Digitized by eGangotri and Sarayu Trust.

मनुस्मृतिः

MANUSMṚTI

(Text with Sanskrit Commentary and English Translation)



Edited by
Dr. N.C. Panda

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CAT (04-03-25)
209975

मनुस्मृतिः

Manu Smṛti

(Text with Sanskrit Commentary and English Translation)

RRLF. 2e, 577.



Sv/23

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मनुस्मृतिः

Manu Smṛti

(Text with Sanskrit Commentary and English Translation)



Vol-II

Edited by

Dr. Narasingha Panda
Panjab University,
Sadhu Ashram, Hoshiarpur,
Punjab, (India)

BKP
Bhartiya Kala Prakashan
Delhi - India

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

No part of this book shall be reproduced, reprinted or translated for any purpose whatsoever without prior permission of the publishers in writing.

89.2
P11M



First Edition: 2014

© Bharatiya Kala Prakashan

ISBN : 978-81-8090-348-9 (Set) (H.B.)
ISBN : 978-81-8090-349-6 (Set) (P.B.)

Published by : **BHARATIYA KALA PRAKASHAN**
3421-A, IInd Floor, Narang Colony, Tri Nagar,
Delhi-110035. Ph. : (O) 27393083, 32967505
E-mail : info@bkpbooks.com
Web : www.bkpbooks.com
buy on line @ : www.booksnyou.com

Laser Typesetting by: A.R. Printers, Delhi
Printed by: G.S. Offset, Delhi

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

39/161 2nd PR

Contents

Vol-II

सप्तोऽध्यायः	421
अष्टमोऽध्यायः	494
नवमोऽध्यायः	628
दशमोऽध्यायः	737
एकदशोऽध्यायः	782
द्वादशोऽध्यायः	872

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सप्तमोऽध्यायः

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः।
संभवश्च यथा तस्य सिद्धिश्च परमा यथा॥१॥

I will declare the duties of kings, (and) show how a king should conduct himself, how he was created, and how (he can obtain) highest success.

धर्मशब्दोऽत्र दृष्टादृष्टार्थानुष्ठेयपरः, षाङ्गुण्योदरपि वक्ष्यमाणत्वात्। राजशब्दोऽपि नात्र क्षत्रियजातिवचनः किंत्वभिषिक्तजनपदपुरपालयितृ-पुरुषवचनः। अतएवाह "यथावृत्तो भवेङ्गृपः" इति। यथावदाचारो नृपतिर्भवेत्तथा तस्यानुष्ठेयानि कथयिष्यामि। यथा येन प्रकारेण वा "राजानमसृजत्प्रभुः" (अ०७ श्लो०३) इत्यादिना तस्योत्पत्तिः यथा च दृष्टादृष्टफलसंपत्तिः तदपि वक्ष्यामि॥१॥

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्॥२॥

A Kṣatriya, who has received according to the rule the sacrament prescribed by the Veda, must duly protect this whole (world).

ब्रह्म वेदस्तत्प्राप्त्यर्थतयोपनयसंस्कारस्तं यथाशास्त्रं प्राप्नुवता क्षत्रियेणास्य सर्वस्य स्वविषयावस्थितस्य शास्त्रानुसारेण नियमतो रक्षणं कर्तव्यम्। एतेन क्षत्रिय एव नान्यो राज्याधिकारीति दर्शितम्। अतएव शास्त्रार्थतत्त्वं क्षत्रियस्य जीवनार्थं, तथा क्षत्रियस्य तु रक्षणं स्वकर्मसु श्रेष्ठं च वक्ष्यति, ब्राह्मणस्य ह्यापदि "जीवेत्क्षत्रियधर्मेण" इत्याभिधास्यति। वैश्यस्यापि क्षत्रियधर्मं, शूद्रस्य च क्षत्रियवैश्यकर्मणी जीवनार्थमापदि जगाद नारदः-"न कथञ्चन कुर्वीत ब्राह्मणः कर्म वार्षलम्। वृषलः कर्म च ब्राह्मं पतनीये हि ते तयोः॥ उत्कृष्टं चापकृष्टं च तयोः कर्म न विद्यते। मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते॥ रक्षणं वेदधर्मार्थं तपः क्षत्रस्य रक्षणम्" इति। "सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः"

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(अ०८ श्लो०३०४) इति च वक्ष्यमाणत्वाद्रक्षितुर्बलिषड्भागग्रहणादृष्टार्थमपि "योरक्षन्बलिमादत्ते" (अ०८ श्लो० ३०७) इति नरकपातं वक्ष्यति ॥२॥

अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥३॥

For, when these creatures, being without a king, through fear dispersed in all directions, the Lord created a king for the protection of this whole (creation).

यस्मादराजके जगति बलवद्भयात्सर्वतः प्रचलिते सर्वस्यास्य चराचरस्य रक्षाय राजानं सृष्टवांस्तस्मात्तेन रक्षणं कार्यम् ॥३॥

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥४॥

Taking (for that purpose) eternal particles of Indra, of the Wind, of Yama, of the Sun, of Fire, of Varuṇa, of the Moon, and of the Lord of wealth (Kubera).

इन्द्रवातयमसूर्याग्निवरुणचन्द्रकुबेराणां मात्रा अंशान्सारभूतानकृष्य राजानमसृजत् ॥४॥

कथं सृष्टवानित्याह–

यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥५॥

Because a king has been formed of particles of those lords of the gods he therefore surpasses all created beings in lustre.

यस्मादिन्द्रादीनां देवश्रेष्ठानामंशेभ्यो नृपतिः सृष्टस्तस्मादेव सर्वप्राणिनो वीर्येणातिशेते ॥५॥

तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥६॥

And, like the sun, he burns eyes and hearts; nor can anybody on earth even gaze on him.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अयं च राजा स्वतेजसा सूर्य इव पश्यतां चक्षूंषि मनांसि च संतापयति, न चैनं राजानं पृथिव्यां कश्चिदप्याभिमुख्येन द्रष्टुं क्षमते ॥६॥

सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट्।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥७॥

Through his (supernatural) power he is Fire and Wind, he Sun and Moon, he the Lord of justice (Yama), he Kubera, he Varuṇa, he great Indra.

एवं चाग्न्यादीनां पूर्वोक्तांशभवत्वात्तत्कर्मकारित्वाच्च प्रताप उक्तस्तेजस्वीत्यादिना नवमाध्याये वक्ष्यमाणत्वात् स राजा शक्त्यतिशयेनाग्न्यादिरूपो भवति ॥७॥

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति ॥८॥

Even an infant king must not be despised, (from an idea) that he is a (mere) mortal; for he is a great deity in human form.

ततश्च मनुष्य इति बुद्ध्या बालोऽपि राजा नावमन्तव्यः। यस्मान्महतीयं काचिद्देवता मानुषरूपेणावतिष्ठते। एतेन देवतावज्ञायामधर्मादयोऽदृष्टदोषा उक्ताः ॥८॥

संप्रति दृष्टदोषमाह-

एकमेव दहत्यग्निरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥९॥

Fire burns one man only, if he carelessly approaches it, the fire of a king's (anger) consumes the (whole) family, together with its cattle and its hoard of property.

योऽग्नेरतिसमीपमनवहितः सन्नुपसर्पति तं दुरुपसर्पिणमेकमेवाग्निर्दहति न तत्पुत्रादिकम्। क्रुद्धो राजाग्निः पुत्रदारभावादिरूपं कुलमेव गवाश्वादिपशुसुवर्णादिधन संचयसहितं सापराधं निहन्ति ॥९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(अ०८ श्लो०३०४) इति च वक्ष्यमाणत्वाद्रक्षितुर्बलिषड्भागग्रहणादृष्टार्थमपि "योरक्षन्बलिमादत्ते" (अ०८ श्लो० ३०७) इति नरकपातं वक्ष्यति ॥२॥

अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥३॥

For, when these creatures, being without a king, through fear dispersed in all directions, the Lord created a king for the protection of this whole (creation).

यस्मादराजके जगति बलवद्भयात्सर्वतः प्रचलिते सर्वस्यास्य चराचरस्य रक्षाय राजानं सृष्टवांस्तस्मात्तेन रक्षणं कार्यम् ॥३॥

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥४॥

Taking (for that purpose) eternal particles of Indra, of the Wind, of Yama, of the Sun, of Fire, of Varuṇa, of the Moon, and of the Lord of wealth (Kubera).

इन्द्रवातयमसूर्याग्निवरुणचन्द्रकुबेराणां मात्रा अंशान्सारभूतानकृष्य राजानमसृजत् ॥४॥

कथं सृष्टवानित्याह-

यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥५॥

Because a king has been formed of particles of those lords of the gods he therefore surpasses all created beings in lustre.

यस्मादिन्द्रादीनां देवश्रेष्ठानामंशेभ्यो नृपतिः सृष्टस्तस्मादेव सर्वप्राणिनो वीर्येणातिशेते ॥५॥

तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥६॥

And, like the sun, he burns eyes and hearts; nor can anybody on earth even gaze on him.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अयं च राजा स्वतेजसा सूर्य इव पश्यतां चक्षूंषि मनांसि च संतापयति, न चैनं राजानं पृथिव्यां कश्चिदप्याभिमुख्येन द्रष्टुं क्षमते ॥६॥

सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट्।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥७॥

Through his (supernatural) power he is Fire and Wind, he Sun and Moon, he the Lord of justice (Yama), he Kubera, he Varuṇa, he great Indra.

एवं चाग्न्यादीनां पूर्वोक्तांशभवत्वात्तत्कर्मकारित्वाच्च प्रताप उक्तस्ते-जस्वीत्यादिना नवमाध्याये वक्ष्यमाणत्वात् स राजा शक्त्यतिशयेनाग्न्यादिरूपो भवति ॥७॥

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति ॥८॥

Even an infant king must not be despised, (from an idea) that he is a (mere) mortal; for he is a great deity in human form.

ततश्च मनुष्य इति बुद्ध्या बालोऽपि राजा नावमन्तव्यः। यस्मान्महतीयं काचिद्देवता मानुषरूपेणावतिष्ठते। एतेन देवतावज्ञायामधर्मादयोऽदृष्टदोषा उक्ताः ॥८॥

संप्रति दृष्टदोषमाह-

एकमेव दहत्यग्निरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥९॥

Fire burns one man only, if he carelessly approaches it, the fire of a king's (anger) consumes the (whole) family, together with its cattle and its hoard of property.

योऽग्नेरतिसमीपमनवहितः सन्नुपसर्पति तं दुरुपसर्पिणमेकमेवाग्निर्दहति न तत्पुत्रादिकम्। क्रुद्धो राजाग्निः पुत्रदारभावादिरूपं कुलमेव गवाश्वादिपशुसुवर्णादिधन संचयसहितं सापराधं निहन्ति ॥९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कार्यं सोऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः।
कुरुते धर्मसिद्धयर्थं विश्वरूपं पुनः पुनः॥१०॥

Having fully considered the purpose, (his) power, and the place and the time, he assumes by turns many (different) shapes for the complete attainment of justice.

स राजा प्रयोजनापेक्षया स्वशक्तिं देशकालौ चावेक्ष्य कार्यसिध्यर्थं तत्त्वतो विश्वरूपं बहूनि रूपाणि करोति। जातिविवक्षया बहुष्वेकवचनम्। अशक्तिदशायां क्षमते शक्तिं प्राप्योन्मूलयति, एवमेकस्मिन्नपि देशे काले च प्रयोजनानुरोधेन शत्रुर्वा मित्रं वा उदासीनो वा भवति अतो राजवल्लभोऽहमिति बुद्धया नावज्ञेयः॥१०॥

यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः॥११॥

He, in whose favour resides Padmā, the goddess of fortune, in whose valour dwells victory, in whose anger abides death, is formed of the lustre of all (gods).

पद्माशब्दः श्रीपर्यायोऽपि महत्त्वविवक्षयाऽत्र प्रयुक्तः। यस्य प्रसादान्महती श्रीर्भवत्यतः श्रीकामेन सेव्यः। यस्य शत्रवः सन्ति तानपि संतोषितो हन्ति। तेन च शत्रुवधकामेनाप्याराधनीयः। यस्मै क्रुध्यति तस्य मृत्युं करोति, तस्माज्जीवनार्थिना न क्रोधनीयः। यस्मात्सर्वेषां सूर्याग्निसोमादीनां तेजो बिभर्ति॥११॥

तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयम्।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः॥१२॥

The (man), who in his exceeding folly hates him, will doubtlessly perish : for the king quickly makes up his mind to destroy such (a man).

तं राजानमज्ञतया यो द्वेष्टि तस्याप्रीतिमुत्पादयति स निश्चितं राजक्रोधान्नश्यति। यस्मात्तस्य विनाशाय शीघ्रं राजा मनो नियुङ्क्ते॥१२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत्॥१३॥

Let no (man), therefore, transgress that law which the king decrees with respect to his favourites, nor (his orders) which inflict pain on those in disfavour.

यतः सर्वतेजोमयो नृपतिस्तस्मादपेक्षितेषु यमिष्टं शास्त्रानुष्ठेयं शास्त्रविरुद्धं निश्चित्य व्यवस्थापयत्यनपेक्षितेषु चानिष्टं तं नियमं नातिक्रामेत्॥१३॥

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः॥१४॥

For the (king's) sake the Lord formerly created his own son, Punishment, the protector of all creatures, (an incarnation of) the law, formed of Brāhmaṇ's glory.

तस्य राज्ञः प्रयोजनसिद्धये सर्वप्राणिनां रक्षितारं धर्मस्वरूपं पुत्रं ब्रह्मणो यत्केवलं तेजस्तेन निर्मितं न पाञ्चभौतिकं दण्डं ब्रह्मा पूर्वं सृष्टवान्॥१४॥

तस्य सर्वाणि भूतानि स्थावराणि चराणि च।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च॥१५॥

Through fear of him all created beings, both the immovable and the movable, allow themselves to be enjoyed and swerve not from their duties.

तस्य दण्डस्य भयेन चराचराः सर्वे प्राणिनो भोगं कर्तुं समर्था भवन्ति, अन्यथा बलवता दुर्बलस्य धनदारादिग्रहणे तस्यापि तदपेक्ष्य बलिनेति कस्यापि भोगो न सिध्येत्, वृक्षादीनां स्थावरादीनां छेदने भोगासिद्धिः, तथा सतामपि नित्यनैमित्तिकस्वधर्मानुष्ठानमकरणे याम्ययातनाभयादेव॥१५॥

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु॥१६॥

Having fully considered the time and the place (of the offence), the srength and the knowledge (of the offender), let him justly inflict that (punishment) on men who act unjustly.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तं दण्डं देशकालौ दण्डयस्य च शक्तिं विद्यादिकं यस्मिन्नपराधे यो दण्डोऽर्हतीत्यादिकं शास्त्रानुसारेण तत्त्वतो निरूप्यापराधिषु प्रवर्तयेत् ॥१६॥

स राजा पुरुषो दण्डः स नेता शासिता च सः।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ॥१७॥

Punishment is (in reality) the king (and) the male, that the manager of affairs, that the ruler, and that is called the surety for the four orders' obedience to thelaw.

स एव दण्डो वस्तुतो राजा तस्मिन् सति राजशक्तियोगात्। स एव पुरुषस्ततोऽन्ये स्त्रिय इव तद्विधेयत्वात्, स एव नेता तेन कार्याणि नीयन्ते प्राप्यन्ते, स एव शासिता शासनमाज्ञा तद्दातृत्वात्, स एव चतुर्णामप्याश्रमाणां यो धर्मस्तस्य संपादने प्रतिभूरिव प्रतिभूर्मुनिभिः स्मृतः ॥१७॥

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥१८॥

Punishment alone governs all created beings, punishment alone protects them, punishment watches over them while they sleep; the wise declare punishment (to be identical with the law.

यस्माद्दण्डः सर्वाः प्रजा आज्ञां करोति तस्मात्साधूक्तं शासितेति ज्ञेयम्। यस्मात्स एव प्रजा रक्षति ततो युक्तमुक्तं राजेति। निद्राणेष्वपि रक्षितृषु दण्ड एव जागर्ति तद्भयेनैव चौरादीनामप्रवृत्तेः। दण्डमेव धर्महेतुत्वाद्धर्मं जानन्ति। कारणे कार्योपचारः ऐहिकपारत्रिकदण्डभयादेव धर्मानुष्ठानात् ॥१८॥

समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥१९॥

If (punishment) is properly inflicted after (due) consideration, it makes all people happy; but inflicted without consideration, it destroyes everything.

स दण्डः शास्त्रतः सम्यङ्निरूप्यापराधानुरूपेण देहधनादिषु धृतः सर्वाः प्रजाः सानुरागाः करोति। अविचार्यं तु लोभादिना प्रयुक्तः सर्वाणि बाह्यार्थपुत्रादीनि नाशयति। सर्वत इति द्वितीयार्थे तसिः ॥१९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यदि न प्रणयेद्राजा दण्डं दण्डयेष्वतन्द्रितः।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः॥२०॥

If the king did not, without tiring, inflict punishment on those worthy to be punished, the stronger would roast the weaker, like fish on a spit.

यदि राजानलसो भूत्वा दण्डप्रणयनं न कुर्यात्तदा शूले कृत्वा मत्स्यानिव बलवन्तो दुर्बलानपक्ष्यन्। लृङन्तस्य पचिधातो रूपमिदम्। बलिनोऽल्पबलानां हिंसामकरिष्यन्नित्यर्थः। "शूले मत्स्यानिवापक्ष्यन्" इत्येष मेधातिथिगोविन्दराज-लिखितः पाठः। "जले मत्स्यानिवार्हिंस्युः" इति च पाठान्तरम्। अत्र बलवन्तो दुर्बलान्हिंस्युरिति मत्स्यन्याय एव स्यादित्युक्तम्॥२०॥

अद्यात्काकः पुरोडाशं श्वा च लिह्याद्धविस्तथा।
स्वाम्यं च न स्यात्कस्मिंचित्प्रवर्त्तेताधरोत्तरम्॥२१॥

The crow would eat the sacrificial cake and the dog would lick the sacrificial viands, and ownership would not remain with anyone, the lower ones would (unsurp the place of) the higher ones.

यदि राजा दण्डं नाचरिष्यत्तदा यज्ञेषु सर्वथा हविरनर्हः काकः पुरोडाशमखादिष्यत्। तथा कुक्कुरः पायसादि हविरलेक्ष्यत्। न कस्यचित्कुत्र-चित्स्वाम्यमभविष्यत्। ततो बलिना तद्ग्रहणाद्ब्रह्मणादिवर्णानां च मध्ये यदधरं शूद्रादि तदेवोत्तरं प्रधानं प्रावर्तिष्यत॥२१॥

सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते॥२२॥

The whole world is kept in order by punishment, for a guiltless man is hard to find; through fear of punishment the whole world yields the enjoyments (which it owes).

सर्वोऽयं लोको दण्डेनैव नियमितः सन्मार्गेऽवतिष्ठते। स्वभावविशुद्धो हि मानुषः कष्टेन लभ्यते। तथा सर्वमिदं जगद्दण्डस्यैव भयादावश्यकभोजनादि-रूपेऽपि भोगे समर्थं भवति॥२२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उक्तमपि दण्डस्य भोगसंपादकत्वं दाढ्यार्थं पुनरुच्यते-

देवदानवगन्धर्वा रक्षांसि पतगोरगाः।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः॥२३॥

The gods, the Dānavas, the Gandharvas, the Rākṣasas, the bird and snake deities even give the enjoyments (due from them) only, if they are tormented by the (fear of) punishment.

इन्द्राग्निसूर्यवाय्वादयो देवास्तथा दानगन्धर्वराक्षसपक्षिसर्पा अपि जगदीश्वरपरमार्थभयपीडिता एव वर्षदानाद्युपकाराय प्रवर्तन्ते। तथाच श्रुतिः-"भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः" इति ॥२३॥

दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः।
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात्॥२४॥

All castes (varṇa) would be corrupted (by intermixture), all barriers would be broken through, and all men would rage (against each other) in consequence of mistakes with respect to punishment.

दण्डस्यानाचरणादनुचितेन वा प्रवर्तनात्सर्वे ब्राह्मणादिवर्णा इतरेतरस्त्रीगमनेन संकीर्येरन्, सर्वशास्त्रीयनियमाश्चतुर्वर्गफला उत्सीदेयुः, चौर्यसाहसादिना च परस्यापकारात्सर्वलोकसंक्षोभश्च जायेत॥२४॥

यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति॥२५॥

But where Punishment with a black hue and red eyes stalks about, destroying sinners, there the subjects are not disturbed, provided that he who inflicts it discerns well.

यत्र देशे शास्त्रप्रमाणावगतः श्यामवर्णः लोहितनयनोऽधिष्ठातृदेवताको दण्डो विचरति तत्र प्रजा व्याकुला न भवन्ति। दण्डप्रणेता यदि विषयानुरूपं सम्यग्दण्डं जानाति॥२५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तस्याहुः संप्रणेतारं राजानं सत्यवादिनम्।
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम्॥ २६॥

They declare that king to be a just inflicter of punishment, who is truthful, who acts after due consideration, who is wise, and who knows (the respective value of) virtue, pleasure, and wealth.

तस्य दण्डस्य प्रवर्तयितारमभिषेकादिगुणयुक्तं नृपतिमवितथवादिनं समीक्ष्यकारिणं तत्त्वातत्त्वविचारोचितं प्रज्ञाशालिनं धर्मार्थकामानां ज्ञातारं मन्वादयोऽप्याहुः॥२६॥

तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्धते।
कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते॥ २७॥

A king who properly inflicts (punishment), prospers with respect to (those) three (means of happiness); but he who is voluptuous, partial, and decetiful will be destroyed, even through the (unjust) punishment (which he inflicts).

तं दण्डं राजा सम्यक्प्रवर्तयन्धर्मार्थकामैर्वृद्धिं गच्छति। यः पुनर्विषयाभिलाषी विषमः कोपनःक्षुद्रश्छलान्वेषी नृपः स प्रकृतेनैव दण्डेनामात्यादिना कोपादधर्माद्वा विनश्यते॥२७॥

दण्डो हि सुमहत्तेजो दुर्धरश्चा कृतात्मभिः।
धर्माद्विचलितं हन्ति नृपमेव सबान्धवम्॥ २८॥

Punishment (possesses) a very bright lustre. and is hard to be adminsitered by men with unimproved minds: it strikes down the king who swerves from his duty, together with his relatives.

यतो दण्डः प्रकृष्टतेजःस्वरूपः स्वशास्त्रैरसंस्कृतात्मभिः दुःखेन ध्रियतेऽतो राजधर्मरहितं नृपमेव पुत्रबन्धुसहितं नाशयति॥२८॥

तो दुर्गं च राष्ट्रं च लोकं च सचराचरम्।
अन्तरिक्षगतांश्चैवमुनीन् देवांश्च पीडयेत्॥ २९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Next it will afflict his castles, his territories, the whole world together with the movable and immovable (creation), likewise the sages and the gods, who (on the failure of offerings) ascend to the sky.

दोषाद्यनपेक्षया यो दण्डः क्रियते स बन्धुनृपनाशानन्तरं धन्यादिदुर्गराष्ट्रं देशं पृथिवीलोकं जन्मस्थावरसहितं "हविःप्रदानजीवना देवाः" इति श्रुत्या हविः प्रदानाभावोऽन्तरिक्षगतानृषीन्देवांश्च पीडयेदिति ॥२९॥

सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च॥३०॥

(Punishment) cannot be inflicted justly by one who has no assiotant, (nor) by a fool, (nor) by a covetous man, (nor) by one whose mind is unimproved, (nor) by one addicted to sensual pleasures.

स दण्डो मन्त्रिसेनापतिपुरोहितादिसहायरहितने मूर्खेण लोभवता शास्त्रासंस्कृतबुद्धिपरेण नृपतिना शास्त्रतो न प्रणेतुं शक्यते ॥३०॥

शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता॥३१॥

By him who is pure (and) faithful to his promise, who acts according to the Institutes (of the sacred law), who has good assitants and is wise, punishment can be (justly) inflicted.

अर्थादिशौचयुक्तेन सत्यप्रतिज्ञेन यथाशास्त्रव्यवहारिणा शोभनसहायेन तत्त्वज्ञेन कर्तुं शक्यत इति पूर्वोक्तदोषप्रतिपक्षे गुणा अनेन श्लोकेनोक्तः॥३१॥

स्वराष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः॥३२॥

Let him act with justice in his own domain, with rigour chastise his enemies, behave without duplicity towards his friends, and be lenient towards Brāhmaṇas.

आत्मदेशे यथाशास्त्रव्यवहारी स्यात्। शत्रुविषयेषु तीक्ष्णदण्डो भवेत्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निसर्गस्नेहविषयेषु मित्रेष्वकुटिलः स्यान्न कार्यमित्रेषु। ब्राह्मणेषु च कृताल्पापराधेषु च क्षमावान्भवेत् ॥३२॥

एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः।
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥३३॥

The fame of a king who behaves thus, even though he subsist by gleaning, is spread in the world, like a drop of oil on water.

शिलोञ्छेनेति क्षीणकोशत्वं विवक्षितम्। क्षीणकोशस्यापि नृपतेरुक्ताचारवती जले तैलबिन्दुरिव कीर्तिर्लोके विस्तारमेति ॥३३॥

अतस्तु विपरीतस्य नृपतेरजितात्मनः।
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ॥३४॥

But the fame of a king who acts in a contary manner and who does not subdue himself, diminishes in extent among men like a drop of clarified butter in water.

उक्ताचाराद्विपरीताचारवतो नृपतेरजितेन्द्रियस्य जले घृतबिन्दुरिव कीर्तिः लोके संकोचयति ॥३४॥

स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः।
वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ॥३५॥

The king has been created (to be) the protector of the castes (varṇa) and orders, who, all according to their rank, discharge their several duties.

क्रमेण स्वधर्मानुष्ठातॄणां ब्राह्मणादिवर्णानां ब्रह्मचार्याद्याश्रमाणां च विश्वसृजा राजा रक्षिता सृष्टः। तस्मात्तेषां रक्षणमकुर्वतो राज्ञः प्रत्यवायः स्वधर्मविरहिणां त्वरक्षणेऽपि न प्रत्यवाय इत्यस्य तात्पर्यार्थः ॥३५॥

तेन यद्यत्सभृत्येन कर्त्तव्यं रक्षता प्रजाः।
तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः ॥३६॥

Whatever must be done by him and by his servants for the protection of his people, that I will fully declare to you in due order.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वक्ष्यमाणावतारार्थोऽयं श्लोकः। तेन राज्ञा प्रजारक्षणं कुर्वता सामात्येन यद्यत्कर्तव्यं तत्तत्समग्रं युष्माकमभिधास्यामि॥३६॥

ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः।
त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने॥३७॥

Let the king, after rising early in the morning, worship Brāhmaṇas who are well versed in the threefold sacred science and learned (in polity), and follow their advice.

प्रत्यहं प्रातरुत्थाय ब्राह्मणनृग्यजुःसामाख्यविद्यात्रयग्रन्थार्थाभिज्ञान्विदुष इति नीतिशास्त्राभिज्ञान्सेवेत तदाज्ञां कुर्यात्॥३७॥

वृद्धांश्च नित्य सेवेत विप्रान्वेदविदः शुचीन्।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते॥३८॥

Let him daily worship aged Brāhmaṇas who know the Veda and are pure; for he who always worships aged men, in honoured even by Rākṣasas.

तांश्च ब्राह्मणान्वयस्तपस्यादिवृद्धानर्थतो ग्रन्थतश्च वेदज्ञान्बहिरन्तश्चार्थदानादिना शुचीन्नित्यं सेवेत। यस्माद्वृद्धसेवी सततं हिंकृैराक्षसैरपि तैरपि तस्य हितं क्रियते। सुतरां मनुष्यैः॥३८॥

तेभ्योऽधिगच्छेद्विनयं विनीतात्माऽपि नित्यशः।
विनीताऽत्मा हि नृपतिर्न विनश्यति कर्हिचित्॥३९॥

Let him, though he may already be modesty, constantly learn modesty from them; for a king who is modest never perishes.

सहजप्रज्ञया अर्थशास्त्रादिज्ञानेन च विनीतोऽप्यतिशयार्थं तेभ्यो विनयमभ्यसेत्। यस्माद्विनीतात्मा राजा न कदाचिन्नश्यति॥३९॥

बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः।
वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे॥४०॥

Through a want of modesty many kings have perished,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

together witrh their belongings; through modesty even hermits in the forest have gained kingdoms.

करितुरगकोशादिपरिच्छदयुक्ता अपि राजानो विनयरहिता नष्टाः। बहवश्च वनस्था निष्परिच्छदा अपि विनयेन राज्यं प्राप्नुवन्॥४०॥

उभयत्रैव श्लोकद्वयेन दृष्टान्तमाह—

वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः।
सुदाः पैजवनश्चैव सुमुखो निमिरेव च॥४१॥

Through a want of humility Vena perished, likewise king Nahuṣa, Sudās, the son of Pijavana, Sumukha, and Nemi.

वेनो नहुषश्च राजा पिजवनस्य च पुत्रः सुदानामा सुमुखो निमिश्चाविनयादनश्यन्॥४१॥

पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च।
कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः॥४२॥

But by humility Pṛthu and Manu gained soverignty, Kubera the position of the Lord of wealth, and the son of Gādhi the rank of a Brāhmaṇa.

पृथुर्मनुश्च विनयाद्राज्यं प्रापतुः। कुबेरश्च विनयाद्धनाधिपत्यं लेभे। गाधिपुत्रो विश्वामित्रश्च क्षत्रियः संस्तेनैव देहेन ब्राह्मण्यं प्राप्तवान्। राज्यलाभावसरे ब्राह्मण्यप्राप्तिरप्रस्तुताऽपि विनयोत्कर्षार्थमुक्ता। ईदृशोऽयं शास्त्रानुष्ठाननिषिद्ध-वर्जनरूपो विनयः यदनेन क्षत्रियोऽपि दुर्लभं ब्राह्मण्यं लेभे॥४२॥

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः॥४३॥

From those versed in the three Vedas let him learn the threefold (sacred science), the primeval science of government, the science of dialectics, and the knowledge of the (supreme) Soul; from the people (the theory of) the (various) trades and profession.

त्रिवेदीरूपविद्याविद्श्यस्त्रिवेदीमर्थतो ग्रन्थतश्चाभ्यसेत्। ब्रह्मचर्यदशायामेव वेदग्रहणात्समावृत्तस्य च राज्याधिकारात् अभ्यासार्थोऽयमुपदेशः। दण्डनीतिं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चार्थशास्त्ररूपामर्थयोगक्षेमोपदेशिनीं पारम्पर्यागतत्वेन नित्यां तद्विद्वष्टोऽधिगच्छेत्। तथा आन्वीक्षिकीं तर्कविद्यां भूतप्रवृत्तिप्रयुक्तपयोगिनीं ब्रह्मविद्यां चाभ्युदयव्यसनयोर्हर्षविषादप्रशमनहेतुं शिक्षेत। कृषिवाणिज्यपशुपालनादिवार्तां तदारम्भान्धनोपायार्थांस्तदभिज्ञकर्षकादिभ्यः शिक्षेत ॥४३॥

इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥४४॥

Day and night he must strenuously exert himself to conquer his senses; for he (alone) who has conquered his own senses, can keep his subjects in obedience.

चक्षुरादीनामिन्द्रियाणां विषयासक्तिवारणे सर्वकालं यत्नं कुर्यात्। यस्माज्जितेन्द्रियः प्रजा नियन्तुं शक्नोति न तु विषयोपभोगव्यग्रः। ब्रह्मचारिधर्मेषु सर्वपुरुषार्थोपादेयतयाऽभिहितोऽपीन्द्रियजयो राजधर्मेषु मुख्यत्वज्ञानार्थमनन्तरवक्ष्यमाणव्यसननिवृत्तिहेतुत्वाच्च पुनरुक्तः ॥४४॥

दश कामसमुत्थानि तथाष्टौ क्रोधजानि च।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ॥४५॥

Let him carefully shun the ten vices, springing from love of pleasure, and the eight, proceeding from wrath, which (all) end in misery.

दश कामसंभवानि अष्टौ क्रोधजानि वक्ष्यमाणव्यसनानि यत्नतस्त्यजेत्। दुरन्तानि दुःखावसानान्यादौ सुखयन्ति अन्ते दुःखानि कुर्वन्ति। यद्वा दुर्लभोऽन्तो येषां तानि दुरन्तानि। नहि व्यसनिनस्ततो निवर्तयितुं शक्यन्ते ॥४५॥

वर्जनप्रयोजनमाह-

कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः।
वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥४६॥

For a king who is attached to the vices springing from love of pleasure, loses his wealth and his virtue, but (he who is given) to those arising from anger, (loses) even his life.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्मात्कामजनितेषु व्यसनेषु प्रसक्तो राजा धर्मार्थाभ्यां हीयते। क्रोधजेषु प्रसक्तः प्रकृतिकोपाद्देहनाशं प्राप्नोति ॥४६॥

तानि व्यसनानि नामतो दर्शयति–

मृगयाक्षो दिवा स्वप्नः परिवादः स्त्रियो मदः।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥४७॥

Hunting, gambling, sleeping by day, censoriousness, (excess with) women, drunkenness, (an inordinate love for) dancing, singing, and music, and useless travel are the tenfold set (of vices) springing from love of pleasure.

आखेटकाख्यो मृगवधो मृगया, अक्षो द्यूतक्रीडा, सकलकार्यविघातिनी दिवानिद्रा, परदोषकथनं, स्त्रीसंभोगः, मद्यपानजनितो मदः, तौर्यत्रिकं नृत्यगीतवादित्राणि, वृथाभ्रमणं एष दशपरिमाणो दशकः सुखेच्छाप्रभवो गणः॥४७॥

पैशुन्यं साहसं द्रोहं ईर्ष्याऽसूयार्थदूषणम्।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥४८॥

Tale-bearing, violence, treacher,y envy, slandering, (unjust) seizure of property, reviling, and assault are the eightfold set (of vices) produced by wrath.

पैशुन्यमविज्ञातदोषाविष्करणं, साहसं साधोर्बन्धनादिनिग्रहः, द्रोहश्छअवधः, ईर्ष्याऽन्यगुणासहिष्णुता, परगुणेषु दोषाविष्करणमसूया, अर्थदूषणमर्थानामपहरणं देयानामदानं च, वाक्पारुष्यमाक्रोशादि, दण्डपारुष्यं ताडनादि, एषोऽष्टपरिमाणो व्यसनगणः क्रोधाद्भवति ॥४८॥

द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥४९॥

That greediness which all wise men declare to be the root even of both these (sets), let him carefully conquer; both set (of vices) are produced by tht.

एतयोर्द्वयोरपि कामक्रोधजव्यसनसङ्घयोः कारणं स्मृतिकारा जानन्ति तं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यत्नतो लोभं त्यजेत्। यस्मादेतद्गणद्वयं लोभाज्जायते। क्वचिद्धनलोभतः क्वचित्प्रकारन्तरलोभेन प्रवृत्तेः ॥४९॥

पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्।
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥५०॥

Drinking, dice, women, and hunting, these four (which have been enumerated) in succession, he must know to be the most pernicious in the set that springs from love of pleasure.

मद्यपानं, अक्षैः क्रीडा, स्त्रीसंभोगो, मृगया चेति क्रमपठितमेतच्चतुष्कं कामजव्यसनमध्ये बहुदोषत्वादतिशयेन दुःखहेतुं जानीयात् ॥५०॥

दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे।
क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ॥५१॥

Doing bodily injury, reviling, and the seizure of proprty, these three he must know to be the most pernicious in the set produced by wrath.

दण्डपातनं, वाक्पारुष्यं, अर्थदूषणं चेति क्रोधजेऽपि व्यसनगणे दोषबहुलत्वादतिशयितदुःखसाधनं मन्येत ॥५१॥

सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः।
पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥५२॥

A self-controlled (king) should know that in this set of seven, which prevails everywhere, each earlier-named vice is more abominable (than those named later).

अस्य पानादेः कामक्रोधसम्भवस्य सप्तपरिमाणस्य व्यसनवर्गस्य सर्वस्मिन्नेव राजमण्डले प्रायेणावस्थितस्य पूर्वपूर्वव्यसनमुत्तरात्कष्टतरं प्रशस्तात्मा राजा जानीयात्। तथाहि द्यूतात्मानं कष्टतरं, मद्यपानेन मत्तस्य संज्ञाप्रणाशाद्यथेष्टचेष्टया देहधनादिविरोध इत्यादयो दोषाः। द्यूते तु पाक्षिकीधनावाप्तिरप्यस्ति। स्त्रीव्यसनाद्द्यूतं दुष्टम्। द्यूते हि वैरोद्भवादयो नीतिशास्त्रोक्ता दोषाः। मूत्रपुरीषवेगधारणाच्च व्याध्युत्पत्तिः। स्त्रीव्यसने पुनरपत्योत्पत्त्यादिगुण-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

योगोऽप्यस्ति। मृगयास्त्रीव्यसनयोः स्त्रीव्यसनं दुष्टम्। तत्रादर्शनकार्याणां कालातिपातेन धर्मलोपादयो दोषाः, मृगयायां तु व्यायामेनारोग्यादि गुणयोगोऽप्यस्तीत्येवं कामजचतुष्कस्य पूर्वं पूर्वं गुरुदोषं, क्रोधजेष्वपि त्रिषु वाक्पारुष्याद्दण्डपारुष्यं दुष्टम्। अन्नच्छेदादेरशक्यसमाधानत्वात्। वाक्पारुष्ये तु कोपानलो दानमानपानीयसेकैः शक्यः शमयितुम्। अर्थदूषणाद्वाक्पारुष्यं दोषवन्मर्मपीडाकरं, वाक्प्रहारस्य दुश्चिकित्स्यत्वात्। तदुक्तं न संरोहयति वाक्कृतम्। अर्थदूषणं तु प्रचुरतरार्थदानाच्छक्यसमाधानं, एवं क्रोधजनितस्यापि पूर्वपूर्वं दुष्टतरं यत्नतस्त्यजेत्॥५२॥

व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते।
व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः॥५३॥

(On a comparison) between vice and death, vice is declared to be more pernicious; a vicious man sinks to the nethermost (hell), he who dies, free from vice, ascends to heaven.

यद्यपि मृत्युव्यसने द्वे अपीह लोके संज्ञाप्रणाशादिदुःखहेतुतया शास्त्रानुष्ठानविरोधितया च तुल्ये, तथापि व्यसनं कष्टतरं परत्रापि नरकपातहेतुत्वात्। तदाह व्यसन्यधोऽधो व्रजतीति। बहून्नरकान्गच्छतीत्यर्थः। अव्यसनी तु मृतः शास्त्रानुष्ठानप्रतिपक्षव्यसनाभावात्स्वर्गं गच्छति। एतेनातिप्रसक्तिर्व्यसनेषु निषिध्यते न तु तस्य सेवनमपि॥५३॥

मौलाच्छास्त्रविदः शूराँल्लब्धलक्षान्कुलोद्भवान्।
सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान्॥५४॥

Let him appoint seven or eight ministers whose ancestors have been royal servants, who are versed in the sciences, heroes skilled in the use of weapons and descended from (noble) families and who have been tried.

मौलान्पितृपितामहक्रमेण सेवकान्, तेषामपि द्रोहादिना व्यभिचारात् दृष्टादृष्टार्थशास्त्रज्ञान्विक्रान्तान्, लब्धलक्षान्लक्षादप्रच्युतशरीरशल्यादीनायुधविद इत्यर्थः। विशुद्धकुलभवान्देवतास्पर्शादिनियतानमात्यान्सप्ताष्टौ वा मन्त्रादौ कुर्वीत॥५४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अपि यत्सुकरं कर्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम्॥५५॥

Even an undertaking easy (in itself) is (sometimes) hard to be accomplished by a single man; how much (harder is it for a king), especially (if he has) no assistant, (to govern) a kingdom which yields great revenues.

सुखेनापि यत्क्रियते कर्म तदप्येकेन दुष्करं भवति। विशेषतो यन्महाफलं तत्कथमसहायेन क्रियते॥५५॥

तैः सार्धं चिन्तयेन्नित्यं सामान्यं संधिविग्रहम्।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥५६॥

Let him daily consider with them the ordinary (business, referring to) peace and war, (the four subjects called) *sthāna*, the revenue, the (manner of) protecting (himself and his kingdom), and the sanctification of his gains (by pious gifts).

सचिवैः सह सामान्यं मन्त्रेष्वगोपनीयं संधिविग्रहादि। तन्निरूपयेत्। तथा तिष्ठत्यनेनेति स्थानं दण्डकोशपुरराष्ट्रात्मकं चतुर्विधं चिन्तयेत्। दण्डयतेऽनेनेति दण्डो हस्त्यश्वरथपदातयस्तेषां पोषणं रक्षणादि तच्चिन्त्यम्। कोशोऽर्थनिचयस्तस्यायव्ययादि, पुरस्य रक्षणादि, राष्ट्रं देशस्तद्वासिमनुष्यपश्वादिधारणक्षमत्वादि चिन्तेयत्। तथा समुदयन्त्युत्पद्यन्तेऽस्मादर्था इति समुदयो धान्यहिरण्याद्युत्पत्तिस्थानं तन्निरूपयेत्। तथा गुप्तिं रक्षामात्मगतां राष्ट्रगतां, च स्वपरीक्षितमन्नाद्यमद्यात् "परीक्षिताः स्त्रियश्चैवं" (अ०७ श्लो०२१९) इत्यादिनात्मरक्षणं "राष्ट्रस्य संग्रहे नित्यम्" (अ०७ श्लो०११३) इत्यादिना राष्ट्ररक्षां च वक्ष्यति। लब्धस्य च धनस्य प्रशमनानि सत्पात्रे प्रतिपादनादीनि चिन्तयेत्। तथाच वक्ष्यति "जित्वा सम्पूजयेद्देवान्" (अ०७ श्लो०२०१) इत्यादि॥५६॥

तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक्।
समस्तानां च कार्येषु विदध्याद्धितमात्मनः॥५७॥

Having (first) ascertained the opinion of each (minis-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ter) separately and (then the views) of all together, let him do what is (most) beneficial for him in his affairs.

तेषां सचिवानां रहसि निष्प्रतिपक्षतया हृदयगतभावज्ञानसंभवात्प्रत्येकमभिप्रायं समस्तानामपि युगपदभिप्रायं बुध्वा कार्ये यदात्मनो हितं तत्कुर्यात् ॥५७॥

सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता।
मन्त्रयेत्परं मन्त्रं राजा षाड्गुण्यसंयुतम् ॥५८॥

But with the most distinguished among them all, a larned Brāhmaṇa, let the king deliberate on the most important affairs which relate to the six measures of royal policy.

एषामेव सर्वेषां सचिवानां मध्यादन्यतमेन धार्मिकत्वादिना विशिष्टेन ब्राह्मणेन सह संधिविग्रहादिवक्ष्यमाणगुणषट्कोपेतं प्रकृष्टं मन्त्रं निरूपयेत् ॥५८॥

नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत्।
तेन सार्धं विनिश्चित्य ततः कर्म समारभेत् ॥५९॥

Let him, full of confidence, always entrust to that (official) all business; having taken his final resolution with him, let him afterwards begin to act.

सर्वदा तस्मिन्ब्राह्मणे संजातविश्वासो भूत्वा यानि कुर्यात्तानि सर्वकार्याणि समर्पयेत्। तेन सह निश्चित्य सर्वं कर्मारभेत् ॥५९॥

अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान्।
सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ॥६०॥

He must also appoint other officials, (men) of integrity, (who are) wise, firm, well able to collect money, and well tried.

अन्यानप्यर्थदानादिना शुचीन्, प्रज्ञाशालिनः, सम्यग्धनार्जनशीलान्धर्मादिना परीक्षितान्कर्मसचिवान्कुर्यात् ॥६०॥

निर्वर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः।
तावतोऽतन्द्रितान् दक्षान् प्रकुर्वीत विचक्षणान् ॥६१॥

As many persons as the due performance of his busi-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ness requires, so many skilful and clever (men), free from sloth, let him appoint.

अस्य राज्ञो यत्संख्याकैर्मनुष्यैः कर्मजातं सम्पद्यते तत्संख्याकान्मनुष्यानालस्यशून्यान्, क्रियासु सोत्साहान्, तत्कर्मज्ञांस्तत्र कुर्यात् ॥६१॥

तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान्।
शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ॥६२॥

Among them let him employ the brave, the skilful the high-born, and the honest in (offices for the collection of) revence, (*e.g.*) in mines, manufactures, and storehouses, (but) the timid in the interior of his palace.

तेषां सचिवानां मध्ये विक्रान्तांश्चतुरान् कुलांकुशनियमितान्, शुचीनर्थनिःस्पृहान् धनोत्पत्तिस्थाने नियुञ्जीत। अस्यैवोदाहरणं आकरकर्मान्त इति। आकरेषु सुवर्णाद्युत्पत्तिस्थानेषु, कर्मान्तेषु च इक्षुधान्यादिसंग्रहस्थानेषु, अन्तर्निवेशेने भोजनशयनगृहान्तःपुरादौ भीरून्नियुञ्जीत। शूरा हि तत्र राजानं प्रायेणैकाकिनं स्त्रीवृतं वा कदाचिच्छत्रूपजापदूषिता हन्युरपि ॥६२॥

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम्।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥६३॥

Let him also appoint an ambassador who is versed in all sciences, who understands hints, expressions of the face and gestures, who is honest, skilful, and of (noble) family.

दूतं च दृष्टादृष्टार्थशास्त्रज्ञं, इन्नितज्ञमभिप्रायसूचकं वचनस्वरादि, आकारो देहधर्मादिमुखप्रसादवैवर्ण्यादिरूपः प्रीत्यप्रीतिसूचकः चेष्टा करास्फालनादिक्रिया कोपादिसूचिका तदीयतत्त्वज्ञं, अर्थदानस्त्रीव्यसनाद्यभावात्मकं शौचयुक्तं चतुरं कुलीनं कुर्यात् ॥६३॥

अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित्।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥६४॥
[सन्धिविग्रहकालज्ञान्समर्थानायतिक्षमान्।
परैरहार्याञ्छुद्धांश्च धर्मतः कामतोऽर्थतः ॥१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समाहर्तुं प्रकुर्वीत सर्वशास्त्रविपश्चितः।
कुलीनान्वृत्तिसंपन्नन्निापुणान्कोशवृद्धये॥२॥
आयव्ययस्य कुशलान्गणितज्ञानलोलुपान्।
नियोजयेद्धर्मनिष्ठान्सम्यक्कार्यार्थचिन्तकान्॥३॥
कर्मणि चातिकुशलान्लिपिज्ञानायतिक्षमान्
सर्वविश्वासिनः सत्यान्सर्वकार्येषु निश्चितवान्॥४॥
अकृताशांस्तथाभर्तुः कालज्ञांश्च प्रसन्निनः।
कार्यकामोपधा शुद्धा बाह्याभ्यन्तरचारिणः॥५॥
कुर्यादासन्नकार्येषु गृहसंरक्षणेषु च।]

(Such) an ambassador is commended to a king (who is) loyal, honest, skilful, possessing a good memory, who knows the (proper) place and time (for action, who is) handsome, fearless, and eloquent.

जनेषु अनुरागवान् तेन प्रतिराजादेरपि अद्वेषविषयः, अर्थस्त्रीशौचयुक्तस्तेन धनस्त्रीदानादिनाऽभेद्यः दक्षश्चतुरस्तेन कार्यकालं नातिक्रामति। स्मृतिमान् तेन संदेशं न विस्मरति, देशकालज्ञः तेन देशकालौ ज्ञात्वा अन्यदपि संदिष्टं देशकालोचितमन्यथा कथयति, सुरूपः तेनादेयवचनः, विगतभयः, तेनाप्रियसंदेशस्यापि वक्ता, वाग्मी तेन संस्कृताद्युक्तिक्षमः, एवंविधो दूतो राज्ञः प्रशस्यो भवति॥६४॥

अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया।
नृपतौ कोशराष्ट्रे च दूते संधिविपर्ययौ॥६५॥

The army depends on the official (placed in charge of it), the due control (of the subjects) on the army, the treasury and the (government of) the realm on the king, peace and its opposite (war) on the ambassador.

अमात्ये सेनापतौ हस्त्यश्वरथपादाताद्यात्मको दण्ड आयत्तः। तदिच्छया तस्य कार्येषु प्रवृत्तेः। विनययोगाद्वैनयिकी यो विनयः स दण्ड आयत्तः। नृपतावर्थसंचयस्थानदेशावायत्तौ राज्ञा पराधीनौ न कर्तव्यौ। स्वयमेव चिन्तमीयं धनं ग्रामश्च। दूते संधिविग्रहावायत्तौ, तदिच्छया तत्प्रवृत्तेः॥६५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दूत एव हि संधत्ते भिनत्त्येव च संहतान्।
दूतस्तत्कुरुते कर्म भिद्यन्ते येन मानवाः ॥६६॥

For the ambassador alone makes (kings') allies and separates allies; the ambassador transacts that business by which (kings) are disunited or not.

यस्माद्दूत एव हि भिन्नानां संधिसंपादने क्षमः। संहतानां च भेदने। तथा परदेशे दूतस्तत्कर्म करोति येन संहता भिद्यन्ते। तस्माद्दूते संधिविग्रहौ विपर्ययावायत्ताविति तदुक्तं तस्यैवायं प्रपञ्चः॥६६॥

दूतस्य कार्यान्तरमाह—

स विद्यादस्य कृत्येषु निगूढेङ्गितचेष्टितैः।
आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम् ॥६७॥

With respect to the affairs let the (ambassador) explore the expression of the countenance, the gestures and actions of the (foreign king) through the gestures and actions of his confidential (advisers) and (discover) his designs among his servants.

स दूतोऽस्य प्रतिराजस्य कर्तव्ये आकारेन्नितचेष्टां जानीयात्। निगूढा अनुचराः प्रतिपक्षनृपस्यैव परिजनास्तस्मिन्युक्तास्तत्सन्निधावपि तेषामिन्नितचेष्टितैः भृत्येषु च क्षुब्धलुब्धापमानितेषु प्रतिराजस्य कर्तुमीप्सितं जानीयात्॥६७॥

बुद्ध्वा च सर्वं तत्त्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीडयेत् ॥६८॥

Having learnt exactly (from his ambassador) the designs of the foreign king, let (the king) take such measures that he does not bring evil on himself.

उक्तलक्षणदूतद्वारेण प्रतिपक्षराजस्य कर्तुमिष्टं सर्वं तत्त्वतो ज्ञात्वा तथा प्रयत्नं कुर्यात्। यथाऽऽत्मनः पीडा न भवति॥६८॥

जाङ्गलं सस्यसंपन्नमार्यप्रायमनाविलम्।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥६९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Let him settle in a country which is open and has a dry climate, where grain is abundant, which is chiefly (inhabited) by Āryans, not subject to epidemic diseases (or similar troubles), and pleasant, where the vassals are obedient and his own (people easily) find their livelihood.

"अल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः। स ज्ञेयो जाङ्गलो देशो बहुधान्यादिसंयुतः।" प्रचुरधार्मिकजनं रोगोपसर्गाद्यैरनाकुलं फलपुष्पतरुलतादिमनोहरं प्रणतसमीपवास्तव्याटाविकादिजनं सुलभकृषिवाणिज्याद्याजीवनमाश्रित्यावासं कुर्यात् ॥६९॥

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम् ॥७०॥

Let him build (there) a town, making for his safetly a fortress, protected by a desert, or a fortress built of (stone and) earth, or one protected by water or trees, or one (formed by an encampment of armed) men or a hill-fort.

धनुर्दुर्गं मरुवेष्टितं चतुर्दिशं पञ्चयोजनमनुदकं, महीदुर्गं पाषाणेन इष्टकेन वा विस्तारादद्वैगुण्योच्छ्रायेण द्वादशहस्तादुच्छ्रितेन युद्धार्थमुपरिभ्रमणयोग्येन सावरणगवाक्षादियुक्तेन प्राकारेण वेष्टितं, जलदुर्गमगाधोदकेन सर्वतः परिवृतं, वार्क्षदुर्गं बहिः सर्वतो योजनमात्रां व्याप्य तिष्ठन्महावृक्षकण्टकिगुल्मलताद्याचितं नृदुर्गं चतुर्दिगवस्थायि हस्त्यश्वरथयुक्तबहुपदातरक्षितं, गिरिदुर्गं पर्वतपृष्ठमतिदुरारोहं संकोचैकमार्गोपेतं अन्तर्नदीप्रकृवणाद्युदकयुक्तं, बहुसस्योत्पन्नक्षेत्रवृक्षान्वितं, एतेषु दुर्गेषु मध्यादन्यतमं दुर्गमाश्रित्य पुरं विरचयेत् ॥७०॥

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥७१॥

Let him make every effort to secure a hillfort, for amongst all those (fortresses mentioned) a hill-fort is distinguished by many superior qualities.

यस्मादेषां दुर्गाणां मध्यात् दुर्गगुणबहुत्वेन गिरिदुर्गमतिरिच्यते तस्मात्सर्वप्रयत्नेन तदाश्रयेत्। गिरिदुर्गे शत्रुदुरारोहत्वं महत्प्रदेशादल्पप्रयत्नप्रेरितशिलादिना बहुविपक्षसैन्यव्यापादनमित्यादयो बहवो गुणाः ॥७१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रयाऽप्सराः।
त्रीण्युत्तराणि क्रमशः प्लवङ्गमनरामराः॥७२॥

The first three of those (various kinds of fortresses) are inhabited by wild beasts, animals, living in holes and aquatic animals, the last three by monkeys, men, and gods respectively.

एषां दुर्गाणां मध्यात्प्रथमोक्तानि त्रीणि दुर्गाणि मृगादय आश्रिताः। तत्र धनुर्दुर्गं मृगैराश्रितं, महीदुर्गं गर्ताश्रितैर्मूषिकादिभिः, अब्दुर्गं जलचरैर्नक्रादिभिः, इतराणि त्रीणि वृक्षदुर्गादीनि वानरादय आसितास्तत्र वृक्षदुर्गं वानरैराश्रितं, नृदुर्गं मानुषैः, गिरिदुर्गं देवैः॥७२॥

यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः।
तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम्॥७३॥

As enemies do not hurt these (beings, when they are) sheltered by (their) fortresses, even so foes (can) not injure a king who has taken refuge in his fort.

यथैतान्दुर्गवासिनो मृगादीन्व्याधादयः शत्रवो न हिंसन्ति एवं दुर्गाश्रितं राजानं न शत्रवः॥७३॥

एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दश सहस्राणि तस्माद्दुर्गं विधीयते॥७४॥
[मन्दरस्यापि शिखरं निर्मानुष्यं न शिष्यते।
मनुयदुर्गं दुर्गाणां मनुः स्वायंभुवोऽब्रवीत्॥६॥]

One bowman, placed on a rampart, is a match in battle for one hundred (foes), one hundred for ten thousand; hence it is prescribed (in the Śāstras that a king shall possess) a fortress.

यस्मादेको धानुष्कः प्राकारस्थः शत्रूणां शतं योधयति। प्राकारस्थं धानुष्कशतं च शत्रूणां दशसहस्राणि तस्माद्दुर्गं कर्तुमुपदिश्यते॥७४॥

तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च॥७५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Let tht (fort) be well supplied with weapons, money, grain and beasts of burden, with Brāhmaṇas, with artisans, with engines, with fodder, and with water.

तद्दुर्गं खड्गाद्यायुधसुवर्णादिधनधान्यकरितुरगादिवाहनब्राह्मणभक्ष्यादि-शिल्पियन्त्रघासोदकसमृद्धं कुर्यात् ॥७५॥

तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः।
गुप्तं सर्वर्तुकं शुभ्रं जल वृक्षसमन्वितम् ॥७६॥

Let him cause to be built for himself, in the centre of it, a spacious palace, (well) protected, habitable in every season, resplendent (with whitewash), supplied with water and trees.

तस्य दुर्गस्य मध्ये पर्याप्तं पृथक्पृथक् स्त्रीगृहदेवागारायुधा-गाराग्निशालादियुक्तं परिखाप्राकाराद्यैर्गुप्तं सर्वर्तुकफलपुष्पादियोगेन सर्वर्तुकं सुधाधवलितं वाप्यादिजलयुक्तं वृक्षान्वितमात्मनो गृहं कारयेत् ॥७६॥

तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम्।
कुले महति संभूतां हृद्यां रूपगुणान्विताम् ॥७७॥

Inhabiting that, let him wed a consort of equal caste (varna), who possessed auspicious marks (on her body), and is born in a great family, who is charming and possesses beauty and excellent qualities.

तद्गृहमाश्रित्य समानवर्णां शुभसूचकलक्षणोपेतां महाकुलप्रसूतां मनोहारिणीं सुरूपां गुणवतीं भार्यामुद्वहेत् ॥७७॥

पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजम्।
तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ॥७८॥

Let him appoint a domestic priest (*purohita*) and choose officiating priests (*rjtvig*); they shall perform his domestic rites and the (sacrifices) for which three fires are required.

पुरोहितं चाप्याथर्वणविधिना कुर्वीत। ऋत्विजश्च कर्माणि कर्तुं वृणुयात्। ते चास्य राज्ञो गृह्योक्तानि त्रेतासंपाद्यानि कर्माणि कुर्युः ॥७८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः।
धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च॥७९॥

A king shall offer various (Śrauta) sacrifices at which liberal fees (are distributed), and in order to acquire merit, he shall give to Brāhmaṇas enjoyments and wealth.

राजा नानाप्रकारान्बहुदक्षिणानश्वमेधादियज्ञान्कुर्यात्। ब्राह्मणेभ्यश्च स्त्रीगृह-शय्यादीन्भोगान्सुवर्णवस्त्रादीनि धनानि दद्यात्॥७९॥

सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्।
स्याच्चाम्नायपरो लोको वर्तेत पितृवन्नृषु॥८०॥

Let him cause the annual revenue in his kingdom to be collected by trusty (officials), let him obey the sacred law in (his transactions with) the people, and behave like a father towards all men.

राजा सक्तैफरमात्यैर्वर्षग्राह्यं धान्यादिभागमानाययेत्, लोके च करादिग्रहणे शास्त्रनिष्ठः स्यात्, स्वदेशवासिषु नरेषु पितृवत्स्नेहादिना वर्तेत॥८०॥

अध्यक्षान् विविधान्कुर्यात्तत्र तत्र विपश्चितः।
तेऽस्य सर्वाण्यवेक्षेरन्नृणां कार्याणि कुर्वताम्॥८१॥

For the various (branches of business) let him appoint intelligent supervisors; they shall inspect all (the acts) of those men who transact his business.

तत्र तत्र हस्त्यश्वरथपदाताद्यर्थादिस्थानेष्वध्यक्षानवेक्षितृन्विविधान्पृथक् पृथक् विपश्चितः कर्मकुशलान्कुर्यात्। तेऽस्य राज्ञस्तेषु हस्त्यश्वादिस्थानेषु मनुष्याणां कुर्वतां सर्वाणि कार्याणि सम्यक्कार्यार्थमवेक्षेरन्॥८१॥

आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत्।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते॥८२॥

Let him honour those Brāhmaṇas who have returned from their teacher's house (after studying the Veda); for that (money which is given) to Brāhmaṇas is declared to be an imperishable treasure for kings.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.
76548

गुरुकुलान्निवृत्तानामधीतवेदानां ब्राह्मणानां गार्हस्थ्यार्थिना नियमतो धनधान्येन पूजां कुर्यात्। यस्माद्योऽयं ब्राह्मो ब्राह्मणेषु स्थापितधनधान्यादिनिधिरिव निधिरक्षयो। ब्रह्मफलत्वादविनाशी राज्ञां शास्त्रेणोपदिश्यते ॥८२॥

न तं स्तेना न चामित्रा हरन्ति न च नश्यति।
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥८३॥

Neither thieves nor foes can take it, nor can it be lost; hence an imperishable store must be deposited by kings with Brāhmaṇas.

तं ब्राह्मणस्थापितनिधिं न चौरा नापि शत्रवो हरन्ति, अन्यनिधिवद्भूम्यादिस्थापितः कालवशान्न नश्यति। स्थानभ्रान्त्या वाऽदर्शनमुपैति। तस्माद्योयमक्षयोऽनन्तफलो निधिरिव निधिर्धनौघः स राज्ञा ब्राह्मणेषु निधातव्यः। तेभ्यो देय इत्यर्थः ॥८३॥

न स्कन्दते न व्यथते न विनश्यति कर्हिचित्।
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम् ॥८४॥

The offering made through the mouth of a Brāhmaṇa, which is neither spolit, nor falls (on the ground), nor ever perishes, is far more excellent than Agnihotras.

अग्नौ यद्धविर्हूयते तत्कदाचित्स्कन्दते कृवत्यधः पतति, कदाचिद्व्यथते शुष्यति कदाचिद्दाहादिना नश्यति, ब्राह्मणस्य मुखे यद्धुतं "पाण्यास्यो हि द्विजः स्मृतः" इति ब्राह्मणहस्तदत्तमित्यर्थः। तस्य नोक्ता दोषाः। तस्मादग्निहोत्रादिभ्यः श्रेष्ठं ब्राह्मणाय दानमित्यर्थः ॥८४॥

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
प्राधीते शतसाहस्त्रमनन्तं वेदपारगे ॥८५॥

A gift to one who is not a Brāhmaṇa (yields) the ordinary (reward; a gift) to one who calls himself a Brāhmaṇa, a double (reward); a gift to a well read Brāhmaṇa, a hundred-thousandfold (reward);l (a gift) to one who knows the Veda and the Aṅgas (Vedapāraga, a reward) without end.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणेतरक्षत्रादिविषये यद्दानं तत्समफलं यस्य देयद्रव्यस्य यत्फलं श्रुतं ततो नाधिकं न च न्यूनं भवति। यो ब्राह्मणः क्रियारहित आत्मानं ब्राह्मणं ब्रवीति स ब्राह्मणब्रुवः। तद्विषयदानं पूर्वापेक्षया द्विगुणफलम्। एवं प्राधीते प्रक्रान्ताध्ययने ब्राह्मणे लक्षगुणं फलम्। समस्तशाखाऽध्यायिन्यनन्तफलम्। "सहस्रगुणमाचार्ये" इति वा तृतीयपादस्य पाठः॥८५॥

पात्रस्य हि विशेषेण श्रद्दधानतयैव च।
अल्पं वा बहु वा प्रेत्य दानस्य फलमश्नुते॥८६॥
[एष एव परो धर्मः कृत्स्नो राज्ञ उदाहृतः।
जित्वा धनानि संग्रामाद्विजेभ्यः प्रतिपादयेत्॥७॥
देशकालविधानेन द्रव्यं श्रद्धासमन्वितम्।
पात्रे प्रदीयते यत्तु तद्धर्मस्य प्रसाधनम्॥८॥]

For according to the particular qualities of the recipient and according to the faith (of the giver) a small or a great reward will be obtained for a gift in the next world.

विद्यातपोवृत्तियुतया पात्रस्य तारतम्यमपेक्ष्य शास्त्रे तथेति प्रत्ययरूपाया श्रद्धायास्तारतम्यपात्रमासाद्य दानस्याल्पं महद्वाफलं परलोके लभ्यते॥८६॥

समोत्तमाधमै राजा त्वाहूतः पालयन् प्रजाः।
न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन्॥८७॥

A king who, while he protects his people, is defied by (foes), be they equal in strength, or stronger, or weaker, must not shrink from battle, remembering the duty of Kṣatriyas.

समबलेनाधिकबलेन हीनबलेन च राज्ञा युद्धार्थमाहूतो राजा प्रजारक्षणं कुर्वन्युद्धान्न निवर्तेत। क्षत्रियेण युद्धार्थमाहूतेनावश्यं योद्धव्यमिति क्षात्रं धर्मं स्मरन्॥८७॥

संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्।
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्॥८८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Not to turn back in battle, to protect the people, to honour the Brāhmaṇas, is the best means for a king to secure happiness.

युद्धेष्वपराङ्मुखत्वं प्रजानां च रक्षणं ब्राह्मणपरिचर्या एतद्राज्ञामतिशयितं स्वर्गादिश्रेयःस्थानम् ॥८८॥

आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥८९॥

Those kings who, seeking to slay each other in battle, fight with the utmost exertion and do not turn back, go to heaven.

अतएव राजानो मिथः स्पर्धमाना युद्धेष्वन्योन्यं हन्तुमिच्छन्तः प्रकृष्टया शक्त्या संमुखीभूय युध्यमानाः स्वर्गं गच्छन्ति। यद्यपि युद्धस्य शत्रुजयधनलाभादिरूपं दृष्टमेव फलं न स्वर्गस्तथापि युद्धाश्रितापराङ्मुखत्वनियमस्य स्वर्गः फलमिति न दोषः ॥८९॥

न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥९०॥

When he fights with his foes in battle, let him not strike with weapons concealed (in wood), nor with (such as are) barbed, poisoned, or the points of which are blazing with fire.

कूटान्यायुधानि बहिःकाष्ठादिमयान्यन्तर्गुप्तनिशितशस्त्राण्येतैः समरे युध्यमानः शत्रून्न हन्यात्। नापि कर्ण्याकारफलकैर्बाणैः। नापि विषाक्तैः। नाप्यग्निदीप्तफलकैः ॥९०॥

न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ॥९१॥

Let him not strike one who (in flight) has climbed on an emience, nor a eunuch, nor one who joins the palms of his hands (in supplication), nor one who (flees) with flying hair, nor one who sits down, nor one who says 'I am thine;'

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वयं रथस्थो रथं त्यक्त्वा स्थलारूढं न हन्यात्। तथा नपुंसकं, बद्धाञ्जलिं मुक्तकेशं, उपविष्टं, त्वदीयोऽहमित्येवंवादिनं न हन्यात्॥९१॥

न सुप्तं न विसन्नाहं न नग्नं न निरायुधम्।
नायुध्यमानं पश्यन्तं न परेण समागतम्॥९२॥

Nor one who sleeps, nor one who has lost his coat of mail, nor one who is naked, nor one who is disarmed, nor one who looks on without taking part in the fight, nor one who is fighting with another (foe).

सुप्तं, मुक्तसन्नाहं, विवस्त्रं, अनायुधं, अयुध्यमानं, प्रेक्षकं, अन्येन सह युध्यमानं च न हन्यात्॥९२॥

नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतम्।
न भीतं न परावृत्तं सतां धर्ममनुस्मरन्॥९३॥

Nor one whose weapons are broken, nor one afflicted (with sorrow), nor one who has been grievously wounded, nor one who is in fear, nor one who has turned to flight; (but in all these cases let him) remember the duty (of honourable warriors).

भग्नखड्गाद्यायुधं, पुत्रशोकादिनार्तं, बहुप्रहाराकुलं, भीतं, युद्धपराङ्मुखं, शिष्टक्षत्रियाणां धर्मं स्मरन्न हन्यात्॥९३॥

यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः।
भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते॥९४॥

But the (Kṣatriya) who is slain in battle, while he turns back in fear, takes upon himself all the sin of his master, whatever (it may be).

यस्तु योधो भीतः पराङ्मुखः सन्युद्धे शत्रुभिर्हन्यते स पोषणकर्तुः प्रभोर्यद्दुष्कृतं तत्सर्वं प्राप्नोति। शास्त्रप्रमाणके च सुकृतदुष्कृते यथाशास्त्रं संक्रमयोग्ये एव सिद्धयतः अतएवोपजीव्यशास्त्रेण बाधनाङ्ग प्रतिपक्षानुमानादयोऽपि। एतच्च षष्ठे "प्रियेषु स्वेषु सुकृतम्" (अ०६ श्लो०७९) इत्यत्राविष्कृतमस्माभिः। "पराङ्मुखहतस्य स्यात्पापमेतद्विवक्षितम्। न त्वत्र प्रभुपापं स्यादिति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गोविन्दराजकः॥ मेधातिथिस्त्वर्थवादमात्रमेतन्निरूपयन्। मन्ये नैतद्द्वयं युक्तं व्यक्तमन्वर्थवर्जनात्"। "अन्यदीय पुण्यपापेऽन्यत्र संक्रमेते" इति शास्त्रप्रामाण्याद्वेदान्सूत्रकृता बादरायणेन निर्णीतोऽयमर्थ इति यथोक्तमेव रमणीयम्॥९४॥

यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम्।
भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु॥९५॥

And whatever merit (a man) who is slain in flight may have gained for the next (world), all that his master takes.

पराङ्मुखहतस्य यत्किंचित्सुकृतं परलोकार्थमर्जितमनेनास्ति तत्सर्वं प्रभुर्लभते॥९५॥

राज्ञः स्वामिनः सर्वधनग्रहणे प्राप्ते तदपवादार्थमाह-

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून्स्त्रियः।
सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत्॥९६॥

Chariots and horses, elephants, parasols, money, grain, cattle, women, all sorts of (marketable) goods and valueless metals belong to him who takes them (singly) conquering (the possessor).

रथाश्वहस्तिछत्रवस्त्रादि, धनधान्यगवादि, दास्यस्त्रियः, सर्वाणि द्रव्याणि गुडलवणादीनि, कुप्यं च सुवर्णरजतव्यतिरिक्तं ताम्रादि धनं, यः पृथग्जित्वा सततं गृहमानयति तस्यैव तद्भवति। सुवर्णरजतभूमिरत्नाद्यनपकृष्टधनं तु राज्ञ एव समर्पणीयं एतदर्थमेवात्र परिगणनीयम्॥९६॥

अत एवाह-

राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः।
राज्ञा न सर्वयोधेभ्यो दातव्यमपृथग्जितम्॥९७॥
[भृत्येभ्यो विजयेदर्थान्नैकः सर्वहरो भवेत्।
नाममात्रेण तुष्येत छत्रेण च महीपतिः॥९॥]

A text of the Veda (declares) that (the soldiers) shall present a choice portion (of the booty) to the king; what

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

has not been taken singly, must be distributed by the king among all the soldiers.

उद्धारं योद्धारो राज्ञे दद्युः। उद्ध्रियत इत्युद्धारः। जितधनादुत्कृष्टधनं सुवर्णरजतकुप्यादि राज्ञे समर्पणीयम्। करितुरगादि वाहनमपि राज्ञे देयम्। "वाहनं च राज्ञ उद्धारं च" इति गोतमवचनात्। उद्धारदाने च श्रुतिः "इन्द्रो वै वृत्रां हत्वा" इत्युपक्रम्य "स महान्भूत्वा देवता अब्रवीदुद्धारं समुद्धरत" इति। राज्ञा चापृथग्जितं सह जितं सर्वयोधेभ्यो यथापौरुषं संविभजनीयम्॥९७॥

एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः।
अस्माद्धर्मान्न च्यवेत क्षत्रियौ घ्नन् रणे रिपून्॥९८॥

Thus has been declared the blameless, primeval law for warriors; from this law a Kṣatriya must not depart, when he strikes his foes in battle.

अविगर्हित एषोऽनादिसर्गप्रवाहसंभवतया नित्यो योधधर्म उक्तः। युद्धे शत्रून्हिंसन्क्षत्रिय एतं धर्मं न त्यजेत्। युद्धाधिकारित्वात्क्षत्रियग्रहणम्। अन्योऽपि तत्स्थानपतितो न त्यजेत्॥९८॥

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः।
रक्षितं वर्धयेच्चैव वृद्धं पत्रिषु निःक्षिपेत्॥९९॥

Let him strive to gain what he has not yet gained; what he has gained let him carefully preserve; let him augment what he preserves, and what he has augmented let him bestow on worthy men.

अजितं भूमिहिरण्यादि जेतुमिच्छेत्। जितं प्रयत्नतो रक्षेत्। रक्षितं च वाणिज्यादिना वर्धयेत्। वृद्धं च पात्रेभ्यो दद्यात्॥९९॥

एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनम्।
अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतन्द्रितः॥१००॥

Let him know that these are the four means for securing the aims of human (existence); let him, without ever tiring, properly employ them.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतच्चतुःप्रकारं पुरुषार्थो यः स्वर्गादिस्तत्प्रयोजनं यस्मादेवंरूपं जानीयात्। अतोऽलनसः सन्सर्वदाऽनुष्ठानं कुर्यात्॥१००॥

अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्धयेद्वृद्धया वृद्धं दानेन निक्षिपेत्॥१०१॥

What he has not (yet) gained, let him seek (to gain) by (his) army; what he has gained, let him protect by careful attention; what he has protected, let him augment by (various modes of) increasing it; and what he has augmented, let him liberally bestow (on worthy men).

अलब्धं यद्धस्त्यश्वरथपादातात्मकेन दण्डेन जेतुमिच्छेत्। जितं च प्रत्यवेक्षणेन रक्षेत्। रक्षितं च बुद्धयुपायेन स्थलजलपथवाणिज्यादिना वर्धयेत्। वृद्धं शास्त्रीयविभागेन पात्रेभ्यो दद्यात्॥१०१॥

नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः।
नित्यं संवृतसर्वार्थो नित्यं छिद्रानुसार्यरेः॥१०२॥

Let him be ever ready to strike, his prowess constantly displayed, and his secret constantly concealed, and let him constantly explore the weaknesses of his foe.

नित्यं हस्त्यश्वादियुद्धादिशिक्षाभ्यासो दण्डो यस्य स तथा स्यात्। नित्यं च प्रकाशीकृतमस्त्रविद्यादिना पौरुषं यस्य स तथा स्यात्। नित्यं संवृतं संवरणीयं मन्त्राचारचेष्टादिकं यस्य स तथा स्यात्। नित्यं च शत्रोर्व्यसनादिरूपच्छिद्रानुसंधानं तत्परः स्यात्॥१०२॥

नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत्।
तस्मात्सर्वाणि भूतानि दण्डेनैव प्रसादयेत्॥१०३॥

Of him who is always ready to strike, the whole world stands in awe; let him therefore make all creatures subject to himself even by the employment of force.

यस्मान्नित्योद्यतदण्डस्य जगदुद्विजेदिति तस्मात्सर्वप्राणिनो दण्डेनैवात्मसात्कुर्यात्॥१०३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अमाययैव वर्तेत न कथंचन मायया।
बुद्ध्येतारिप्रयुक्तां च मायां नित्यं स्वसंवृतः॥१०४॥

Let him ever act without guile, and on no account treacherously; carefully guarding himself, let him always fathom the treachery which his foes employ.

मायया छअतया अमात्यादिषु न वर्तते। तथा सति सर्वेषामविश्वसनीयः स्यात्। धर्मरक्षार्थं यथातत्त्वेनैव व्यवहरेत्। यत्नकृतात्मपक्षरक्षश्च शत्रुकृतां प्रकृतिभेदरूपां मायां चारद्वारेण जानीयात्॥१०४॥

नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु।
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः॥१०५॥
[न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति॥१०॥]

His enemy must not know his weakness, but he must know the weakness of his enemy; as the tortoise (hides its) limbs), even so let him secure the members (of his government against treachery), let him protect his own weak points.

तथा यत्नं कुर्याद्यथास्य प्रकृतिभेदादि छिद्रं शत्रुर्न जानाति। शत्रोस्तु प्रकृतिभेदादिकं चारैर्जानीयात्। कूर्मो यथा मुखचरणादीन्यन्नान्यात्मदेहे गोपायत्येवं राज्यान्नान्यमात्यादीनि दानसंमानादिनात्मसात्कुर्यात्। दैवाच्च प्रकृतिभेदादिरूपे छिद्रे जाते यत्नतः प्रतीकारं कुर्यात्॥१०५॥

बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्॥१०६॥

Let him plan his undertakings (patiently meditating) like a heron; like a lion, let him put forth his strength; like a wolf, lethim snatch (his prey); like a hare, let him double in retreat.

यथा बको जले मीनमतिचञ्चलस्वभावमपि मत्स्यग्रहणादेकतानान्तःकरणश्चिन्तयत्येवं रहसि सुविहितरक्षस्यापि विपक्षस्य देशग्रहणादीनर्थांश्चिन्तयेत्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथाच सिंहः प्रबलमतिस्थूलमपि दन्तीबलं हन्तुमाक्रमत्येवमल्पबलो बलवतोपक्रान्तः संश्रयाद्युपायान्तरासंभवे सर्वशक्त्या शत्रुं हन्तुमाक्रमेत्। यथा च वृकः पालकृतरक्षणमपि पशुं दैवात्पालानवधानमासाद्य व्यापादयत्येवं दुर्गाद्यवस्थितमपि रिपुं कथंचित्प्रमादमासाद्य व्यापादयेत्। यथा शशः वधोद्धुरविविधव्याधमध्यगतोऽपि कुटिलगतिरुत्प्लुत्यर्थिवान्तरं संश्रयितुमुपसर्पेत् ॥१०६॥

एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः।
तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः ॥१०७॥

When he is thus engaged in conquest, let him subdue all the opponents whom he may find, by the (four) expedients, conciliation and the rest.

एवमुक्तप्रकारेण विजयप्रवृत्तस्य नृपतेर्ये विजयविरोधिनो भवेयुस्तान्सर्वान्सामदानभेददण्डैरुपायैर्वशमानयेत् ॥१०७॥

यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः।
दण्डेनैव प्रसह्यैतांश्छनकैर्वशमानयेत् ॥१०८॥

If they cannot be stopped by the three first expedients, then let him, overcoming them by force alone, gradually bring them to subjection.

ते च विजयविरोधिनो यद्याद्यैस्त्रिभिरुपायैर्न निवर्तन्ते तदा बलाद्देशोपमर्दादिना युद्धेन शनकैर्लघुगुरुदण्डक्रमेण दण्डेन वशीकुर्यात् ॥१०८॥

सामादीनामुपायानां चतुर्णामपि पण्डिताः।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये ॥१०९॥

Among the four expedients, conciliation and the rest, the learned always recommend conciliation and (the employment of) force for the prosperity of kingdoms.

चतुर्णामपि सामादीनामुपायानां मध्यात्सामदण्डावेव राष्ट्रवृद्धयर्थं पण्डिताः प्रशंसन्ति। साम्नि प्रयासधनव्ययसैन्यक्षयादिदोषाभावाद्दण्डे तु तत्सद्भावेऽपि कार्यसिध्यतिशयात् ॥१०९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः॥११०॥

As the weeder plucks up the weeds and preserves the corn, even so let the king protect his kingdom and destroy his opponents.

यथा क्षेत्रे धान्यतृणादिकयोः सहोत्पन्नयोरपि धान्यानि लवनकर्ता रक्षति तृणादिकं चोद्धरति, एवं नृपती राष्ट्रे दुष्टान्हन्यान्नत्वदुष्टांस्तदीयसहजान्भ्रातृनपि निर्दातृदृष्टान्तादवसीयते। शिष्टसहितं च राष्ट्रं रक्षेत्॥११०॥

मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया।
सोऽचिराद् भ्रश्यते राज्याज्जीविताच्च सबान्धवः॥१११॥

That king who through folly rashly oppresses his kingdom, (will), together with his relatives, ere long be deprived of his life and of his kingdom.

यो राजा अनवेक्षया दुष्टशिष्टाज्ञानेन सर्वानेव स्वराष्ट्रीयजनाञ्छास्त्रीयधन-ग्रहणमारणादिकष्टेन पीडयति स शीघ्रमेव जनपदवैराख्यप्रकृतिकोपाधर्मैः राजा राज्याज्जीविताच्च पुत्रादिसहितो भ्रश्यते॥१११॥

शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्॥११२॥

As the lives of living creatures are destroyed by tormenting their bodies, even so the lives of kings are destroyed by their oppressing their kingdoms.

यथा प्राणभृतामाहारनिरोधादिना शरीरशोषणात्प्राणाः क्षीयन्ते, एवं राज्ञामपि राष्ट्रपीडनात्प्रकृतिकोपादिना प्राणा विनश्यन्ति। तस्मात्स्वशरीरवद्राजा राष्ट्रं रक्षणीयमित्युक्तम्॥११२॥

राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत्।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते॥११३॥

In governing his kingdom let him always observe the (following) rules; for a king who governs his kingdom well, easily prospers.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

राष्ट्रस्य रक्षणे च वक्ष्यमाणमिममुपायमनुतिष्ठेत्। यस्मात्संरक्षितराष्ट्रो राजाऽनायासेन वर्धते ॥११३॥

द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम्।
तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहम्॥११४॥

Let him place a company of soldiers, commanded (by a trusty officer), in the midst of two, three, five or hundreds of villages, (to be) a protection of the kingdom.

द्वयोर्ग्रामयोर्मध्ये त्रयाणां वा ग्रामाणां पञ्चानां वा ग्रामशतानां गुल्मं रक्षितृपुरुषसमूहं सत्यप्रधानपुरुषाधिष्ठितं राष्ट्रस्य संग्रहं रक्षास्थानं कुर्यात्। अस्य लाघवगौरवापेक्षश्चोक्तविकल्पः॥११४॥

ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा।
विंशतीशं शतेशं च सहस्रपतिमेव च॥११५॥

Let him appoint a lord over (each) village, as well as lords of ten villages, lords of twenty, lords of a hundred, and lords of a thousand.

एकग्रामदशग्रामाद्यधिपतीन्कुर्यात्॥११५॥

ग्रामदोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयम्।
शसेद्ग्रामदशेशाय दशेशो विंशतीशिने॥११६॥

The lord of one village himself shall inform the lord of ten villages of the crimes committed in his village, and the ruler of ten (shall make his report) to the ruler of twenty.

विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत्।
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम्॥११७॥

But the ruler of twenty shall report all such (matters) to the lord of a hundred, and the lord of a hundred shall himself gives information to the lord of a thousand.

ग्रामधिपतिश्चौरादिदोषान्ग्रामे संजातानात्मना प्रतिकर्तुमक्षमोऽनुत्कृष्टतया स्वयं दशग्रामाधिपतये कथयेत्। एवं दशग्रामाधिपतयो विंशतिग्रामस्वाम्यादिभ्यः कथयेयुः। तथा च सति सम्यक् चौरादिकण्टकोद्धारो भवति॥११६॥११७॥

एकग्रामाधिकृतस्य वृत्तिमाह-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः।
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्॥११८॥

Those (articles) which the villagers ought to furnish daily to the king, such as food, drink, and fuel, the lord of one village shall obtain.

यान्यन्नपानेन्धनादीनि ग्रामवासिभिः प्रत्यहं राज्ञे देयानि न त्वब्दकरं "धान्यानामष्टमो भागः" (अ०७ श्लो०१३०) इत्यादिकं तानि ग्रामाधिपतिर्वृत्त्यर्थं गृह्णीयात्॥११८॥

दशी कुलं तु भुञ्जीत विंशी पञ्चकुलानि च।
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम्॥११९॥

The ruler of ten (villages) shall enjoy one kula (as much land as suffices for one family), the ruler of twenty five kulas, the superintendent of a hundred villages (the revenues of) one village, the lord of a thousand (the revences of) a town.

"अष्टगवं धर्महलं षन्नवं जीवितार्थिनाम्। चतुर्गवं गृहस्थानां त्रिगवं ब्रह्मघातिनाम्" इति हारीतस्मरणात्। षड्गवं मध्यमं हलामिति तथाविधहलद्वयेन यावती भूमिर्वाह्यते तत्कुलमिति वदति तद्दशग्रामाधिपतिर्वृत्त्यर्थं भुञ्जीत। एवं विंशत्यधिपतिः पञ्च कुलानि, शताधिपतिर्मध्यमं ग्रामं, सहस्राधिपतिर्मध्यमं पुरम्॥११९॥

तेषां ग्राम्याणि कार्याणि पृथक्कार्याणि चैव हि।
राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः॥१२०॥

The affairs of these (officials), which are connected with (their) villages and their separate business, another minister of the king shall inspect, (who must be) loyal and never remiss.

तेषां ग्रामनिवासिप्रभृतीनां परस्परविप्रतिपत्तौ यानि ग्रामभवानि कार्याणि, कृताकृतानि च पृथक्कार्याणि, तान्यन्यो राज्ञो हितकृत्तन्नियुक्तोऽनलसः कुर्वीत॥१२०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नगरे नगरे चैकं कुर्यात्सर्वार्थचिन्तकम्।
उच्चैः स्थानं घोररूपं नक्षत्राणामिव ग्रहम्॥१२१॥

And in each town let him appoint one superintendent of all affairs, elevated in rank, formidable, (resmbling) a planet among the stars.

प्रतिनगरमेकैकमुच्चैःस्थानं कुलादिना महान्तं प्रधानरूपं घोररूपं हस्त्यश्वादिसामग्र्या भयजनकं नक्षत्रादिमध्ये भार्गवादिग्रहवानिव तेजस्विनं, कार्यद्रष्टारं नगराधिपतिं कुर्यात्॥१२१॥

स ताननुपरिक्रामेत्सर्वानेव सदा स्वयम्।
तेषां वृत्तं परिणयेत्सम्यग्राष्ट्रेषु तच्चरैः॥१२२॥

Let that (man) always personally visit by turns all those (other officials); let him properly explore their behaviour in their districts through spies (appointed to) each.

स नगराधिकृतस्तान्सर्वान्ग्रामाधिपत्यादीनसति प्रयोजने सर्वदा स्वयं स्वबलेनानुगच्छेत्। तेषां च नगराधिकृतपर्यन्तानां सर्वेषामेव यद्राष्ट्रे स्वचेष्टितं तत्तद्विषयनियुक्तैश्चरैः सम्यक्प्रजाः परिणयेदवगच्छेत्॥१२२॥

राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः॥१२३॥

For the servants of the king, who are appointed to protect (the people), generally become knaves who seize the property of others; let him protect his subjects against such (men).

यस्माद्ये राज्ञो रक्षाधिकृतास्ते बाहुल्येन परस्वग्रहणशीला वञ्चकाश्च भवन्तितस्मात्तेभ्य इमाः स्वात्मीयाः प्रजा राजा रक्षेत्॥१२३॥

ये कार्मिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः।
तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनम्॥१२४॥

Let the king consicate the whole property of those (officials) who, evil-minded, may take money from suitors, and banish them.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ये रक्षाधिकृताः कार्यार्थिभ्य एव वाक्छलादिकमुद्भाव्य लोभादशास्त्रीय धनग्रहणं पापबुद्धयः कुर्वन्ति तेषां सर्वस्वं राजा गृहीत्वा देशान्निःसारणं कुर्यात्॥१२४॥

राजा कर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च।
प्रत्यहं कल्पयेद्वृत्तिं स्थानं कर्मानुरूपतः॥१२५॥

For women employed in the royal service and for menial servants, let him fix a daily maintenance, in proportion to their position and to their work.

राजोपयुक्तकर्मनियुक्तानां स्त्रीणां दास्यादीनां कर्मकरजनस्य चोत्कृष्टमध्यमापकृष्टस्थानयोग्यानुरूपेण प्रत्यहं कर्मानुरूपेण वृत्तिं कुर्यात्॥१२५॥

तामेव दर्शयति—

पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम्।
षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः॥१२६॥

One paṇa must be given (daily) as wages to the lowest, six to the highest, likewise clothing every six months and one droṇa of grain every month.

अवकृष्टस्य गृहादिसंमार्जकोदकवाहादेः कर्मकरस्य वक्ष्यमाणलक्षणः पणो भृतिरूपः प्रत्यहं दातव्यः। षाण्मासिकश्चाच्छादो वस्त्रयुगं दातव्यम्। "अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ च पुष्कलम्। पुष्कलानि तु चत्वारि आढकः परिकीर्तितः॥ चतुराढको भवेद्द्रोणः" इति गणनया धान्यद्रोणश्च प्रतिमासं देयः। उत्कृष्टस्य तु भृतिरूपाश्च षट् पणा देयाः। अनयैव कल्पनया षाण्मासिकानि षट् वस्त्रयुगानि देयानि। प्रतिमासं षाण्मास्या द्रोणा देयाः। अनयैवातिदिशा मध्यमस्य पणत्रयं भृतिरूपं दातव्यम्। षाण्मासिकं च वस्त्रयुगत्रयं मासिकं च धान्यं द्रोणत्रयं देयम्॥१२६॥

क्रयविक्रयमध्वानं भक्तं च सपरिव्ययम्।
योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान्॥१२७॥

Having well considered (the rates of) purchase and (of) sale, (the length of) the road, (the expense for) food and

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

condiments, the charges of securing the goods, let the king make the traders pay duty.

कियता मूल्येन क्रीतमिदं वस्त्रं, लवणादिद्रव्यं विक्रीयमाणं चात्र कियल्लभ्यते, कियद्दूरादनीतं, किमस्य वणिजो भक्तव्ययेन शाकसूपादिना परिव्ययेण लग्नं, किमस्यारण्यादौ चौरदिभ्यो रक्षारूपेण क्षेमप्रतिविधानेन गतं, कोऽस्येदानीं लाभयोग इत्येतदवेक्ष्य वणिजः करान्पापयेत् ॥१२७॥

यथा फलेन युज्येत राजा कर्ता च कर्मणाम्।
तथाऽवेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् ॥१२८॥

After (due) consideration the king shall always fix in his realm and duties and taxes in such a manner that both he himself and the man who does the work receive (their due) reward.

यथा राजाऽवेक्षणादिकर्मणः फलेन, यथा च वार्षिकवणिगादयः कृषिवाणिज्यादिकर्मणां फलेन संबध्यन्ते तथा निरूप्य राजा सर्वदा राष्ट्रे करान्गृह्णीयात् ॥१२८॥

यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः ॥१२९॥

As the leech, the calf, and the bee take their food little by little, even so must the king draw from his realm moderate annual taxes.

यथा जलौकोवत्सभ्रमराः स्तोकस्तोकानि रक्तक्षीरमधून्यदन्त्येव राज्ञा मूलधनमनुच्छिन्दतात्पोऽल्पो राष्ट्रदाब्दिकः करो ग्राह्यः ॥१२९॥

पञ्चशद्भाग आदेयो राज्ञा पशुहिरण्ययोः।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ॥१३०॥

A fiftieth part of (the increments on) cattle and gold may be taken by the king, and the eighth, sixth, or twelfth part of the crops.

मूलादधिकयोः पशुहिरण्ययोः पञ्चशद्भागो राज्ञा ग्रहीतव्यः। एवं धान्यानां षष्ठोऽष्टमो द्वादशो वा भागो राज्ञा ग्राह्यः। भूम्युत्कर्षापकर्षापेक्षया कर्षणादिक्लेशलाघवगौरवापेक्षश्चायं बह्वल्पग्रहणविकल्पः ॥१३०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्।
गन्धौषधिरसानां च पुष्पमूलफलस्य च॥१३१॥

He may also take the sixth part of trees, meat, honey clarifed butter, perfumes, (medical) herbs, substances used for flavouring food, flowers, roots, and fruit.

पत्रशाकतृणानां च चर्मणां वैदलस्य च।
मृण्मयानां च भाण्डानां सर्वस्याश्ममयस्य च॥१३२॥

Of leaves, pot-herbs, grass, (objects) made of cane, skins, of earthen vessels, and all (articles) made of stone.

द्रुशब्दोऽत्र वृक्षवाचकः। वृक्षादीनां सप्तदशानामश्ममयान्तानां षष्ठो भागो लाभाद ग्रहीतव्यः॥१३१॥

म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करम्।
न च क्षुधाऽस्य संसीदेच्छ्रोत्रियो विषये वसन्॥१३३॥

Though dying (with want), a king must not levy a tax on Śrotriyas, and no Śrotriya, residing in his kingdom, must perish from hunger.

क्षीणधनोऽपि राजा श्रोत्रियब्राह्मणात्करं न गृह्णीयात्। न च तदीयदेशे वसन्श्रोत्रियो बुभुक्षयाऽवसादं गच्छेत्॥१३३॥

यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा।
तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति॥१३४॥

The kingdom of that king, in whose dominions a Śrotriya pines with hunger, will even, ere long, be afflicted by famine.

यस्य राज्ञो देशे श्रोत्रियः क्षुधावसन्नो भवति तस्य राष्ट्रमपि दुर्भिक्षादिभिः क्षुधया च शीघ्रमवसादं गच्छति॥१३४॥

श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत्।
संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसम्॥१३५॥

Having ascertained his learning in the Veda and (the

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

purity of) his conduct, the king shall provide for him means of subsistence in accordance with the sacred law, and shall protect him in every way, as a father (protects) the lawful son of his body.

शास्त्रज्ञानानुष्ठाने ज्ञात्वा अस्य तदनुरूपां धर्मादनपेतां जीविकामुपकल्पयेत्। चौरादिभ्यश्चैनमौरसं पुत्रमिव पिता रक्षेत् ॥१३५॥

संरक्ष्यमाणो राज्ञायं कुरुते धर्ममन्वहम्।
तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च ॥१३६॥

Whatever meritorious acts (such a Brāhmaṇa) performs under the full protection of the king, thereby the king's length of life, wealth, and kingdom increase.

स च श्रोत्रियो राज्ञा सम्यग्रक्ष्यमाणो यं धर्मं प्रत्यहं करोति तेन राज्ञ आयुर्धनराष्ट्राणि वर्धन्ते ॥१३६॥

यत्किंचिदपि वर्षस्य दापयेत्करसंज्ञितम्।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् ॥१३७॥

Let the king make the common inhabitants of his realm who live by traffic, pay annually some trifle, which is called a tax.

राजा स्वदेशे शाकपर्णादिस्वल्पमूल्यवस्तुक्रयविक्रयादिना जीवन्तं निकृष्टजनं स्वल्पमपि कराख्यं वर्षेण दापयेत् ॥१३७॥

कारुकाञ्छिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः।
एकैकं कारयेत्कर्म मासि मासि महीपतिः ॥१३८॥

Mechanics and artisans, as well as Śūdras who subsist by manual labour, he may cause to work (for himself) one (day) in each month.

कारुकान्सूपकारादीन् शिल्पिभ्य ईषदुत्कृष्टान्, शिल्पिनश्च लोहकारादीन्, शूद्रांश्च देहक्लेशोपजीविनो भारिकादीन् मासि मास्येकं दिनं कर्म कारयेत् ॥१३८॥

नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया।
उच्छिन्दन् ह्यात्मनो मूलमात्मानं तांश्च पीडयेत् ॥१३९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Let him not cut up his own root (by levying no taxes), nor the root of other (men) by excessive greed; for by cutting up his own root (or theirs), he makes himself or them wretched.

प्रजास्नेहात्करशुल्कादेरग्रहणमात्मनो मूलच्छेदः, अतिलोभेन प्रचुरकरादिग्रहणं परेषां मूलोच्छेदः एतदुभयं न कुर्यात्। यस्माद् आत्मनो मूलमुच्छिद्य कोशक्षयादात्मानं पीडयेत्। पूर्वार्धात्परेषां चेत्यपि संबध्यते। परेषां मूलमुच्छिद्य तांश्च पीडयेत्॥१३९॥

तीक्ष्णश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः।
तीक्ष्णश्चैव मृदुश्चैव राजा भवति संमतः॥१४०॥

कार्यविशेषमवगम्य क्वचित्कार्ये तीक्ष्णः क्वचिन्मृदुश्च भवेन्न त्वैकरूपमालम्बेत यस्मादुक्तरूपो राजा सर्वेषामभिमतो भवति॥१४०॥

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम्।
स्थापयेदासने तस्मिन् खिन्नः कार्येक्षणे नृणाम्॥१४१॥

When he is tired with the inspection of business of men, let him place on that seat (of justice) his chief minister, (who must be) acquainted with the law, wise, self-controlled, and descended from a (noble) family.

स्वयं कार्यदर्शने खिन्नः श्रेष्ठामात्यं धर्मविदं प्राज्ञं जितेन्द्रियं कुलीनं तस्मिन्कार्यदर्शनस्थाने नियुञ्जीत॥१४१॥

एवं सर्वं विधायेदमितिकर्त्तव्यमात्मनः।
युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः॥१४२॥

Having thus arranged all the affairs (of) his (government), he shall zealously and carefully protecthis subjects.

एवमुक्तप्रकारेण सर्वमात्मनः कार्यजातं संपाद्योद्युक्त प्रमादरहित आत्मीयाः प्रजा रक्षेत्॥१४२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विक्रोशन्त्यो यस्य राष्ट्राद् ध्रियन्ते दस्युभिः प्रजाः।
संपश्यतः सभृत्यस्य मृतः स न तु जीवति॥१४३॥

That (monarch) whose subjects are carried off by robbers (Dasyu) from his kingdom, while they loudly call (for help), and he and his servants are (quietly) looking on, is a dead and not a living (king).

यस्य राज्ञोऽमात्यादिसहितस्य पश्यत एव राष्ट्रादाक्रोशन्त्यः प्रजास्तस्करादिभिरपि ह्रियन्ते स मृत एव न तु जीवति। जीवनकार्याभावज्जीवनमपि तस्य मरणमेवेत्यर्थः॥१४३॥

तस्मात् "अप्रमत्तः प्रजा रक्षेत्" इति पूर्वोक्तशेषं तदेव द्रढयति-

क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्।
निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते॥१४४॥

The highest duty of a Kṣatriya is to protect his subjects, for the king who enjoys the rewards, just mentioned, is bound to (discharge that) duty.

धर्मान्तरेभ्यः श्रेष्ठं क्षत्रियस्य प्रजारक्षणमेव प्रकृष्टो धर्मः। यस्माद्यथोक्तलक्षणफलकरादिभोक्ता राजा धर्मेण संबध्यते॥१४४॥

उत्थाय पश्चिमे यामे कृतशौचः समाहितः।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम्॥१४५॥

Having risen is the last match of the night, having performed (the rite of) personal purification, having, with a collected mind, offered oblations in the fire, and having worshipped Brāhmaṇas, he shall enter the hall of audience which must possess the marks (considered) auspicious (for a dwelling).

स भूपो रात्रेः पश्चिमयाम उत्थाय कृतमूत्रपुरीषोत्सर्गादिशौचोऽनन्यमना कृताग्निहोत्रावसथ्यहोमो ब्राह्मणान्पूजयित्वा वास्तुलक्षणाद्युपेतां सभाममात्यादिदर्शनगृहं प्रविशेत्॥१४५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत्।
विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः ॥१४६॥

Tarrying there, he shall gratify all subjects (who come to see him by a kind reception) and afterwards dismiss them; having dismissed his subjects, he shall take counsel with his ministers.

तस्यां सभायां स्थितो दर्शनार्थमागताः प्रजाः सर्वाः संभाषणदर्शनादिभिः प्रतिनन्द्य प्रस्थापयेत्। ताश्च प्रस्थाप्य मन्त्रिभिः सह संधिविग्रहादि चिन्तयेत् ॥१४६॥

गिरिपृष्ठं समारुह्य प्रसादं वा रहोगतः।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः ॥१४७॥

Ascending the back of a hill or a terrace, (and) retiring (there) in a lonely place, or in a solitary forest, let him consult with them unobserved.

पर्वतपृष्ठमारुह्य निर्जनवनगृहस्थितोऽरण्यदेशे वा विविक्ते मन्त्रभेदकारिभिरनुपलक्षितः। कर्मणामारम्भोपायः, पुरुषद्रव्यसंपत्, देशकालविभागः, विनिपातप्रतीकारः, कार्यसिद्धिरित्येवं पञ्चन्नं मन्त्रां चिन्तयेत् ॥१४७॥

यस्य मन्त्रं न जानंति समागम्य पृथग्जनाः।
स कृत्स्नां पृथिवीं भुङ्क्ते कोशहीनोऽपि पार्थिवः ॥१४८॥

That king whose secret plans other people, (though) assembled (for the purpose), do not discover, (will) enjoy the whole earth, though he be poor in treasure.

यस्य राज्ञो मन्त्रिभ्यः पृथगन्ये जना मिलित्वाऽस्य मन्त्रं न जानन्ति स क्षीण कोशोऽपि सर्वां पृथिवीं भुनक्ति ॥१४८॥

जडमूकान्धबधिरांस्तैर्यग्योनान्वयोतिगान्।
स्त्रीम्लेच्छव्याधितव्यङ्गान्मन्त्रकालेऽपसारयेत् ॥१४९॥

At the time of consultation let him cause to be removed

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

idiots, the dumb, the blind, and the deaf, animals, very aged men, women, barbarians, the sick, and those deficient in limbs.

बुद्धिवाक्चक्षुःश्रोत्रविकलान् तिर्यग्योनिभवांश्च शुकसारिकादीन् अतिवृद्धस्त्रीम्लेच्छारोग्यन्नहीनांश्च मन्त्रसमयेऽपसारयेत् ॥१४९॥

यस्मात्-

भिन्दन्त्यवमता मन्त्रं तैर्यग्योनास्तथैव च।
स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत् ॥१५०॥

(Such) despicable (pesons), likewise animals, and particularly women betray secret council; for that reason he must be careful with respect to them.

एते जडादयोऽपि प्राचीनदुष्कृतवशेन प्राप्तजडादिभावा अधार्मिकतयैवावमानिता मन्त्रभेदं कुर्वन्ति। तथा शुकादयोऽतिवृद्धाश्च स्त्रियश्च विशेषेणास्थिरबुद्धितया मन्त्रं भिन्दन्ति। तस्मात्तदपसारणे यत्नवान्स्यात् ॥१५०॥

मध्यंदिनेऽर्धरात्रे वा विश्रान्तो विगतक्लमः।
चिन्तयेद्धर्मकामार्थान्सार्धं तैरेक एव वा ॥१५१॥

At midday or at midnight, when his mental and bodily fatigues are over, let him deliberate, either with himself alone or with his (ministers), on virtue, pleasure, and wealth.

दिनमध्ये रात्रिमध्ये वा विगतचित्तखेदः शरीरक्लेशरहितश्च मन्त्रिभिः सह एकाकी वा धर्मार्थकामाननुष्ठातुं चिन्तयेत् ॥१५१॥

परस्परविरुद्धानां तेषां च समुपार्जनम्।
कन्यानां संप्रदानं च कुमाराणां च रक्षणम् ॥१५२॥

On (reconciling) the attainment of these (aims) which are opposed to each other, on bestowing his daughters in marriage, and on keeping his sons (from harm).

तेषां च धर्मार्थकामानां प्रायिकाविरोधवतां विरोधपरिहारेणार्जनोपायं चिन्तयेत्। दुहितॄणां च दानं स्वकार्यसिद्धयर्थं निरूपयेत्। कुमाराणां च पुत्राणां विनयाधाननीतिशिक्षार्थं रक्षणं चिन्तयेत् ॥१५२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दूतसंप्रेषणं चैव कार्यशेषं तथैव च।
अन्तः पुरप्रचारं च प्रणिधीनां च चेष्टितम्॥१५३॥

On sending ambassadors, on the completion of undertakings (already begun), on the behaviour of (the women in) his harem, and on the doings of his spies.

दूतानां संगुप्तार्थलेखहारित्वादिना परराष्ट्रप्रस्थापनं चिन्तयेत्। तथा प्रारब्धकार्यशेषं समापयितुं चिन्तयेत्। स्त्रीणां चातिविषमचेष्टितत्वात्। तथाहि "शस्त्रेण वेणीविनिगृहितेन विदूरथं वै महिषी जघान। विषप्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजम्॥" इत्याद्यवगम्यात्मरक्षार्थं चान्तःपुरस्त्रीणां चेष्टितं सखीदास्यादिना निरूपयेत्। चराणां च प्रतिराजादिषु नियुक्तानां चरान्तरैश्चेष्टितमवधारयेत्॥१५३॥

कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्त्वतः।
अनुरागापरागौ च प्रचारं मण्डलस्य च॥१५४॥
[वने वनेचराः कार्याः श्रमणाटविकादयः।
परप्रवृत्तिज्ञानार्थं शीघ्राचारपरम्पराः॥११॥
परस्य चैते बोद्धव्यास्तादृशैरेव तादृशाः।
चारसंचारिणः संस्थाः शठाश्चागूढसंज्ञिताः॥१२॥]

On the whole eightfold business and the five classes (of spies), on the goodwill or enmity and the conduct of the circle (of neighbours he must) carefully (reflect).

अष्टविधं कर्म समग्रं चिन्तयेत्। तच्चोशनसोक्तम् "आदाने च विसर्गे च तथा प्रैषनिषेधयोः। पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे॥ दण्डशुद्धयोः सदा युक्तस्तेनाष्टगतिको नृपः। अष्टकर्मा दिवं याति राजा शक्राभिपूजितः॥" तत्र आदानं करादीनां, विसर्गो भृत्यादिभ्यो धनदानं, प्रैषोऽमात्यादीनां दृष्टादृष्टानुष्ठानेषु, निषेधो दृष्टादृष्टविरुद्धक्रियासु, अर्थवचनं कार्यसंदेहे राजाज्ञयैव तत्र नियमात्, व्यवहारस्येक्षणं प्रजानामृणादिविप्रतिपत्तौ, दण्डः पराजितानां, शास्त्रोक्तधनग्रहणम्, शुद्धिः पापे कर्मणि जाते तत्र प्रायश्चितसंपादनम्। मेधातिथिस्तु "अकृतारम्भकृतानुष्ठानमनुष्ठितविशेषणं कर्मफलसंग्रहस्तथा सामदानदण्डभेदा एतदष्टविधं कर्म।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथवा वणिक्पथः, उदकसेतुबन्धनं, दुर्गकरणम्, कृतस्य संस्कारनिर्णयः, हस्तिबन्धनं, खनिखननं, शून्यनिवेशनं, दारुवनच्छेदनं च" इत्याह। तथा कापटिकोदास्थित- गृहपतिवैदेहिकतापसव्यष्टनात्मकं पञ्चविधं चारवर्गं पञ्चवर्गशब्दवाच्यं तत्त्वतश्चिन्तयेत्। तत्र परमर्मज्ञः प्रगल्भच्छात्रः कपटव्यवहारित्वात्कापटिकस्तं वृत्यर्थिनमर्थमानाभ्यामुपगृह्य रहसि राजा ब्रूयात्, यस्य दुर्वृत्तं पश्यसि तत्तदानीमेव मयि वक्तव्यमिति। प्रव्रज्यारूढपतित उदास्थितः तं लोकेषु विदितदोषं प्रज्ञाशौचयुक्तं वृत्तर्थिनं कृत्वा रहसि राजा पूर्ववद्ब्रूयात्। बहुत्पत्तिकमठे स्थापयेत्प्रचुरसस्योत्पत्तिकं भूम्यन्तरं च तद्वृत्यर्थमुपकल्पयेत्। स चान्येषामपि प्रव्रजितानां राजा चारकर्मकारिणां ग्रासाच्छादनादिकं दद्यात्। कर्षकः क्षीणवृत्तिः प्रज्ञाशौचयुक्तो गृहपतिव्यञ्जनस्तमपि पूर्ववदुक्त्वा स्वभूमौ कृषिकर्म कारयेत्। वाणिजकः क्षीणवृत्तिः वैदेहिक व्यञ्जनस्तं पूर्ववदुक्त्वा धनमानाभ्यामात्मीकृत्य वाणिज्यं कारयेत्। मुण्डो जटिलो वा वृत्तिकामस्तापसव्यञ्जनः सोऽपि क्वचिदाश्रमे वसन्बहुमुण्डजटिलान्तरे कपटशिष्यगणवृतो गुप्तराजोपकल्पितवृत्तिस्तापस्यं कुर्यात्। मासद्विमासान्तरितं प्रकाशं बदरादिमुष्टिमश्नीयात्, रहसि च राजोपकल्पितमाहारं कल्पयेत्। शिष्याश्चास्यातीतानागतज्ञानादिकं ख्यापयेषुः। ते च बहुलोकवेष्टनमासाद्य सर्वेषां विश्वसनीयत्वात्सर्वकार्यमकार्यं च पृच्छन्ति अन्यस्य कुक्रियादिकं कथयन्त्येवंरूपं पञ्चवर्गं यथावच्चिन्तयेत्। एवं पञ्चवर्गं प्रकल्प्य तेनैव पञ्चवर्गद्वारेण प्रतिराजस्यात्मीयानां चामात्यादीनां चानुरागविरागौ ज्ञात्वा तदनुरूपं चिन्तयेत्। वक्ष्यमाणस्य राजमण्डलस्य प्रचारं कः संध्यार्थी को वा विग्रहार्थीत्यादिकं चिन्तयेत्। तं च ज्ञात्वा तदनुगुणं चिन्तयेत्॥१५४॥

मध्यमस्य प्रचारं च विजिगीषोश्च चेष्टितम्।
उदासीनप्रचारं च शत्रोश्चैव प्रयत्नतः॥१५५॥

On the conduct of the middlemost (prince), on the doings of him who seeks conquest, on the behaviour of the neutral (king), and (on that) of the foe (let him) sedulously (meditate).

अरिविजिगीषोर्यो भूम्यनन्तरः संहतयोरनुग्रहसमर्थो निग्रहे चासंहतयोः समर्थः स मध्यमस्तस्य प्रचारं चिन्तयेत्। तथा प्रज्ञोत्साहगुणप्रकृतिसमर्थो विजिगीषुस्तस्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चेष्टितं चिन्तयेत्। तथा विजीगीषुमध्यमानां संहतानामनुग्रहे समर्थो निग्रहे चासंहतानां समर्थ उदासीनस्तस्य प्रचारं चिन्तयेत्। शत्रोश्च त्रिविधस्यापि सहजस्याकृत्रिमस्य भूम्यनन्तरस्य च पूर्वापेक्षया प्रयत्नः प्रचारं चिन्तयेत्॥१५५॥

एताः प्रकृतयो मूलं मण्डलस्य समासतः।
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः॥१५६॥

These (four) constituents (prakriti, form), briefly (speaking), the foundation of the circle (of neighbours); besides, eight others are enumerated (in the Institutes of Polity) and (thus) the (total) is declared to be twelve.

एता मध्यमाद्याश्चतस्रः प्रकृतयः संक्षेपेण मण्डलमूलं अपरासामभिधास्यमानप्रकृतीनाममात्यादीनां मूलमित्युच्यते। अन्याश्चाष्टौ समाख्याताः। तद्यथा। अग्रतोऽरिभूमीनां मित्रं, अरिमित्रं, मित्रमित्रं अरिमित्रमित्रं चेत्येवं चतस्रः प्रकृतयो भवन्ति। पश्चाच्च पार्ष्णिग्राहः, आक्रन्दः, पार्ष्णिग्राहासारः, आक्रन्दासार इति चतस्रः एवमष्टौ प्रकृतयो भवन्ति। पूर्वोक्ताभिश्च मध्यमारिविजिगीषूदासीनशत्रुरूपाभिः मूलप्रकृतिभिः सह द्वादशैताः प्रकृतयः स्मृताः॥१५६॥

अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः।
प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः॥१५७॥

The minister, the kingdom, the fortress, the treasury, and the army are five other (constitutent elements of the circle); for, these are mentioned in connexion with each (of the first twelve; thus the whole circle consists), briefly (speaking, of) seventytwo (constituent parts).

आसां मूलप्रकृतीनां चतसृणामष्टानां शाखाप्रकृतीनामुक्तानामेकैकस्याः प्रकृतेरमात्यदेशदुर्गकोशदुर्गदण्डाख्याः पञ्च द्रव्यप्रकृतयो भवन्ति। एताश्च पञ्च द्वादशानां प्रत्येकं भवन्त्यो द्वादशगुणजाताः षष्टिरेव द्रव्यप्रकृतयो भवन्ति। तथा मूलप्रकृतिभिश्चतसृभिः शाखाप्रकृतिश्चाष्टाभिः सह संक्षेपतो द्विसप्तातिप्रकृतयो मुनिभिः कथिताः॥१५७॥

अनन्तरमरिं विद्यादरिसेविनमेव च।
अरेरनन्तरं मित्रमुदासीनं तयोः परम्॥१५८॥
[विप्रकृष्टेऽध्वनीयत्र उदासीनो बलान्वितः।
स खिलो मण्डलार्थस्तु यस्मिञ्ज्ञेयः स मध्यमः॥१३॥]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Let (the king) consider as hostile his immediate neighbour and the partisan of (such a) foe, as friendly the immediate neighbour of his foe, and as neutral (the king) beyond those two.

विजिगीषोर्नृपस्यानन्तरितं चतुर्दिशमप्यरिप्रकृतिं विजानीयात्। तथा तत्सेविनमप्यरिमेव विद्यात्। अरेरनन्तरं विजिगीषोर्नृपस्यैकान्तरं मित्रप्रकृतिं विद्यात्। तयोश्चारिमित्रयोः परं विजिगीषोरुदासीनप्रकृतिं विद्यात्। आसामेव प्रकृतीनामग्रपश्चाद्भाव- भेदेन व्यपदेशभेदः। अत्राग्रवर्तिनोऽरिव्यपदेश एव। पश्चाद्वर्तिनस्त्वरित्वेऽपि पार्ष्णिग्राहव्यपदेशः॥१५८॥

तान्सर्वानभिसंदध्यात्सामादिभिरुपक्रमैः।
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च॥१५९॥

Let him overcome all of them by means of the (four) expedients, conciliation and the rest (employed) either singly or conjointly, (or) by bravery and policy (alone).

तान्सर्वान्नृपतीन्सामदानभेददण्डैरूपायैर्यथासंभवं व्यस्तैः समस्तैर्वशीकुर्यात्। अथवा पौरुषेण दण्डेनैव केवलेन नयेन सान्नैव वा केवलेनात्मवशान्कुर्यात्। तथा चोक्तम् "सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये" ॥१५९॥

संधिं च विग्रहं चैव यानमासनमेव च।
द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा॥१६०॥

Let him constantly think of the six measures of royal policy (guṇa, *viz*) alliance, war, marching, halting, dividing the army, and seeking protection.

तत्रोभयानुग्रहार्थं हस्त्यश्वरथहिरण्यादिनिबन्धनेनावाभ्यामन्यस्योपकर्तव्यमिति नियमबन्धः संधिः, वैरं विग्रहाचरणाद्याधिक्येन, यानं शत्रुं प्रतिगमनम्, उपेक्षणम् आसनम्, स्वार्थसिद्धये बलस्य द्विधाकरणं द्वैधीभावः, शत्रुपीडितस्य प्रबलतर राजान्तराश्रयणं संश्रयः, एतान्गुणानुपकारकान्सर्वदा चिन्तयेत्। यद्गुणाश्रयणे सत्यात्मन उपचयः परस्यापचयस्तं गुणमाश्रयेत्॥१६०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आसनं चैव यानं च संधिं विग्रहमेव च।
कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च॥१६१॥

Having carefully considered the business (in hand), let him resort to sitting quiet or marching, alliance or war, diving his forces or seeking protection (as the case may require).

संध्यादिगुणानां नैरपेक्ष्येणानुष्ठानमनन्तरमुक्तं तदुचितानुष्ठानार्थोऽयमारम्भः। आत्मसमृद्धिपरहान्यादिकं कार्यं वीक्ष्य संधायासनं विगृह्य वा यानं द्वैधीभावसंश्रये च केनचित्संधिं केनचिद्विग्रहमित्यादिकमनुतिष्ठेत्॥१६१॥

संधिं तु द्विविधं विद्याद्राजा विग्रहमेव च।
उभे यानासने चैव द्विविधः संश्रयः स्मृतः॥१६२॥

But the king must know that there are two kinds of alliances and of wars, (likewise two) of both marching and sitting quiet, and two (occasions for) seeking protection.

संध्यादीन्षडेव गुणान्द्विप्रकाराञ्जनीयादित्युत्तरविवक्षार्थम्॥१६२॥

समानयानकर्मा च विपरीतस्तथैव च।
तदात्वायतिसंयुक्तः संधिर्ज्ञेयो द्विलक्षणः॥१६३॥

An alliance which yields present and future advantages, one must know to be of two descriptions, (*viz.*) that when one marches together (with an ally) and the contrary (when the allies act separately).

तात्कालिकफललाभार्थमुत्तरकालीनफललाभार्थं वा यत्र राजान्तरेण सहान्यं प्रति यानादि कर्म क्रियते स समानयानकर्मा संधिः। यः पुनस्त्वमत्र याहि अहमत्र यास्यामीति सांप्रतिकोत्तरकालीनफलार्थितयैव क्रियते सोऽसमानयानकर्मेत्येवं द्विप्रकारः संधिर्ज्ञातव्यः॥१६३॥

स्वयंकृतश्च कार्यार्थमकाले काल एव वा।
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः॥१६४॥

War is decalred to be of two kinds, (*viz.*) that which

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

is undertaken in season or out of season, by oneself and for one's own purposes, and (that wages to avenge) an injury done to a friend.

शत्रुजयरूपप्रयोजनार्थं शत्रोर्व्यसनादिकमाकलय्य वक्ष्यमाणमार्गशीर्षादि-कालादन्यदा यथोक्तकाल एव वा स्वयंकृत इत्येको विग्रहः। अपकृतमपकारः मित्रस्यापकारे राजान्तरेण कृते मित्ररक्षणार्थमपरो विग्रह इत्येवं द्विविधो विग्रहः। गोविन्दराजेन तु "मित्रेण चैवापकृते" इति पठितं व्याख्यातं च-यः परस्य शत्रुः स विजिगीषोर्मित्रं तेनापकारे क्रियमाणे व्यसनिनि शत्राविति। "तस्माल्लिखित-पाठार्थौ वृद्धेगोविन्दराजतः। मेधातिथिप्रभृतिभिर्लिखितौ स्वीकृतौ मया॥" ॥१६४॥

एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया।
संहतस्य च मित्रेण द्विविधं यानमुच्यते॥१६५॥

Marching (to attack) is said to be twofold, (viz. that undertaken) by one alone when an urgent matter has sud-denly arisen, and (that undertaken) by one allied with a friend.

आत्ययिकं कार्यं शत्रोर्व्यसनादिकं तस्मिन्नकस्माज्जाते शक्तस्यैकाकिनो यानमशक्तस्य मित्रसहितस्येत्येवं यानं द्विविधमभिधीयते॥१६५॥

क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा।
मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम्॥१६६॥

Sitting quiet is stated tobe of two kinds, (*viz.* that in-cumbent) on one who has gradually been weakened by fate or in consequence of former acts, and (that) in favour of a friend.

प्राग्जन्मार्जितेन दुष्कृते ऐहिकेन वा पूर्वकृतेन क्रमशः क्षीणहस्त्यश्वकोशादिकस्य समृद्धस्यापि वा मित्रानुरोधेन तत्कार्यरक्षार्थमित्येवं द्विविधमासनं मुनिभिः स्मृतम्॥१६६॥

बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः॥१६७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

If the army stops (in one place) and its master (in another) in order to effect some purpose, of that is called by those acquainted with the virtues of the measures of royal policy, the twofold division of the forces.

साध्यस्वप्रयोजनसिध्यर्थं बलस्य हस्त्यश्वादेः सेनाधिपत्याधिष्ठितस्य एकत्र शत्रुनृपोपद्रववारणार्थमवस्थानमन्यत्र दुर्गदेशे राज्ञः कतिचिद्बलाधिष्ठितस्यावस्थानमेवं संध्यादिगुणषट्कोपकारज्ञैः द्विविधं द्वैधं कीर्त्यते ॥१६७॥

अर्थसंपादनार्थं च पीड्यमानस्य शत्रुभिः।
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः॥१६८॥

Seeking refuge is declared to be of two kinds, (first) for the purpose of attaining an advantage when one is harassed by enemies, (secondly) in order to become known among the virtuous (as the protege of a powerful king).

शत्रुभिः पीडष्टमानस्य शत्रुपीडानिवृत्त्याख्यप्रयोजनसिद्धयर्थम्, असत्यामपि वा तत्काले पीडायां भाविशत्रुपीडनशङ्कया अमुकमयं महाबलं नृपतिमाश्रित इति सर्वत्र व्यपदेशोत्पादनार्थं बलवन्तमुपाश्रयणमेवं द्विविधः संश्रयः स्मृतः॥१६८॥

यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीडां तदा संधिं समाश्रयेत्॥१६९॥

यदा युद्धोत्तरकाले निश्चितमात्मन आधिक्यं जानीयात्तदात्वे तत्कालेऽल्पधनाद्युपक्षयः तदा त्वल्पमन्नीकृत्यापि संधिमाश्रयेत्॥१६९॥

When (the king) knows (that) at some future time his superiority (is) certain, and (that) at the time present (he will suffer) little injury, then let him have recourse to peaceful measures.

यदा प्रकृष्टा मन्येत स्वास्तु प्रकृतीर्भृशम्।
अत्युच्छ्रितं तथात्मानं तदा कुर्वीत विग्रहम्॥१७०॥

But when he thinks all his subjects to be exceedingly contented. and (that he) himself (is) most exalted (in power),

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

then let him make war.

यदाऽमात्यादिकाः सर्वाः प्रकृतीर्दानसंमानाद्यैरतीव तुष्टा मन्येत आत्मानं च हस्त्यश्वकोशादिशक्तित्रयेणोपचितं तदा विग्रहमाश्रयेत् ॥१७० ॥

यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्।
परस्य विपरीतं च तदा यायाद्रिपुं प्रति ॥ १७१ ॥

When he knows his own army to be cheerful in disposition and strong, and (that) of his enemy the reverse, then let him march against his foe.

यदाऽऽत्मीयममात्यादिसैन्यं हर्षयुक्तं धनादिना पुष्टं तत्त्वतो जानीयात् शत्रोश्चामाल्यादिबलं विपरीतं तदा तं लक्षीकृत्य यायात् ॥१७१ ॥

यदा तु स्यात्परिक्षीणो वाहनेन बलेन च।
तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् ॥ १७२ ॥

But if he is very weak in chariots and beasts of burden and in troops, then let him carefully sit quiet, graudally conciliating his foes.

यदा पुनर्वाहनेन हस्त्यश्वादिना बलेन चामात्यादिविपत्त्यादिपरिक्षीणो भवेत्तदा शनैः शनैः सामोपदाप्रदानादिना शत्रून्प्रसान्त्वयन्प्रयत्नेनासमाश्रयेत् ॥१७२ ॥

मन्येतारिं यदा राजा सर्वथा बलवत्तरम्।
तदा द्विधा बलं कृत्वा साधयेत्कार्यमात्मनः ॥ १७३ ॥

When the king knows the enemy to be stronger in every respect, then let him divide his army and thus achieve his purpose.

यदा राजा सर्वप्रकारेण बलीयांसमशक्यसंधानं च शत्रुं बुध्येत्तदा कतिचिद्बलसहितः स्वयं दुर्गमाश्रयेत्। बलैकदेशेन च शत्रुविरोधमाचरेत्। एवं द्विधा बलं कृत्वा मित्रसंग्रहादिकं स्वकार्यं साधयेत् ॥१७३ ॥

यदा परबलानां तु गमनीयतमो भवेत्।
तदा तु संश्रयेत्क्षिप्रं धार्मिकं बलिनं नृपम् ॥ १७४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But when he is very easily assailable by the forces of the enemy, then let him quickly seek refuge with a righteous, powerful king.

यदा तु सैन्यानाममात्यादिप्रकृतिदोषादिनाऽतिशयेन ग्राह्यो भवति बलं द्वैधं विधाय दुर्गाश्रयणेनापि नात्मरक्षाक्षमस्तदा शीघ्रमेव धार्मिकं बलवन्तं च राजानमाश्रयेत् ॥१७४॥

कीदृशं तं बलवन्तमित्याह—

निग्रहं प्रकृतीनां च कुर्याद्योऽरिबलस्य च।
उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा॥१७५॥

That (prince) who will coerce both his (disloyal) subjects and the army of the foe, let him ever serve with every effort like a Guru.

यासां दोषेणासौ गमनीयतमो जातस्तासां प्रकृतीनां, यस्माच्च शत्रुबलादस्यभयमुत्पन्नं तयोर्द्वयोरपि यः संश्रितो निग्रहक्षमस्तं नृपं सर्वयत्नैगुरुमिव नित्यं सेवेत ॥१७५॥

यदि तत्रापि संपश्येद्दोषं संश्रयकारितम्।
सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत्॥१७६॥

When, even in that (condition), he sees (that) evil is caused by (such) protection, let him without hesitation have recourse to war.

अगतिको हि गतिः संश्रयो नाम। तत्रापि यदि संश्रयकृतं दोषं पश्येत्तदा निःसंशयो भूत्वा शोभनमेव युद्धं तस्मिन्काले समाचरेत्। दुर्बलेनापि बलवतो जयदर्शनान्निहतस्य च स्वर्गप्राप्तेः ॥१७६॥

सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः॥१७७॥

By all (the four) expedients a politic prince must arrange (matters so) that neither friends, nor neutrals, nor foes are superior to himself.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वैः सामादिभिरूपायैर्नीतिज्ञो राजा तथा यतेत, यथाऽस्य मित्रोदासीन-शत्रवोऽभ्यधिका न भवन्ति। आधिक्ये हि तेषामसौ ग्राह्यो भवति। धनलोभेन मित्रस्यापि शात्रवापत्तेः॥१७७॥

आयतिं सर्वकार्याणां तदात्वं च विचारयेत्।
अतीतानां च सर्वेषां गुणदोषौ च तत्त्वतः॥१७८॥

Let him fully consider the future and the immediate results of all undertakings, and the good and bad sides of all past (actions).

सर्वेषां कार्याणामल्पानां बहूनामप्यायतिमुत्तरकालं गुणं दोषं विचारयेत्। वर्तमानकालं च शीघ्रसंपादनाद्यर्थं विचारयेत्। अतीतानां च सर्वकार्याणां गुणदोषौ किमेषां कृतं विघटितं किं वावशिष्टमित्येवं यथावद्विचारयेत्॥१७८॥

यस्मात्—

आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः।
अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते॥१७९॥

He who knows the good and the evil (which will result from his acts) in the future, is quick in forming resolutions for the present, and understands the consequences of past (actions), will not be conquered.

यः कार्याणामागामिकगुणदोषज्ञः स गुणवत्कार्यमारभते दोषवत्परित्यजति। यश्च वर्तमानकाले क्षिप्रमेवावधार्य कार्यं करोति अतीते कार्ये यः कार्यशेषज्ञः स तत्कार्यसमाप्तौ तत्फलं लभते। यस्मादेवंविधकालत्रयसावधानत्वान्न कदाचिच्छत्रुभिरभि भूयते॥१७९॥

किं बहुना-

यथैनं नाभिसंदध्युर्मित्रोदासीनशत्रवः।
तथा सर्वं संविदध्यादेष सामासिको नयः॥१८०॥

Let him arrange everything in such a manner that no ally, no neutral or foe may injure him; that is the sum of political wisdom.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथैनं राजानं मित्रादय उक्ता न बाधेरंस्तथा सर्वसंविधानं कुर्यात्। इत्येष सांक्षेपिको नयो नीतिः॥१८०॥

यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः।
तदानेन विधानेन यायादरिपुरं शनैः॥१८१॥

But if the king undertakes an expedition against a hostile kingdom, then let him gradually advance, in the following manner, against his foe's capital.

यदा पुनः शक्तः सन् शत्रुराष्ट्रं प्रति यात्रामारभेत्तदाऽनेन वक्ष्यमाणप्रकारेण शत्रुदेशमत्वरमाणो गच्छेत्॥१८१॥

मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः।
फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम्॥१८२॥

Let the king undertake his march in the fine month Mārgasīrṣa, or towards the months of Phālguna and Caitra, according to the (condition of his) army.

यश्चतुरन्नबलोपेतो राजा करिरथादिगमनविलम्बेन विलम्बितप्रयाणस्तथा हैमन्तिकसस्यबहुलं च परराष्ट्रं जिगमिषुः समुपगमनाय शोभने मार्गशीर्षे मासि यात्रां कुर्यात्। यः पुनरश्वबलप्रायो नृपतिः क्षीघ्रगतिर्वा सर्वस्यबहुलं परराष्ट्रं यियासुः स फाल्गुने चैत्रे वा मासि स्वबलयोग्यकालानतिक्रमेण यायात्। अत एवमन्वर्थव्यापारपरं संक्षेपेण याज्ञवल्क्यवचनम्। "यदा सस्यगुणोपेतं परराष्ट्रं तदा व्रजेत्" (अ०२ श्लो० ३४८)॥१८२॥

अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम्।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः॥१८३॥

Even at other times, when he has a certain prospect of victory, or when a disaster has befallen his foe, he may advance to attack him.

उक्तकालव्यतिरिक्तेषु यदाऽऽत्मनो निश्चितं जयमवगच्छेत्तदा स्वबलयोग्यकाले ग्रीष्मादवपि हस्त्यश्वादिबलप्रायो विगृह्यैव यात्रां कुर्यात्। शत्रोश्चामात्यादिप्रकृतिगोचरदण्डपारुष्यादिव्यसने जातेऽरिपक्षभूतायां तत्प्रकृतावप्युक्तकालदन्यत्रापि यायात्॥१८३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कृत्वा विधानं मूले तु यात्रिकं च यथाविधि।
उपगृह्यास्पदं चैव चारान्सभ्यग्विधाय च॥१८४॥

But having duly arranged (all affairs) in his original (kingdom) and what relates to the expedition, having secured a basis (for his operations) and having duly dispatched his spies.

संशोध्य त्रिविधं मार्ग षड्विधं च बलं स्वकम्।
सांपरायिककल्पेन यायादरिपुरं शनैः॥१८५॥

Having cleared the three kingds of roads, and (having made) his sixfold army (efficient), let him leaisurely proceed in the manner prescribed for war fare against the enemy's capital.

मूले स्वीयदुर्गराष्ट्ररूपे पार्ष्णिग्राहसंविधानं प्रधानपुरुषाधिष्ठितरक्षार्थं सैन्यैकदेशस्थापनरूपं प्रतिविधानं कृत्वा यात्रोपयोगि च वाहनायुधवर्मयात्राविधानं यथाशास्त्रं कृत्वा परमण्डलगतस्य च येनास्यावस्थानं भवति तदुपगृह्य तदीयान्भृत्यपक्षानात्मसात्कृत्वा चारांश्च कापटिकादीन्शत्रुदेशवार्ताज्ञापनार्थं प्रस्थाप्य सम्यक्तया जाङ्गलानूपाटविकविषयभेदेन त्रिविधं पन्थानं मार्गं शोधिततरुगुल्मादिच्छेदनिम्नोन्नतादि समीकरणादिना संशोध्य तथा हस्त्यश्वरथपदातिसेनाकर्मकरात्मकं षड्विधं बलं यथोपयोगमाहारौषधसत्कारादिना संशोध्य सांपरायिकं संपरायः संग्रामस्तदुपचितविधिना शत्रुदेशमत्वरया गच्छेत्॥१८४॥१८५॥

शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः॥१८६॥

Let him be very much on his guard against a friend who secretly serves the enemy and against (dserters) who return (from the enemy's camp); for such (men are) the most dangerous foes.

यन्मित्रं गूढं कृत्वा शत्रुं सेवते, यश्च भृत्यादिः पूर्वं विरागाद्गतः पश्चादगतस्तयोः सावधानो भवेत्। यस्मात्तावतिशयेन दुर्निग्रहौ रिपुः॥१८६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥१८७॥

Let him march on his road, arraying (his troops) like a staff (*i.e.* in an oblong), or like a waggon (*i.e.* in a wedge), or like a boar (*i.e.* in a rhombus), or like a Makara (*i.e.* in two triangies, with the apices joined), or like a pin (*i.e.* in a long line), or like a Garuḍa (*i.e.* in a rohmboid with far-extened wings).

दण्डाकृतिव्यूहरचनादि दण्डव्यूहः। एवं शकटादिव्यूहा अपि। तत्राग्रे बलाध्यक्षो मध्ये राजा पश्चात्सेनापतिः पार्श्वयोर्हस्तिनस्तत्समीपे घोटकास्ततः पदातय इत्येवं कृतरचनो दीर्घः सर्वतः समविन्यासो दण्डव्यूहस्तेन तद्यातव्यं मार्गं सर्वतो भये सति यायात्। सूच्याकाराग्रः पश्चात्पृथुलः शकटव्यूहस्तेन पृष्ठते भये सति गच्छेत्। सूक्ष्ममुखपश्चाद्भागः पृथुमध्यो वराहव्यूहः। एष एव पृथुतरमध्यो गरुडव्यूहस्ताभ्यां पार्श्वयोर्भये सति व्रजेत्। वराहविपर्ययेण मकरव्यूहस्तेनाग्रे पश्चाचोभयत्र भये सति गच्छेत्। पिपीलिकापङ्क्तिरिवाग्रपश्चाद्भावेन संहतरूपतया यत्र यत्र सैनिकावस्थानं स शीघ्रप्रवीरपुरुषपमुखः सूचीव्यूहस्तेनाग्रतोभये सति यायात्॥१८७॥

यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम्।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्॥१८८॥

From whatever (side) he apprehends danger, in that (direction) let him extend his troops, and let him always himself encamp in an array, shaped like a lotus.

यस्या दिशः शत्रुभयमाशङ्केत तस्यामेव बलं विस्तारयेत्समविस्तृत-परिमण्डलो मध्योपविष्टजिगीषुः पद्मव्यूहस्तेन पुरान्निर्गत्य सर्वदा कपटनिवेशनं कुर्यात्॥१८८॥

सेनापतिबलाध्यक्षौ सर्वदिक्षु निवेशयेत्।
यतश्च भयमाशङ्केत्प्राचीं तां कल्पयेद्दिशम्॥१८९॥

Let him allot to the commander-in-chief, to the (subordinate) general, (and to the superior officers) places in

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

all directions, and let him turn his front in that direction whence he hears danger.

हस्त्यश्वरथपदात्यात्मकस्यान्नदशकस्यैकः पतिः कार्यः स च पत्तिक उच्यते। पत्तिकदशकस्यैकः पतिः सेनापतिरुच्यते। तद्दशकस्यैक सेनानायकः स एव च बलाध्यक्षः। सेनापतिबलाध्यक्षौ समस्तासु दिक्षु संघर्षयुद्धार्थं नियोजयेत्। यस्माश्च दिशो यदा भयमाशङ्केत्तदा तामग्रे दिशं कुर्यात्॥१८९॥

गुल्मांश्च स्थापयेदाप्तान्कृतसंज्ञान्समन्ततः।
स्थाने युद्धे च कुशलानभीरूनविकारिणः॥१९०॥

On all sides let him place troops of soldiers, on whom he can rely, with whom signals have been arranged, who are expert both in sustaining a charge and in charging, fearless and loyal.

गुल्मान्सैन्यैकदेशानाप्तपुरुषाधिष्ठितान् स्थानापसरणयुद्धार्थंकृतभेरीपटह-शङ्खादिसंकेतान् अवस्थानयुद्धयोः प्रवीणान्निर्भयानव्यभिचारिणः सेनापतिबला-ध्यक्षान्दूरतः सर्वदिक्षु पारक्यप्रवेशवारणाय शत्रुचेष्टापरिज्ञानाय च नियोजयेत्॥१९०॥

संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून्।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत्॥१९१॥

Let him make a small number of soldiers fight in close order, at his pleasure let him extend a large number in loose ranks; or let him make them fight, arranging (a small number) in the needlearray, (and a large number) in the thunderbolt-array.

अल्पान्योधान्संहतान्कृत्वा बहून्पुनर्यथेष्टं विस्तारयेत्। सूच्या पूर्वोक्तया वज्राख्येन व्यूहेन त्रिधा व्यवस्थितबलेन रचयित्वा योधान्योधयेत्॥१९१॥

स्यन्दनाश्वैः समे युद्धयेदनूपे नौद्विपैस्तथा।
वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले॥१९२॥

On even ground let him fight with chariots and horses, in water-bound places with boats and elephants, on (ground)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

covered with trees and shrubs with bows, on hilly ground with swords, targets, (and other) weapons.

समभूभागे रथाश्वेन युध्येत। तत्र तेन युद्धसामर्थ्यात्तथानुगतोदके नौकाहस्तिभिः। तरुगुल्मावृते धन्विभिर्गर्तकण्टकपाषाणादिरहितस्थले खड्गफलकुन्ताद्यैरायुधैर्युद्धयेत ॥१९२॥

कुरुक्षेत्रांश्च मत्स्यांश्च पञ्चालान्शूरसेनजान्।
दीर्घाल्लघूंश्चैव नरानग्रानीकेषु योजयेत्॥१९३॥

(Men born in) Kurukshetra, Matsayas, Pañcālas, and those born in Śūrasena, let him cause to fight in the van of the battle, as well as (others who are) tall and light.

कुरुक्षेत्रभवान्, मत्स्यान्विराटदेशनिवासिनः, पञ्चलान्कान्यकुब्जाहिच्छत्रोद्भवान्, शूरसेनजान्माथुरान्, प्रायेण पृथुशरीरशौर्याहंकारयोगान्सेनाग्रे योजयेत्। तथान्यदेशोद्भवानपि दीर्घलघुदेहान्मनुष्यान्युद्धाभिमानिनः सेनाग्र एव योजयेत्॥१९३॥

प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक्परीक्षयेत्।
चेष्टाश्चैव विजानीयादरीन्योधयतामपि॥१९४॥

After arranging his troops, he should encourage them (by an address) and carefully inspect them; he should also mark the behaviour (of the soldiers) when they engage the enemy.

बलं रचयित्वा जये धर्मलाभः अभिमुखहतस्य स्वर्गप्राप्तिः पलायने तु प्रभुदुरितग्रहणं नरकगमनं चेत्याद्यर्थवादैर्युद्धार्थं प्रोत्साहयेत्। तांश्च योधान्केनाभिप्रायेण हृष्यन्ति कुप्यन्ति वेति परीक्षयेत्। तथा योधानामरिभिः सह युध्यमानानामपि सोपध्यनुपधिचेष्टा बुद्ध्येत ॥१९४॥

उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत्।
दूषयेचास्य सततं यवसान्नोदकेन्धनम्॥१९५॥

When he has shut up his foe (in a town), let him sit encamped, harass his kingdom, and continually spoil his grass, food, fuel, and water.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दुर्गाश्रयमदुर्गाश्रयं वा रिपुमयुध्यमानमप्यावेष्टयासीत। अस्य च देशमुत्सादयेत्। तथा घासान्नोदकेन्धनानि सर्वदाऽस्यापद्रव्यसंमिश्रणादिना दूषयेत्॥१९५॥

भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥१९६॥

Likewise let him destroy the tanks, ramparts, and ditches, andlet him assail the (foe unawares) and alarm him at night.

शत्रोरुपजीव्यानि तडागादीनि नाशयेत्, तथा दुर्गप्राकारदीन्भिन्द्यात्, तत्परिखाश्च पूरणादिना निरुदकाः कुर्यात्। एवं च शत्रूनशङ्कितमेव सम्यगवस्कन्दयेत्तथा शक्तिं गृह्णीयात्। रात्रौ च ढक्काकाहलिकादिशब्देन वित्रासयेत्॥१९६॥

उपजप्यानुपजपेद्बुद्धयेतैव च तत्कृतम्।
युक्ते च दैवे युयेत जयप्रेप्सुरपेतभीः॥१९७॥

Let him instigate to rebeliion those who are open to such instigations, let him be informed of his (foe's) doings, and, when fate is propitious, let him fight without fear, trying to conquer.

उपजापार्हान् रिपुवंश्यान् राज्यार्थिनः क्षुब्धानमात्यादींश्च भेदयेत्। उपजापेनात्मीयकृतां च तेषां चेष्टां जानीयात्। शुभग्रहदशादिना शुभफलयुक्ते दैवेऽवगते निर्भयो जयेप्सुर्युध्येत॥१९७॥

साम्ना दानेन भेदेन समस्तैरथवा पृथक्।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन॥१९८॥

He should (however) try to conquer his foes by conciliation, by (well-applied) gifts, andby creating dissension, used either separately or conjointly, never by fighting, (if it can be avoided.).

प्रीत्यादरदर्शनहितकथनाद्यात्मकेन साम्ना हस्त्यश्वरथहिरण्यादीनां च दानेन

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्प्रकृतीनां तदनुयायिनां च राज्यार्थिना भेदेन। एतैःसमस्तैर्व्यस्तैर्वा यथासामर्थ्यमरीञ्जेतुं यत्नं कुर्यान्न पुनः कदाचिद्युद्धेन ॥१९८॥

अनित्यो विजयो यस्मादृश्यते युध्यमानयोः।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत्॥१९९॥

For when two (princes) fight, victory and defeat in the batle are, as experience teaches, uncertain; let him therefore avoid an engagement.

यस्माद्युध्यमानयोर्बहुलबलत्वाद्यल्पबलत्वाद्यनपेक्षमेवानियमेनजय-पराजयौ दृश्येते तस्मात्सत्युपायान्तरे युद्धं परिहरेत्॥१९९॥

त्रयाणामप्युपायानां पूर्वोक्तानामसम्भवे।
तथा युद्धयेत संपन्नो विजयेत रिपून्यथा॥२००॥

(But) if even those three before-mentioned expendients fail, then let him duly exerting himself, fight in such a manner that he may completely conquer his enemies.

पूर्वोक्तानां त्रयाणामपि सामादीनामुपायानामसाधकत्वे सति जयपराजय-संदेहेऽपि तथा प्रयत्नवान्सम्यग्युध्येत। तथा शत्रूञ्जयेत्। यतो जयेऽर्थलाभोऽभिमुखमरणे च स्वर्गप्राप्तिः। निःसंदिग्धे तु पराजये युद्धादपसरणं साधीयः। यथा वक्ष्यति "आत्मानं सततं रक्षेत्" (अ०७ श्लो०२१३) इति मेधातिथिगोविन्दराजौ॥२००॥

जित्वा संपूजयेद्देवान्ब्राह्मणांश्चैव धार्मिकान्।
प्रदद्यात्परिहारांश्च ख्यापयेदभयानि च॥२०१॥

When he has gained victory, let him duly worship the gods and honour righteous Brāhmaṇas, let him grant exemptions, and let him cause promises of safety to be proclaimed.

परराष्ट्रं जित्वा तत्र ये देवास्तान्धर्मप्रधानांश्च ब्राह्मणान्भूमि-सुवर्णादिदानसम्मानादिभिः पूज्येत्। जितद्रव्यैकदेशदानादिनैव चेदं पूजनम्। तदाह याज्ञवल्क्यः- "नातः परतरो धर्मो नृपाणां यद्रणार्जितम्। विप्रेभ्यो दीयते

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्रव्यं प्रजाभ्यश्चाभयं सदा" (अ०१ श्लो०३२३)। तथा देवब्राह्मणार्थं मयैतद्दत्तमिति तद्देशवासिनां परिहारान्दद्यात्। तथा स्वामिभक्त्या यैरस्माकमपकृतं तेषां मया क्षान्तमिदानीं निर्भयाः सन्तः सुखं स्वव्यापारमनुतिष्ठन्त्वित्यभयानि ख्यापयेत्॥२०१॥

सर्वेषां तु विदित्वैषां समासेन चिकीर्षितम्।
स्थापयेत्तत्र तद्वंश्यं कुर्याच्च समयक्रियाम्॥२०२॥

But having fully ascertained the wishes of all the (conquered), let him place there a relative of the (vanquished ruler on the throne), and let him impose his conditions.

येषां शत्रुनृपामात्यानां सर्वेषामेव संक्षेपतोऽभिप्रायं ज्ञात्वा तस्मिन्राष्ट्रे बलनिहतराजवंश्यमेव राज्येऽभिषेचयेत्। इदं कार्यं त्वया, इदं नेति तस्य तदमात्यानां च नियमं कुर्यात्॥२०२॥

प्रमाणानि च कुर्वीत तेषां धर्म्यान्यथोदितान्।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह॥२०३॥

Let him make authoritative the lawful (customs) of the (inhabitants), just as they are stated (to be), and let him honour the (new king) and his chief servants with precious gifts.

तेषां च परकीयानां धर्मादनपेतानाचारान्देशधर्मतया शास्त्रेणाभ्युपेतान्प्रमाणीकुर्यात्। एनं चाभिषिक्तममात्यादिभिः सह रत्नादिदानेन पूजयेत्॥२०३॥

आदानमप्रियकरं दानं च प्रियकारकम्।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते॥२०४॥

The seizure of desirable property which causes displeasure, and its distribution which causes pleasure, are both recommendable, (if they are) resorted to at the proper time.

यद्यप्यभिलषितानां द्रव्याणां ग्रहणमप्रियकरं दानं च प्रियकारकमित्युत्सर्गस्तथापि समयविशेषे दानमादानं च प्रशस्यते। तस्मात्तस्मिन्काल एवं पूजयेत्॥२०४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वं कर्मेदमायत्तं विधाने दैवमानुषे।
तयोर्दैवमचिन्त्यं तु मानुषे विद्यते क्रिया॥२०५॥
[दैवेन विधिना युक्तं मानुष्यं यत्प्रवर्तते।
परिक्लेशेन महता तदर्थस्य समाधकम्॥१४॥
संयुक्तस्यापि दैवेन पुरुषकारेण वर्जितम्।
विना पुरुषकारेण फलं क्षेत्रं प्रयच्छति॥१५॥
चन्द्रार्काद्या ग्रहा वायुरग्निापस्तथैव च।
इह दैवेन साध्यन्ते पौरुषेण प्रयत्नतः॥१६॥

All undertakings (in) this (world) depend both on the ordering of fate and on human exertion; but among these two (the ways of) fate are unfathomable; in the case of man's work action is possible.

यत्किंचित्संपाद्यं तत्प्राग्जन्मार्जितसुकृतदुष्कृतरूपे कर्मणि दैवशब्दाभिधेये, तथेहलोकार्जितमानुषशब्दवाच्ये व्यापारे आयत्तं, तयोर्मध्ये दैवं चिन्तयितुमशक्यम्। मानुषे तु पर्यालोचनमस्ति। अतो मानुषद्वारेणैव कार्यसिद्धये यतितव्यम्॥२०५॥

सह वापि व्रजेद्युक्तः संधि कृत्वा प्रयत्नतः।
मित्रं हिरण्यं भूमिं वा संपश्यंस्त्रिविधं फलम्॥२०६॥

Or (the king, bent on coquest), considering a friend, gold, and land (to be) the triple result (of an expedition), may, using diligent care, make peace with (his foe) and return (to his realm).

एवमुपक्रमणीयेन शत्रुणा युद्धं कार्यम्। यदि वा स एव मित्रं तेन च दत्तं हिरण्यं भूम्येकदेशो वाऽर्पितं एतत्त्रयं यात्राफलम्। तेन सह सधिं कृत्वा यत्नवान्व्रजेत्॥२०६॥

पार्ष्णिग्राहं च संप्रेक्ष्य तथाक्रन्दं च मण्डले।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात्॥२०७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Having paid due attanetion to any king in the circle (of neighbouring states) who might attack him in the rear, and to his supporter who opposes the latter, let (the conqueror) secure the fruit of the expedition from (the prince whom he attacks), whether (he may have become) friendly or (remained) hostile.

विजिगीषोररिं प्रति निर्यातस्य यः पृष्ठवर्ती नृपतिर्देशाक्रमणाद्यचरति स पार्ष्णिग्राहस्तस्य तथा कुर्वतो यो नियामकस्तस्यानन्तरो नृपतिः स आक्रन्दस्तावपेक्ष्य यातव्यम्। मित्रीभूतादमित्राद्वा यात्राफलं गृह्णीयात्। तावनपेक्ष्य गृह्णन्कदाचितत्कृतेन दोषेण गृह्यते ॥२०७॥

हिरण्यभूमिसंप्राप्त्या पार्थिवो न तथैधत।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम्॥२०८॥

By gaining gold and land a king grows not so much in strength as by obtining a firm friend, (who), though weak, (may become) powerful in the future.

सुवर्णभूमिलाभेन तथा राजा न वृद्धिमेति यथेदानीं कृशमप्यागामिकाले वृद्धियुतं स्थिरं मित्रं लब्ध्वा वर्धते ॥२०८॥

धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिमेव च।
अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते॥२०९॥

A weak friend (even) is greatly commended, who is righteous (and) grateful, whose people are contented, who is attached and persevering in his undertakings.

धर्मज्ञं, कृतोपकारस्य स्मर्तृ, सानुरागमनुरक्तं, स्थिरकार्यारम्भं, प्रीतिमत्प्रकृतिकं यत्तन्मित्रमतिशयेन शस्यते ॥२०९॥

प्राज्ञं कुलीनं शूरं च दक्षं दातारमेव च।
कृतज्ञं धृतिमन्तं च कष्टमाहुररिं बुधाः॥२१०॥

The wise declare him (to be) a most dangerous foe, who is wise, of noble race, brave, clever, liberal, grateful, and firm.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विद्वांस, महाकुलं, विक्रान्तं, चतुरं, दातारं, उपकारस्मर्तारं, सुखदुःखयोरेकरूपं शत्रुं दुरुच्छेदं पण्डिता वदन्ति। तेनैवंविधशत्रुणा सह संधातव्यम्॥२१०॥

आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता।
स्थौललक्ष्यं च सततमुदासीनगुणोदयः॥२११॥

Behaviour worthy of an Āryan, knowledge of men, bravery, a compassionate disposition, and great liberality are the virtues of a neutral (who may be courted).

साधुत्वं पुरुषविशेषज्ञता, विक्रान्तत्वं, कृपालुत्वं, सर्वदा च स्थौललक्ष्यं बहुप्रदत्वम्। अतएव "स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे" (अमरकोषे विशेष्यनिघ्रे श्लो०६) इत्याभिधानिकाः। स्थौललक्ष्यमर्थेऽसूक्ष्मदर्शित्वमिति तु मेधातिथिगोविन्द राजयोः पदार्थकथनमनागमम्, एतदुदासीनगुणसामग्र्यं तस्मादेवंविधमुदासीनमाश्रित्योक्तलक्षणेनाप्यरिणा सह योद्धव्यम्॥२११॥

क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन्॥२१२॥

Let the king, without hesitation, quite for his own sake even a country (which is) salubrious, fertile, and causing an increase of cattle.

अनामयादिकल्याणक्षमामपि, नदीमातृकतया सर्वदा सर्वसस्यप्रदामपि, प्रचुरतृणादियोगात्पशुवृद्धिकरीमपि भूमिमात्मरक्षार्थमविलम्बमानो राजा निजरक्षाप्रकारान्तराभावात्परित्यजेत्॥२१२॥

यस्मात्सर्वविषयोऽयं धर्मः स्मर्यते-

आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥२१३॥

For times of need let him preserve his wealth; at the expense of his wealth let him preserve his wife; let him at all events preserve himself even by (giving up) his wife and his wealth.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आपन्निवारणार्थं धनं रक्षणीयम्। धनपरित्यागेनापि दारान्रक्षेत्। आत्मानं पुनः सर्वदा दारधनपरित्यागेनापि रक्षेत्। "सर्वत एवात्मानं योपायीत" इति श्रुत्या शास्त्रीयमरणव्यतिरेकेणात्मरक्षेत्युपदेशात्॥२१३॥

सह सर्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम्।
संयुक्तांश्च वियुक्तांश्च सर्वोपायान् सृजेद्बुधः॥२१४॥

A wise (king), seeing that all kinds of misfourtunes violently assail him at the same time, should try all (the four) expedients, be it together or separately, (in order to save himself).

कोशक्षयप्रकृतिकोशमित्रस्य व्यसनादिकाः सर्वा आपदो युगपदतिशयेनात्पन्ना ज्ञात्वा न मोहमुपेयात्। अपि तु व्यस्तान्समस्तान्वा सामादीनुपायान्शास्त्रज्ञः संप्रयुञ्जीत॥२१४॥

उपेतारमुपेयं च सर्वोपायांश्च कृत्स्नशः।
एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये॥२१५॥

On the person who employs the expedients, on the business to be accomplished, and on all the expedients collectively, on these three let him ponder and strive to accomplish his ends.

उपेतारमात्मानं, उपेयं प्राप्तव्यं, उपायाः, सामादयः सर्वे ते च परिपूर्णा एतत्त्रयमवलम्ब्य यथासामर्थ्यं प्रयोजनसिद्धये यत्नं कुर्यात्॥२१५॥

एवं सर्वमिदं राजा सह संमन्त्र्य मन्त्रिभिः।
व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तः पुरं विशेत्॥२१६॥

Having thus consulted with his ministers on all these (matters), having taken exercise, and having bathed afterwards, the king may enter the harem at midday in order to dine.

एवममुक्तप्रकारेण सर्वराजवृत्तं मन्त्रिभिः सह विचार्य अनन्तरमायुधाभ्यासादिना व्यायामं कृत्वा मध्याह्ने स्नानादिकं माध्याह्निकं कृत्यं निर्वाह्य भोक्तुमन्तःपुरं विशेत्॥२१६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः॥२१७॥

There he may eat food, (which has been prepared) by faithful, incorruptible (servants) who know the (proper) time (for dining), which has been well examined (and hallowed) sacred texts that destroy poison.

तत्रान्तःपुर आत्मतुल्यैर्भोजनकालवेदिभिरभेद्यैः सुपकारादिभिः कृतं सुष्ठु च परीक्षितं चकोरादिदर्शनेन। सविषमन्नं दृष्ट्वा चकोराक्षिणी रक्ते भवतः। विषापहैर्मन्त्रैर्जपितमन्नमद्यात्॥२१७॥

विषघ्नैरगदैश्चास्य सर्वद्रव्याणि योजयेत्।
विषघ्नानि च रत्नानि नियतो धारयेत्सदा॥२१८॥

Let him mix all his food with medicines (that are) antidotes against poison, and let him always be careful to wear gems which destroy poison.

विषनाशिभिरौषधैः सर्वाणि भोज्यद्रव्याणि योजयेत्। विषहरणानि च रत्नानि यत्नवान्सर्वदा धारयेत्॥२१८॥

परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनः।
वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः॥२१९॥

Well-tried feamles whose toilet and ornaments have been examined, shall attentively serve him with fans, water, and perfumes.

स्त्रियश्च गूढचारद्वारेण कृतपरीक्षा गुप्तायुधग्रहणविषलिप्ताभरण-धारणशङ्कया निरूपितवेषाभरणो अनन्यमनसः चामरस्नानपानाद्युदकधूपनैरेनं राजानं परिचरेयुः॥२१९॥

एवं प्रयत्नं कुर्वीत यानशय्यासनाशने।
स्नाने प्रसाधने चैव सर्वालंकारकेषु च॥२२०॥

In like manner let him be careful about his carriages, bed, seat, bath, toilet and all his ornaments.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एवंविधपरीक्षादिप्रयत्नं वाहनशय्यासनाशनस्नानानुलेपनेषु सर्वेषु चालङ्करणार्थेषु कुर्यात्॥२२०॥

भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह।
विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत्॥२२१॥

When he has dined, he may divert himself with his wives in the harem; but when he has diverted himself, he must, in due time, again think of the affairs of state.

कृतभोजनश्च तत्रैवान्तःपुरे भार्याभिः सह क्रीडेत्। कालानतिक्रमेण च सप्तमे दिवसस्य भागे तत्र विहृत्याष्टमे भागे पुनः कार्याणि चिन्तयेत्॥२२१॥

अलंकृतश्च संपश्येदायुधीयं पुनर्जनम्।
वाहनानि च सर्वाणि शस्त्राण्याभरणानि च॥२२२॥

Adorned (with his robes of state), let him again inspect his fighting men, all his chariots and beasts of burden, the weapons and accoutrements.

कृतालङ्कारः सन्नायुधजीविनं, वाहनानि हस्त्यादीनि, सर्वाणि च शस्त्राणि खड्गादीनि, अलङ्काररचनादीनि च पश्येत्॥२२२॥

संध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत्।
रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम्॥२२३॥

Having performed his twilight-devotions, let him, well armed, hear in an inner apartment the doings of those who make secret reports and of his spies.

गत्वा कक्षान्तरं त्वन्यत्समनुज्ञाप्य तं जनम्।
प्रविशेद्भोजनार्थं च स्त्रीवृतोऽन्तःपुरं पुनः॥२२४॥

But going to another secret apartment and dismissing those people, he may enter the harem, surrounded by female (servants), in order to dine again.

ततः संध्योपासनं कृत्वा तस्मात्प्रदेशात्कक्षान्तरं विविक्तप्रकोष्ठावकाशमन्यद् गत्वा गृहाभ्यन्तरे धृतशस्त्रो रहस्याभिधायिनां चराणां स्वव्यापारां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शृणुयात्। ततस्तं चरं संप्रेष्य परिचारिकास्त्रीवृतः पुनर्भोक्तुमन्तरःपुरं विशेत्॥२२३॥२२४॥

तत्र भुक्त्वा पुनः किंचित्तूर्यघोषैः प्रहर्षितः।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः॥२२५॥

Having eaten there something for the second time, and having been recreated by the sound of music, let him go to rest and rise at the proper time free from fatigue.

तत्रान्तःपुरे वादित्रशब्दैः श्रुतिसुखैः प्रहर्षितः पुनः किंचिद्भुक्त्वा नातितृप्तः कालानतिक्रमेण गतार्धप्रहरायां रात्रौ स्वप्यात्। ततो रात्रेः पश्चिमयामे च विश्रान्तः सन्नुत्तिष्ठेत्॥२२५॥

एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः।
अस्वस्थः सर्वमेतत्तु भृत्येषु विनियोजयेत्॥२२६॥

A king who is in good health must observe these rules; but, it he is indisposed, he may entrust all this (business) to his servants.

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां सप्तमोऽध्यायः॥७॥

एतद्यथोक्तप्रकारप्रजारक्षणादिकं नीरोगो राजा स्वयमनुतिष्ठेत्। अस्वस्थः पुनः सर्वमेतद्योग्यश्रेष्ठामात्येषु समर्पयेत्॥२२६॥

इति श्री कुलूकभट्टकृतायां मन्वर्थमुक्तावल्यां मनुवृत्तौ सप्तमोऽध्यायः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अष्टमोऽध्यायः

व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम्॥ १ ॥

A king, desirous of investigating law cases, must enter his court of justice, preserving a disgnified demeanour, together with Brāhmaṇas and with experienced councillors.

एवंविधविपक्षमहीद्विषः प्रजानां रक्षणादवाप्तवृत्तिस्तासामेवेतरेतरविवादजपीडापरिहारार्थं, ऋणादानाद्यष्टादशविवादे विरुद्धार्थार्थिप्रत्यर्थिवाक्यजनितसंदेहहारी विचार एव व्यवहारः। तदाह कात्यायनः-"विनानार्थेऽवसंदेहे हरणं हार उच्यते। नानासंदेहहरणाद्व्यवहार इति स्मृतः"। तान्व्यवहारान्द्रष्टुमिच्छन्पृथिवीपतिर्वक्ष्यमाणलक्षणलक्षितैर्ब्राह्मणैरमात्यैश्च सप्तमाध्यायोक्तपञ्चाङ्गमन्त्रैः सह विनीतो वाक्पाणिपादचापञ्चाविरहादनुद्धतः। अविनीते हि नृपे वादिप्रतिवादिनां प्रतिभाक्षयादसम्यगभिधाने तत्त्वनिर्णयो न स्यात्। तादृशो वक्ष्यमाणां सभां प्रविशेत्। व्यवहारदर्शनं चेदं प्रजानामितरेतरपीडायां तत्त्वनिर्णयेन रक्षणार्थं वक्ष्यमाणदृष्टा- दृष्टार्थकरणफलेनैव फलवत्॥१ ॥

तत्रासीनः स्थितो वाऽपि पाणिमुद्यम्य दक्षिणम्।
विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणाम्॥ २ ॥

There, either seated or standing, raising his right arm, without ostentation in his dresss and ornaments, let him examine the business of suitors.

तस्यां च सभायां कार्यगौरवापेक्षायामुपविष्टो, लघुनि कार्ये उत्थितोऽपि वा। पाणिशब्दो बाहुपरः दक्षिणपाणिमुद्यम्यानुद्धतवेषालंकारः पूर्वत्रश्लोक इन्द्रियानौद्धत्यमुक्तं, तादृशः कार्याणि विचारयेत्॥२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः।
अष्टादशसु मार्गेषु निबद्धानि पृथक्पृथक्॥३॥
[हिंसां यः कुरुते कश्चिद्देयं वा न प्रयच्छति।
स्थाने ते द्वे विवादस्य भिन्नोऽष्टादशधा पुनः॥१॥]

Daily (deciding) one after another (all cases) which fall under the eighteen titles (all cases) according to principles drawn from local usages and from the Institutes of the sacred law.

तानि च ऋणादानादीनि कार्याण्यष्टादशसु व्यवहारमार्गेषु विषयेषु पठितानि देशजातिकुलव्यवहारावगतैः शास्त्रावगतैः साक्षिद्रव्यादिभिर्हेतुभिः पृथक्पृथक् प्रत्यहं विचारयेत्॥३॥

तान्येवाष्टादश गणयति–

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।
संभूय च समुत्थानं दत्तस्यानपकर्म च॥४॥

Of those (titles) the first is the non-payment of debts, (then follow), (2) deposit and pledge, (3) sale without ownership, (4) concerns among partners, and (5) resumption of gifts).

वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः॥५॥

सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च॥६॥

(10) Disputes regarding boundaries, (11) assault and (12) defamation, (13) theft, (14) robbery and violence, (15) adultery.

स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह॥७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(16) Duties of man and wife, (17) partition (of inheritance), (18) gambling andbetting; these are in this world the eighteen topics which give rise to lawsuits. 7

तेषामष्टादशानां मध्ये आदाविह ऋणादानं विचार्यते। तस्य स्वरूपमुक्तं नारदेन-"ऋणं देयमदेयं च येन यत्र यथाच यत्। दानग्रहणधर्माश्च तदृणादानमुच्यते"। ततश्च स्वधनस्यान्यस्मिन्नर्पणरूपो निक्षेपः अस्वामिना च कृतो विक्रयः। संभूय वणिगादीनां क्रियानुष्ठानम्। दत्तस्य धनस्यापात्रबुध्या क्रोधादिना वा ग्रहणम्। कर्मकरस्य भृतेरदानम्। कृतव्यवस्थातिक्रमः। क्रयविक्रये च कृते पश्चात्तापाद्विप्रतिपत्तिः। स्वामिपशुपालयोर्विवादः। ग्रामादिसीमाविप्रतिपत्तिः। वाक्पारुष्यमाक्रोशनादि। दण्डपारुष्यं ताडनादि। स्तेयं निह्नवेन धनग्रहणम्। साहसं प्रसह्य धनहरणादि। स्त्रियाश्च परपुरुषसंपर्कः। स्त्रीसहितस्य पुंसो धर्मे व्यवस्था। पैतृकादिधनस्य च विभागः। अक्षादिक्रीडापणव्यवस्थापनपूर्वकम्। पक्षिमेषादिप्राणियोधनम्। इत्येवमष्टादश एतानि व्यवहारप्रवृत्तेः स्थानानि समाह्वयस्य प्राणिद्यूतरूपत्वेन द्यूतावान्तरविशेषत्वादष्टादशसंख्योपपत्तिः ॥४ ॥५ ॥६ ॥७ ॥

एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम्।
धर्मं शाश्वतमाश्रित्य कुर्यात्कार्यविनिर्णयम् ॥८ ॥

Depending on the eternal law, let him decide the suits of men who mostly contend on the titles just mentioned.

एष्वृणादानादिषु व्यवहारस्थानेषु बाहुल्येन विवादं कुर्वतां मनुष्याणामनादिपारंपर्यागतत्वेन नित्यं धर्ममवलम्ब्य कार्यनिर्णयं कुर्यात्। भूयिष्ठशब्देनान्यान्यपि विवादपदानि सन्तीति सूचयति। तानि च प्रकीर्णकशब्देन नारदाद्युक्तानि। अतएव नारदः-"न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णकम्" इति ॥८ ॥

यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम्।
तदा नियुज्याद्विद्वांस ब्राह्मणं कार्यदर्शने ॥९ ॥

But if the king does not personally investigate the suits, then let him appoint a learned Brāhmaṇa to try them.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यदा कार्यान्तराकुलतया रोगादिना वा राजा स्वयं कार्यदर्शनं न कुर्यात्तदा तद्दर्शनार्थं कार्यदर्शनाभिज्ञं ब्राह्मणं नियुञ्जीत ॥९॥

सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः।
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा॥१०॥

That (man) shall enter that most excellent court, accompanied by three assessors, and fully consider (all) causes (brought) before the (king), either sitting down or standing.

स ब्राह्मणोऽस्य राज्ञो द्रष्टव्यानि कार्याणि त्रिभिर्ब्राह्मणैः सभायां साधुभिर्धार्मिकैः कार्यदर्शनाभिज्ञैर्वृतस्तामेव सभां प्रविश्योपविश्य स्थितो वा नतु चंक्रम्यमाणस्तस्य चित्तव्याक्षेपसंभवत्वात्तादृशऋणादानादीनि कार्याणि पश्येत् ॥१०॥

यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः।
राज्ञश्चाधिकृतो विद्वान्ब्रह्मणस्तां सभां विदुः॥११॥

Where three Brāhmaṇas versed in the Vedas and the learned (judge) appointed by the king sit down they call that the court of (four-faced) Brāhmaṇ.

यस्मिंस्थाने ऋग्यजुःसामवेदिनस्त्रयोऽपि ब्राह्मणा अवतिष्ठन्ते, राज्ञाधिकृतश्च विद्वान्ब्राह्मण एव प्रकृतत्वादवतिष्ठते, तां सभां चतुर्मुखसभामिव मन्यन्ते ॥११॥

धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते।
शल्यं चास्य न कृन्तन्ति विद्धास्तत्र सभासदः॥१२॥

But where justice, wounded by injustice, approaches and the judges do not extract the dart, there (they also) are wounded (by that dart of injustice).

भाः प्रकाशस्तया सह वर्तत इति विद्वत्संहतिरेवात्र सभाशब्देनाभिमता। यत्र देशे सभां विद्वत्संहतिरूपां धर्मः सत्याभिधानजन्योऽनृताभिधानजन्येनाधर्मेणो पीडित आगच्छति अर्थिप्रत्यर्थिनोर्मध्ये एकस्य सत्याभिधानादपरस्य मृषावादात्ते च सभासदोऽस्य धर्मस्य पीडाकरत्वाच्छल्यमिवाधर्मं नोद्धरन्ति तदा ते एव तेनाधर्मशल्येन विद्धा भवन्ति ॥१२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम्।
अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी॥१३॥

Either the court must not be entered, or the truth must be spoken; a man who either says nothing or speaks falsely, becomes sinful.

सभामवगम्य व्यवहारार्थं तत्प्रवेशो न कर्तव्यः। पृष्टश्चेत्तदा सत्यमेव वक्तव्यम्। अन्यथा तूष्णीमवतिष्ठमानो मृषा वा वदन्नुभयथापि सद्यः पापी भवति। मेधातिथिना तु ''सभा वा न प्रवेष्टव्या'' इति ऋज्वेव पठितम्॥१३॥

यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः॥१४॥

Where justice is destroyed by injustice, or truth by falsehood, while the judges look on, there they shall also be destroyed.

यस्यां सभायामर्थिप्रत्यर्थिभ्यामधर्मेण धर्मो न दृश्यते। यत्र च साक्षिभिः सत्यमनृतेन नाश्यते सभासदां प्रेक्षमाणानां तानादृत्य ते प्रतीकारक्षमा न भवन्तीत्यर्थः। ''षष्ठी चानादरे'' (पा.सू. २/३/३८) इत्यनेन षष्ठी। तत्र त एव सभासदस्तेन पापेन हता भवन्ति॥१४॥

धर्म एव हतो हन्ति धर्मो रक्षति रक्षतः।
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत्॥१५॥

'Justice, being violated, destroys; justice, being preserved, preserves : therefore justice must not be violated, lest violated justice destroy us.'

यस्माद्धर्म एवातिक्रान्त इष्टानिष्टाभ्यां सह नाशयति नार्थिप्रत्यर्थ्यादि। स एव नातिक्रान्तस्ताभ्यां सह रक्षति। तस्माद्धर्मो नातिक्रमणीयः। माऽस्मान् त्वत्सहितानतिक्रान्तो धर्मोऽवधीदिति सभ्यानामुत्पथप्रवृत्तस्य प्राड्विवाकस्य संबोधनमिदम्। अथवा नो निषेधेऽव्ययं नो हतो धर्मो मावधीत् न हन्त्येवेत्यभिप्रायः॥१५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वृषो हि भगवान्धर्मस्तस्य यः कुरुते ह्यलम्।
वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत्॥१६॥

For divine justice (is said to be) a bull (vṛṣa); that (man) who violates it (kurute'lam) the gods consider to be (a man despicable like) a Śūdra (vṛṣala); let him, therefore, beware of violating justice.

कामान्वर्षतीति वृषः वृषशब्देन धर्म एवाभिधीयत इति। अलंशब्दो वारणार्थः। यस्माद्धर्मस्य यो वारणं करोति तं देवा वृषलं जानन्ति न जातिवृषलं तस्माद्धर्मं नोच्छिद्यादिति धर्मव्यतिक्रमखण्डनार्थं वृषलशब्दार्थनिर्वचनम्॥१६॥

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति॥१७॥

The only friend who follows men even after death is justice; for everything else is lost at the same time when the body (perishes).

धर्म एवैको मित्रं यो मरणेऽप्यभीष्टफलदानार्थमनुगच्छति यस्मादन्यत्सर्वं भार्यापुत्रादि शरीरेणैव सहादर्शनं गच्छति। तस्मात्पुत्रादिस्नेहापेक्षयापि धर्मो न हातव्यः॥१७॥

पादोधर्मस्य कर्तारं पादः साक्षिणमृच्छति।
पादः सभासदः सर्वान्पादो राजानमृच्छति॥१८॥

One quarter of (the guilt of) an unjust (decision) falls on hims who committed (the crime), one quarter one the (false) witness, one quarter on all the judges, one quarter on the king.

दुर्व्यवहारदर्शनादधर्मसंबन्धी चतुर्थभागोऽर्थिनमधर्मकर्तारं प्रत्यर्थिनं वा गच्छति। परश्चतुर्थभागः साक्षिणमसत्यवादिनम्। अन्यपादः सभासदः सर्वानधर्मप्रवृत्त्यनिवारकान्व्याप्नोति। पादश्च राजानं व्रजति। सर्वेषां पापसम्बन्धो भवतीत्यत्र विवक्षितम्॥१८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते॥१९॥

But where he who is worthy of condemnation is condemned, the king is free from guilt, and the judges are saved (from sin); the guilt falls on the perpetrator (of the crime alone).

यस्यां पुनः सभायामसत्यवादी निन्दार्होऽर्थी प्रत्यर्थी वा सम्यक् न्यायदर्शनेन निन्द्यते तत्र राजा निष्पापो भवति। सभासदश्च पापेन न संबध्यन्ते। अर्थ्यादिकमेव कर्तारं पापमुपैति॥१९॥

जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः।
धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचन॥२०॥

A Brāhmaṇa who subsists only by the name of his caste (jāti), or one who merely calls himself a Brāhmaṇa (though his origin be uncertain), may, at the king's pleasure, interpret the law to him, but never a Śūdra.

ब्राह्मणजातिमात्रं यस्य विद्यते नतु ब्राह्मणकर्मानुष्ठानं वणिगादिवत्साक्ष्यादिद्वारेण स्फुटन्यायान्यायनिरूपणक्षमः, ब्राह्मणजातिरपि वा यस्य संदिग्धाऽऽत्मानं ब्राह्मणं ब्रवीति स वरम्। उक्तयोग्यब्राह्मणाभावे च क्वचित्कार्यदर्शने नृपतेर्धर्मप्रवक्ता भवेन्न तु धार्मिकोऽपि व्यवहारज्ञोऽपि शूद्रः। ब्राह्मणे धर्मप्रवक्तेति विधानादेव शूद्रनिवृत्तिः सिद्धा पुनर्न तु शूद्र इति शूद्रनिषेधो योग्यब्राह्मणाभावे क्षत्रियवैश्ययोरभ्यनुज्ञानार्थः। अतएव कात्यायनः-"यत्र विप्रो न विद्वान्स्यात्क्षत्रियं तत्र योजयेत्। वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्"॥२०॥

यस्मात्-

यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम्।
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः॥२१॥

The kingdom of that monarch, who looks on while a Śūdra settles the law, will sink (low), like a cow's in a morass.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्य राज्ञो धर्मविवेचनं शूद्रः कुरुते तस्य पश्यत एव पङ्के गौरिव तद्राष्ट्रमवसन्न भवति ॥२१॥

यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम्।
विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितम्॥२२॥

That kingdom where Śūdras are very numrous, which is infested by atheists and destitue of twice-born (inhabitants), soon entirely perishes, afflicted by famine and disease.

यद्राष्ट्रं शूद्रबहुलं बहुलपरलोकाभाववाद्याक्रान्तं द्विजशून्यं तत्सर्वं दुर्भिक्षरोगपीडितं सच्छीघ्रं विनश्यति। "अग्नौप्रास्ताहुतिः सम्यक्" (अ. ३श्लो. ७६) इत्यस्याभावेन वृष्टिविरहादुपजातदुर्भिक्षरोगाद्युपसर्गशान्त्यर्थकर्माभावाच्च ॥२२॥

धर्मासनमधिष्ठाय संवीताङ्गः समाहितः।
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत्॥२३॥

Having occupied the seat of justice, having covered his body, and having worshipped the guardian deities of the world, let him, with a collected mind, begin the trial of causes.

धर्मदर्शनार्थमासन उपविश्य आच्छादितदेहोऽनन्यमना लोकपालेभ्यः प्रणामं कृत्वा कार्यदर्शनमनुतिष्ठेत् ॥२३॥

अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ।
वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणाम्॥२४॥

Knowing what is expedient or inexpedient, what is pure justice or injustice, let him examine the causes of suitors according to the order of the castes (varṇa).

प्रजारक्षणोच्छेदाद्यात्मकावैहिकावर्थानर्थौ बुद्ध्वा परलोकार्थं धर्माधर्मौ केवलावनुरुध्य यथा विरोधो न भवति तथा कार्यार्थिनां कार्याणि पश्येत्। बहुवर्णमेलके तु ब्राह्मणादिक्रमेण पश्येत् ॥२४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बाह्यैर्विभावयेल्लिन्नैर्भावमन्तर्गतं नृणाम्।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च॥२५॥

By external signs let him discover the internal disposition of men, by their voice, their colour, their motions, their aspect, their eyes, and their gestures.

बाह्यैः स्वरादिलिन्नैरित्यभिधानादेवावधारितव्यापारैः अर्थिप्रत्यर्थिनामन्तर्गतमभिप्रायं निरूपयेत्। स्वरो गद्गदादिः, वर्णः स्वाभाविकवर्णादन्यादृशो मुखकालिमादिः, इन्नितमधोनिरीक्षणादिः, अकारो देहभवस्वेदरोमाञ्चादिः, चेष्टा हस्तास्फालनादिः॥२५॥

आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥२६॥

The internal (working of the) mind is perceived through the aspect, the motions, the gait, the gestures, the speech, and the changes in the eye and of the face.

आकारादिभिः पूर्वोक्तैः गत्या स्खलत्पादादिकया अन्तर्गतमनोबुद्धिरूपेण परिणतमवधार्यते॥२६॥

बालदायादिकं रिक्थं तावद्राजानुपालयेत्।
यावत्स स्यात्समावृत्तो यावद्वाचातीतशैशवः॥२७॥

The king shall protect the inherited (and other) property of a minor, until he has returned (from his teacher's house) or until he has passed his minority.

अनाथबालस्वामिकं धनं पितृव्यादिभिरन्यायेन गृह्यमाणं तावद्राजा रक्षेत्। यावदसौ षट्त्रिंशदब्दादिकं ब्रह्मचर्यमित्याद्युक्तेन प्रकारेण गुरुकुलात्समावृत्तो न भवति तादृशस्यावश्यकबाल्यविगमात्। यस्त्वशक्त्यादिना बाल एव समावर्तते सोऽपि यावदतीतबाल्यो भवति तावत्तस्य धनं रक्षेत्। बाल्यं च षोडशवर्षपर्यन्तम्। "बाल आषोडशाद्वर्षात्" इति नारदवचनात्॥२७॥

वशाऽपुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च॥२८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[एवमेव विधिः कुर्याद्योषित्सु पतितास्वपि।
वस्त्रान्नपानं देयं च वसेयुश्च गृहान्तिके ॥2॥]

In like manner care must be taken of barren women, of those who have no sons, of those whose family is extinct, of wives and widows faithful to their lods, and of women afflicted with diseases.

वशासु वन्ध्यासु कृतदारान्तरपरिग्रहः स्वामी निर्वाहार्थोपकल्पित-धनोपायासु निरपेक्षः अपुत्रासु च स्त्रीषु, प्रोषितभर्तृकासु, निष्कुलासु सपिण्ड-रहितासु, साध्वीषु च स्त्रीषु, विधवासु, रोगिणीषु च यद्धनं तस्यापि बाल-धनस्येव राज्ञा रक्षणं कर्तव्यम्। अत्र चानेकशब्दोपादाने गोबलीवर्दन्यायेन पुनरुक्तिपरिहारः॥२८॥

जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः।
ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः ॥२९॥

A righteous king must punish like thieves those relatives who appropriate the property of such females during their lifetime.

वयमत्रानन्तराधिकारिणो रक्ष्याम इदं धनमित्यादिव्याजेन ये बान्धवास्तासां जीवन्तीनां तद्धनं गृह्णन्ति तान्वक्ष्यमाणचौरदण्डेन धार्मिको राजा दण्डयेत्॥२९॥

प्रणष्टस्वामिकं रिक्थं राजा त्रयब्दं निधापयेत्।
अर्वाक् त्रयब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ॥३०॥

Property, the owner of which has disappeared, the king shall cause to be kept as a deposit during three years; within the period of three years the owner may claim it, after (the term) the king may take it.

अज्ञातस्वामिकं धनं राजा कस्य किं प्रणष्टमित्येवं पटहादिना उद्घोष्य राजद्वारादौ रक्षितं वर्षत्रयं स्थापयेत्। वर्षत्रयमध्ये यदि धनस्वाम्यागच्छति तदा स एव गृह्णीयात्। तदूर्ध्वं तु नृपतिर्विनियुञ्जीत॥३०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ममेदमिति यो ब्रूयात्सोऽनुयोज्यो यथाविधि।
संवाद्य रूपसंख्यादीन्स्वामी तद्द्रव्यमर्हति॥३१॥

He who says, 'This belongs to me', must be examined according to the rule; if he accurately describes the shape, and the number (of the articles found) and so forth, (he is) the owner (and) ought (to receive) that property.

मदीयं धनमिति यो वदति स किंरूपं किंसंख्याकं, कुत्र प्रणष्टं तद्धनमित्यादिविधानेन प्रष्टव्यः। ततो यदि रूपसंख्यादीन्सत्यान्वदति तदा स तत्र धनस्वामी तद्धनं ग्रहीतुमर्हति॥३१॥

अवेदयानो नष्टस्य देशं कालं च तत्त्वतः।
वर्णं रूपं प्रमाणं च तत्समं दण्डमर्हति॥३२॥

But if he does not really know the time and the place (where it was) lost, its colour, shape, and size, he is worthy of a fine equal (in value) to the (object claimed).

नष्टद्रव्यस्य देशकालावस्मिन्देशेऽस्मिन्काले नष्टमिति, तथा वर्णं शुक्लादि, आकारं कटकमुकुटादि, परिमाणं च यथावदजानन्नष्टद्रव्यसमदण्डमर्हति॥३२॥

देशकालादिसंवादे पुनः-

आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः।
दशमं द्वादशं वापि सतां धर्ममनुस्मरन्॥३३॥

Now the king, remembering the duty of good men, may take one-sixth part of property lost and afterwards found, or one-tenth, or at least one-twelfth.

यदेतद्राज्ञा प्रणष्टद्रव्यं प्राप्तं तस्मात्षड्भागं दशमं द्वादशं वा रक्षादिनिमित्तं पूर्वेषां साधूनामयं धर्म इति जानन्राजा गृह्णीयात्। धनस्वामिनो निर्गुणसगुणत्वापेक्षश्चायं षड्भागादिग्रहणविकल्पः। अवशिष्टं स्वामिने समर्पयेत्॥३३॥

प्रणष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितम्।
यांस्तत्र चौरान्गृह्णीयात्तान्राजेभेन घातयेत्॥३४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Property lost and afterwards found (by the king's servants) shall remain in the keeping of (special) official; those whom the king may convict of stealing it, he shall cause to be slain by an elephant.

यद्द्रव्यं कस्यापि प्रणष्टं सत् राजपुरुषैः प्राप्तं रक्षायुक्तै रक्षितं कृत्वा स्थाप्यम्। तस्मिंश्च द्रव्ये यांश्चौरान्गृह्णीयात्तान्हस्तिना घातयेत्। गोविन्दराजस्तु "शतादभ्यधिके वधः" इति दर्शनादत्रापि शतसुवर्णस्य मौल्यादिकद्रव्यहरणे वधमाह। तन्न। तत्र संधिकृत्वा तु यच्चौर्यमिति यत्स्वाम्येऽपि प्रणष्टराजरक्षित-द्रव्यहरणेनैव विशेषेण वधविधानाच्छतादभ्यधिके वध इत्यस्य विशेषोपदिष्ट-वधेतरविषयत्वात् ॥३४॥

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः।
तस्याददीत षड्भागं राजा द्वादशमेव वा॥३५॥

From that man who shall truly say with respect to treasure-trove, 'This belongs to me,' the king may take one-sxith or one-twelfth part.

यो मानुषः स्वयं निधिं लब्ध्वा, अन्येन वा निधौ प्राप्ते ममायं निधिरिति वदति सत्येन प्रमाणेन च स्वसंबन्धं बोधयति तस्य पुरुषस्य निर्गुणत्वसगुणत्वापेक्षया ततो निधानादष्टभागं वा राजा गृह्णीयात्। अवशिष्टं तस्यार्पयेत् ॥३५॥

अनृतं तु वदन्दण्डयः स्ववित्तस्यांशमष्टमम्।
तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलाम्॥३६॥

But he who falsely says (so), shall be fined in one-eighth of his property, or, a calculation of (the value of) the treasure having been made, in some smaller portion (of that).

अस्वीयं स्वीयमिति ब्रुवन्स्वधनस्याष्टमं भागं दण्डयः। यद्वा तस्यैव निधेरत्यन्ताल्पभागं गणयित्वा येनावसादं न गच्छति विनयञ्च लभते तद्दण्डयः। अल्पीयसीमितीयसुन्नन्तनिर्देशात्पूर्वस्मादन्योऽयं दण्डः। विकल्पश्च निर्गुणसगुणापेक्षः ॥३६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिम्।
अशेषतोऽप्याददीत सर्वस्याधिपतिर्हि सः ॥ ३७ ॥
[ब्राह्मणस्तु निधिं लब्ध्वा क्षिप्रं राज्ञे निवेदयेत्।
तेन दत्तं तु भुञ्जीत स्तेनः स्यादनिवेदयन् ॥ ३ ॥]

When a learned Brāhmaṇa has found treasure, deposited in former (times), he may take even the whole (of it); for he is master of everything.

विद्वान्पुनर्ब्राह्मणः पूर्वमुपनिहितं निधिं दृष्ट्वा सर्वं गृह्णीयात्। न षड्भागं दद्यात्। यस्मात्सर्वस्य धनजातस्य प्रभुः। अतएवोक्तम् ''सर्वं स्वं ब्राह्मणस्येदम्'' (अ. १ श्लो. १००) इति। तस्मात्परनिहितविषयमेतद्वचनम्। तथाच नारदः- ''परेण निहितं लब्ध्वा राजा ह्यपहरेन्निधिम्। राजगामी निधिः सर्वः सर्वेषां ब्राह्मणादृते॥'' याज्ञवल्क्योऽप्याह-''राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योऽर्धं द्विजः पुनः। विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः॥'' (अ. २ श्लो. ३४) अतो यन्मेधातिथिगोविन्दराजाभ्यां ''ममायमिति यो ब्रूयात्'' (अ. ८ श्लो. ३५) इत्युक्तं, राजदेयार्थनिरासार्थं पित्रादिनिहितविषयत्वमेवास्य वचनस्य व्याख्यातं तदनार्षम्। नारदादिमुनिव्याख्याविपरीतं स्वकल्पितं। न मेधातिथिगोविन्दराज-व्याख्यानमाद्रिये ॥३७॥

यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ।
तस्माद्द्विजेभ्यो दत्त्वार्धमर्धं कोशे प्रवेशयेत् ॥ ३८ ॥

When the king finds treasure of old concelaed in the ground, let him give one half to Brāhmaṇas and place the (other) half in his treasury.

यं पुनरस्वामिकं पुरातनं भूम्यन्तर्गतं निधिं राजा लभते तस्माद्ब्राह्मणेभ्योऽर्धं दत्त्वार्धमात्मीयधनागारे च प्रवेशयेत् ॥३८॥

निधीनां तु पुराणानां धातूनामेव च क्षितौ।
अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ॥ ३९ ॥

The king obtains one half of ancient hoards and metals

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(found) in the ground, by reason of (his giving) protection, (and) because he is the lord of the soil.

निधीनां पुरातनानामस्वकीयानां विद्वद्ब्राह्मणेतरलब्धानां सुवर्णाद्युत्पत्तिस्थानानां चार्धहरो राजा। यस्मादसौ रक्षति, भूमेश्च प्रभुः॥३९॥

दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम्।
राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषम्॥४०॥

Property stolen by thieves must be restored by the king to (men of) all castes (*varṇa*); a king who uses such (property) for himself incurs the guilt of a thief.

यद्धनं चौरैर्लोकानामपहृतं तद्राज्ञा चौरेभ्य आहृत्य धनस्वामिभ्यो देयम्। तद्धनं राजा स्वयमुपयुञ्जानश्चौरस्य पापं प्राप्नोति॥४०॥

जातिजानपदान्धर्मान्श्रेणीधर्माश्च धर्मवित्।
समीक्ष्य कुलधर्माश्च स्वधर्मं प्रतिपादयेत्॥४१॥

(A king) who knows the sacred law, must inquire into the laws of castes (*jāti*), of districts, of fuilds, and of families, and (thus) settle the peculiar law of each.

धर्मान्ब्राह्मणादिजातिनियतान्याजनादीन् जानपदांश्च नियतदेशव्यवस्थितानान्नायाविरुद्धान्, "देशजातिकुलधर्माश्चाम्नायैरप्रतिषिद्धाः प्रमाणम्" इति गोतमस्मरणात्। श्रेणीधर्माश्च वणिगादिधर्मान्प्रतिनियतकुलव्यवस्थितान्ज्ञात्वा तदविरुद्धान्राजा व्यवहारेषु तत्तद्धर्मान्व्यवस्थापयेत्॥४१॥

यस्मात्-

स्वानि कर्माणि कुर्वाणा दूरे सन्तोऽपि मानवाः।
प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः॥४२॥

For men who follow their particular occupations and abide by their particular duty, become dear to people, though they may live at a distance.

जातिदेशकुलधर्मादीन्यात्मीयकर्माण्यनुतिष्ठन्तः, स्वे स्वे च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नित्यनैमित्तिकादौ कर्मणि वर्तमानाः, दूरेऽपि सन्तः सांनिध्यनिबन्धनस्नेहाभावेऽपि लोकस्य प्रिया भवन्ति ॥४२॥

प्रासङ्गिकमिदमभिधाय पुनः प्रकृतमाह-

नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः।
न च प्रापितमन्येन ग्रसेदर्थं कथंचन ॥४३॥

Neither the king nor any servant of his shall themselves cause a lawsuit to be begun, or hush up one that has been brought (before them) by (some) other (man).

राजा राजनियुक्तो वा धनलोभादिना कार्यमृणादिविवादं नोत्पादयेत्। तदाह कात्यायनः-"न राजा तु वशित्वेन धनलोभेन वा पुनः। स्वयं कर्माणि कुर्वीत नराणामविवादिनाम्॥" न चार्थिना प्रत्यर्थिना वावेदितं विवादं धनादिलोभेनोपेक्षेत ॥४३॥

यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम्।
नयेत्तथाऽनुमानेन धर्मस्य नृपतिः पदम् ॥४४॥

As a hunter traces the lair of a (wounded) deer by the drops of blood, even so the king shall discover on which side the right lies, by inderences (from the facts).

यथा मृगस्य शस्त्रहतस्य रुधिरपातैर्व्याधः पदं स्थानं प्राप्नोति तथानुमानेन इष्टप्रमाणेन वा धर्मस्य तत्त्वं निश्चिनुयात् ॥४४॥

सत्यमर्थं च संपश्येदात्मानमथ साक्षिणः।
देशं रूपं च कालं च व्यवहारविधौ स्थितः ॥४५॥

When engaged in judicial proceedings he must pay full attention to the truth, to the object (of the dispute), (and) to himself, next to the witnesses, to the place, to the time, and to the aspect.

व्यवहारदर्शनप्रवृत्तो राजा छलमपहाय सत्यं पश्येत्तथार्थं च। अर्श आदित्वान्मत्वर्थीयोऽच्। अर्थवन्तं गोहिरण्यादिधनविषयस्थं व्यवहारं पश्येत् न त्वहमननेनाक्षिनिकोचनेनोपहसित इत्यादिस्वल्पापराधम्, आत्मानं च तत्त्वनिर्णये

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वर्गादिफलभागिनं, साक्षिणः सत्यवादिनः, देशं कालं च देशकालोचितं स्वरूपं, व्यवहारस्वरूपं गुरुलघुतादिकं पश्येत् ॥४५॥

सद्भिराचरितं यत्स्याद्धार्मिकैश्च द्विजातिभिः।
तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत् ॥४६॥

What may have been practised by the virtuous, by such twice-born men as are devoted to the law, that he shall establish as low, if it be not opposed to the (customs of) countries, families, and castes (*jāti*).

विद्वद्भिर्धर्मप्रधानैर्द्विजातिभिर्यद्दृश्यमानशास्त्रमनुष्ठितं तद्देशकुलजात्यविरुद्धमादाय व्यवहारनिर्णयं प्रकल्पयेत् ॥४६॥

एतत्सकलव्यवहारसाधारणं परिभाषात्मकमुक्तम्। संप्रतिऋणादानमधिकृत्याह-

अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥४७॥

When a creditor sues (before the king) for the recovery of money from a debtor, let him make the debtor pay the sum which the creditor proves (to be due).

अधमर्णार्थसिद्ध्यर्थं प्रयुक्तधनसिद्ध्यर्थं धनस्वामिना राजा बोधितो वक्ष्यमाणलेख्यादिप्रमाणप्रतिपादितं धनमुत्तमर्णस्याधमर्णं प्रदापयेत्। अधमर्णादुत्तमर्णाय दापयेदित्यर्थः ॥४७॥

कथं दापयेदित्याह-

यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः।
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम् ॥४८॥

By whatever means a creditor may be able to obtain possession of his property, even by those means may he force the debtor and make him pay.

यैर्वक्ष्यमाणैरुपायैः संप्रयुक्तमर्थमुत्तमर्णो लभते तैस्तैरुपायैर्वशीकृत्य तमर्थं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दापयेत् ॥४८॥

तानुपायानाह–

धर्मेण व्यवहारेण छलेनाचरितेन च।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च॥४९॥

By moral suasion, by suit of law, by artful management, or by the customary proceeding, a creditor may recover property lent; and fifthly, by force.

धर्मादिना प्रयुक्तमर्थं साधयेत्। तत्र धर्मानाह बृहस्पतिः–"सुहृत्संबन्धिसंदिष्टैः साम्ना चानुगमेन च। प्रायेण वा ऋणी दाप्यो धर्म एष उदाहृतः॥" देये धनेऽधमर्णस्याविप्रतिपत्तौ व्यवहारेण। तथा च वक्ष्यति–"अर्थेऽपव्ययमानं तु" (अ. ८ श्लो० ५१) इति। मेधातिथिस्तु निःस्वो यः स व्यवहारेण दापयितव्यः। अन्यत्कर्मोपकरणं धनं दत्त्वा कृषिवाणिज्यादिना व्यवहारयितव्यः। तदुत्पन्नं धनं तस्मात्तु गृह्णीयादित्याह। छलादीनि त्रीण्याह बृहस्पतिः–"छद्मना याचितं चार्थमानीय ऋणिकाद्बली। अन्याहृतादि वाहृत्य दाप्यते तत्र सोपधिः। दारपुत्रपशून्हत्वा कृत्वा द्वारोपवेशनम्। यत्रार्थी दाप्यतेऽर्थं स्वं तदाचरितमुच्यते। बध्वा स्वगृहमानीय ताडनाद्यैरुपक्रमैः। ऋणिको दाप्यते यत्र बलात्कारः प्रकीर्तितः"॥४९॥

यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात्।
न स राज्ञाऽभियोक्तव्यः स्वकं संसाधयन्धनम्॥५०॥

A creditor who himself recovers his property from his debtor, must not blamed by the king for retaking what is his own.

य उत्तमर्णः संप्रतिपन्नमर्थमधमर्णात्स्वयं बलादिना साधयति स स्वीयं धनं सम्यक्साधयन्नस्मास्वनिवेद्य किमिति बलादिकं कृतवानसीति न राज्ञा निषेद्धव्यः॥५०॥

अर्थेऽपव्ययमानं तु करणेन विभावितम्।
दापयेद्धनिकस्यार्थं दण्डलेशं च शक्तितः॥५१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[यत्र तत्स्यात्कृतं यत्र करणं च न विद्यते।
न चोपलम्भपूर्वोक्तस्तत्र दैवी क्रिया भवेत्॥४॥]

But him who denies a debt which is proved by good evidence, he shall order to pay that debt to the creditor and a small fine according to his circumstances.

नाहमस्मै धारयामीति धनविषयेऽपह्नवानमधमर्णं करणेन लेख्यसाक्षिदिव्यादिना प्रतिपादितमर्थमुत्तमर्णस्य राजा प्रदापदायेत्। दण्डलेशं च "अपह्नवे तु द्विगुणम्" इति वक्ष्यमाणदशमभागदण्डान्यूनमपि दण्डं पुरुषशक्तया दापयेत्॥५१॥

अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि।
अभियोक्तादिशेद्देश्यं करणं वान्यदुद्दिशेत्॥५२॥

On the denial (of a debt) by a debtor who has been required in court to pay it, the complainant must call (a witness) who was present (when the loan was made), or adduce other evidence.

उत्तमर्णस्य धनं देहीति सभायं प्राड्विवाकेनोक्तस्याधमर्णस्य नास्मै धारयामित्यपलापे सति अभियोक्ताऽर्थी देश्यं धनप्रयोगदेशवर्तिसाक्षिणं निर्दिशेत्। प्रायेण साक्षिभिरेव स्त्रीमूर्खादिसाधारणऋणनिर्णयात्प्राक्साक्ष्युपन्यासः। अन्यद्वा करणं पत्रादि कथयेत्॥५२॥

अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः।
यश्चाधरोत्तरानर्थान् विगीतान्नावबुध्यते॥५३॥

(The plaintifi) who calls a witness not present at the transaction, who retracts his statements, or does not perceive that his statements (are) confused or contradictory.

अपदिश्यापदेश्यं च पुनर्यस्त्वपधावति।
सम्यक् प्रणिहितं चार्थं पृष्टः सन्नाभिनन्दति॥५४॥

Or who having stated what he means to prove afterwards varies (his case), or who being questioned on a fact duly stated by himself does not abide by it.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

असंभाष्ये साक्षिभिश्च देशे संभाषते मिथः।
निरुच्यमानं प्रश्नं च नेच्छेद्यश्चापि निष्पतेत्॥५५॥

Or who converses with the witnesses in a place improper for such conversation; or who declines to answer a question, properly put, or leaves (the court).

ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च न विभावयेत्।
न च पूर्वापरं विद्यात्तस्मादर्थात्स हीयते॥५६॥

Or who, being ordered to speak, does not answer, or does not prove what he has alleged; or who does not know what is the first (point), and what the second fails in his suit.

अदेश्यं यत्र देशेऽधमर्णस्य ऋणग्रहणकाले सर्वदावस्थानं न संभवतीति। निर्दिश्यचादेशादिकं नैतन्मया निर्दिष्टमित्यपनयति। यश्च पूर्वोक्तानर्थान्स्वार्थान्स्वोक्तान्विरुद्धान्वावगच्छति। यश्च मम हस्तात्सुवर्णस्य पलमनेन गृहीतमिति निर्दिश्य मत्पुत्रहस्ताद्गृहीतमित्येवमादिना यः पुनरपसरति। यश्च सम्यक्प्रतिज्ञातमर्थं कस्मात्त्वया रात्रावसाक्षिकं दत्तमित्येवमादि प्राड्विवाकेन पृष्टः सन्न समाधत्ते। यश्च संभाषणानर्हनिर्जनादिदेशे साक्षिभिः सहान्योन्यं संभाषते। यश्च भाषार्थस्थिरीकरणाय नितरामुच्यमानं प्राड्विवाकेन प्रश्नं नेच्छेत्। यश्च निष्पतेत् उक्तांश्च व्यवहारान्पुराऽनाख्याय यथा स्थानात्स्थानान्तरं गच्छेत्। यश्च ब्रूहीत्युक्तो न किंचिद्ब्रवीति। उक्तं साध्यं न प्रमाणेन प्रतिपादयति। पूर्वं साधनं, अपरं साध्यं, तद्यो न जानाति। असाधनमेव साधनत्वेन निर्दिशति। असाध्यमेव मानेन "शशशृन्नकृतं धनुर्ज्ञेयम्" इत्यादि साध्यत्वेन निर्दिशति स तस्मात्साध्यादर्थाद्धीयते॥५३-५६॥

साक्षिणः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः।
धर्मस्थः कारणैरेतैर्हीनं तपमि निर्दिशेत्॥५७॥

Him also who says 'I have witnesses,' and, being ordered to produce them, produces them not, the judge must on these (same) grounds declare to be non-suited.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

साक्षिणो मम विद्यन्त इत्युक्त्वा तान्निर्दिशेत्युक्तो यो न निर्दिशति तं पूर्वोक्तैरेभिः कारणैर्धर्मस्थः प्राड्विवाकः पराजितं कथयेत्। "ज्ञातारः सन्ति मेत्युक्त्वा" इति वा पाठः। अत्र छान्दसमिकारस्य पूर्वरूपत्वम् ॥५७॥

अभियोक्ता न चेद्ब्रूयाद्बध्यो दण्डष्टश्च धर्मतः।
न चेत्त्रिपक्षात्प्रब्रूयाद्धर्मं प्रति पराजितः ॥५८॥

If a plaintiff does not speak, he may be punished corporally or fined according to the law; if (a defendant) does not plead within three fortnights, he has lost his cause.

योऽर्थी सन् राजस्थाने निवेद्य भाषायां न ब्रूयात्तदा विषयगौरवापेक्षया बध्यो लघुनि विषये दण्ड्यश्च धर्मतः स्यात्। प्रत्यर्थी पुनर्यदि पक्षत्रयमध्ये न ब्रूयात्तदा धर्मत एव पराजितः स्यान्न तु छलेन ॥५८॥

यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत्।
तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम् ॥५९॥

In the double of that sum which (a defendant) falsely denies or on which (the plaintiff) falsely declares, shall those two (men) offending against justice be fined by the king.

यः प्रत्यर्थी यत्परिमाणधनमपनयति, अर्थी वा यत्परिमाणधने मिथ्या वदति तावधार्मिकावपह्नुतमिथ्योक्तधनाद्द्विगुणं दण्डरूपं दापनीयौ। अधर्मज्ञाविति वचनाज्ज्ञानपूर्वापह्नवमिथ्योक्तिविषयमिदम्। प्रमादादिनापलाप-मिथ्यानियोगापह्नवे द्विगुणमिति शतदशमभागं वक्ष्यति ॥५९॥

पृष्टोऽपव्ययमानस्तु कृतावस्थो धनैषिणा।
त्र्यवरैः साक्षिभिर्भाव्यो नृपब्राह्मणसन्निधौ ॥६०॥

(A defendant) who, being brought (into court) by the creditor, (and) being questioned, denies (the debt), shall be convicted (of his falsehood) by at least three witnesses (who must depose) in the presence of the Brāhmaṇa (appointed by) the king.

धनार्थिनोत्तमर्णेन राजपुरुषापकर्षं कृताह्वानः प्राड्विवाकेन पृष्टः सन्यदा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न धारयामीत्यपह्नवानो भवति तदा नृपत्यधिकृतब्राह्मणसमक्षं त्र्यवरैः साक्षिभिस्त्रयोऽवरा न्यूना येषां तैरर्थिना भावनीयः ॥६०॥

यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः।
तादृशान्संप्रवक्ष्यामि यथा वच्यमृतं च तैः ॥६१॥

I will fully declare what kind of men may be made witnesses in suits by creditors, and in what manner those (witnesses) must give true (evidence).

धनिभिरुत्तमर्णादिभिः ऋणादानादिव्यवहारेषु यथाविधाः साक्षिणः कर्तव्यास्तथाविधान्वदिष्यामि। यथा च तैरपि सत्यं वक्तव्यं तमपि प्रकारं वक्ष्यामि ॥६१॥

गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः।
अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ॥६२॥

Householders, men with male issue, and indigenous (inhabitants of the country, be they) Kṣatriyas, Vaiśyas, or Śūdras, are competent, when called by a suitor, to give evidence, not any persons whatever (their condition may be) except in cases of urgency.

कृतदारपरिग्रहाः पुत्रवन्तस्तद्देशजाः क्षत्रियशूद्रवैश्यजातीया अर्थिनिर्दिष्टाः सन्तः साक्षित्वयोग्या भवन्ति। ते हि कृतपरिकरपुत्रभयात्तद्देशवासिना विरोधाच्च नान्यथा वदन्ति नतु ये केचिदृणादानादिव्यवहारेषु साक्षिणः स्युः। आपदि तु वाग्दण्डपारुष्यस्त्रीसंग्रहणादिषूक्तव्यतिरिक्ताः साक्षिणो भवन्ति ॥६२॥

आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः।
सर्वधर्मविदोलुब्धा विपरीतांस्तु वर्जयेत् ॥६३॥

Trustworthy men of all the (four) castes (varna) may be made witnesses in lawsuits, (men) who know (their) whole duty, and are free from covetousness; but let him reject those (of an) opposite (character).

"क्षत्रविट्शूद्रयोनयः" (अ. ८. श्लो. ६२) इत्युक्तत्वात्ततो ब्राह्मणपरिग्रहार्थं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वेषु वर्णेष्वित्यभिधानम्। सर्ववर्णेषु मध्ये ये यथार्थावगतवादिनः सर्वधर्मज्ञा लोभरहितास्ते साक्षिणः कर्तव्याः। उक्तविपरीतांश्च वर्जयेत् ॥६३॥

नार्थसंबन्धिनो नाप्ता न सहाया न वैरिणः।
न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः ॥६४॥

Those must not be made (witnesses) who have an interest in the suit, nor familiar (friends), companions, and enemies (of the parties), nor (men) formerly convicted (of perjury), nor (persons) suffering under (severe) illness, nor (those tainted (by mortal sin).

ऋणाद्यर्थसंबन्धिनोऽधमर्णाद्याः आप्ता मित्राणि, सहायास्तत्परिचारकाः, शत्रवः स्थानान्तरावगतकौटसाक्ष्याः, रोगपीडिता महापातकादिदूषिताः साक्षिणो न कर्तव्याः। लोभरागद्वेषस्मृतिभ्रंशादीनामन्यथाभिधानहेतूनां संभवात् ॥६४॥

न साक्षी नृपतिः कार्यो न कारुककुशीलवौ।
न श्रोत्रियो न लिङ्गस्थो न सङ्घेभ्यो विनिगर्तः ॥६५॥

The king cannot be made a witness, nor mechanics and actors, nor a Śrotriya, nor a student of the Veda, nor (an ascetic) who has given up (all) connexion (with the world).

प्रभुत्वात्साक्षिधर्मेण प्रष्टुमयोग्यत्वान्न राजा साक्षी कार्यः। कारुः सूपकारादिः, कुशीलवो नटादिः, तयोः स्वकर्मव्यग्रत्वात्प्रायेण धनलोभवत्त्वाच्चासाक्षित्वम्। श्रोत्रियोऽप्यध्ययनाग्निहोत्रादिकर्मव्यग्रतया न साक्षी। लिन्नस्थो ब्रह्मचारी, सन्नविनिर्गतः परिव्राजकस्तयोरपि स्वकर्मव्यग्रत्वाद्-ब्रह्मनिष्ठत्वाच्चसाक्षित्वम्। श्रोत्रियग्रहणादध्ययनाग्निहोत्रादिव्यग्रेतरब्राह्मण-स्यानिषेधः ॥६५॥

नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत्।
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ॥६६॥

Nor one wholly dependent, nor one of bade fame, nor a Dasyu, nor one who follows forbidden occupations, nor

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

an aged (man), nor an infant, nor one (man alone), nor a man of the lowest castes, nor one deficient in organs of sense.

आध्यधीनोऽत्यन्तपरतन्त्रो गर्भदासो न वक्तव्यो विहितकर्मत्यागाल्लोकविगर्हितः। दस्युः क्रूरकर्मा "न क्रुद्धो नापि तस्करः" (अ. ८ श्लो. ६७) इति वक्ष्यमाणत्वात्। विकर्मकृन्निषिद्धकर्मकारी, एतेषां रागद्वेषादिसंभवात्। न वृद्धः, प्रायेण स्मृतिभ्रंशसंभवात्। न बालोऽप्राप्तव्यवहारत्वात्। नैको विनाशप्रवासशङ्क्या तस्य त्र्यवरैरिति विधानात्। अर्थप्रतिषेधसिद्धौ कस्यांचिदवस्थायां द्वयोरभ्यनुज्ञानार्थं निषेधवचनम्। अन्त्यश्चाण्डालादिः, धर्मानभिज्ञातत्वात्। विकलेन्द्रिय उपलब्धिवैकल्यान्न साक्षी कार्यः॥६६॥

नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः।
न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्करः॥६७॥

Nor one extremely grieved, nor one intorxicate, nor a madman, nor one tormented by hunger or thirst, nor one oppressed by fatigue, nor one tormented by desire, nor a wrathful man, nor a thief.

आर्तो बन्धुविनाशादिना, मत्तो मद्यादिना, उन्मत्त उत्क्षेपभूतावेशादिना, क्षुधापिपासादिना पीडितः, श्रमार्तो वर्त्मगमनादिना खिन्नः, कामार्तः, उत्पन्नक्रोधः, चौरश्च न साक्षी कार्य इति सर्वत्र संबध्यते। तत्रार्तादिर्बुद्धिवैकल्यात्। चौरस्त्वधार्मिकत्वात्॥६७॥

स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः॥६८॥

Women should give evidence for women, and for twice-bron men twice-born men (of the) same (kind), virtuous Śūdras for Śūdras, and men of the lowest castes for the lowest.

स्त्रीणामन्योन्यव्यवहारे ऋणादानादौ स्त्रियः साक्षिण्यो भवन्ति। द्विजानां ब्राह्मणक्षत्रियविशां सदृशाः सजातीयाः साक्षिणः स्युः। एवं शूद्राः साधवः शूद्राणां, चाण्डालादीनां चाण्डालादयः साक्षिणो भवेयुः। एतच्च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सजातीयसाक्ष्यभिधानम्। उक्तलक्षणसजातीयसाक्ष्यसंभवे विजातीया अपि साक्षिणो भवन्ति। अतएव याज्ञवल्क्यः-"यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः (अ. २ श्लो. ६९) ॥६८॥

अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनाम्।
अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि चात्यये॥६९॥

But any person whatsover, who has personal knowledge (of an act committed) in the interior apartment (of a house), or in a forest, or of (a crime causing) loss of life, may give evidence between the parties.

गृहाभ्यन्तरेऽरण्यादौ वा चौरादिकृतोपद्रवे देहोपघाते वाताता"यादिकृते यः कश्चिदुपलभ्यते स वादिनोरेव साक्षी भवति, नतु ऋणादानादिवदुक्त-लक्षणोपेतः॥६९॥

तदेवोदाहरणात्स्पष्टयति-

स्त्रियाप्यसंभवे कार्यं बालेन स्थविरेण वा॥
शिष्येण बन्धुना वापि दासेन भृतकेन वा॥७०॥

On failure (of qualified witnesses, evidence) may be given (in such cases) by a woman, by an infant, by an aged man, by a pupil, by a relative, by a slave, or by a hired servant.

अन्तर्वेश्मादावुक्तसाक्ष्यभावे सति स्त्रीबालवृद्धशिष्यबन्धुदासकर्मकरा अपि साक्षिणः स्युः॥७०॥

नन्वस्थिरबुद्धित्वादीनां स्त्रीबालादिनां कथमत्रापि साक्षित्वमित्यत्राह-

बालवृद्धातुराणां च साक्ष्येषु वदतां मृषा।
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा॥७१॥

But the (juge) should consider the evidence of infants, aged and diseased men, who (are apt to) speak untruly, as untrustworthy, likewise that of men with disordered minds.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बालवृद्धव्याधितानामुपप्लुतमनसां च साक्ष्येऽनृतं वदतामस्थिरा वाग्भवति। अतस्तामनुमानेन जानीयात्। यथोक्तम् ''वाग्भिर्विभावयेल्लिन्नैः'' इति ॥७१॥

साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च।
वाग्दण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः ॥७२॥

In all cases of violence, of theft and adultery, of defamation and assault, he must not examine the (competence of) witnesses (too strictly).

गृहदारादिषु साहसेष्वाचार्यस्त्रीसंग्रहणे वाग्दण्डपारुष्ये च गृहिण इत्युक्तसाक्षिपरीक्षा न कार्या। ''स्त्रियाप्यसंभवे कार्यम्'' (अ. ९ श्लो. ७०) इत्यस्यैवायमुदाहरणप्रपञ्चः ॥७२॥

बहुत्वं परिगृह्णीयात्साक्षिद्वैधे नराधिपः।
समेषु तु गुणोत्कृष्टान्गुणिद्वैधे द्विजोत्तमान् ॥७३॥

On a conflict of the witnesses the king shall accept (as true) the (evidence of the) majority; if (the conflicting parties are) equal in number, (that of) those distinguished by good qualities; on a fifference between (equally) distinguished(witnesses, that of) the best among the twice-born.

साक्षिणां परस्परविरुद्धानां बहुभिर्यदुक्तं तदेव निर्णयार्थत्वेन राजा गृह्णीयात्। समेषु तु विरुद्धार्थाभिधायिषु गुणवतः प्रमाणीकुर्यात्। गुणवतामेव विप्रतिपत्तौ द्विजोत्तमान् द्विजेषु य उत्तमाः। क्रियावन्त इत्यर्थः। अतएव बृहस्पतिः-''गुणिद्वैधे क्रियायुक्ताः'' इति ॥७३॥

गोविन्दराजस्तु गुणवतां विप्रतिपत्तौ द्विजोत्तमान्ब्राह्मणान्प्रमाणीकुर्यादित्याह-

समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्ध्यति।
तत्र सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते ॥७४॥

Evidence in accordance with what has actually been

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

seen or heard, is admissible; a witness who speaks truth in those (cases), neither loses spiritual merit nor wealth.

चक्षुर्ग्राह्ये साक्षाद्दर्शनात्, श्रोत्रग्राह्ये श्रवणात्साक्ष्यं सिध्यति। तत्र साक्षी सत्यं वदन्धर्मार्थाभ्यां न मुच्यते। सत्यवचनेन धर्मोपपत्तेर्दण्डाभावेऽर्थ-हान्यभावात्॥७४॥

साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि।
अवाङ्नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते॥७५॥

A witness who deposes in an assembly of honourable men (Ārya) anything else but what he has seen or heard, falls after death headlong into hell and loses heaven.

साक्षी दृष्टश्रुतादन्यादृशं साधुसभायां वदन्नधोमुखो नरकं गच्छति। परलोके च कर्मान्तरजन्यस्वर्गरूपफलादानेन पापेन हीयते॥७५॥

यत्रानिबद्धोऽपीक्षेत शृणुयाद्वापि किंचन।
दृष्टस्तत्रापि तद्ब्रूयाद्यथादृष्टं यथाश्रुतम्॥७६॥

When a man (originally) not appointed to be a witness sees or hears anything an is (afterwards) examined regarding it, he must declare it (exactly) as he saw or heard it.

त्वमस्मिन्विषये साक्षी भवेत्येवमकृतोऽपि यत्किंचिदृणादानादि पश्यति वाक्पारुष्यादिकं वा शृणोति तत्रापि साक्षी स पृष्टः सन्यथोपलब्धं कथयेत्। अयं त्वकृतसाक्षी सामान्येन मनुनोक्तः। अस्य "ग्रामश्च प्राड्विवाकश्च राजा च" इत्यादिना नारदादिभिः षाड्विध्यमुक्तम्॥७६॥

एकोऽलुब्धस्तु साक्षी स्याद्बह्वयः शुच्योऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः॥७७॥

One man who is free from covetousness may be accepted as) witness; but not even many pure women, because the understanding of females is apt to waver, nor even many other men, who are tainted with sin.

एकोऽलुब्ध इत्यत्राकारप्रश्लेषो द्रष्टव्यः। एकोऽपि साक्षी लोभादिरहितः स्यात्। अतएव व्यासः-"शुचिक्रियश्च धर्मज्ञः साक्षी यत्रानुभूतवाक्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रमाणमेकोऽपि भवेत्साहसेषु विशेषतः॥'' मेधातिथिगोविन्दराजाभ्यां ''एको लुब्धस्त्वत्साक्षी स्यात्'' इति पठितं व्याख्यातं च-लोभात्मक एकः साक्षी न भवति। एवं चालुब्धो गुणवान्कस्यांचिदवस्थायामेकोऽपि भवतीति। स्त्रियः पुनरात्मशौचांदियुक्ता बह्वयोऽप्यस्थिरबुद्धित्वादृणादानाद्यैः पर्यालोचितव्यवहारे साक्षिण्यो न भवन्ति। अपर्यालोचिते तु स्तेयवाग्दण्डपारुष्यादौ ''स्त्रियाप्यसंभवे कार्यं'' इति साक्षित्वमुक्तम्। अन्येऽपि ये स्तेयादिदोषैर्व्याप्तास्तेऽपि पर्यालोचितव्यवहारे साक्षिणो न स्युः॥७७॥

स्वभावेनैव यद्ब्रूयुस्तद्ग्राह्यं व्यावहारिकम्।
अतो यदन्यद्विब्रूयुर्धर्मार्थं तदपार्थकम्॥७८॥

What witness declare quite naturally, that must be recieved on trials; (depositions) differing from that, which they make improperly, are worthless for (the purposes of) justice.

यत्साक्षिणो भयादिव्यतिरेकेण स्वभावाद्यद्ब्रूयुस्तद्व्यवहारनिर्णयार्थं ग्राह्यम्। यत्पुनः स्वाभाविकादन्यत्कुतोऽपि कारणाद्वदन्ति तद्धर्मविषये निष्प्रयोजनं तन्न ग्राह्यम्॥७८॥

सभान्तःसाक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ।
प्राड्विवाकोऽनुयुञ्जीत विधिना तेन सान्त्वयन्॥७९॥

The witness being assembled in the court in the presence of the plaintiff and of the defendant, let the judge examine them, kindly exhorting them in the following manner.

सभामध्यं साक्षिणः संप्राप्तानर्थिप्रत्यर्थिसमक्षं राजाधिकृतो ब्राह्मणः प्रियोक्तिं रचयन्वक्ष्यमाणप्रकारेण पृच्छेत्॥७९॥

यद्द्वयोरनयोर्वेत्थ कार्येऽस्मिन्चेष्टितं मिथः।
तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता॥८०॥

'What ye know to have been mutually transacted in this matter between the two men before us, declare all that in accordance with the truth; for ye are witness in this (cause).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यद्द्वयोरर्थिप्रत्यर्थिनोरनयोः परस्परमस्मिन्कार्ये चेष्टितं जानीथ तत्सर्वं सत्येन कथयत। यतो युष्माकमत्र साक्षित्वम् ॥८०॥

सत्यं साक्ष्ये ब्रुवन्साक्षी लोकानाप्नोति पुष्कलान्।
इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ॥८१॥
[विक्रियाद्यो धनं किंचिद् गृह्णीयात्कुलसन्निधौ।
क्रमेण स विशुद्धं हि न्यायतो लभते धनम् ॥५॥]

'A witness who speaks the truth in his evidence, gains (after death) the most excellent regions (of bliss) and here (below) unsurpassable fame; such testimony is revered by Brāhmaṇ (himself).

साक्षी साक्ष्ये कर्मणि सत्यं वदन्सन्नुत्कृष्टान्ब्रह्मलोकादीन्प्राप्नोति पुष्कलान्, इह लोकेषु चात्युत्कृष्टां ख्यातिं लभते। यस्मादेषा सत्यात्मिका वाक् चतुर्मुखेन पूजिता ॥८१॥

साक्ष्येऽनृतं वदन्पाशैर्बध्यते वारुणैर्भृशम्।
विवशः शतमाजातीस्तस्मात्साक्ष्यं वदेदृतम् ॥८२॥
[ब्राह्मणो वै मनुष्याणामादित्यस्तेजसां दिवि।
शिरो वा सर्वगात्राणां धर्माणां सत्यमुत्तमम् ॥६॥
नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम्।
साक्षिधर्मे विशेषेण तस्मात्सत्यं विशिष्यते ॥७॥
एकमेवाद्वितीयं तु प्रब्रुवन्नावबुध्यते।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥८॥]

'He who gives false evidence is firmly bound by Varuṇa's fetters, helpless during one hundred existence; let (men therefore) give true evidence.

यस्मात्साक्षी मृषा वाचं कथयन्वरुणसंबन्धिभिः पाशैः सर्परज्जुभिर्जलोदरेण परतन्त्रीकृतः शतं जन्मानि यावदत्यर्थं पीडयते। तस्मात्साक्ष्ये सत्यं ब्रूयात् ॥८२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सत्येन पूयते साक्षी धर्मः सत्येन वर्धते।
तस्मात्सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ॥८३॥

'By truthfulness a witness is purified, through turthfulness his merit grows; truth must, therefore, be spoken by witness of all castes (varṇa).

यस्मात्सत्येन पूर्वार्जितादपि पापात्साक्षी मुच्यते धर्मश्चास्य सत्याभिधानेन वृद्धिमेति तस्मात्सर्ववर्णविषये साक्षिभिः सत्यं वक्तव्यम् ॥८३॥

आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः।
मावमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम् ॥८४॥

'The Soul itself is the witness of the Soul, and the Soul is the reguge of the Soul; despise not thy own Soul, the supreme witness of men.

यस्माच्छुभाशुभकर्मप्रतिष्ठा आत्मैवात्मनः शरणं तस्मादेवं स्वमात्मानं नराणां मध्यमादुत्तमं साक्षिणं मृषाभिधाने नावज्ञासीः ॥८४॥

मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः।
तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ॥८५॥

'The wicked, indeed, say in their hearts, "Nobody sees us;" but the gods distinctly see them and the male within their own breasts.

पापकारिण एवं मन्यन्तेऽस्मानधर्मप्रवृत्तान्न कश्चित्पश्यतीति। तान्पुनर्वक्ष्यमाणा देवाः पश्यन्ति। स्वस्यान्तरपुरुषः पश्यति ॥८५॥

द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः।
रात्रिः संध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम् ॥८६॥

'The sky, the earth, the waters, (the male in) the heart, the moon the sun, the fire, Yama and the wind, the night, the two twilights, and justice know the conduct of all corporeal beings.'

द्युलोकपृथिवीजलहृदयस्थजीवचन्द्रादित्याग्नियमवायुरात्रिसंध्याद्वयधर्माः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वशरीरिणां शुभाशुभकर्मज्ञाः। दिवादीनां चाधिष्ठातृदेवतास्ति सा च शरीरिण्यैकत्रावस्थापिता तत्सर्वं जानातीत्यागमप्रामाण्याद्वेदान्तदर्शनं तदन्नीकृत्येदमुक्तम् ॥८६॥

देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेद्यतं द्विजान्।
उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन् ॥८७॥

The (judge), being purified, shall ask in the forenoon the twice-born (witnesses) who (also have been) purified, (and stand) facing the north or the east, to give true evidence in the presence of (images of) the gods and of Brāhmaṇas.

प्रतिमादेवताब्राह्मणसन्निधाने शुचीन्द्विजातिप्रभृतीन्प्राङ्मुखानुदङ्मुखान्वा स्वयं प्रयतः प्राङ्विवाकः पूर्वाह्णे काले यथातथ्यं साक्ष्यं पृच्छेत् ॥८७॥

ब्रूहीति ब्राह्मणं पृच्छेत्सत्यं ब्रूहीति पार्थिवम्।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥८८॥

Let him examine a Brāhmaṇa (beginning with) 'Speak,' a Kṣatriya (beginning with) 'Speak the truth,' a Vaiśya (admonishing him) by (mentioning) his kine, grain, and gold, a Śūdra (threatening him) with (the guilt of) every crime that causes loss of caste.

ब्रूहीत्येवं शब्दमुच्चार्य ब्राह्मणं पृच्छेत्। सत्यं ब्रूहीति पार्थिवं क्षत्रियं पृच्छेत्। गोबीजसुवर्णापहारे यत्पापं तद्भवतोऽनृताभिधाने स्यादित्येवं वैश्यम्। शूद्रं पुनः सर्वैर्वक्ष्यमाणपापैः संबध्यसे यदि मृषा वदसीति पृच्छेत् ॥८८॥

ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा ॥८९॥

(Saying), 'Whatever places (of torment) are assigned (by the sages) to the slayer of a Brāhmaṇa, to the murderer of women and children to him who betrays a friend, and to an ungrateful man, those shall be thy (portion), if thou speakest

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

falsely.

ब्राह्मणहन्तुः स्त्रीघातिनो बालघातिनश्च ये नरकादिलोका ऋषिभिः स्मृताः, ये च मित्रद्रोहादिकारिणः, ये चोपकर्तुरपकारिणस्ते तव मिथ्यावदतो भवेयुः ॥८९॥

जन्मप्रभृति यत्किञ्चित्पुण्यं भद्र त्वया कृतम्।
तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा ॥९०॥

'(The reward) of all meritorious deeds which thou, good man, hast done since thy birth, shall become the share of the dogs, if in thy speech thou departest from the truth.

हे शुभाचार, यत्त्वया जन्मत आरभ्य किंचित्सुकृतं कृतं तत्सर्वं त्वदीयं कुक्कुरादिकं संक्रामति यदि त्वमसत्यं ब्रवीषि ॥९०॥

एकोऽहमस्मीत्यात्मानं यत्त्वं कल्याण मन्यसे।
नित्यं स्थितस्ते हृद्येषः पुण्यपापेक्षिता मुनिः ॥९१॥

'If thou thinkest, O friend of virtue, with respect to thyself, "I am alone," (know that) that sage who witness all virtuous acts and all crimes, ever resides in thy heart.

हे भद्र, एक एवाहमस्मि जीवात्मक इति यदात्मानं मन्यसे मैवं मंस्थाः। यस्मादेवं पापानां पुण्यानां च द्रष्टा मननान्मुनिः सर्वज्ञस्तव हृदये परमात्मा नित्यमवस्थितः। तथाच श्रुतिः-"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" ॥९१॥

यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः।
तेन चेदविवादस्ते मा गङ्गां मा कुरून्गमः ॥९२॥

'If thou art not at variance with that divine Yama, the sone Vivasvat, who dwells in thy heart, thou needest neither visit the Gangest nor the (land of the) Kurus.

सर्वसंयमनाद्यमः परमात्मा वैवस्वत इति दण्डधारित्वात्, देवनाद्देवः, यस्तवैष हृदि तिष्ठति तेन सह यथार्थकथने यदि तवाविवादः यदा त्वन्मनोगतमसावन्यज्जानाति त्वं चान्यथा कथयसि तदान्तर्यामिणा सह विप्रतिपत्तिः स्यात्। एवं चात्र सत्याभिधानेनैव निःपापः कृतकृत्योऽसि। पापनिर्हरणार्थं मा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गन्नां मा च कुरुक्षेत्रं यासीः। मनूक्तमेवात्र गन्नाकुरुक्षेत्रयोः साम्यं मत्स्यपुराणे व्यासेन स्फुटीकृतम्-"कुरुक्षेत्रसमा गन्ना यत्र तत्रावगाहिता" इति। मेधातिथिगोविन्दराजौ तु विवस्वतः पुत्रो यो यमो दक्षिणदिक्पतिर्लोकतः कर्णगोचरीभूतत्वात्तव हृदये परिस्फुरति तेन सह यदि तवाधर्मकारित्वाद्विवादो नास्ति तदा मा गन्नां मा कुरुक्षेत्रं यासीरिति व्याचक्षाते ॥९२॥

नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः।
अन्धः शत्रुकुलं गच्छेद्यः साक्ष्यमनृतं वदेत्॥९३॥

'Nakest and shorn, tormented with hunger and thirst, and deprived of sight, shall the man who gives false evidence, go with a potsherd to beg food at the door of his enemy.

यः साक्ष्यमसत्यं वदेत्स नग्नः कृतमुण्डनपरिभावोऽन्धः कपरेणोपलक्षितः भिक्षार्थी शत्रुकुलं गच्छेत् ॥९३॥

अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं व्रजेत्।
यः प्रश्नं वितथं ब्रूयात्पृष्टः सन्धर्मनिश्चये॥९४॥

'Headlong, in utter darkness shall the sinful man tumble into hell, who being interrogated in a judicial inquiry answers one question falsely.

यो धर्मनिश्चयनिमित्तं पृष्टः सन्नसत्यं ब्रूयात्स पापवानधोमुखो महान्धकारे यो नरकस्तं गच्छति ॥९४॥

अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह।
यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभां गतः॥९५॥

'That man who in a court (of justice) gives an untrue account of a transaction (or asserts a fact) of which he was not an eye-witness, resembles a blind man who swallows fish with the bones.

यः सभां प्राप्तोऽर्थस्य तत्वार्थस्य वैकल्यमयथार्थाभिप्रायमप्रत्यक्षमनुपलब्धमुत्कोचादिसुखलेशेन कथयति स नरोऽन्ध इव सकण्टकान्मस्त्यान्भक्षयति सुखबुद्ध्या प्रवृत्तो दुःखमेव महल्लभते ॥९५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्य विद्वान् हि वदतः क्षेत्रज्ञो नाभिशङ्कते।
तस्मान्न देवाः श्रेयांसं लोकेऽन्यं पुरुषं विदुः॥९६॥

'The gods are acquainted with no better man in this world than him, of whom his conscious Soul has not distrust, when he gives evidence.

यस्य वदतः सर्वज्ञोऽन्तर्यामी किमयं सत्यं वदत्युतानृतमिति न शङ्कते किंतु सत्यमेवायं वदतीति निर्विशङ्कः संपद्यते। तस्मादन्यं प्रशस्ततरं पुरुषं देवा न जानन्ति॥९६॥

यावतो बान्धवान् यस्मिन् हन्ति साक्ष्येऽनृतं वदन्।
तावतः संख्यया तस्मिन् शृणु सौम्यानुपूर्वशः॥९७॥
[एवं संबन्धनात्तस्मान्मुच्यते नियतावृतः।
पशून्गोश्वपुरुषाणां हिरण्यं भूर्यथाक्रमम्॥९॥]

'Learn now, O firend, from an enumeration in due order, how many relatives he destroys who gives false evidence in several particular cases.

यस्मिन्पश्वादिनिमित्ते साक्ष्येऽनृतं वदन् यत्संख्याकान्पित्रादिबान्धवान्नरके योजयति तत्संख्याकान्क्रमेण परिगणनया मयोच्यमानान्साधो शृणु। अथवा यावतो बान्धवान्यस्मिन्हन्ति यावतां बान्धवानां हननफलं प्राप्नोति तावत्संख्याकाञ्छृणु। पक्षद्वयेऽप्यनृतनिन्दार्थमिदम्॥९७॥

पञ्च पश्वनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥९८॥

'He kills five by false testimony regarding (small) cattle, he kills ten by false testimony regarding kine, he kills a hundred by false evidence concerning horses, and a thousand by false evidence concerning men.

पशुविषयेऽनृते पञ्च बान्धवान्नरके योजयति पञ्चानां बान्धवानां हननफलं प्राप्नोति। एवं दश गोविषये, शतमश्वविषये सहकृं पुरुषविषये। संख्यागौरवं चेदं प्रायश्चित्तगौरवार्थम्॥९८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन्।
सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदीः॥९९॥
[पशुवत्क्षौद्रघृतयोर्यच्चान्यत्पशुसंभवम्।
गोवद्वस्त्रहिरण्येषु धान्यपुष्पफलेषु च॥१०॥
अश्ववत्सर्वयानेषु खरोष्ट्रवतरादिषु॥]

'By speaking falsely in a cuase regarding gold, he kills the born and the unborn; by false evidence concerning land, he kills everything; beware, therefore, of false evidence concerning land.

हिरण्यार्थेऽनृतं वदञ्जातानजातांश्च पुत्रप्रभृतीन्नरके योजयति एषां हननफलं प्राप्नोति। भूमिविषये चानृतं वदन्सर्वप्राणिनां हननफलं प्राप्नोति। तस्माद्भूविषयेऽनृतं मा वदीरिति विशिष्याभिधानम्॥९९॥

वैदूर्यादिष्वनृतं ब्रुवतो भूमिवद्दोषमाह-

अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने।
अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च॥१००॥
[पशुवत्क्षौद्रघृतयोर्यानेषु च तथाश्ववत्।
गोवद्रजतवस्त्रेषु धान्ये ब्राह्मणवद्विधिः॥११॥]

'They declare (false evidence) concerning water, concerning the carnal enjoyment of women, and concerning all gems, produced in water, or consisting of stones (to be) equally (wicked) as a lie concerning land.

तडागकूपग्राह्योदकविषयेऽनृते स्त्रीणां च मैथुनाख्योपभोगविषये अब्जेषु च रत्नेषु च मुक्तादिषु पाषाणमयेषु वैदूर्यादिष्वनृते भूमिवद्दोषमाहुः॥१००॥

एतान्दोषानवेक्ष्य त्वं सर्वाननृतभाषणे।
यथाश्रुतं यथादृष्टं सर्वमेवाञ्जसा वद॥१०१॥

'Marking well all the evils (which are produced) by perjury, declare thou openly everything as (thou hast) heard or seen (it).'

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतानसत्यभाषणदोषानधिगम्य दृष्टश्रुतानतिक्रमेण सर्वमेवाञ्जसा तत्त्वतो ब्रूहि ॥१०१॥

गोरक्षकान्वाणिजिकांस्तथा कारुकुशीलवान्।
प्रेष्यान्वार्धुषिकांश्चैव विप्रान्शूद्रवदाचरेत् ॥१०२॥
[येप्यतीताः स्वधर्मेभ्यः परपिण्डोपजीविनः।
द्विजत्वमभिकाङ्क्षन्ति तांश्च शूद्रानिवाचरेत् ॥१२॥]

Brāhmaṇas who tend cattle, who trade, who are mechanics, actors (or singers), menial servants or usurers, the (judge) shall treat like Śūdras.

गोरक्षणजीविनो, वाणिज्यजीविनः, सूपकारादिकारुकर्मजीविनः, दासकर्मजीविनः, नटकर्मनृत्यगीतादिजीविनः, प्रतिषिद्धजीविनो ब्राह्मणान्प्रकृतसाक्ष्यदर्शने शूद्रवत्पृच्छेत् ॥१०२॥

तद्वदन्धर्मतोऽर्थेषु जानन्नप्यन्यथा नरः।
न स्वर्गाच्च्यवते लोकाद्दैवीं वाचं वदन्ति ताम् ॥१०३॥

In (some) cases a man who, though knowing (the facts to be) different, gives such (false evidence) from a pious motive, does not lose heaven; such (evidence) they call the speech of the gods.

तदेतत्साक्ष्यमन्यथापि जानन्मनुष्यो धर्मेण दयादिना व्यवहारेष्वन्यथा वदन्स्वर्गलोकान्न भ्रश्यति। यस्माद्यदेतन्निमित्तविशेषेणासत्याभिधानं तां देवसंबन्धिनीं वाचं मन्वादयो वदन्ति ॥१०३॥

क्व पुनस्तदसत्यं वक्तव्यमित्यत आह-

शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः।
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते ॥१०४॥

Whenever the death of a Śūdra, of a Vaiśya of a Kṣatriya, or a Brāhmaṇa would be (caused by a declaration of the truth, a falsehood may be spoken; for such (falsehood) is preferable to the truth.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्मिन्व्यवहारे सत्याभिधाने सति शूद्रवैश्यक्षत्रियब्राह्मणानां वधः सम्पद्यते तत्रासत्यं वक्तव्यम्। यस्मात् यस्मिन्विषयेऽनृतं यत्तत्प्राणरक्षणेन सत्याद्विशिष्यते। एतच्च प्रमादस्खलिताधर्मविषयत्वे न त्वत्यन्ताधार्मिकसंधिकारस्तेनादिविषये। तथा गौतमः-"नानृतवदने दोषो यज्जीवनं चेत्तदधीनं नतु पापीयसो जीवनम्" इति। नच "न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम्" (अ. ८ श्लो. ३८०) इति मनुनैव वक्ष्यमाणत्वान्न ब्राह्मणवधप्रसक्तिरिति वाच्यम्। उग्रदण्डत्वाद्राज्ञः कथञ्चित्संभवात्। अत्र वचने शूद्रादिक्रमेणाभिधानं वधस्यामन्नलत्वात्॥१०४॥

वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सरस्वतीम्।
अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम्॥१०५॥

Such (witnesses) must offer to Sarasvatī oblations of boiled rice (*caru*) which are sacred to the goddess of speech, (thus) performing the best penance in order to expiate the guilt of that falsehood.

ते साक्षिणोऽनृताभिधायिनो वाग्देवताकैश्चरुभिः सरस्वतीं यजेरन्। तस्यानृताभिधानजनितपापस्य प्रकृष्टां शुद्धिं कुर्वाणाः। साक्षिबहुत्वापेक्षं चेदं न त्वेकस्यैव साक्षिणः कपिञ्जलन्यायेन चरुत्रयम्। यद्यपि वाग्देवताके चरौ वाक्शब्देनैव देवतात्वं न सरस्वतीशब्देन "विधिशब्दस्य मन्त्रत्वे भावः स्यात्" इति न्यायात्तथापि "वाग्वै सरस्वती" इति श्रुतेर्वाक्सरस्वत्योरेकार्थत्वात्सरस्वती-मित्युपसंहारः। अत्र प्रकरणे चेदं प्रायश्चित्ताभिधानं लाघवार्थम्। तत्र क्रियमाणे शूद्रविट्क्षत्रियब्राह्मणवधविषयानृतवादिन इत्यपि वक्तव्यं स्यात्॥१०५॥

कूष्माण्डैर्वापि जुहुयात्घृतमग्नौ यथाविधि।
उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वा॥१०६॥

Or such (a witness) may offer according to the rule clarified butter in the fire, reciting the Kūṣmāṇḍa texts, or the Ṛk, sacred to Varuṇa, 'Untie, O Varuṇa, the uppermost fetter,' or the three verses addressed to the Waters.

कूष्माण्डमन्त्रा यजुर्वेदिका "यद्देवा देवहेडनम्" इत्येवमादयस्तैर्मन्त्रदेवतायै

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

घृतमग्नौ जुहुयात्। यथाविधि परिस्तरणादि त्वात्मधर्मेण स्वगृह्योक्तेन। "उदुत्तमं वरुणपाशम" इत्येतया वरुणदेवताकया "आपो हि ष्ठा:" इति तृचेन वाग्देवताकेन जुहुयात्। घृतमग्नाविति सर्वत्रानुषन्नः॥१०६॥

त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः।
तत्ऋणं प्राप्नुयात्सर्वं दशबन्धं च सर्वतः॥१०७॥

A man who, without being ill, does not give evidence in (cases of) loans and the like within three fortnights (after the summons), shall become responsible for the whole debt and (pay) a tenth part of the whole (as a fine to the king).

अव्याधितः साक्षी ऋणादानादिव्यवहारे त्रिपक्षपर्यन्तं यदि साक्ष्यं न वदेत्तदा तद्विवादास्पदं सर्वमृणमुत्तमर्णस्य दद्यात्, तस्य च सर्वस्यर्णस्य दशमं भागं राज्ञो दण्डं दद्यात्॥१०७॥

यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः।
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः॥१०८॥

The witness to whom, within seven days after he has given evidence, happens (a misfortune through) sickness, a fire, or the death of a relative, shall be made to pay the debt and a fine.

यस्य साक्षिण उक्तसाक्ष्यस्य सप्ताहमध्ये व्याध्यग्निदाहसंनिहित-पुत्रादिज्ञातिमरणानामन्यतमं भवति दैवसूचितमिथ्याभिदोषत्वादृणमुत्तमर्णस्य दण्डं च राज्ञा दाप्यः॥१०८॥

असाक्षिकेषु त्वर्थेषु मिथो विवदमानयोः।
अविन्दंस्तत्त्वतः सत्यं शपथेनापि लम्भयेत्॥१०९॥

If two (parties) dispute about matters for which no witness are available, and the (judge) is unable to really ascertain the truth, he may cause it to be discovered even by an oath.

अविद्यमानसाक्षिकेषु व्यवहारेषु परस्परं विवदमानयोस्तत्त्वत-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्छलादिव्यतिरेकेण सत्यमलभमानः प्राड्विवाको वक्ष्यमाणेन शपथेन सत्यमुन्नयेत् ॥१०९॥

महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः।
वसिष्ठश्चापि शपथं शेपजवने नृपे॥११०॥

Both by the great sages and the gods oaths have been taken for the purpose of (deciding doubtful) matters; and Vasiṣṭha even swore an oath before king (Sudās), the son of Pijavana.

सप्तर्षिभिर्देवैश्चेन्द्रादिभिः संदिग्धकार्यनिर्णयार्थं शपथाः कृताः वसिष्ठोऽप्यनेन पुत्रशतं भक्षितमिति विश्वामित्रेणाक्रुष्टः स्वपरिशुद्धये पिजवनापत्ये सुदासि राजनि शपथं चकार। अनेकार्थत्वाद्धातूनां शपिरपि करोत्यर्थः॥११०॥

न वृथा शपथं कुर्यात्स्वल्पेऽप्यर्थे नरो बुधः।
वृथा हि शपथं कुर्वन् प्रेत्य चेह च नश्यति॥१११॥

Let no wise man swear an on oarth falsely, even in a trifling matter; for he who swears an oath falsely in lost in this (world) and after death.

स्वल्पेऽपि कार्ये न वृथा शपथं पण्डितः कुर्यात्। वृथा शपथं कुर्वन्परलोक इह लोके नरकप्राप्त्याऽकीर्तिप्राप्त्या च नाशं प्राप्नोति॥१११॥

वृथाशपथप्रतिप्रसवार्थमाह-

कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्॥११२॥

No crime, causing loss of caste, is committed by swearing (falsely) to women, the objects of one's desire, at marraiges, for the sake of fodder for a cow, or a fuel, and in (order to show) favour to a Brāhmaṇa.

बहुभार्यस्य नान्यामहं कामये त्वमेव मत्प्रेयसीत्येवंविशिष्टः सुरतलाभार्थं कामिनीविषये, विवाहविषये च मयान्या न वोढव्येत्यादौ, गवार्थं घासाद्युपहारे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

च, अग्नौ होमार्थमिन्धनाद्युपहारे, ब्राह्मणरक्षार्थमन्नीकृतधनादौ वृथा शपथे पापं न भवति।११२॥

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः॥११३॥

Let the (judge) casue a Brāhmaṇa to swear by his veracity, a Kṣatriya by his cahriot or the animal he rides on and by his weapons, a Vaiśya by his kine, grain, and gold, and a Śūdra by (impurecating on his own head the guilt) of all grievous offences (*pātaka*).

ब्राह्मणं सत्यशब्दोच्चारणेन शापयेत्। क्षत्रियं वाहनायुधं मम निष्फलं स्यादित्येवम्। वैश्यं गोबीजकाञ्चनानि च मम निष्फलानि स्युरित्येवम्। शूद्रं च सर्वाणि मे पातकानि स्युरित्येवं शापयेत्॥११३॥

कार्यगौरवलाघवापेक्षया–

अग्निं वाहारयेदेनमप्सु चैनं निमज्जयेत्।
पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत्पृथक्॥११४॥

Or the (judge) may cause the (party) to carry fire or to dive under water, or severally to touch the heads of his wives and children.

अग्निसन्निभं पञ्चशत्पलिकमष्टाङ्गुलमयःपिण्डं हस्तद्वयविन्यस्तसप्ताश्वत्थपत्रं शूद्रादिकं सप्त पदानि पितामहाद्युक्तविधानादाहारयेत्। जलौकादिरहितजले चैनं निमज्जयेत्। अशेषेतिकर्तव्यता स्मृत्यन्तरे ज्ञेया। पुत्राणां दाराणां च पृथक् शिरस्येनं स्पर्शयेत्॥११४॥

यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च।
न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः॥११५॥

He whom the blazing fire burns not, whom the water forces not to come (quickly) up, who meets with no speedy misfortune, must be held innocent on (the strength of) his oath.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यं प्रदीप्तोऽग्निर्न दहति, आपश्च यं नोर्ध्वं नयन्ति, न चार्तिमेव महतीं प्राप्नोति स शपथे विशुद्धो ज्ञेयः॥११५॥

अत्र प्रकृतमर्थवादमाह-

वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा।
नाग्निर्ददाह रोमापि सत्येन जगतः स्पृशः।॥११६॥

For formerly when Vatsa was accused by his younger brother, the fire, the spy of the world, burned not even a hair (of his) by reason of his veracity.

यस्मात्पूर्वकाले वत्सनाम्न ऋषेर्न त्वं ब्राह्मणः शूद्रापत्योऽसीत्येवं कनीयसा वैमात्रेयेणाभिक्रुष्टस्य नैतदेवमिति स यथार्थमग्निं प्रविष्टस्याग्निः सर्वस्य जगतः शुभाशुभकर्तव्ये चारभूतः सत्येन हेतुना रोमैकमपि वह्निर्न दग्धवान्॥११६॥

यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत्।
तत्कार्यं निवर्त्तेत कृतं चाप्यकृतं भवेत्॥११७॥

Whenever false evidence has been given in any suit, let the (judge) reverse the judgment, and whatever has been done must be (considered as) undone.

यस्मिन्यस्मिन्व्यवहारे साक्षिभिरनृतमुक्तमिति निश्चितं भवेत्तत्कार्यमसमाप्तं प्राड्विवाकः पुनरपि निवर्तयेत्। यदपि च दण्डसमाप्तिपर्यन्ततां नीतं तदपि पुनः परीक्षेत॥११७॥

वक्ष्यमाणविशेषार्थं लोभादीन्पृथङ्निर्दिशति-

लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते॥११८॥

Evidence (given) from covetousness, distraction, terror, friendhsip, lust, wrath, ignorance, and childishness is declared (to be) invalid.

लोभेन, विपरीतज्ञानेन, भयेन, स्नेहेन, कामेन, क्रोधेन, अज्ञानेन, अनवस्थानेन साक्ष्यमसत्यमुच्यते॥११८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत्।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः॥११९॥

I will propound in (due) order the particular punishments for him who gives false evidence from any one of these motives.

एषां लोभादीनां मध्यादन्यतमस्मिन्निमित्ते सति यो मिथ्या साक्ष्यं कथयेत्तस्य दण्डविशेषाणि क्रमशो वदिष्यामि॥११९॥

लोभात्सहस्त्रं दण्डयस्तु मोहात्पूर्वं तु साहसम्।
भयाद्द्वौ मध्यमौ दण्डौ मैत्रात्पूर्वं चतुर्गुणम्॥१२०॥

(He who commits perjury) through covetousness shall be fined one thousand (*paṇas*), (he who does it) through distraction, in the lowest amercement; (if a man does it) through fear, two middling amercements shall be paid as a fine, (if he does it) through friendship, four times the amount of the lowest (amercement).

लोभेन मिथ्याभिधाने सति वक्ष्यमाणपणानां सहस्रं दण्डयः, मोहेन प्रथमं साहस वक्ष्यमाणम्, भयेन च वक्ष्यमाणौ मध्यमसाहसौ, मैत्रात्प्रथमसाहसं चतुर्गुणम्॥१२०॥

कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्।
अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु॥१२१॥

(He who does it) through lust, (shall pay) ten times the lowest amercement, but (he who does it) through wrath, three times the next (or second amercement); (he who does it) through ignorance, two full hundreds, but (he who does it) through childishness, one hundred (panas).

स्त्रीसंभोगरूपकामानुरोधेन मिथ्या वदन्प्रथमसाहसं दशगुणं दण्डयः। क्रोधेन तु परं मध्यमसाहसं त्रिगुणं वक्ष्यमाणं, अज्ञानत्वाद्द्वे शते, बालिश्यादनवधानात्पणशतमेव दण्डय इति सर्वत्रानुषन्नः॥१२१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतानाहुः कौटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः।
धर्मस्याव्यभिचारार्थमधर्मनियमाय च॥१२२॥

They declare that the wise have prescribed these fines for perjury in order to prevent a failure of justice, and in order to restrain injustice.

सत्यरूपधर्मस्यापरिलोपार्थमसत्यरूपाधर्मस्य च वारणार्थमेतान्कौट-साक्ष्यविषये पूर्वैर्मुनिभिरुक्तान्दण्डान्मन्वादय आहुः। एतच्च सकृत्कौट-साक्ष्ये॥१२२॥

भूयोभूयः कौटसाक्ष्यकरणेतु-

कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः।
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत्॥१२३॥

But a just king shall fine and banish (men of) the three (lower) castes (*varṇa*) who have given false evidence, but a Brāhmaṇa he shall (only) banish.

क्षत्रियादींस्त्रीन्वर्णान्कौटसाक्ष्यात्पूर्वोक्तेन दण्डयित्वा धार्मिको राजा स्वराष्ट्राद्विवासयेत्। ब्राह्मणं तु धनदण्डव्यतिरेकेण स्वराष्ट्रान्निःसारयेत्। "न जातु ब्राह्मणं हन्यात्सर्वपापेष्ववस्थितम्। राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम्॥" (अ. ८ श्लो. ३८०) इति धनसहितनिर्वासनस्याभिधास्यमानत्वात्। गोविन्दराजस्तु ब्राह्मणं पुनः पूर्वदण्डेन दण्डयित्वा नग्नं कुर्यादिति व्याचष्टे। मेधातिथिस्तु ब्राह्मणस्य विवासस्त्वं वासोऽपहरणं गृहभन्नो वेत्याचष्टे॥१२३॥

दश स्थानानि दण्डस्य मनुः स्वायंभुवोऽब्रवीत्।
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्॥१२४॥

Manu, the son of the Self-existent (Svayambhū), has named ten places on which punishment may be (made to fall) in the cases of the three (lower) castes (*varṇa*); but a Brāhmaṇa shall depart unhurt (from the country).

हैरण्यगर्भो मनुर्दश दण्डस्थानान्युक्तवान्। यानि क्षत्रियादिवर्णत्रयविषये भवन्ति। ब्राह्मणः पुनर्महत्यपराधेऽक्षतशरीरो देशान्निस्सार्यते॥१२४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च॥१२५॥

(These are) the organ, the belly, the tongue, the two hands, and fifthly the two feet, the eye, the nose, the two ears, likewise the (whole) body.

लिन्नादीन्येतानि दश दण्डस्थानानि, अतस्तत्तदन्नेनापराधे सति अपराधलाघवगौरवापेक्षया तत्तदन्नताडनवेदनादि कर्तव्यम्। अल्पापराधे यथाश्रुतं धनदण्डः। देहदण्डो मारणं महापातकादौ॥१२५॥

अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः।
सारापराधौ चालोक्य दण्डं दण्डयेषु पातयेत्॥१२६॥

Let the (king), having fully ascertained the motive, the time and place (of the offence), and having considered the ability (of the criminal to suffer) and the (nature of the) crime, cause punishment to fall on those who deserve it.

पुनःपुनरिच्छतोऽपराधकरणमपेक्ष्य ग्रामारण्यादिचापराधिस्थानं रात्र्यादिकं वापराधस्यापेक्ष्य सारं चापराधकारिणो धनशरीरादिसामर्थ्यमपराधं च गुरुलघुभावेन चालोक्य दण्डनीयेषु दण्डं कुर्यात्। एतच्चभिहिताभिधास्यमानदण्ड-शेषभृतम्॥१२६॥

अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम्।
अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत्॥१२७॥

Unjust punishment destroys reputation among men, and fame (after death), and causes even in the next world the loss of heaven; let him, therefore, beware of (inflicting) it.

जीवतः ख्यातिर्यशः मृतस्य ख्यातिः कीर्तिः, यस्मादनुबन्धाद्यनपेक्ष्य दण्डनमिह लोके यशोनाशनं मृतस्य च कीर्तिनाशनं परलोके च धर्मान्तरार्जितस्वर्गप्रतिबन्धकं तस्मात्तत्परित्यजेत्॥१२७॥

अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकं चैव गच्छति॥१२८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

A king who punishes those who do not deserve it, and punishes not those who deserve it, brings great infamy on himself and (after death) sinks into hell.

राजा दण्डानर्हान्धनलोभादिना दण्डयन्, दण्डार्हश्चानुराधादिनोत्सृजन्महतीमख्यातिं प्राप्नोति नरकं च व्रजति॥१२८॥

वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डं तु वधदण्डमतः परम्॥१२९॥

Let him punish firt by (gentle) admonition, afterwards by (harsh) reproof, thirdly by a fine, after than by corporal chastisement.

न साधु कृतवानसि मैवं भूयः कार्षीरित्येवं वाङ्निर्भर्त्सनं प्रथमापराधे गुणवतः कुर्यात्। तथापि यदि नोपशाम्यति तदा धिग् जाल्म माजीव हानिस्ते पापस्य भूयादित्येवमादि तस्य कार्यम्। तदापि यद्यसन्मार्गान्न निवर्तते तदा धनदण्डमस्य तृतीयं कुर्यात्। एवमपि चेन्नावतिष्ठते तदातः परं वधदण्डं ताडनाद्यन्नच्छेदरूपं तस्य कुर्यान्न मारणम्॥१२९॥

वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात्।
तदैषु सर्वमप्येतत्प्रयुञ्जीत चतुष्टयम्॥१३०॥

But when he cannot restrain such (offenders) even by corporal punishment, then let him apply to them even all the four (modes conjointly).

यतो वक्ष्यति "वधेनापि यदा त्वेतान्" (अ. ८ श्लो. १३०) इति। व्यस्तेनान्नच्छेदेनापि दण्डयान्वशे कर्तुं न शक्नुयात्तदा एतेषु सर्वं वाग्दण्डादिचतुष्टयं कुर्यात्॥१३०॥

लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि।
ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः॥१३१॥

Those technical names of (certain quantities of) copper, silver, and gold, which are generally used on earth for the purpose of business transactions among men, I will fully declare.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ताम्ररूप्यसुवर्णानां याः पणादिसंज्ञाः क्रयविक्रयादिलोकव्यवहारार्थं पृथिव्यां प्रसिद्धास्ता दण्डाद्युपयोगार्थं साकल्येन कथयिष्यामि ॥१३१॥

जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥१३२॥

The very small mote which is seen when the sun shines through a lattice, they declare (to be) the least of (all) quantities and (to be called) a trasarenu (a floating particle of dust).

गवाक्षविवरप्रविष्टसूर्यरश्मिषु यत्सूक्ष्मं रजो दृश्यते तद्दृश्यमानपरिमाणानां प्रथमं त्रसरेणुं वदन्ति ॥१३२॥

त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः।
ता राजसर्षपस्तिस्त्रस्ते त्रयो गौरसर्षपः ॥१३३॥

Know (that) eight trasareṇus (are equal) in bulk (to a likṣā (the egg of a lous), three of those to one grain of black mustard (rājasarṣapa), and three of the latter to a white mustard-seed.

अष्टौ त्रसरेणवो लिक्षैका परिमाणेन ज्ञेया। तास्तिस्रो लिक्षाराजसर्षपो ज्ञेयः। ते राजसर्षपास्त्रयो गौरसर्षपो ज्ञेयः ॥१३३॥

सर्षपाः षट् यवो मध्यस्त्रियवं त्वेककृष्णलम्।
पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश ॥१३४॥

Six grains of white mustard are one middle sized barley-corn, and three barley-corns one *kṛṣṇnala* (*raktikā*, or guñja-berry); five *kṛṣṇalas* are one *māṣa* (bean), and sixteen of those one *suvarṇa*.

गौरसर्षपाः षट् मध्यो न स्थूलो नापि सूक्ष्मो यवो भवति। त्रिभिर्यवैः कृष्णलं रक्तिकेति प्रसिद्धम्। पञ्चभिः कृष्णलैर्माषः। षोडश माषा सुवर्णः स्यात्। पुंलिन्नश्चायं परिमाणवचनः ॥१३४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पलं सुवर्णाश्चत्वारः पलानि धरणं दश।
द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः ॥१३५॥

Four survarṇas are one *pala*, and ten *palas* one *dharaṇa*; two *kṛṣṇalas* (of silver), weighted together, must be considered one *māṣaka* of silver.

चत्वारः सुवर्णाः पलं स्यात्। दश पलानि धरणम्। कृष्णलद्वयं समं कृत्वा तुलया धृतं रूप्यमाषको बोद्धव्यः ॥१३५॥

ते षोडश स्याद्धरणं पुराणश्चैव राजतः।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥१३६॥

Sixteen of those make a silver *dharaṇa*, or *purāṇa*; but know (that) a karṣa of copper is a *kārṣāpaṇa*, or *paṇa*.

ते षोडश रूप्यमाषका रौप्यधरणं पुराणश्च राजतो रजतसम्बन्धी स्यात्। कार्षिकस्ताम्रमयः कार्षापणः पण इति विज्ञेयः। कार्षिकश्च शास्त्रीयपलचतुर्थभागो बोद्धव्यः। अतएव "पलं कर्षचतुष्टयम्" (अमरकोषे वैश्यवर्गे श्लो. ८६) इत्याभिधानिकः ॥१३६॥

धरणानि दश ज्ञेयः शतमानस्तु राजतः।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥१३७॥

Know (that) ten *dharaṇas* of silver make one *śatamāna;* four *survarṇas* must be considered (equal) in weight to a *niṣka*.

दश रूप्यधरणानि रौप्यशतमानो ज्ञातव्यः। चतुर्भिः सुवर्णैर्निष्कः प्रमाणेन बोद्धव्यः ॥१३७॥

पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः।
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः ॥१३८॥

Two hundred and fifty panas are declared (to be) the first (or lowest) amercement, five (hundred) are considered as the mean (or middle-most), but one thousand as the highest.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पञ्चाशदधिके द्वे पणशते प्रथमसाहसो मन्वादिभिः स्मृतः। पणपञ्चशतानि मध्यमसाहसो ज्ञेयः। पणसहस्रं तूत्तमसाहसो ज्ञेयः॥१३८॥

ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम्॥१३९॥

A debt being admitted as due, (the defendant) shall pay five in the hundred (as a fine), if it be denied (and proved) twice as much; that is the teaching of Manu.

मयोत्तमर्णस्य धनं देयमिति सभायामधमर्णेनोक्ते सत्यधमर्णः पणशतात्पञ्च पणा इत्येवं दण्डमर्हति। यदा तु सभायामपि न किंञ्चिदस्मै धारयामीत्येवमपलपति तदा पणशताद्दशपणा इत्येवं दण्डमर्हति। इत्येवं मनुस्मृतौ दण्डप्रकारः॥१३९॥

वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्धिनीम्।
अशीतिभागं गृह्णीयान्मासाद्वार्धुषिकः शते॥१४०॥

A money-lender may stipulate as an increase of his capital, for the interest, allowed by Vasiṣṭha, and take monthly the eightieth part of a hundred.

वसिष्ठेनोक्तां वृद्धिं धर्म्यत्वाद्धनवृद्धिकरीं वृद्धिजीवी गृह्णीयात्। तामेव दर्शयति। शते प्रयुक्तेऽशीतिभागं प्रतिमासं वृद्धिं गृह्णीयात्॥१४०॥

द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन्।
द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्विषी॥१४१॥

Or, remembering the duty of good men, he may take two in the hundred (by the month), for he who takes two in the hundred becomes not a sinner for gain.

साधूनामयं धर्म इति मन्यमानः पणशते प्रयुक्ते पणद्वयं वा प्रतिमासं गृह्णीयात्। यस्मात् द्विकं शतं हि गृह्णानो वृद्धिधनग्रहणे किल्बिषी न भवति॥१४१॥

द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं समम्।
मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः॥१४२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Just two in the hundred, three, four, and five (and not more), he may takes as monthly interest according to the order of the castes (*varṇa*).

ब्राह्मणादिवर्णानां क्रमेण द्विकं त्रिकं चतुष्कं पञ्चकं शतसममितो नाधिकं मासस्यसम्बन्धिनीं वृद्धिं गृह्णीयात्। नन्वशीतिभागो लघु, द्विकशतग्रहणं गुरु, कथमिमौ ब्राह्मणस्य लघुगुरुकल्पौ विकल्पेताम्। अत्र मेधातिथिगोविन्दराजौ तु पूर्ववृद्ध्या निर्वाहासम्भवे द्विकशतपरिग्रह इति व्याचक्षाते। इदंतु वदामः-सबन्धकेष्वशीतिभागग्रहणं बन्धकरहिते तु द्विकशतवृद्धिपरिग्रहः। तदाह याज्ञवल्क्यः "अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके। वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा॥" (अ. २ श्लो. ३७) वेदान्तोद्गीतमहसो मुनेर्व्याख्यान-माद्रिये। तद्विरुद्धं स्वबुध्या च निबद्धमधुनातनैः॥१४२॥

न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्।
न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः॥१४३॥

But if a beneficial pledge (*i.e.* one from which profit accrues, has been given), he shall receive no interest on the loan; nor can he, after keeping (such) a pledge for a very long time, give or sell it.

भूमिगोधनादौ भोगार्थं बन्धके दत्ते धनप्रयोगभवामनन्तरोक्तां वृद्धिमुत्तमर्णो न लभते। कलासंरोधाच्चिरकालावस्थानाद्द्विगुणीभूतमूलधनप्रवेशेऽपि न निसर्गोऽन्यस्मै दानं, न वान्यतो विक्रयः। मेधातिथिगोविन्दराजौ तु आधेश्चिरकालावस्थानेऽपि न निसर्गो नान्यत्र बन्धकेनार्पणमिति व्याचक्षाते। अत्र तु सर्वदेशीयशिष्टाचारविरोधः बन्धकीकृतभूम्यादेरन्यत्राधीकरण-समाचारात्॥१४३॥

न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत्।
मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेत्॥१४४॥

A pledge (to be kept only) must not be used by force, (the creditor), so using it, shall give up his (whole) interest, or, (if it has been spoilt by use) he shall satify the (owner)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

by (paying its) original price; else he commits a theft of the pledge.

गोप्याधिविषयं वचनमिदम्। वस्त्रालङ्कारादिर्गोप्याधिर्बलान्न भोक्तव्यः भुञ्जानोवृद्धिमुत्सृजेत्प्राङ्मूल्येनात्रैनं तोषयेत्। यद्वा भोगेनासारतामाधौ नीते सारावस्थाधिमूल्यदानेन स्वामिनं तोषयेदन्यथा बन्धकचौरः स्यात्॥१४४॥

आधिश्चोपानिधिश्चोभौ न कालात्ययमर्हतः।
अवहार्यौ भवेतां तौ दीर्घकालमवस्थितौ॥१४५॥

Neither a pledge nor a deposit can be lost by lapse of time; they are both recoverable, though they have remained long (with the bailee).

आधिर्बन्धकः, उपनिधीयत इत्युपनिधिः प्रीत्या भोगार्थमर्पितं द्रव्यम्। नारदस्मृतिलक्षितौ च निक्षेपोपनिधी तात्रेवात्रोपनिधिशब्देन गृह्येते। एतावाध्युपनिधी चिरकालावस्थितावपि न कालात्ययमर्हतः। यदैव स्वामिना प्रार्थितौ तदैव तस्यावहार्यौ समर्पणीयावित्यर्थः॥१४५॥

संप्रीत्या भुज्यमानानि न नश्यन्ति कदाचन।
धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते॥१४६॥

Things used with friendly assent, a cow, a camel, a riding-horse, and (a beast) made over for breaking in, are never lost (to the owner).

"यत्किंचिद्दश वर्षाणि" (अ. ८ श्लो. १४७) इत्यनन्तरं भोनेन स्वत्वहानिं वक्ष्यति तदपवादार्थमिदम्। दृष्यमाना गौरुष्ट्रोऽश्वश्च वहन्दमनार्थं च प्रयुक्तो बलीवर्दादिः एते प्रीत्यान्येन तु भुज्यमानाः कदाचिदपि स्वामिनो न नश्यन्ति। प्रदर्शनार्थमिदं प्रीत्योपभुज्यमानं न नश्यतीति विवक्षितम्। सामान्योपक्रमं चेदं विशेषाभिधनमिति नपुंसकलिन्नता॥१४६॥

यत्किञ्चिद्दश वर्षाणि सन्निधौ प्रेक्षते धनी।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति॥१४७॥

(But in general) whatever(chattel) an owner sees en-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

joyed by others during ten years, while, though present, he says nothing, that (chattel) he shall not recover.

यत्किंचिद्धनजातं समक्षमेव प्रीत्यादिव्यतिरेकेण परैर्दश वर्षाणि भुज्यमानं स्वामी प्रेक्षते मा भुङ्क्ष्वेत्यादिप्रतिशेधोक्तिं न रचयति नासौ तल्लब्धुं योग्यो भवति। तस्य तत्र स्वाम्यं निवर्तत इति भावः॥१४७॥

अजडश्चेदपोगण्डो विषये चास्य भुज्यते।
भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति॥१४८॥

If (the owner is) neither an idiot nor a minor and if (his chattel) is enjoyed (by another) before his eyes, it is lost to him by law; the adverse prossessor shall retain that property.

जडो बुद्धिविकलः। न्यूनषोडशवर्षः पोगण्डः। तथाच नारद-"बाल आषोडशाद्वर्षात्पोगण्डश्चापि शब्दितः"। स धनस्वामी यदि जडः पोगण्डश्च न भवति तदीयदर्शनविषये च तद्धनं भुज्यते तदा स्वामिनो व्यवहारेण नष्टं ततो भोक्तुरेव तद्धनं भवति॥१४८॥

आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः।
राजस्वं श्रोत्रियस्वं च न भोगेन प्रणश्यति॥१४९॥
[यद्विनाऽगममत्यन्तं भुक्तपूर्वैस्त्रिभिर्भवे।
न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम्॥१३॥]

A pledge, a boundary, the property of infants, an (open) deposit, a sealed deposit, women, the property of the king and the wealth of a Śrotriya are not lost in consequence of (adverse) enjoyment.

बन्धः, ग्रामादिमर्यादा, बालधनं, निक्षेपः "वासनस्थमनाख्याय समुद्रं यन्निधीयते" इति नारदोक्त उपनिधिलक्षणः, दास्यादिस्त्रियः, राजश्रोत्रियधनानि, उक्तेन दशवर्षभोगेन न स्वामिनो नश्यन्ति न भोक्तुः स्वत्वं भजन्ते॥१४९॥

यः स्वामिनाननुज्ञातमाधिं भुङ्क्तेऽविचक्षणः।
तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः॥१५०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

The fool who uses a pledge without the permission of the owner, shall remit half of his interest, as a compensation for (such) use.

यो वृद्ध्या दत्तं बन्धं स्वाम्यनुज्ञाव्यतिरेकेण मूर्खो निह्नवेन भुङ्क्ते तेन तस्य भोगस्य संशुद्ध्यर्थमर्धवृद्धिर्भोक्तव्या। बलभोगेन तु भोक्तव्ये बलादधिभुञ्जाने सति सर्ववृद्धित्याग एवोक्तः॥१५०॥

कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता।
धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम्॥१५१॥

In money transactions interest paid at one time (not by instalments) shall never exceed the double (of the principal); on grain, fruit, wool or hair, (and) beasts of burden it must not be more than five times (the original amount).

वृद्ध्या धनप्रयोगः कुसीदं तत्र या वृद्धिः सकृद्गृहीता सा द्वैगुण्यं नातिक्रामति मूलवृद्धिर्द्विगुणैव भवति। प्रतिदिनप्रतिमासादिग्राह्येति तात्पर्यम्। धान्ये पुनर्वृद्ध्यादिप्रयुक्ते, सदे वृक्षफले, लूयत इति लव ऊर्णालोम तस्मिन्, वाहनीये च बलीवर्दादौ प्रयुक्ते चिरेणापि कालेन मूलधान्यादिना सह पञ्चगुणतां नातिक्रामेदिति॥१५१॥

कृतानुसारादधिका व्यतिरिक्ता न सिद्ध्यति।
कुसीदपथमाहुस्तं पञ्चकं शतमर्हति॥१५२॥

Stipulated interest beyond the legal rate, being against (the law), cannot be recovered; they call that usurious way (of lending); (the lender) is (in no case) entitled to (more than) five in the hundred.

कृता या वृद्धिर्द्विकं त्रिकमिति शास्त्रेण वर्णक्रमेणोक्ता तस्याः शास्त्रानुसारादधिका व्यतिरिक्ता कृता। अतोऽन्या वृद्धिरकृतेत्यर्थः। किन्तु कृतापि वृद्धिर्वर्णक्रमेण द्विकत्रिकशतादिरूपैर्या मासे ग्राह्या। तथाच विष्णुः-"वृद्धिं दद्युरकृता अपि वत्सरातिक्रमे यथाभिहिता वर्णक्रमेण" द्विकत्रिकादिनेत्यर्थः। किं त्वकृतवृद्धावपि विशेषान्तरमाह। कुत्सितात्प्रसरत्ययं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पन्था इति कुसीदपथः अयमधमर्णो यच्छूद्रविषयोक्तं पञ्चकं शतं द्विजातेरपि गृह्णातीत्येवं कुत्सितपन्थाः पूर्वोक्ताद्धर्म्यवृद्धिकरादपकृष्ट इत्येवं मन्वादय आहुः। इयं चाकृता वृद्धिरुद्धारविषये याचनादूर्ध्वं बोद्धव्या तदाह कात्यायनः-"प्रीतिदत्तं न वर्धेत यावन्न प्रतियाचितम्। याच्यमानं नदत्तंचेद्वर्धते पञ्चकं शतम्" ॥१५२॥

नातिसांवत्सरीं वृद्धिं न चादृष्टां पुनर्हरेत्।
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या॥१५३॥
[अथ शक्तिविहीनः स्यादृणी कालविपर्ययात्।
प्रेक्ष्यश्च तमृणं दाप्यः काले देशे यथोदयम्॥१४॥]

Let him not take interest beyond the year, nor such as is inapproved, nor compound interest, periodical interest, stipulated interest, and corporal interest.

ममैकस्मिन्मासि मासद्वये मासत्रये वा गते तस्य वृद्धिं विगणय्यैकदा दातव्येत्येवंविधनियमपूर्वकवृद्धिग्रहणमुत्तमर्णः संवत्सरपर्यन्तं कुर्यात्। नातिक्रान्ते संवत्सरे नियमस्य वृद्धिं गृह्णीयात्। न च शस्त्राददृष्टामुक्तधर्म्यद्विक-त्रिकशताद्यधिकां गृह्णीयात्। अधर्मत्वबोधनार्थो निषेधः। चक्रवृद्ध्यादिचतुष्टयीं चाशास्त्रीयां न गृह्णीयात्। तासां स्वरूपमाह बृहस्पतिः-"कायिका कायसंयुक्ता मासग्राह्या च कालिका। वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता"। तत्र चक्रवृद्धिः स्वरूपेणैव गर्हिता। कालावृद्धिस्तु द्विगुणाधिकग्रहणेन कायिका चातिवाहदोहादिन्ना कारिता ऋणिकेन यानापत्काल एवोत्तमर्णपीडया कृता। चतस्रोऽपि वृद्धीरशास्त्रीया न गृह्णीयात्। तथा च बृहस्पतिः-"भागो यद्विगुणादूर्ध्वं चक्रवृद्धिश्च गृह्यते। पूर्णे च सोदयं पश्चाद्वार्धुष्यं तद्विगर्हितम्"। कात्यायनः-"ऋणिकेन कृता वृद्धिरधिका संप्रकल्पिता। आपत्कालकृता नित्यं दातव्या कारिता तथा। अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चन" ॥१५३॥

ऋणं दातुमशक्तो यः कर्तुमिच्छेत्पुनः क्रियाम्।
स दत्त्वा निर्जितां वृद्धिं करणं परिवर्तयेत्॥१५४॥

He who, unable to pay a debt (at the fixed time), wishes to make a new contract, may renew the aggreement, after paying the interest which is due.

योऽधमर्णो धनदानासामर्थ्यात्पुनर्लेख्यादिक्रियां कर्तुमिच्छेत्स निर्जितामुत्त-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मर्णः स्वत्वतयात्मसात्कृतां वृद्धिं दत्त्वा करणं लेख्यं पुनः कुर्यात्॥१५४॥

अदर्शयित्वा तत्रैव हिरण्यं परिवर्तयेत्।
यावती संभवेद्वृद्धिस्तावतीं दातुमर्हति॥१५५॥

If he cannot pay the money (due as interest), he may insert it in the renewed (agreement); he must pay as much interest as may be due.

यदि दैवगत्या वृद्धिहिरण्यमपि समये दातुं न शक्नोति तदा तद्गृहीत्वैव तत्रैव पुनः क्रियमाणे लेख्यादौ वृद्धिहिरण्यादिशेषमारोपयेत्। यत्प्रमाणं चक्रवृद्धिधनं तदानीं सम्भवति तद्दातुमर्हति॥१५५॥

चक्रवृद्धिं समारूढो देशकालव्यवस्थितः।
अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात्॥१५६॥

He who has made a contract to carry goods by a wheeled carriage for money and has agreed to a certain place or time, shall not reap that reward, if he does not keep to the place and the time (stipulated).

चक्रवृद्धिशब्देनात्र चक्रवच्छकटादिभररूपा वृद्धिरभिमता। चक्रवृद्धिमाश्रित उत्तमर्णो देशकालव्यवस्थितो यदि वाराणसीपर्यन्तं लवणादि शकटेन वहामि तदा ममेदं यद्धनं दातव्यमिति वेतनरूपदेशव्यवस्थितिः। यदि मांस यावद्वहामि तदा मासं यद्धनं दातव्यमिति कालव्यवस्थितिः। एवमभ्युपगतदेशकालनियमस्थौ देशकालौ दैवादपूरयन्शकटादिना वहन् लाभरूपफलं सकलं न प्राप्नोति॥१५६॥

अपितु-

समुद्रयानकुशला देशकालार्थदर्शिनः।
स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति॥१५७॥

Whatever rate men fix, who are expert in sea-voyages and able to calculate (the profit) according to the place, the time, and the objects (carried), that (has legal force) in such cases with respect to the payment (to be made).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्थलपथजलपथयाने निपुणा इयद्देशपर्यन्तमियत्कालपर्यन्तमूह्यमाने सति एतावाँल्लाभो ग्रहीतुं युक्त इत्येवं देशलाभधनज्ञा वणिगादयो यां वृद्धिं तथाविषये चावस्थापयन्ति सैव तत्र व्यवस्था तत्राधिगमं धनप्राप्तिं प्रति प्रमाणम् ॥१५७॥

यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः।
अदर्शयन्स तं तस्य प्रयच्छेत्स्वधनादृणम् ॥१५८॥

The man who becomes a surety in this (world) for the appearance of a (debtor), and produces him not, shall pay the debt out of his own property.

यो मनुष्यो यस्य दर्शनाय प्रतिभूस्तिष्ठेत् धनदानकाले ममायमधमर्णो दर्शनीय इति स तं तस्मिन्काल उत्तमर्णस्यादर्शयंस्तद्धनं दातुं यतेत ॥१५८॥

प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्।
दण्डशुल्कावशेषं च न पुत्रो दातुमर्हति ॥१५९॥

But money due by a surety, or idly promised, or lost at play, or due for spirituous liquor, or what remains unpaid of a fine and a tax or duty, the son (of the party owing it) shall not be obliged to pay.

प्रतिभूत्वेन यद्देयं धनं तत्प्रातिभाव्यं, वृथादानं परिहासनिमित्तं पण्डादिभ्यो देयत्वेन पित्रान्नीकृतं, द्यूतनिमित्तं सुरानिमित्तं च, दण्डं यद्देयं दण्डं, शुल्कं घट्टादिदेयं तदवशेषं च पितृसम्बन्धिनं पितरि मृते पुत्रो दातुं नार्हति ॥१५९॥

दर्शनप्रातिभाव्ये तु विधिः स्यात्पूर्वचोदितः।
दानप्रतिभुवि प्रेते दायादानपि दापयेत् ॥१६०॥

This just mentioned rule shall apply to the case of a surety for appearance (only); if a surety for payment should die, the (judge) may compel even his heirs to discharge the debt.

सुरानिमित्तं च यद्देयं दण्डं प्रातिभाव्यं न पुत्रो दातुमर्हतीति योऽयं पूर्णोपदेशः स दर्शनप्रतिभुवः पितुर्देयो ज्ञेयः। दानप्रतिभुवि तु पितरि मृते पुत्रं ऋणं दापयेत् ॥१६०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अदातरि पुनर्दाता विज्ञातप्रकृतावृणम्।
पश्चात्प्रतिभुवि प्रेते परीप्सेत्केन हेतुना॥१६१॥

On what account then is it that after the death of a surety other than for payment, whose affairs are fully known, the creditor may (in some cases) afterwards demand the debt (of the heirs)?

अदातरि दानप्रतिभुवोऽन्यस्मिन्दर्शनप्रतिभुवि प्रत्ययप्रतिभुवि वा विज्ञातप्रातिभाव्यकारणमूलशोधनोचितधनग्रहणं यस्य तस्मिन्मृते दातोत्तमर्णः पश्चात्केन हेतुना धनं प्राप्नुमिच्छेत्॥१६१॥

प्रतिभुवो मृतत्त्वात्तत्पुत्रस्य चादानप्रतिभूत्वेनादातृत्वादित्याशंक्याह-

निरादिष्टधनश्चेत्तु प्रतिभूः स्यादलंघनः।
स्वधनादेव तद्दद्यान्निरादिष्ट इति स्थितिः॥१६२॥

If the surety had received money (from him for whom he stood bail) and had money enough (to pay), then (the heir of him) who received it, shall pay (the debt) out of his property; that is the settled rule.

असौ दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वा यदि निरादिष्टधनोऽधमर्णेन निसृष्टधनो यावता धनेनासौ प्रतिभूस्तच्छोधनपर्याप्तधनस्तदात्मधनादेव तद्धनं निरादिष्टोऽत्र निरादिष्टधनपुत्रो लक्षणयोच्यते। ऋणमुत्तमर्णाय दद्यादिति शास्त्रसम्प्रदायः॥१६२॥

मत्तोन्मत्तार्ताध्यधीनैर्बालेन स्थविरेण वा।
असंबद्धकृतश्चैव व्यवहारो न सिद्ध्यति॥१६३॥

A contract made by a person intoxicated, or insane, or grievously disordered (by disease and so forth), or wholly dependent, by an infant or very aged man, or by an unauthorised (party) is invalid.

मद्यादिना मत्तः, उन्मतो, व्याध्यादिपीडितोऽपहतोऽस्वतन्त्र-बालवृद्धैरस्वतन्त्वेन पितृभ्रातृनियुक्तादिव्यतिरेकेण कृत ऋणादानव्यवहारो न सिद्धयति॥१६३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सत्या न भाषा भवति यद्यपि स्यात्प्रतिष्ठिता।
बहिश्चेद्भाष्यते धर्मान्नियताद्व्यावहारिकात्॥१६४॥

That agreement which has been made contrary to the law or to the settled usage (of the virtuous), can have no legal force, though it be established (by proofs).

इदं मयानुष्ठेयमित्येवमादिका भाषा लेख्यादिना स्थिरीकृतापि यदि शास्त्रीयधर्मात्पारम्पर्यात्सद्व्यवहाराच्च बहिर्भाष्यते सा सत्या न भवति तदर्थो नानुष्ठेयः॥१६४॥

योगाधमनविक्रीतं योगदानप्रतिग्रहम्।
यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत्॥१६५॥

योगशब्दश्छलवाची। छलेन ये बन्धकविक्रयदानप्रतिग्रहाः क्रियन्ते न तत्त्वतोऽन्यत्रापि निक्षेपादौ यत्र छद्म जानीयात्। वस्तुतो यत् निक्षेपादि न कृतं तत्सर्वं निवर्तते॥१६५॥

ग्रहीता यदि नष्टः स्यात्कुटुम्बार्थे कृतो व्ययः।
दातव्यं बान्धवैस्तत्स्यात्प्रविभक्तैरपि स्वतः॥१६६॥

If the debtor be dead and (the money borrowed) was expended for the family; it must be paid by the relatives out of their own estate even if they are divided.

ऋणग्रहीता यदि मृतः स्यात्तेन पूर्वविभक्ताविभक्त सर्वभ्रातृ-कुटुम्बसम्वर्धनार्थं तदृणव्ययः कृतस्तदा तदृणं विभक्तैरविभक्तैश्च स्वधनाद्दातव्यम्॥१६६॥

कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत्।
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत्॥१६७॥

Should even a person wholly dependent make a contract for the behoof of the family, the master (of the house), whether (living) in his own country or abroad, shall not rescind it.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तद्देशस्थे देशान्तरस्थे वा स्वामिनि स्वामिसम्बन्धिकुटुम्बव्ययनिमित्तं दासोऽपि यदृणादानादि कुर्यात्स्वामी तत्तथाप्यनुमन्येत ॥१६७॥

बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम्।
सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत् ॥१६८॥

What is given by force, what is enjoyed by force, also what has been caused to be written by force, and all other transactions done by force, Manu has declared void.

बलाद्दत्तमप्रतिग्राह्यादि, बलाद्भुक्तं भूम्यादि, बलाल्लेखितं चक्रवृद्धिपत्रादि। प्रदर्शनं चैतत्। सर्वान्बलकृतान्व्यवहारान्निवर्तनीयान्मनुराह ॥१६८॥

त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्।
चत्वारस्तूपचीयन्ते विप्र आढ्यो वणिङ्नृपः ॥१६९॥

Three suffer for the sake of others, witnesses, a surety, and judges; but for enrich themselves (through others), a Brāhmaṇa, a money-lender a merchant, and a king.

साक्षिणः, प्रतिभूः, कुलं च धर्मार्थव्यवहारद्रष्टारस्त्रय एते परार्थं क्लेशमनुभवन्ति तस्माद्बलेन साक्ष्यं प्रातिभाव्यं व्यवहारेक्षणं च नान्नीकारयितव्याः। चत्वारः पुनः ब्राह्मणोत्तमर्णवणिग्राजानः परार्थं दानफलोपादानऋणद्रव्यार्पणविक्रयव्यवहारेक्षणरूपं कुर्वाणा धनोपचयं प्राप्नुवन्ति। तस्माद्विप्रो दातारं, आढ्योऽधमर्णं, वणिक् क्रेतारं, राजा व्यवहर्तारं बलेन न प्रवर्तयेत्। पूर्वश्लोकाभिहितबलनिषेधस्यैवायं प्रपञ्चः ॥१६९॥

अनादेयं नाददीत परिक्षीणोऽपि पार्थिवः।
न चादेयं समृद्धोऽपि सूक्ष्ममप्यर्थमुत्सृजेत् ॥१७०॥

No king, however indigent, shall take anything that ought not to be taken, nor shall he, however wealthy, decline taking that which he ought to take, be it ever so small.

क्षीणधनोऽपि राजा नाग्राह्यमर्थं गृह्णीयात्। समृद्धोऽपि स्वल्पमपि ग्राह्यं धनं न त्यजेत् ॥१७०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनादेयस्य चादानादादेयस्य च वर्जनात्।
दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति॥१७१॥

In consequence of his taking what ought not to be taken, or of his refusing what ought to be received, a king will be accused of weakness and perish in this (world) and after death.

अग्राह्यग्रहणाच्छास्त्रीयग्राह्यपरित्यागाच्च राज्ञः पौरैरसामर्थ्यं ख्याप्यते। ततश्च स प्रेत्याधर्मेण नरकादिभोगादिहाकीर्त्या विनश्यति॥१७१॥

स्वादानाद्वर्णसंसर्गात्त्वबलानां च रक्षणात्।
बलं संजायते राज्ञः स प्रेत्येह च वर्धते॥१७२॥

By taking his due, by preventing the confusion of the castes (*varṇa*), and by protecting the weak, the power of the king grows, and he prospers in this (world) and after death.

न्यायधनग्रहणाद्वर्णानां सजातीयैः शास्त्रीयपरिणयनादिसम्बन्धात्। यद्वा वर्णसंसर्गाद्वर्णसंकरादित्यत्रापि रक्षणादिति योजनीयम्। प्रजानां दुर्बलानां बलवद्भ्योपि रक्षणात्सामर्थ्यमुपजायते नृपस्य। ततश्चासाविहलोकपरलोकयोश्च वर्धते॥१७२॥

तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये।
वर्तेत याम्यया वृत्त्या जितक्रोधो जितेन्द्रियः॥१७३॥

Let the prince, therefore, like Yama, not heeding his own likings and dislikings, behave exactly like Yama, suppressing his anger and controlling himself.

तस्माद्यम इव राजा वशीकृत क्रोधो जितेन्द्रिय स्वकीयेऽपि प्रियाप्रिये परित्यज्य यमस्य चेष्टया सर्वत्र साम्यरूपया वर्तेत॥१७३॥

यत एवम्-

यस्त्वधर्मेण कार्याणि मोहात्कुर्यान्नराधिपः।
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः॥१७४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But that evil-minded king who in his folly decides causes unjustly, his enemies soon subjugate.

यः पुनर्नृपतिर्लोभादिव्यवहाराद्धर्मेण व्यवहाराद्दर्शनादीनि कार्याणि कुरुते तं दुष्टचित्तं प्रकृतिपौरविरागात्क्षिप्रमेव शत्रवो निगृह्णन्ति ॥१७४॥

कामक्रोधौ तु संयम्य योऽर्थान् धर्मेण पश्यति।
प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ॥१७५॥

If, subduing love and hatred, he decides the causes according to the law, (the hearts of) his subjects turn towards him as the rivers (run) towards the ocean.

यो राजा राजद्वेषौ विहाय धर्मेण कार्याणि निरूपयति तं राजानं प्रजा भजन्ते समुद्रमिव नद्यः। नद्यो यथा समुद्रान्न निवर्तन्ते तेनैवैकतां यान्ति प्रजा अपि तस्मान्नृपा (न्ननिवर्तन्ते तम) नुवर्तिन्यस्तदेकताना भवन्तीति साम्यम् ॥१७५॥

यः साधयन्तं छन्देन वेदयेद्धनिकं नृपे।
स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनम् ॥१७६॥

(The debtor) who complains to the king that his creditor recovers (the debt) independently (of the court), shall be compelled by the king to pay (as a fine) one quarter (of the sum) and to his (creditor) the money (due).

योऽधमर्णो राजवल्लभोऽहमिति गर्वादुत्तमर्ण स्वेच्छया धनं साधयन्तं नृपे निवेदयेत्स राज्ञा ऋणचतुर्थभागं दण्डयः तस्य तद्धनं दापनीयम् ॥१७६॥

कर्मणापि समं कुर्याद्धनिकायाधमर्णिकः।
समोऽवकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैः ॥१७७॥

Even by (personal) labour shall the debotr make good (what he owes) to his creditor, if he be of the same case or of a lower one; but a (debtor) of a higher caste shall pay it gradually (when he earns something).

समानजातिरपकृष्टजातिश्चाधमर्णो धनाभावे सति स्वजात्यनुरूपकर्मकरणेनापि समं कुर्यात्। निवृत्तोत्तमर्णाधमर्णव्यपदेशतया धनिकसममात्मानं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुर्यात्। समजातिरत्र ब्राह्मणेतरः कर्मणा क्षत्रविट्शूद्रान्समानजातीयान् "हीनांस्तु दापयेत्" इति कात्यायनेन विशेषितत्वात्। श्रेयान्पुनरुत्कृष्टजातिर्न कर्म कारयितव्यः किंतु शनैः शनैर्यथासम्भवं तद्धनं दद्यात्॥१७७॥

अनेन विधिना राजा मिथो विवदतां नृणाम्।
साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत्॥१७८॥

According to these rules let the king equitably decide between men, who dispute with each other the matters, which are proved by witnesses and (other) evidence.

अनेन प्रोक्तप्रकारेण परस्परं विवदमानानामर्थिप्रत्यर्थिनां साक्ष्यादिप्रमाणेन निर्णीतार्थानि कार्याणि विप्रतिपत्तिखण्डनेन राजा समीकुर्यात्॥१७८॥

कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि।
महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः॥१७९॥

A sensible man should make a deposit (only) with a person of (good) family, of good conduct, well acquainted with the law, veracious, having many relatives, wealthy, and honourable (*ārya*).

सत्कुलप्रसूते, सदाचारवति, धर्मवेदिनि, सत्याभिधायिनि, बहुपुत्रादिपरिजने, ऋजुप्रकृतौ मनुष्ये, व्यभिचाराभावान्निक्षेपं स्थापयेत्॥१७९॥

यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः।
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः॥१८०॥

In whatever manner a person shall deposit anything in the hands of another, in the same manner ought the same thing to be received back (by the owner); as the delivery (was, so must be) the re-devliery.

यो मनुष्यो येन प्रकारेण मुद्रारहितं समुद्रं वा ससाक्षिकमसाक्षिकं वा यमर्थं सुवर्णादि यस्य हस्ते निक्षिपेत्सोऽर्थस्तेन निक्षेप्त्रा तथैव ग्राह्यो यस्माद्येन प्रकारेण समर्पणं तेनैव प्रकारेण ग्रहणं न्याय्यम्। समुद्रस्थापितसुवर्णादेर्निक्षेप्ता स्वयमेव मुद्रां भित्त्वा यदा वदति ममेदं तुलयित्वा समर्पयेत्यभिधानं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दण्डाद्यर्थम्॥१८०॥

यो निक्षेपं याच्यमानो निक्षेप्तुर्न प्रयच्छति।
स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसन्निधौ॥१८१॥

He who restores not his deposit to the depositor at his request, may be tried by the judge in the depositor's absence.

यः पुरुषो देहि मे निक्षिप्तं हिरण्यादि द्रव्यमित्येवं निक्षेप्त्राप्रार्थ्यमानस्तस्य यदा न समर्पयति तदा निक्षेप्त्रा ज्ञापिते प्राड्विवाकेन तस्य निक्षेप्तुरसन्निधौ याचनीयः॥१८१॥

किं कृत्वा किं चायनीय इत्याह-

साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः।
अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वतः॥१८२॥

On failure of witnesses let the (judge) actually deposit gold what that (defendant) under some pretext or other through spies of suitable age and appearance (and afterwards demand it back).

प्रथमनिक्षेपे साक्ष्यभावे स्वकीयसभ्यैश्चारपुरुषैरतिक्रान्तबाल्यैः सौम्यादिभिर्नृपोपद्रवादिव्याजाभिधायिभिर्हिरण्यानि तत्त्वेन तत्र निक्षेपयित्वा तैरेव चारपुरुषैः स निक्षेपधारी प्राड्विवाकेन चारपुरुषनिक्षिप्तसुवर्णं याच्यः॥१८२॥

स यदि प्रतिपद्येत यथान्यस्तं यथाकृतम्।
न तत्र विद्यते किंचिद्यत्परैरभियुज्यते॥१८३॥

If the (defendant) restores it in the manner and shape in which it was bailed, there is nothing (of the descritpion) in his hands, for which others accuse him.

स निक्षेपधारी यथान्यस्तं समुद्रं वा यथाकृतं कटकमुकुटाकारेण रचितं यदि तथैव प्रतिपद्येत सत्यमस्ति गृह्यतामिति तदा परेण पूर्वनिक्षेप्त्रा प्राड्विवाकवेदिना यन्निक्षिप्तमित्यभियुज्यते तत्र न किञ्चिदस्तीति ज्ञातव्यम्॥१८३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तेषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि।
उभौ निगृह्य दाप्यः स्यादिति धर्मस्य धारणा॥१८४॥

But if the restores not that gold, as he ought, to those (spies), then he shall be compelled by force to restore both (deposits); that is a settled rule of law.

तेषां चारपुरुषाणां यन्निक्षिप्तं हिरण्यं यथान्यस्तं यदि तन्न दद्यात्तदा द्वावपि निक्षेपौ ज्ञापकचारसम्बन्धिनौ संपीडय दापनीयः स्यादित्येवंरूपो धर्मस्य धारणा निश्चयः। "यो निक्षेपम्" (अ. ४ श्लो. १८१-८४) इत्यादिश्लोकचतुष्टयस्य चेदृश एव पाठक्रमो मेधातिथिभोजदेवादिभिर्निश्चितः। गोविन्दराजेन तु "साक्ष्यभावे प्रणिधिभिः" (अ. ४ श्लो. १८२) इति श्लोकोऽन्त एव पठितः तदा च नार्थसंगतिः न वा वृद्धान्नायादरः॥१८४॥

निक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरे।
नश्यतो विनिपाते तावनिपाते त्वनाशिनौ॥१८५॥

An open or a sealed deposit must never be returned to a near relative (of the depositor during the latter's lifetime); for it (the recipient) dies (without delivering them), they are lost, but if he does not die, they are not lost.

निक्षिप्यत इति निक्षेपः। मुद्राङ्कितमगणितं वा यन्निधीयते स उपनिधिः। ब्राह्मणपरिव्राजकवदुपदेशभेदः। तौ निक्षेपोपनिधी निक्षेप्तर्युपनिधातरि जीवति प्रत्यनन्तरे तदीयपुत्रादौ तदनन्तरे तद्धनाधिकारिणि कदाचिन्न निक्षेपधारिणा देयौ। यतस्तस्य पुत्रादेरपि पितुरसमर्पणविनाशे तौ निक्षेपोपनिधी नश्यतः। पुत्रादेः पितुश्च पुनरविनाशे समर्पणे च कदाचिदविनाशिनौ स्यातां, तस्मादनर्थसंदेहान्न देयौ॥१८५॥

स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे।
न स राज्ञा नियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः॥१८६॥

But (a depositary) who of his own accord returns them to a near relative of a deceased (depositor), must not be harassed (about them) by the king or by the depositor's rela-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

tives.

निक्षेप्तुर्मृतस्य निक्षेपधारी तद्धनाधिकारिणि पुत्रादौ तदनभ्यर्थितः स्वयमेव यः समर्पयति स राज्ञा निक्षेप्तुः पुत्रादिभिर्वान्यदपि त्वयि निक्षिप्तमस्तीति नाक्षेप्तव्यः॥१८६॥

यदि कथञ्चिदभ्रान्तिः स्यात्तदा-

अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम्।
विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत्॥१८७॥

And (in doubtful cases) he should try to obtain that object by friendly means, without (having recourse to) artifice, or having inquired into the (depositary's) conduct, he should settled (the matter) with gentle means.

तत्रस्थे धनान्तरसद्भावलक्षणवाक्छलादिपरिहारेणैव प्रीतिपूर्वकं निश्चिनुयान्नतु झटिति दिव्यादिदानेन। तस्य निक्षेपधारिणः शीलमवेक्ष्य धार्मिकोऽयमिति ज्ञात्वा सामप्रयोगेण निश्चिनुयात्॥१८७॥

निक्षेपेष्वेषु सर्वेषु विधिः स्यात्परिसाधने।
समुद्रे नाप्नुयात्किञ्चिद्यदि तस्मान्न संहरेत्॥१८८॥

Such is the rule for obtaining back all those open deposits; in the case of a sealed deposit (the depositary) shall incur no (censure), unless he has taken out something.

सर्वेषु निक्षेपेष्वपक्रियमाणेष्वेष "साक्ष्यभावे" (अ. ८ श्लो. १८२) इत्यादिपूर्वोक्तविधिर्निर्णयसिद्धौ स्यात्। मुद्रितादौ पुनस्तस्य निक्षेपधारी यदि प्रतिमुद्रादिना न किमप्यपहरेत्तदा तस्मिन्नपि तेन किं दूषणं प्राप्नुयात्॥१८८॥

चौरैर्हृतं जलेनोढमग्निना दग्धमेव वा।
न दद्याद्यदि तस्मात्स न संहरति किंचन॥१८९॥

(A deposit) which has been stolen by thieves or washed away by water or burned by fire, (the bailee) shall not make it good, unless he took part of it (for himself).

चौरैर्मुषितं, उदकेन देशान्तरं प्रापितं, अग्निना वा दग्धं निक्षेपं निक्षेपधारी न दद्यात्। यदि स्वयं तस्मान्न किंचिदप्यपहरति॥१८९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निक्षेपस्यापहर्तारमनिक्षेप्तारमेव च।
सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः॥१९०॥

Him who appropriates a deposit and him (who asks for it) without having made it, (the judge) shall try by all (sorts of) means, and by the oaths prescribed in the Veda.

निक्षेपस्यापह्नोतारमनिक्षिप्य याचितारं सर्वैः सामदिभिरुपायैर्वैदिकैश्च शपथैरग्निहरणादिभिर्नृपो निरूपयेत्॥१९०॥

यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम्॥१९१॥

He who does not return a deposit and he who demands what he never bailed shall both be punished like thieves, or be compelled to pay a fine equal (to the value of the object retained or claimed).

निक्षिप्तधनं यो न समर्पयति यश्चानिक्षिप्तं प्रार्थयति तौ द्वौ सुवर्णमुक्तादौ महति विषये चौरवद्दण्ड्यौ। स्वल्पविषये ताम्रादौ तत्समं दण्डनीयौ॥१९१॥

निक्षेपस्यापहर्तारं तत्समं दापयेद्दमम्।
तथोपनिधिहर्तारमविशेषेण पार्थिवः॥१९२॥

The king should compel him who does not restore an open deposit, and in like manner him who retains a sealed deposit, to pay a fine equal (to its value).

निक्षेपापहारिणं निक्षिप्तसमधनं दण्डयेत्। समशिष्टत्वादनिक्षिप्य याचितारमपि। नच पुनरुक्तिः। महत्यपराधे ब्राह्मणेतरस्य चौरवदिति पूर्वश्लोकेन शारीरदण्डस्यापि प्राप्तौ तन्निवृत्त्यर्थमिदम्, दापयेदिति धनदण्डनियमात्। नचानेन पूर्वश्लोकवैयर्थ्यम्। अस्य प्रथमापराधविषयत्वात्पूर्वोक्ते चाभ्यासे चौरोक्तमहा-साहसादिधनदण्डावरोधकत्वात्। उपनिधिर्मुद्रादिचिह्नितं निहितधनं तस्यापहर्तारं कथितविशेषणं राजा दण्डयेत्॥१९२॥

उपधाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः।
ससहायः स हन्तव्यः प्रकाशं विविधैर्वधैः॥१९३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

That man who by false pretences may possess himself of another's property, shall be publicly punished by various (modes of) corporal (or capital) chastisement, together with his accomplices.

राजा त्वयि रुष्टस्तस्मात्त्वां रक्षामि मम धनं देहि धनधान्यादिलोभोपकरणं वानृतमभिधाय छद्मभिर्यः परद्रव्यं गृह्णाति स छद्मधनसहकारि सहितो बहुजनसमक्षं करचरणशिरश्छेदादिभिर्नानाप्रकारैर्वधोपायैः राज्ञा हन्तव्यः ॥१९३॥

निक्षेपो यः कृतो येन यावांश्च कुलसन्निधौ।
तावानेव स विज्ञेयो विब्रुवन्दण्डमर्हति ॥१९४॥

If a deposit of a particular description or quantity is bailed by anybody in the presence of a number (of witnesses), it must be known to be of that particular (description and quantity; the depositary) who makes a false statement (regarding it) is liable to a fine.

यः सुवर्णादिर्यावत्परपरिमितो येन साक्षिसमक्षं निक्षेपः कृतस्तत्र परिमाणादिविप्रतिपत्तौ साक्षिवचनात्तावानेव विज्ञातव्यः। विप्रतिपत्तिं कुर्वन्नप्येतदुक्तानुसारेण दण्डं दाप्यः ॥१९४॥

मिथो दायः कृतोयेन गृहीतो मिथ एव वा।
मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः ॥१९५॥

But if anything is delivered or received privately, it must be privately returned; as the bailment (was, so should be) the re-delivery.

रहसि येन निक्षेपोऽर्पितो निक्षेपधारिणा च रहस्येव गृहीतः स निक्षेपो रहस्येव प्रत्यर्पणीयः न प्रत्यर्पणे साक्ष्यपेक्षा। यस्माद्येनैव प्रकारेण दानं तेनैव प्रकारेण प्रत्यर्पणं दातव्यमिति श्रवणान्निक्षेपधारिणोऽयं नियमविधिः। "यो यथा निक्षिपेद्धस्ते" (अ. ८ श्लो. १८०) इति तु निक्षेप्तुर्नियमार्थं; ग्रहीतव्य इति श्रवणात्। अतो न पौनरुक्त्यम् ॥१९५॥

निक्षिप्तस्य धनस्यैवं प्रोत्योपनिहितस्य च।
राजा विनिर्णयं कुर्यादक्षिण्वन्न्यासधारिणम् ॥१९६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Thus let the king decide (causes) concerning a deposit and a friendly loan (for use) without showing (undue) rigour to the depositary.

राज्ञा निक्षिप्तस्य धनस्यामुद्रस्य मुद्रादियुतस्य वोपनिधिरूपस्य तथा प्रीत्या कतिचित्कालं भोगार्थमर्पितस्यानेनोक्तप्रकारेण न्यस्तधनधारिणमपीडयन्निर्णयं कुर्यात् ॥१९६॥

विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसंमतः।
न तं नयेत साक्ष्यं तु स्तेनमस्तेनमानिनम् ॥१९७॥

If anybody sells the property of another man, without being the owner and without, the assent of the owner, the (judge) shall not admit him who is a thief, though he may not consider himself as a thief, as a witness (in any case).

अस्वामी यः स्वामिना चाननुमतः परकीयं द्रव्यं विक्रीणीते वस्तुतश्चौरमचौरमात्मानं मन्यमानं तं साक्षित्वं न कारयेत्। न कुत्रचिदपि प्रमाणीकुर्यादित्यर्थः ॥१९७॥

अवहार्यो भवेच्चैव सान्वयः षट्शतं दमम्।
निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषम् ॥१९८॥

If the (offender) is a kinsman (of the owner), he shall be fined six hundred *paṇas*; if he is not a kinsman, nor has any excuse, he shall be guilty of theft.

एष परस्वविक्रयी यदि स्वामिनो भ्रात्रादिरूपत्वेन सान्वयः संबन्धी भवति तदा षट् पणशतान्यवहार्यो दण्डनीयः। यदि पुनः स्वामिनः संबन्धी न भवति, अनपसरश्च स्यात्, अपसरत्यनेनास्मात्सकाशाद्धनमित्यपसरः प्रतिग्रहक्रयादिः स यस्य स्वामिसंबन्धिपुत्रादेः सकाशान्नास्ति तदा चौरसंबन्धि पापं प्राप्नोति। तद्वद्दण्डनीय इत्यर्थः ॥१९८॥

अस्वामिना कृतो यस्तु दायो विक्रय एव वा।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥१९९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[अनेन विधिना शास्ता कुर्वन्नस्वामिविक्रयम्।
अज्ञानाज्ज्ञानपूर्वं तु चौरवद्दण्डमर्हति॥१५॥]

A gift or sale, made by anybody else but the owner, must be considered as null and void, according to the rule in judicial proceedings.

अस्वामिना यत्कृतं यद्दत्तं विक्रीतं वा तदकृतमेव बोद्धव्यम्। व्यवहारे यथा मर्यादा तथा कृतं न भवतीत्यर्थः॥१९९॥

संभोगो दृश्यते यत्र न दृश्येतागमः क्वचित्।
आगमः कारणं तत्र न संभोग इति स्थितिः॥२००॥

Where possession is evident, but not title is perceived, there the title (shall be) a proof (of ownership), not possession; such is the settled rule.

यस्मिन्वस्तुनि संभोगो विद्यते क्रयादिरूपस्त्वागमो नास्ति तत्र प्रथमपुरुषगोचर आगम एव प्रमाणं न संभोग इति शास्त्रमर्यादा॥२००॥

विक्रयाद्यो धनं किंचद्गृह्णीयात्कुलसन्निधौ।
क्रयेण स विशुद्धं हि न्यायतो लभते धनम्॥२०१॥

He who obtains a chattel in the market before a number (of witnesses), acquires that chattel with a clear legal title by purchase.

विक्रीयतेऽस्मिन्निति विक्रयदेशो विक्रयः ततो यत्क्रेयधनं किंचिद्वष्टवहर्तृसमूहसमक्षं क्रीयतेऽनेनेति क्रयो मूल्यं तेन यस्माद्गृह्णीयात्। अतो न्यायत एवास्वामिविक्रेतृसकाशात्क्रयणाद्विशुद्धं धनं लभते॥२०१॥

अथ मूलमनाहार्यं प्रकाशक्रयशोधितः।
आदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम्॥२०२॥

If the original (seller) be not producible, (the buyer) being exculpated by a publich sale, must be dismissed by the king without punishment, but (the former owner) who lost the chattel shall receive it (back from the buyer).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ मूलमस्वामी विक्रेता मरणादेशान्तरादिगमनादिना वा हर्तुं शक्यते प्रकाशक्रयेण चासौ निश्चितस्तदा दण्डानर्ह एव क्रेता राज्ञा मुच्यते। नष्टधनस्वामी च यदस्वामिना विक्रीतं द्रव्यं तत्क्रेतुर्हस्ताल्लभ्यते। अत्र च विषयोऽर्धमूल्यं क्रेतुर्द्रत्त्वा स्वधनं स्वामिना ग्राह्यम्। तदाह बृहस्पतिः-"वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः। अविज्ञाताश्रयात्क्रीतं विक्रेता यत्र वा मृतः॥ स्वामी दत्त्वार्धमूल्यं तु प्रगृह्णीयात्स्वकं धनम्। अर्थद्वयोरपहृतं तत्र स्याद्व्यवहारतः"॥२०२॥

नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न चासारं न च न्यूनं न दूरेण तिरोहितम्॥२०३॥

One commodity mixed with another must not be sold (as pure), nor a bade one (as good), nor less (than the proper quantity or weight), nor anything that is not at hand or that is concealed.

कुङ्कुमादि द्रव्यं कुसुम्भादिना मिश्रीकृत्य न विक्रेतव्यम्। नचासारं सारमित्यभिधाय। न च तुलादिना न्यूनम्। न परोक्षावस्थितम्। न रागादिना स्थगितरूपम्। अत्रास्वामिविक्रयसादृश्यादस्वामिविक्रये दण्ड एव स्यात्॥२०३॥

अन्यां चेद्दर्शयित्वान्या वोढुः कन्या प्रदीयते।
उभे त एक शुल्केन वहेदित्यब्रवीन्मनुः॥२०४॥

If, aftrer one damsel has been shown, another be given to the bridegroom, he may marry them both for the same price; that Manu ordained.

शुल्कदेयां शुल्कव्यवस्थाकाले निरवद्यां दर्शयित्वा यदि सावद्या वराय दीयते तदा द्वे अपि कन्ये तेनैवैकेन शुल्केनासौ वरः परिणयेदिति मनुराह। शुल्कग्रहणपूर्वककन्याया दानस्य विक्रयरूपत्वादर्थक्रयविक्रयसाधर्म्येणा-स्यात्राभिधानम्॥२०४॥

नोन्मत्ताया न कुष्ठिन्या न च या स्पृष्टमैथुना।
पूर्वं दोषानभिख्याप्य प्रदाता दण्डमर्हति॥२०५॥

He who gives (a damsel in marriage), having first openly

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

declared her blemishes, whether she be insane, or afflicted with leprosy, or have lost her virginity, is not liable to punishment.

उन्मत्तायास्तथा कुष्ठवत्या या चानुभूतमैथुना तस्या ब्राह्मणादिविवाहात्पूर्वमुन्मादादीन्दोषान्वरस्य कथयित्वा दण्डार्हो न भवति। तेनाकथने दण्ड इति गम्यते। ''यस्तु दोषवतीं कन्यां'' (अ. ८ श्लो. २२४) इति वक्ष्यति॥२०५॥

ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्।
तसय कर्मानुरूपेण देयोऽंशः सह कर्तृभिः॥२०६॥

If an officiating priest, chosen to perform a sacrifice, abandons his work, a share only (of the fee) in proportion to the work (done) shall be given to him by those who work with him.

अथ संभूयसमुत्थानमाह-

यज्ञे कृतवरण ऋत्विक् यदि किंचित्कर्म कृत्वा व्याध्यादिना कर्म त्यजति तदा तस्येतरर्त्विग्भिः पर्यालोच्य कृतानुसारेण दक्षिणांशो देयः॥२०६॥

दक्षिणासु च दत्तासु स्वकर्म परिहापयन्।
कृत्स्नमेव लभेतांशमन्येनैव च कारयेत्॥२०७॥

But he who abandons his work after the sacrificial fees have been given, shall obtain his full share and cause to be performed (what remains) by another (priest).

माध्यंदिनसवनादौ दक्षिणाकाले दक्षिणासु दत्तासु व्याध्यादिना कर्म परित्यजन्न तु शाठयात्स कृत्स्नमेव दक्षिणाभागं लभेत॥ कर्मशेषं प्रकृतमन्येन कारयेत्॥२०७॥

यस्मिन्कर्मणि यास्तु स्युरुक्ताः प्रत्यन्नदक्षिणाः।
स एव ता आददीत भजेरन्सर्व एव वा॥२०८॥

But if (specific) fees are ordained for the several parts of a rite, shall he (who performs the part) receive them, or shall they all share them?

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्मिन्कर्मण्याधानादौ अन्नमन्नं प्रति या दक्षिणा यत्संबन्धेन श्रुताः स्युः स एव ता आददीत न तत्तद्भागमात्रं सर्वे विभज्य गृह्णीरन्निति संशयः॥२०८॥

अत्र सिद्धान्तमाह-

रथं हरेत चाध्वर्युर्ब्रह्माधाने च वाजिनम्।
होता वापि हरेदश्वमुद्गाता चाप्यनः क्रये॥२०९॥

The Adhvaryu priest shall take the chariot, and the Brāhmaṇ at the kindling of the fires (Agnyādhāna) a horse, the Hotṛ priest shall also take a horse, and the Udgātṛ the cart, (used) when (the Soma) is purchased.

केषांचिच्छाखिनामाधानेऽध्वर्यवे रथो देयत्वेनाम्नायते, ब्रह्मणे वेगवानश्वः, होत्रे चाश्वः, उद्गात्रे सोमक्रयवहनशकटम्, अतो व्यवस्थाम्नानसामर्थ्याद्या दक्षिणा यत्सबन्धत्वेन श्रूयते स एव तामाददीत॥२०९॥

संप्रतिपत्तिविधाने दक्षिणाविभागमाह-

सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे।
तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः॥२१०॥

The (four) chief priests among all (the sixteen), who are entitled to one half, shall receive a moiety (of the fee), the next (four) one half of that, the set entitled to a third share, one third, and those entitled to a fourth a quarter.

"तं शतेन दीक्षयति" इति श्रूयते। तत्र सर्वेषां षोडशानामृत्विजां मध्ये ये मुख्या ऋत्विजो होत्रध्वर्युब्रह्मोद्गातारः समग्रदक्षिणायास्तेऽर्धहरा अष्टचत्वारिंशद्गोभाजो भवन्ति। अतएव कात्यायनेन "यद्द्वादशाद्येभ्यः" इति प्रत्येकं द्वादशगोदानं विहितम्। यद्यपि तस्यार्धं पञ्चशद्भवति तथापीह न्यूनार्धग्रहणेनापि इमेऽर्धिन उच्यन्ते सामीप्यात्। अपरे मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्ते मुख्यर्त्विग्गृहीतदक्षिणार्धग्रहणेनार्धिन उच्यते। तृतीयिनोऽच्छावाङ्नेष्ट्रग्नीत्प्रतिहर्तारस्ते मुख्यर्त्विग्गृहीतस्य तृतीयमंशं लभन्ते। पादिनस्तु ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्या एते मुख्यर्त्विग्गृहीतस्य चतुर्थमंशं लभन्ते।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतच्च "षट् षट् द्वितीयेभ्यश्चतस्रश्चतस्रश्च तृतीयेभ्यस्तिस्रस्तिस्रश्चतुर्थेभ्यः" इति सूत्रयता कात्यायनेन स्फुटीकृतम् ॥२१०॥

संभूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः।
अनेन विधियोगेन कर्तव्यांशप्रकल्पना॥२११॥

By the application of these principles the allotment of shares must be made among those men who here (below) perform their work conjointly.

मिलित्वा गृहनिर्माणादीनि स्वकर्माणि लोके स्थपतिसूत्रधार्यादिभिश्च मनुष्यैः कुर्वद्भिरनेन यज्ञदक्षिणाविधिनाश्रयणेन विज्ञानव्यापाराद्यपेक्षया भागकल्पना कार्या॥२११॥

इदानीं दत्तानपकर्माह-

धर्मार्थं येन दत्तं स्यात्कस्मैचिद्याचते धनम्।
पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत्॥२१२॥

Should money be given (or promised) for a pious purpose by one man to another who asks for it, the gift shall be void, if the (money is) afterwards not (used) in the manner (stated).

येन यागादिकर्मार्थं कस्मैचिद्याचमानाय धनं दत्तं प्रतिश्रुतं वा, पश्चाच्च तद्धनमसौ यागार्थं न विनियुञ्जीत तदा तद्दत्तमपि धन ग्राह्यं प्रतिश्रुतं च न देयम्। यदाह गौतमः-"प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्"॥२१२॥

यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः।
राज्ञा दाप्यः सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिः॥२१३॥

But if the (recipient) through pride or greed tries to enforce (the fulfilment of the promise), he shall be compelled by the king to pay one survana as an expiation for this theft.

यदि तद्दत्तमसौ गृहीत्वा लोभादहंकाराद्वा न त्यजति, प्रतिश्रुतं वा धनं बलेन गृह्णाति तदा तस्य चौर्यपापस्य संशुद्धयर्थं राज्ञा स्वर्णं दण्डं दापनीयो भवति॥२१३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दत्तस्यैषोदिता धर्म्या यथावदनपक्रिया।
अत ऊर्ध्वं प्रवक्ष्यामि वेतनस्यानपक्रियाम्॥२१४॥

Thus the lawful subtraction of a gift has been fully explained; I will next propound (the law for) the non-payment of wages.

एतद्दत्तस्याप्रतिपादनं धर्मादनपेतं तदुक्तम्। अतोऽनन्तरं भृतेरसमर्पणादिकं वक्ष्यामि॥२१४॥

भृतो नार्तो न कुर्याद्योदर्पात्कर्म यथोदितम्।
स दण्ड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनम्॥२१५॥

A hired (servant or workman) who, without being ill, out of pride fails to perform his work according to the agreement, shall be fined eight kṛṣṇalas and no wages shall be paid to him.

यो भृतिपरिक्रीतो व्याध्यपीडितो यथानिरूपितं कर्माहंकारान्न कुर्यात्सकर्मानुरूपेण सुवर्णादिकृष्णलान्यष्टौ दण्डनीयः। वेतनं चास्य न देयम्॥२१५॥

आर्तस्तु कुर्यात्स्वस्थः सन्यथाभाषितमादितः।
स दीर्घस्यापि कालस्य तल्लभेतैव वेतनम्॥२१६॥

But (if he is really) ill, (and) after recovery performs (his work) according to the original agreement, he shall receive his wages even after (the lapse of) a very long time.

यदा व्याध्यादिपीडया कर्म न करोति स्वस्थःसन् यादृग्भाषितं तादृक्कर्म कुर्याद्वेतनं च चिरकालादपि लभेतैव॥२१६॥

यथोक्तमार्तः सुस्थो वा यस्तत्कर्म न कारयेत्।
न तस्य वेतनं देयमल्पोनस्यापि कर्मणः॥२१७॥

But if he, whether sick or well, does not (perform or) cause to be performed (by others) his work according to his agreement, the wages for that work shall not be given to him, even (if it be only) slightly incomplete.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यत्कर्म यथाभावितं पीडितोऽन्येन न कारयेत्सुस्थो वा न कुर्यान्नापि कारयेत् तस्यकिंचिच्छेषस्य कृतस्य कर्मणोपि वेतनं न देयम् ॥२१७॥

एष धर्मोऽखिलेनोक्तो वेतनादानकर्मणः।
अत ऊर्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनाम् ॥ २१८ ॥

Thus the law for the non-payment of wages has been completely stated; I will next explain the law concerning men who break an agreement.

एषा व्यवस्था वेतनादानाख्यकर्मणो निःशेषेणोक्ता। अतोऽनन्तरं संविद्व्यतिक्रमकारिणां दण्डादिव्यवस्थां वदिष्यामि ॥२१८॥

यो ग्रामदेशसंघानां कृत्वा सत्येन संविदम्।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥ २१९ ॥

If a man belonging to a corporation inhabiting a village or a district, after swearing to an agreement, breaks it through avarice, (the king) shall banish him from his realm.

ग्रामदेशशब्दाभ्यां तद्वासिनो लक्ष्यन्ते। संघो वणिगादिसमूहः इदमस्माभिः कर्तव्यं परिहार्यमित्येवंरूपं संकेतं सत्यादिशपथेन कृत्वा तन्मध्ये यो नरो लोभादिना निष्क्रामेत्तं राजा राष्ट्रान्निर्वासयेत् ॥२१९॥

निगृह्य दापयेच्चैनं समयव्यभिचारिणम्।
चतुःसुवर्णान् षण्निष्कांश्छतमानं च राजतम् ॥ २२० ॥

And having imprisoned such a breaker of an agreement, he shall compel him to pay six niṣkas, (eact of) four *suvarṇas*, and one *satamāna* of silver.

अथ चैनं संविद्व्यतिक्रमकारिणं निबोध्य चतुरः सुवर्णान्षण्निष्कान्प्रत्येकं चतुःसुवर्णपरिमितान् राजतं च शतमानं विंशत्यधिकरक्तिकाशतत्रयपरिमाणं त्रयमेतद्विषयलाघवगौरवापेक्षया समन्वितं व्यस्तं वा राजा दण्डं दापयेत् ॥२२०॥

एतद्दण्डविधिं कुर्याद्धार्मिकः पृथिवीपतिः।
ग्रामजातिसमूहेषु समयव्यभिचारिणाम् ॥ २२१ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

A righteous king shall apply this law of fines in villages and castes (gāti) to those who break an agreement.

ग्रामेषु ब्राह्मणजातिसमूहेषु संविद्व्यतिक्रमकारिणामेतद्दण्डविधिं धर्मप्रधानो राजानुतिष्ठेत्॥२२१॥

क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत्।
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा॥२२२॥

If anybody in this (world), after buying or selling anything, repent (of his bargain), he may return or take (back) that chattel within ten days.

क्रीत्वा विक्रीय वा किंचिद्द्रव्यं विनश्वररूपं स्थिरार्थं भूमिताम्रपट्टादि यस्य लोके पश्चात्तापो जायते न साधु मया क्रीतमिति स क्रीतं दशाहमध्ये प्रत्यर्पयेत्। विक्रीत वा गृह्णीयात्॥२२२॥

परेण तु दशाहस्य न दद्यान्नापि दापयेत्।
आददानो ददच्चैव राज्ञा दण्डयः शतानि षट्॥२२३॥
[स्याच्चतुर्विंशतिपणे दण्डस्तस्य व्यतिक्रमे।
पणस्य दशमे भागे दाप्यः स्यादतिपातिनि॥१६॥
क्रीत्वा विक्रीय वा पण्यमगृह्णन्न ददतस्तथा।
पणा द्वादश दाप्यश्चः मनुष्याणां च वत्सरान्॥१७॥
पणा द्वादश दाप्यः स्यात्प्रतिबोधे न चेद्भवेत्।
पशूनामप्यनाख्याने त्रिपदादर्पणं भवेत्॥१८॥]

But after (the lapse of) ten days he may neither give nor cause it to be given (back); both he who takes it (back) and he who gives it (back, except by consent) shall be fined by the king six hundred (*paṇas*).

दशाहादूर्ध्वं क्रीतं न त्यजेत्। नापि विक्रीतं विक्रयिको बलेन दापयेत्। विक्रीतं बलेन गृह्णपरित्यजन्राज्ञा षट् शतानि पणान् दण्डयः॥२२३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति।
तस्य कुर्यान्नृपो दण्डं स्वयं षण्णवतिं पणान्॥२२४॥

But the king himself shall impose a fine of ninety-six panas on him who gives a blemished damsel (to a suitor) without informing (him of the blemish).

नोन्मत्ताया इति सामान्येनोक्तं दण्डविशेषाभिधानार्थमिदम्। उन्मादादिदोषान-कथयित्वा दोषवतीं कन्यां वराय यः प्रयच्छति तस्य राजा स्वयमादरेण षण्णवतिं पणान्दण्डं कुर्यात्। अनुशयप्रसंगेनैतत्कन्यागतमुच्यते॥२२४॥

अकन्येति तु यः कन्यां ब्रूयात्द्वेषेण मानवः।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन्॥२२५॥

But that man who, out of malice, says of a maiden, 'She is not a maiden,' shall be fined one hundred (*paṇas*), if he cannot prove her blemish.

नेयं कन्या क्षतयोनिरियमिति यो मनुष्यो द्वेषेण ब्रूयात्तस्या उक्तदोषमविभावयन्पणशतं राजा दण्डं प्रकल्पयेत्॥२२५॥

युक्तश्चास्याकन्येति वादिनो दण्डः यस्मात्-

पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः।
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः॥२२६॥

The nuptial texts are applied solely to virgins (and) nowhere among men to females who have lost their virginity, for such (females) are excluded from religious ceremonies.

"अर्यमणं नु देवं कन्या अग्निमयक्षत" इत्येमवादयो वैवाहिका मनुष्याणां मन्त्राः कन्याशब्दश्रवणात्कन्यास्वेव व्यवस्थिताः। नाकन्याविषये क्वचिच्छास्त्रे धर्मविवाहसिद्धये व्यवस्थिता असमवेतार्थत्वात्। अतएवाह। ताः क्षतयोनयो वैवाहिकमन्त्रैः संस्क्रियमाणा अपि यस्मादपगतधर्मविवाहादिशालिन्यो भवन्ति। नासौ धर्म्यो विवाह इत्यर्थः। नतु क्षतयोनेर्वैवाहिकमन्त्रहोमादिनिषेधकमिदम्। "या गर्भिणी संस्क्रियते" (अ. ९ श्लो. १७३) तथा "वोढुः कन्यासमुद्भवम्" (अ. ९ श्लो. १७२) इति क्षतयोनेरपि मनुनैव विवाहसंस्कारस्य वक्ष्यमाणत्वात्। देवलेन तु-"गान्धर्वेषु

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विवाहेषु पुनर्वैवाहिको विधिः। कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः'' इति। गान्धर्वेषु विवाहेषु होममन्त्रादिविधिरुक्तः। गान्धर्वश्चोपगमनपूर्वकोऽपि भवति। तस्य क्षत्रियविषये सुधर्मत्वं मनुनोक्तम्। अतः सामान्यविशेषन्यायादितरविषयोऽयं क्षतयोनिविवाहस्याधर्मत्वोपदेशः॥२२६॥

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥२२७॥

The nuptial texts are a certain proof (that a maiden has been made a lawful) wife; but the learned should know that they (and the marriage-ceremony) are complete with the seventh step (of the bridge around the sacred fire).

वैवाहिका मन्त्रा नियतं निश्चितं भार्यात्वे निमित्तम्, मन्त्रैयथाशास्त्रप्रयुक्तैर्भार्यात्वेन निष्पत्तेः। तेषां तु मन्त्राणां ''सखा सप्तपदी भव'' इति मन्त्रेण कल्पनया सप्तमे पदे दत्ते भार्यात्वनिष्पत्तेः शास्त्रज्ञैर्निष्पत्तिर्विज्ञेया। एवंच सप्तपदीदानात्प्राग्भार्यात्वानिष्पत्तेः सत्यनुशये जह्यान्नोर्ध्वम्॥२२७॥

यस्मिन्यस्मिन्कृते कार्ये यस्येहानुशयो भवेत्।
तमनेन विधानेन धर्मे पथि निवेशयेत्॥२२८॥

If anybody in this (world) repent of any completed transaction, (the king) shall keep him on the road of rectitude in accordance with the rules given above.

न केवलं क्रय एव अन्यत्रापि यस्मिन्यस्मिन्सबन्धित्वेनादौ कार्ये यस्य पश्चात्तापो जायते तमनेन दशाहविधिना धर्मादनपेते मार्गे नृपः स्थापयेत्॥२२८॥

पशुषु स्वामिनां चैव पालानां च व्यतिक्रमे।
विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः॥२२९॥

I will fully declare in accorance with the ture law (the rules concerning) the disputes, (arising) from the transgressions of owners of cattle and of herdsmen.

गवादिपशुविषये स्वामिनां पालानां व्यतिक्रमे जाते विवादं सम्यग्धर्म्य यथा तथा व्यवस्थया वक्ष्यामि॥२२९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्॥२३०॥

During the day the responsibility for the safety (of the cattle rests) on the herdsman, during the night on the owner, (provided they are) in his house; (if it be) otherwise, the herdsman will be responsible (for them also during the night).

दिवा पशूनां पालहस्तन्यस्तानां योगक्षेमविषये पालस्य गर्हणीयता। रात्रौ पुनः पालप्रत्यर्पितानां स्वामिगृहस्थितानां स्वामिनो दोषः। अन्यथा तु यदि रात्रावपि पालहस्तगता भवन्ति तत्र दोष उत्पन्ने पाल एव गर्हणीयतां प्राप्नोति॥२३०॥

गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम्।
गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः॥२३१॥

A hired herdsman who is paid with milk, may milk with the consent of the owner the best (cow) out of ten; such shall be his hire if not (other) wages (are paid).

यो गोपालाख्यो भृत्यः क्षीरेण न भक्तादिना स्वस्वाम्यनुज्ञया गोभ्यः श्रेष्ठामेकां गां भृत्यर्थं दुह्यात्सा भक्तादिरहिते गोपाले भृतिः स्यात्। एवं चैकगवीक्षीरदानेन दश गाः पालयेदित्युक्तम्॥२३१॥

नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम्।
हीनं पुरुषकारेण प्रदद्यात्पाल एव तु॥२३२॥

The herdsman alone shall make good (the loss of a beast) strayed, destroyed by worms, killed by dogs or (by falling) into a pit, if he did not duly exert himself (to prevent it).

नष्टं दृष्टिपथातीतं, कृमिभिर्नाशितं, श्वभिः खादितं हतं, विवरादिपातमृतम्। प्रदर्शनं चैतत् पालसंबन्धिरक्षकाख्यपुरुषव्यापाररहितं मृतं पलायितं गवादि, पशुपाल एव तु स्वामिने दद्यात्॥२३२॥

विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति।
यदि देशे च काले च स्वामिनः स्वस्य शंसति॥२३३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But for (an animal) stolen by thieves, though he raised an alarm, the herdsman shall not pay, provided he gives notice to his master at the proper place and time.

चौरैः पुनः पटहादि विघुष्य हृतं पालो दातुं नार्हति। विघुष्येति चौराणां बहुत्वं प्रबलत्वकथनपरम्। संनिहिते देशे हरणकालानन्तरमेवात्मीयस्वामिनः कथयति॥२३३॥

कर्णौ चर्म च वालांश्च बस्तिं स्नायुं च रोचनाम्।
पशुषु स्वामिनां दद्यान्मृतेष्वङ्गानि दर्शयेत्॥२३४॥

If cattle die, let him carry to his master their ears, skin, tails, bladders, tendons, and the yellow concrete bile, and let him point out their particular marks.

स्वयं मृतेषु पशुषु कर्णचर्मलाङ्गूलप्रवालान्नाभेरधोभागस्नायुरोचनाः स्वामिनां दद्यात्। अन्यानि च चिह्नानि शृन्नखुरादीनि दर्शयेत्॥२३४॥

अजाविके तु संरुद्धे वृकैः पाले त्वनायति।
यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत्॥२३५॥

But if goats or sheep are surrounded by wolves and the herdsman does not hasten (to their assitance), he shall be responsible for any (animal) which a wolf may attack and kill.

अजाश्चाविकाश्चाजाविकं "गवाश्वप्रभृतीनि च" (पा. सू. २/४/११) इति द्वन्द्वैकवद्भावः। तस्मिन्नजाविके वृकैः परिवृते सति पालेऽनागच्छति यामजामेडकां वा वने वृको हन्यात्स पालस्य दोषः स्यात्॥२३५॥

तासां चेदवरुद्धानां चरन्तीनां मिथो वने।
यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी॥२३६॥

But if they, kept in (proper) order, graze together in the forest, and a wolf, suddenly jumping on one of them, kills it, the herdsman shall bear in that case no responsibility.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तासामजाविकानां पालेन नियमितानां संघीभूय वनेचरन्तीनां यत्राद्यदि कश्चित्कुतश्चिदुत्प्लुत्यालक्षितो यां कांचिद्धन्यान्न पालस्तत्र दोषभाक् ॥२३६॥

धनुःशतं परीहारो ग्रामस्य स्यात्समन्ततः।
शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु॥२३७॥

On all sides of a village a space, one hundred *dhanus* or three *samyā*-throws (in breadth), shall be reserved (for pasture), and thrice (that space) round a town.

चतुर्हस्तो धनुः। शम्या यष्टिस्तस्याः पातः प्रक्षेपो ग्रामसमीपे सर्वासु दिक्षु चत्वारि हस्तशतानि, त्रीन्वा यष्टिप्रक्षेपान्यावत्पशुप्रचारार्थं सस्यवपनादिसंरोध-परिहारकार्यः। नगरसमीपे पुनरयं त्रिगुणः कर्तव्यः॥२३७॥

तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि।
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्॥२३८॥

If the cattle do damage to unfenced crops on that (common), the king shall in that case not punish the herdsmen.

तस्मिन्परिहारस्थाने यदि केनचिददत्तावृतिकं धान्यमुप्यते तच्चेत्पशवो भक्षेयुस्तत्र पशुपालानं नृपो दण्डं न कुर्यात्॥२३८॥

वृतिं तत्र प्रकुर्वीत यामुष्ट्रो न विलोकयेत्।
छिद्रं च वारयेत्सर्वं श्वसूकरमुखानुगम्॥२३९॥

(The owner of the field) shall make there a hedge over which a camel cannnot look, and stop every gap through which a dog or a boar can thrust his head.

तत्र परिहारस्थाने क्षेत्रे वृतिं कण्टकादिमयीं तथाविधामुच्छ्रितां कुर्यात्। यामपरपार्श्वे उष्ट्रो न विलोकयेत्, तस्यां च यत्किंचिच्छिद्रं श्वसूकरमुखप्रवेशयोग्यं तत्सर्वमावृणुयात्॥२३९॥

पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः।
सपालः शतदण्डार्हो विपालांवारयेत्पशून्॥२४०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(If cattle do mischief) in an enclosed field near a highway or near a village, the herdsman shall be fined one hundred (*paṇas*); (but cattle), unattended by a herdsman, (the watchman in the field) shall drive away.

वर्त्मसमीपग्रामसमीपवर्तिनि वा परिहारस्थे क्षेत्रे दत्तवृतौ सपालः पशुः पालानिवारितो द्वारादिना कथंचित्प्रविष्टो यदा भक्षयति तदा पणशतं दण्ड्यः। पशोश्च दण्डासंभवात्पाल एव दण्ड्यः। विपालान्पुनर्भक्षणप्रवृत्तान्क्षेत्ररक्षको निवारयेत् ॥२४०॥

क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति।
सर्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा ॥२४१॥

(For damage) in other fields (each head of) cattle shall (pay a fine of) one (*paṇa*) and a quarter, and in all (cases the value of) the crop (destroyed) shall be made good to the owner of the field; that is the settled rule.

वर्त्मग्रामान्तव्यतिरिक्तेषु पशुर्भक्षयन्सपादं पणं दण्डमर्हति। अत्रापि पाल एव दण्ड्यः। सर्वत्र क्षेत्रे पशुभक्षितं फलं स्वामिने पालेन स्वामिना वा यथापराधं दातव्यमिति निश्चयः ॥२४१॥

अनिर्दशाहां गां सूतां वृषान्देवपशूंस्तथा।
सपालान्वा विपालान्वा न दण्ड्यान्मनुरब्रवीत् ॥२४२॥

But Manu had declared that no fine shall be paid for (damage done by) a cow within ten days after her calving, by bulls and by cattle sacred to the gods, whether they are attended by a herdsman or not.

प्रसूतां गामनिर्गतदशाहां तथा च चक्रशूलाङ्कितोत्सृष्टवृषान्हरिहरादिप्रतिमासंबन्धिपशून्पालसहितान्पालरहितान्वा सस्यभक्षणप्रवृत्तान्मनुरदण्डष्टयानाह। उत्सृष्टवृषाणामपि गर्भार्थं गोकुले पालैर्धारणात्सपालत्वसंभवः ॥२४२॥

क्षेत्रियस्यात्यये दण्डो भागाद्दशगुणो भवेत्।
ततोऽर्धदण्डो भृत्यानामज्ञानात्क्षेत्रिकस्य तु ॥२४३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

If (the crops are destroyed by) the husbandman's (own) fault, the fine shall amount to ten times as much as (the king's) share; but the fine (shall be) only half that amount if (the fault lay) with the servants and the farmer had no knowledge of it.

क्षेत्रकर्षकस्यात्मपशुसस्यभक्षणेऽयथाकालं वपनादौ वापराधे सति यावतो राजभागस्य तेन हानिः कृता ततो दशगुणदण्डः स्यात्। क्षेत्रिकाविदिते भृत्यानामुक्तापराधे क्षेत्रिकस्यैव दशगुणार्धदण्डः। क्षेत्रसस्यप्रसन्नाच्चेदमुक्तम्॥२४३॥

एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः।
स्वामिनां च पशूनां च पालानां च व्यतिक्रमे॥२४४॥

To these rule a righteous king shall keep in (all cases of) transgressions by masters, their cattle, and herdsmen.

स्वामिनां पालानां चारक्षणादपराधे पशूनां च सस्यभक्षणरूपे व्यतिक्रमे धर्मप्रधानो भूपतिरेतत्पूर्वोक्तं कर्तव्यमनुतिष्ठेत्॥२४४॥

सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः।
ज्येष्ठे मासि नयेत्सीमां सुप्रकाशेषु सेतुषु॥२४५॥

If a dispute has arisen between two villages concerning a boundary, the king shall settle the limits in the month of Jyaiṣṭha, when the landmarks are most distinctly visible.

द्वयोर्ग्रामयोर्मर्यादां प्रति विप्रतिपत्तावुत्पन्नायां ज्येष्ठे मासि ग्रीष्मरवितापसंशुष्कतृणत्वात्प्रकटीभूतेषु सीमालिन्नेषु राजा सीमां निश्चिनुयात्॥२४५॥

सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्।
शाल्मलीन्सालतालांश्च क्षीरिणश्चैव पादपान्॥२४६॥

Let him mark the boundaries (by) trees, (e.g.) Nyagrodhas, Aśvatthas, Kiṁsukas, cotton-trees, Śālas, Palmyra palms, and trees with milky juice.

न्यग्रोधादीन्वृक्षान्क्षीरिण उदुम्बरादींश्चिरस्थायित्वात्सीमालिन्न-भूतान्कुर्वीत॥२४६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुल्मान्वेणूंश्च विविधाञ्छमीवल्लीस्थलानि च।
शरान्कुब्जकगुल्मांश्च तथा सीमा न नश्यति॥२४७॥

By clustering shrubs, bamboos of different kinds, Śamīs, creepers and rasied mountds, reeds, thickets of Kubjaka; thus the boundary will not be forgotten.

गुल्मान्प्रकाण्डरहितान्वेणूंश्च प्रचुरकण्टकत्वाल्पकण्टकत्वादिभेदेन नानाप्रकारान्सीमावृक्षान्वल्लीर्लताः स्थानानि कृत्रिमोन्नतभूभागान् शरान् कुब्जकगुल्मांश्च प्रचुराल्पभोगत्वेनादरार्थं पृथङ्निर्दिष्टान्सीमालिन्नभूतान्कुर्यात्। एवं कृते सीमा न नश्यति॥२४७॥

तडागान्युदपानानि वाप्यः प्रस्रवणानि च।
सीमासंधिषु कार्याणि देवतायतनानि च॥२४८॥

Tanks, wells, cisterns, and fountains should be built where boundaries meet, as well as temples.

तडागकूपदीर्घिकाजलनिर्गममार्गदेवगृहाणिं सीमारूपेषु ग्रामद्वय-संधिस्थानेषु कर्तव्यानि। एतेषु सीमानिर्णयाय विख्याप्य कृतेषूदकाद्यर्थिजना अपि श्रुतिपरंपरया चिरकालेऽपि साक्षिणो भवन्ति॥२४८॥

उपच्छन्नानि चान्यानि सीमालिन्नानि कारयेत्।
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम्॥२४९॥

And as he will see that through men's ignorance of the boundaries trespasses constantly occur in the world, let him cause to be made other hidden marks for boundaries.

सीमानिर्णये सर्वदास्मिल्लोके मनुष्याणां विभ्रममज्ञानं दृष्ट्वाभिहितव्यतिरिक्तानि गूढानि वक्ष्यमाणानि सीमाचिह्नानि कारयेत्॥२४९॥

अश्मनोऽस्थीनि गोवालांस्तुषान्भस्म कपालिकाः।
करीषमिष्टकाङ्गारांश्छर्करा वालुकास्तथा॥२५०॥
यानि चैवंप्रकाराणि कालाद्भूर्मिन भक्षयेत्।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत्॥२५१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Stones, bones, cow's hairs, chaff, ashes, potsherds, dry cowdung, bricks, cinders, pebbles and sand.

And whatever other things of a similar kind the earth does not corrode even after a long time, those he should cause to be buried where one boundary joins (the other).

प्रस्तरास्थिगोवालतुषभस्मकर्पटिकाशुष्कगोमयपक्वेष्टकान्नारपाषाण-कर्परसिकता अन्यान्यप्येवंप्रकाराणि कालाञ्जनकार्पासास्थिप्रभृतीनि यानि चिरकालेनापि भूभिरात्मसान्न करोति तानि ग्रामयोः संधिषु सीमायां "प्रक्षिप्य कुम्भेष्वेतानि सीमान्तेषु निधापयेत्" इति बृहस्पतिवचनात्स्थूलपाषाण-व्यतिरिक्तानि कुम्भेषु कृत्वा प्रच्छन्नानि भूमौ निखाय धारयेत्॥२५०॥२५१॥

एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः।
पूर्वभुक्त्या च सततमुदकस्यागमेन च॥२५२॥

By these signs, by long continued possession, and by constantly flowing streams of water the king shall ascertain the boundary (of the land) of two disputing parties.

विवदमानयोर्ग्रामयोः प्रागुक्तैरेतैरुक्तचिह्नै राजा सीमामुन्नयेत्। वसतोः पुनरविच्छिन्नया भुक्तया सीमानिर्णयो नतु त्रिपुरुषादिकतया। तस्य "आधिः सीमा" इति पर्युदस्तत्वात्। ग्रामद्वयसंधिस्थनद्यादिप्रवाहेण च पारावारग्रामयोः सीमां निश्चिनुयात्॥२५२॥

यदि संशय एव स्याल्लिन्नानामपि दर्शने।
साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णयः॥२५३॥

If there be a doubt even on inspection of the marks, the settlement of a dispute regarding boundaries shall depend on witnesses.

यदि प्रच्छन्नप्रकाशलिन्नदर्शनेऽपि प्रच्छन्नान्नातुषादिकुम्भा अमी स्थानान्तरं नीत्वा निखाता नायं सीमातरुर्न्यग्रोधः स नष्ट इत्यादि समस्त एव यदि संदेहः स्यात्तदा साक्षिप्रमाण एव सीमाविवादनिश्चयो भवेत्॥२५३॥

ग्रामीयककुलानां च समक्षं सीम्नि साक्षिणः।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः॥२५४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ग्रामिकजनसमूहानां ग्रामद्वयस्थनियुक्तयोर्वादिप्रतिवादिनोश्च समक्षं सीमाविषये सीमालिन्नसंदेहे लिन्नानि साक्षिणः प्रष्टव्याः ॥२५४॥

The witnesses, (giving evidence) regarding a boundary, shall be examined concerning the landmarks in the presence of the crowd of the villagers and also of the two litigants.

ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयम्।
निबन्धीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ॥२५५॥

As they, being questioned, unanimously decide, even so he shall record the boundary (in writing), together with their names.

ते पृष्टाः साक्षिणः समस्ता न द्वैधेन सीमाविषयेण येन प्रकारेण निश्चयं ब्रूयुस्तेन प्रकारेणाविस्मरणार्थं पत्रे सीमां लिखेत्। तांश्च सर्वानेव साक्षिणो नामविभागतो लिखेत् ॥२५५॥

शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः।
सुकृतैः शापिताः स्वैः स्वैर्नयेयुसस्ते समञ्जसम् ॥२५६॥

Let them, putting earth on their heads, wearing chaplets (of red flowers) and red dresses, being sworn each by (the rewards for) his meritorious deeds, settle (the boundary) in accordance with the truth.

ते साक्षिण इति सामान्यश्रवणेऽपि "रक्तस्रग्वाससः सीमां नवेयुः" (अ. २ श्लो. १५२) इति याज्ञवल्क्यवचनाद्रक्तपुष्पमालाधारिणो लोहितवाससो मस्तके मृल्लोष्ठानि गृहीत्वा यदस्माकं सुकृतं तन्निष्फलं स्यादित्येवमात्मीयैः सुकृतैः शापिताः सन्तस्तां सीमां यथाशक्ति निर्णयेयुः ॥२५६॥

यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः।
विपरीतं नयन्तस्तु दाप्या स्युर्द्विशतं दमम् ॥२५७॥

If they determine (the boundary) in the manner stated, they are guiltless (being) veracious witnesses; but if they

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

determine it unjustly, they shall be compelled to pay a fine of two hundred (paṇas).

ते सत्यप्रधाना साक्षिणः शास्त्रोक्तेन विधानेन निर्णयस्था निष्पापा भवन्ति। अतथ्येन तु निश्चिन्वन्तः प्रत्येकं पणशतद्वयं दण्डं दाप्या भवेयुः॥२५७॥

साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः।
सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ॥२५८॥

On failure of witnesses (from the two villages, men of) the four neighbouring villages, who are pure, shall make (as witnesses) a decision concerning the boundary in the presence of the king.

ग्रामद्वयसंबन्धिसीमाविवादसाक्ष्यभावे चतुर्दिशं समन्तभवाः सामन्तास्तद्वासिनश्चत्वारो ग्रामवासिनः साक्षिधर्मेण राजसमक्षं सीमानिर्णयं कुर्युः॥२५८॥

सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्।
इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान्॥२५९॥

On failure of neighbours (who are) original inhabitants (of the country and can be) witnesses with respect to the boundary, (the king) may hear the evidence even of the following inhabitants of the forest.

साक्षिधर्मेण राजसमक्षमनुभवेन निर्णयमकुर्वतां ग्रामवासिनां ग्रामनिर्माणकालादारभ्य मौलानां पुरुषक्रमेण तद्ग्रामस्थानां सीमासाक्षिणामभाव इमान्वक्ष्यमाणान्संनिहितवनचारिणः पृच्छेत्॥२५९॥

व्याधाञ्छाकुनिकान्गोपान्कैवर्तान्मूलखानकान्।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः॥२६०॥

(*Viz.*) hunters, fowlers, herdsmen, fishermen, root-diggers, snake-catchers, gleaners, and other foresters.

लुब्धकान्, पक्षिवधजीविनः, गोपालान्, मत्स्यजीविनो, मूलोत्पाटनजीविनः, सर्पग्राहिणः, शिलोञ्छवृत्तीनन्यांश्च फलपुष्पेन्धनाद्यर्थं वनव्यवहरिणः पृच्छेत्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एते हि स्वप्रयोजनार्थं तेन ग्रामेण सर्वदा वनं गच्छेयुस्तद्ग्रामसीमाभिज्ञाः संभवन्ति ॥२६० ॥

ते पृष्टास्तु यथा ब्रूयुः सीमासंधिषु लक्षणम्।
तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः ॥२६१ ॥

As they, being examined, declare the marks for the meeting of the boundaries (to be), even so the king shall justly cause them to be fixed between the two villages.

ते व्याधादयः पृष्टाः सीमारूपेषु ग्रामसंधिषु येन प्रकारेण चिह्नं ब्रूयुस्तत्तेनैव प्रकारेण राजा द्वयोर्ग्रामयोः सीमां व्यवस्थापयेत् ॥२६१ ॥

क्षेत्रकूपतडागानामारामस्य गृहस्य च।
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः ॥२६२ ॥

The decision concerning the boundary-marks of fields, wells, tanks, of gardens and houses depends upon (the evidence of) the neighbours.

एकग्रामेऽपि क्षेत्रकूपतडागोद्यानगृहाणां सीमासेतुविवादे समस्तदेशवासिसाक्षिप्रमाणक एव मर्यादाचिह्ननिश्चयो विज्ञेयो न व्याधादिप्रमाणकः ॥२६२ ॥

सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम्।
सर्वे पृथक्पृथग्दण्डया राज्ञा मध्यमसाहसम् ॥२६३ ॥

Should the neighbours give false evidence, when men dispute about a boundary-mark, the king shall make each of them pay the middlemost amercement as a fine.

सीमाचिह्ननिमित्तं विवदमानानां मनुष्याणां यदि सामन्ता देशवासिनो मिथ्या ब्रुयुस्तदा ते सर्वे प्रत्येकं राज्ञा मध्यमसाहसं दण्डनीयाः। एवं चासामन्तरूपाणां पूर्वोक्तद्विशतो दमो ज्ञेयः ॥२६३ ॥

गृहं तडागमारामं क्षेत्रं वा भीषया हरन्।
शतानि पञ्च दण्डयः स्यादज्ञानाद्द्विशतो दमः ॥२६४ ॥

He who by intimidation possesses himself of a house, a

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

tank, a garden, or a field, shall be fined five hundred (*paṇas*); (if he trespassed through ignorance, the fine (shall be) two hundred (*paṇas*).

गृहतडागोद्यानक्षेत्राणामन्यतमं मारणबन्धनादिभयकथनपूर्वमाक्रम्य हरणे पञ्च पणशतानि दण्डनीयः स्यात्स्वत्वभ्रान्त्या हरतो द्विशतो दमः ॥२६४॥

सीमायामविषह्यायां स्वयं राजैव धर्मवित्।
प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः ॥२६५॥
[ध्वजिनी मत्सिनी चैव निधानी भयवर्जिता।
राजशासननीता च सीमा पञ्चविधा स्मृताः ॥19॥]

If the boundary cannot be ascertained (by any evidence), let a righteous king with (the intention of) benefiting them (all), himself assign (his) land (to each); that is the settled rule.

लिङ्गसाक्ष्याद्यभावे सीमायां परिच्छेत्तुमशक्यायां राजैव धर्मज्ञः पक्षपातरहितो ग्रामद्वयमध्यवर्तिनीं विवादविषयां भूमिं येषामेव ग्रामवासिनामुपकारातिशयो भवति यद्वतिरेकेण च महाननिर्वाहस्तेषामेव दद्यादिति शास्त्रव्यवस्था ॥२६५॥

एषोऽखिलेनाभिहितो धर्मः सीमाविनिर्णये।
अत ऊर्ध्वं प्रवक्ष्यामि वाक्पारुष्यविनिर्णयम् ॥२६६॥

Thus the law for deciding boundary (disputes) has been fully declared, I will next propound the (manner of) deciding (cases of) defamation.

एष सीमानिश्चयो धर्मो निःशेषेणोक्तः, अत ऊर्ध्वं वाक्पारुष्यं वक्ष्यामि। दण्डपारुष्याद्वाक्पारुष्यप्रवृत्तेः पूर्वमभिधानम्। अनुक्रमश्रुत्यां तु "पारुष्ये दण्डवाचिके" (अ. ८ श्लो. ६) इति दण्डशब्दस्याल्पस्वरत्वात्पूर्वनिर्देशः ॥२६६॥

शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति।
वैश्येऽप्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥२६७॥

A Kṣatriya, having defamed a Brāhmaṇa, shall be fined one hundred (*paṇas*); a Vaiśya one hundred and fifty or two hundred; a Śūdra shall suffer coropral punishment.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्विजस्य चौरेत्याक्षेपरूपं परुषमुक्त्वा क्षत्रियः पणशतं दण्डमर्हति। एवं सार्धशतं द्वे वा शते लाघवगौरवापेक्षया वैश्यः। शूद्रोऽप्येवं ब्राह्मणाक्रोशे ताडनादिरूपं वधमर्हति॥२६७॥

पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने।
वैश्ये स्यादर्धपञ्चाशच्छूद्रे द्वादशको दमः॥२६८॥

A Brāhmaṇa shall be fined fifty (*paṇas*) for defaming a Kṣatriya; in (the case of) a Vaiśya the fine shall be twenty-five (*paṇas*); in (the case of) a Śūdra twelve.

ब्राह्मणः क्षत्रियस्योक्तरूपाक्षेपे कृते पञ्चशत्पणान्दण्ड्यः। वैश्ये शूद्रे च यथोक्ताक्रोशे कृते पञ्चविंशतिर्द्वादशः पणाः क्रमेण ब्राह्मणस्य दण्डः स्यात्॥२६८॥

समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत्॥२६९॥
[विप्रक्षत्रियवत्कार्यो दण्डो राजन्यवैश्ययोः।
[विप्रक्षत्रियवत्कार्योदण्डो राजन्यवैश्ययोः
वैश्यक्षत्रिययोःशूद्रे विप्रे यः क्षत्रशूद्रयोः॥२०॥
समुत्कर्षापकर्षास्तु विप्रदण्डस्य कल्पनाः।
राजन्यवैश्यशूद्राणां धनवर्जमिति स्थितिः॥२१॥]

For offences of twice-born men against those of equal caste (*varṇa*, the fine shall be) also twelve (*paṇas*); for speeches which ought not to be uttered, that (and every fine shall be) double.

द्विजातीनां समानजातिविषये यथोक्ताक्रोशे कृते द्वादशपणो दण्डः। अवचनीयेषु पुनराक्रोशवादेषु मातृभगिन्याद्यश्लीलरूपेषु तदेवेति नपुंसकनिर्देशात् "शतं ब्राह्मणमाक्रुश्य" (अ. ८ श्लो. २६७) इत्यादि यदुक्तं तदेव द्विगुणं दण्डरूपं भवेत्॥२६९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकजातिर्द्विजातीस्तु वाचा दारुणया क्षिपन्।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥२७०॥

A once-born man (a Śūdra), who insults a twice-born man with gross invective, shall have his tongue cut out; for he is of low origin.

शूद्रो द्विजातीन्पातकाभियोगिन्या वाचाक्रुश्य जिह्वाच्छेदं लभेत्। यस्मादसौ पादाख्यान्निकृष्टान्नाज्जातः॥२७०॥

नामजातिग्रहं त्वेषामभिद्रोहेण कुर्वतः।
निक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः॥२७१॥

If he mentions the names and castes (*jāti*) of the (twice-born) with contumely, an iron nail, ten fingers long, shall be thrust red-hot into his mouth.

अभिद्रोह आक्रोशः। ब्राह्मणादीनां रे त्वं यज्ञदत्त ब्राह्मणापसद इत्याक्रोशेन नामजात्यादिग्रहणं कुर्वतो लोहकीलोऽग्निना प्रदीप्तो दशाङ्गुलो मुखेषु क्षेप्तव्यः॥२७१॥

धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः॥२७२॥

If he arrogantly teaches Brāhmaṇas their duty, the king shall cause hot oil to be poured into his mouth and into his ears.

कथंचिद्धर्मलेशमवगम्यायं ते धर्मोऽनुष्ठेय इति ब्राह्मणस्याहंकारादुपदिशतोऽस्य शूद्रस्य मुखे कर्णयोश्च ज्वलत्तैलं राजा प्रक्षेपयेत्॥२७२॥

श्रुतं देशं च जातिं च कर्म शारीरमेव च।
वितथेन ब्रुवन्दर्पाद्दाप्यः स्याद्द्विशतं दमम्॥२७३॥

He who through arrogance makes fales statements regarding the learning (of a caste-fellow), his country, his caste (jāti), or the rites by which his body was sanctified, shall be compelled to pay a fine of two hundred (*paṇas*).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समानजातिविषयमिदं दण्डलाघवान्न तु शूद्रस्य द्विजात्याक्षेपविषयम्। न त्वयैतच्छ्रुतं, न भवान् तद्देशजातो, न तवेयं जातिर्न तव शरीरसंस्कारमुपनयनादिकर्म कृतमित्यहंकारेण मिथ्या ब्रुवन्द्विशतं दण्डं दाप्यः स्यात्। वितथेनेति तृतीयाविधाने "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया ॥२७३॥

काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम्।
तथ्येनापि ब्रुवन्दाप्यो दण्डं कार्षापणावरम्॥२७४॥

He who even in accordance with the true facts (contemptuously) calls another man one-eyes, lame, or the like (names), shall be fined at least one *kārṣāpaṇa*.

एकाक्षिविकलं पादविकलमन्यमपि वा तथाविधं हस्ताद्यन्नविकलं सत्येनापि काणादिशब्देन ब्रुवन्नत्यन्ताल्पं तदा कार्षापणं दण्डं दाप्यः ॥२७४॥

मातरं पितरं जायां भ्रातरं तनयं गुरुम्।
आक्षारयञ्छतं दाप्यः पन्थानं चाददद्गुरोः॥२७५॥

He who defames his mother, his father, his wife, his brohter, his son, or his teacher, and he who gives not the way to his preceptor, shall be compelled to pay one hundred (*paṇas*).

"आक्षारितः क्षारितोऽभिशप्तः" (अमरकोषे विशेष्यनिघ्ने श्लो. ४३) इत्याभिधानिकाः। मात्रादीन्पातकादिनाभिशपन्, गुरोश्च पन्थानमत्यजन्दण्डयः। भार्यादीनां गुरुलघुपापाभिशापेन दण्डसाम्यं समाधेयम्। मेधातिथिस्तु आक्षारणं भेदनमित्युक्त्वा मातृपुत्रपित्रादीनां परस्परभेदनकर्तुरयं दण्डविधिरिति व्याख्यातवान्॥२७५॥

ब्राह्मणक्षत्रियाभ्यां तु दण्डः कार्यो विजानता।
ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः॥२७६॥

(For mutual abuse) by a Brāhmaṇa and a Kṣatriya a fine must be imposed by a discerning (king), on the Brāhmaṇa the lowest amercement, but on the Kṣatriya the middlemost.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणक्षत्रियाभ्यां परस्परं पतनीयाक्रोशे कृते दण्डशास्त्रज्ञेन राज्ञा दण्डः कार्यः। दण्डमेव विशेषेणाह—ब्राह्मण इति। ब्राह्मणे क्षत्रियाक्रोशिनि प्रथमसाहसः कार्यः। ब्राह्मणाक्रोशिनि पुनः क्षत्रिये मध्यमसाहसः॥२७६॥

विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः।
छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः॥२७७॥
[पतितं पतितेत्युक्त्वा चौरं चौरेति वा पुनः।
वचनात्तुल्यदोषः स्यान्मिथ्या द्विर्दोषतां व्रजेत्॥२२॥]

A Vaiśya and a Śūdra must be punished exactly in the same manner according to their respective castes, but the tongue (of the Śūdra) shall not be cut ou t; that is the decision.

वैश्यशूद्रयोरन्योन्यजातिं प्रति पतनीयाक्रोशे ब्राह्मणक्षत्रियवद्वैश्ये शूद्राक्रोशिनि प्रथमसाहसः। शूद्रे वैश्याक्रोशिनि मध्यमसाहस इत्येवंरूपं दण्डस्य प्रणयनं जिह्वाच्छेदरहितं यथावत्कर्तव्यमिति शास्त्रनिश्चयः। एवंच "एकजातिर्द्विजातींस्तु" (अ. ८ श्लो. २७०) इति प्रागुक्तजिह्वाच्छेदो वैश्ये निवारितो ब्राह्मणक्षत्रियाक्रोशविषय एवावतिष्ठते॥२७७॥

एष दण्डविधिः प्रोक्तो वाक्पारुष्यस्य तत्त्वतः।
अत ऊर्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम्॥२७८॥

Thus the rules for punishments (applicable to cases) of defamation have been truly declared; I will next propound the decision (of cases) of assault.

एषोऽनन्तरोक्तो वाक्पारुष्यस्य यथावद्दण्डविधिरुक्तः, अनन्तरं ताडनादेर्दण्डपारुष्यस्य निर्णयं वक्ष्यामि॥२७८॥

येन केनचिदन्नेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम्॥२७९॥

With whatever limb a man of a low caste does hurt to (a man of the three) highest (castes), even that limb shall be cut off; that is the teaching of Manu.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अन्त्यजः शूद्रो येन केनचित्करचरणादिनान्येन साक्षाद्दण्डादिनाऽव्यवहितेन द्विजातिं प्रहरेत्तदेवान्नमस्य छेत्तव्यमित्ययं मनोरुपदेशः। मनुग्रहणमादरार्थम्॥२७९॥

अस्यैवोत्तरत्र प्रपञ्चः-

पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति।
पादेन प्रहरन्कोपात्पादच्छेदनमर्हति॥२८०॥

He who rasies his hand or a stick, shall have his hand cut off; he who in anger kicks with his foot, shall have his foot cut off.

प्रहर्तुं पाणिं दण्डं वोद्यम्य पाणिच्छेदं लभते। पादेन कोपात्प्रहरणे पादच्छेदं प्राप्नोति॥२८०॥

सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः।
कटयां कृताङ्को निर्वास्यः स्फिचं वास्यावकर्तयेत्॥२८१॥

A low-caste man who tries to place himself on the same seat with a man of a high caste, shall be branched on his hip and be banished, or (the king) shall cause his buttock to be gashed.

ब्राह्मणेन सहासनोपविष्टः शूद्रः कटयां तप्तलोहकृतचिह्नोऽपदेशो निर्वासनीयः। स्फिचं वास्य यथा न म्रियते तथा छेदयेत्॥२८१॥

अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः।
अवमूत्रयतो मेढ्रमवशर्धयतो गुदम्॥२८२॥॥

If out of arrogance he spits (on a superior), the king shall cause both his lips to be cut off; if he urines (on him), the penis; if he breaks wind (against him), the anus.

दर्पेण श्लेष्मणा ब्राह्मणानपमानयतः शूद्रस्य राजा द्वावोष्ठौ छेदयेत्। मूत्रप्रक्षेपेणापमानयतो मेढ्रम्। शर्धनं कुत्सितो गुदशब्दस्तेनावमानयतो दर्पान्न प्रमादाद्गुदं छेदयेत्॥२८२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्।
पादयोर्दाढिकायां च ग्रीवायां वृषणेषु च॥२८३॥

If he lays hold of the hair (of a superior), let the (king) unhesitatingly cut off his hands, likewise (if he takes him) by the feet, the beard, the neck, or the scrotum.

दर्पादित्यनुवर्तते। अहंकारेण केशेषु ब्राह्मणं गृह्णतः शूद्रस्य पीडास्य जाता न जाता वेत्यविचारयन्हस्तौ छेदयेत्। पादयोः स्मश्रुणि व ग्रीवायां वृषणे च हिंसार्थं गृह्णतो हस्तद्वयच्छेदमेव कुर्यात्॥२८३॥

त्वग्भेदकः शतं दण्डयो लोहितस्य च दर्शकः।
मांसभेत्ता तु षण्णिष्कान्प्रवास्यस्त्वस्थिभेदकः॥२८४॥

He who breaks the skin (of an equal) or fetches blood (from him) shall be fined one hundred (panas), he who cuts a muscle six nishkas, he who breaks a bone shall be banished.

चर्ममात्रभेदकृत्समानजातिर्न शूद्रो ब्राह्मणस्य दण्डलाघवं पणशतं दण्डनीयः। तथा रक्तोत्पादकोऽपि पणशतमेव दण्ड्यः। मांसभेदी षण्निष्कान्दाप्यः। अस्थिभेदकस्तु देशान्निर्वास्यः॥२८४॥

वनस्पतीनां सर्वेषामुपभोगं यथायथा।
तथातथा दमः कार्यो हिंसायामिति धारणा॥२८५॥

Accroding to the usefulness of the several (kinds of) trees a fine must be inflicted for injuring them; that is the settle rule.

वृक्षाद्युद्भिदां सर्वेषां येन येन प्रकारेण उपभोगः फलपुष्पपत्रादिना उत्तममध्यमरूपो भवति तथातथा हिंसायामप्युत्तमसाहसादिर्दण्डो विधेय इति निश्चयः। तथा च विष्णुः–फलोपभोगद्रुमच्छेदी तूत्तमं साहसं, पुष्पोपभोगद्रुमच्छेदी मध्यं, वल्लीगुल्मलताच्छेदी कार्षापणशतं, तृणच्छेद्येकं कार्षापणं च पण एव मनुनाप्युक्तो वेदितव्यः॥२८५॥

मनुष्याणां पशूनां च दुःखाय प्रहृते सति।
यथायथा महद्दुःखं दण्डं कुर्यात्तथा तथा॥२८६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

If a blow is struck against men or animals in order to (give them) pain, (the judge) shall inflict a fine in proportion to the amount of pain (caused).

मनुष्याणां पशूनां पीडोत्पादनार्थं प्रहारे कृते सति यथा - यथा पीडाधिक्यं तथा - तथा दण्डमप्यधिकं कुर्यात्। एवं च मर्मस्थानादौ त्वग्भेदनादिषु कृतेषु "त्वग्भेदकः शतं दण्ड्यः" (अ. ८ श्लो. १८४) इत्युक्तादप्यधिको दण्डो दुःखविशेषापेक्षया कर्तव्यः॥२८६॥

अन्नावपीडनायां च व्रणशोणितयोस्तथा।
समुत्थानव्ययं दाप्यः सर्वदण्डमथापि वा॥२८७॥

If a limb is injured, a wound (is caused), or blood (flows, the assailant) shall be made to pay (to the sufferer) the expenses of the cure, or the whole (both the usual amercement and the expenses of the cure as a) find (to the king).

अन्नानां करचरणादीनां व्रणशोणितयोश्च पीडनायां सत्यां समुत्थानव्ययं यावता कालेन पूर्वावस्थाप्राप्तिः समुथानसंबन्धो भवति तावत्कालेन पथ्यौषधादिना यावान्व्ययो भवति तमसौ दापनीयः। अथ तं व्ययं पीडोत्पादको न दातुमिच्छति, तदा यः समुत्थानव्ययो यश्च दण्डस्त्वेनं दण्डत्वेन राज्ञा दाप्यः॥२८७॥

द्रव्याणि हिंस्याद्यो यस्य ज्ञानतोऽज्ञानतोऽपि वा।
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम्॥२८८॥

He who damages the goods of another, be it intentionally or unintentionally, shall give satisfaction to the (owner) and pay to the king a fine equal to the (damage).

द्रव्याण्यनुक्तविशेषदण्डानि कटकानि ताम्रघटादीनि यो यस्य ज्ञानादज्ञानाद्वा नाशयेत्स तस्य द्रव्यान्तरादिना तुष्टिमुत्पादयेत्, राज्ञश्च विनाशितद्रव्यसमं दण्डं दद्यात्॥२८८॥

चर्मचार्मिकभाण्डेषु काष्ठलोष्ठमयेषु च।
मूल्यात्पञ्चगुणो दण्डः पुष्पमूलफलेषु च॥२८९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

In the case of (damage done to) leather, or to utnesils of leather, of wood, or of clay, the fine (shall be) five times their value; likewise in the case of (damage to) flowers, roots, and fruit.

चर्मणि चर्मघटितवरत्रादौ चर्मकाष्ठमृत्तिकानिर्मितेषु च भाण्डेषु पुष्पमूलफलेषु परस्य नाशितेषु मूल्यात्पञ्चगुणो दण्डो राज्ञो देयः। स्वामिनश्च तुष्टिरुत्पादनीयैव ॥२८९॥

यानस्य चैव यातुश्च यानस्वामिन एव च।
दशातिवर्तनान्याहुः शेषे दण्डो विधीयते ॥२९०॥

They declare with respect to a carriage, its driver and its owner, (that three are) ten cases in which no punishment (for damage done) can be inflicted; in other cases a fine is prescribed.

यानस्य रथादेर्यातुः सारथ्यादेर्यानस्वामिनश्च यस्य तद्यानं तेषां छिन्ननास्यादीनि दश निमित्तानि दण्डमतिक्रम्य वर्तन्ते। एषु निमित्तेषु सत्सु प्राणिमारणे द्रव्यनाशे च प्रकृते यानस्वामिनां दण्डो न भवतीति मन्वादय आहुः। एतद्व्यतिरिक्तनिमित्ते च पुनर्दण्डोऽनुष्ठीयते ॥२९०॥

छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥२९१॥
छेदने चैव यन्त्राणां योत्क्रशम्योस्तथैव च।
आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत् ॥२९२॥

When the nose-string is snapped, when the yoke is broken, when the carriage turns sideways or back, when the axle or a wheel is broken.

When the leather-thongs, the rope around the neck or the bridle are broken, and when (the driver) has loudly called out, 'Make way,' Manu has declared (that in all these cases) no punishment (shall be inflicted).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नासायां भवं नास्यम्। शरीरावयवत्वाद्यत्। सा चेह बलीवर्दनाससंबन्धिनी रज्जुः। छिन्ननास्यरज्जौ बलीवर्दादिके, भग्नयुगाख्ये काष्ठे, रथादौ भूमिवैषम्यादिना तिरश्चीनं वा गते, तथा चक्रान्तःप्रविष्टाक्षकाष्ठभन्ने यन्त्राणां चर्मबन्धनानां छेदने, योक्त्रस्य पशुग्रीवारज्ज्वाः, रश्मेः प्रहरणस्य च छेदने, अपसरापसरेत्युच्चैःशब्दे सारथ्यादिना कृते च यानेन प्राणिर्हिसाद्रव्यविनाशयोः कृतयोः सारथ्यादेर्द्रण्डो नास्तीति मनुराह॥२९१-२९२॥

यत्रापवर्तते युग्यं वैगुण्यात्प्राजकस्य तु।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्॥२९३॥

But if the cart tuns off (the road) through the driver's want of skill, the owner shall be fined, if damage (is done), two hundred (*paṇas*).

यत्र सारथेरकौशलाद्यानमन्यथा व्रजति तत्र हिंसायामशिक्षितसारथ्य-नियोगस्वामी द्विशतं दण्डं दाप्यः स्यात्॥२९३॥

प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति।
युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतम्॥२९४॥

If the deiver is skilful (but negligent), he alone shall be fined; if the driver is unskulful, the occupants of the carriage (also) shall be each fined one hundred (*paṇas*).

यदि सारथिः कुशलः स्यात्तदा सारथिरेवोक्तद्विशतं दमं वक्ष्यमाणं च "मनुष्यमारणे" (अ. ८ श्लो. २९६) इत्यादिकं दण्डमर्हति न स्वामी। अकुशले तु तस्मिन्सारथिस्वामिव्यतिरिक्ता अन्येऽपि यानारूढा अकुशलसारथिक-यानारोहणात्सर्वे प्रत्येकं शतं शतं दण्ड्याः॥२९४॥

स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा।
प्रमापयेत्प्राणभृतस्तत्र दण्डोऽविचारितः॥२९५॥

But if he is stopped on his way by cattle or by (another) carriage, and he causes the death of any living being, a fine shall without doubt be imposed.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स चेत्प्राजकः संमुखागतैः प्रचुरगवादिभि रथान्तरेण वा संरुद्धः स्वरथगमनानवधानात्प्रत्यक्सर्पणाक्षमः संकटेऽपि स्वरथतुरगान्प्रेरयन्, तुरगै रथेन वा रथावयवैर्वा प्राणिनो व्यापादयति तत्राविचारितो दण्डः कर्तव्य एव ॥२९५॥

सकृदपराधे कीदृश इत्याह-

मनुष्यमारणे क्षिप्तं चौरवत्किल्बिषं भवेत्।
प्राणभृत्सु महत्स्वर्धं गोगजोष्ट्रहयादिषु ॥२९६॥

If a man is killed, his guilt will be at once the same as (that of) a thief; for large animals such as cows, elephants, camels or horses, half of that.

तत्र मनुष्यमारणे प्राजकस्यानवधानाद्यानेन कृतं शीघ्रमेव चौरदण्डोत्तमसाहसं भवेन्न तु मारणरूपः। "प्राणभृत्सु महत्स्वर्धम्" इति श्रवणात्। गोगजादिषु महत्सु प्राणिषु मारितेषु उत्तमसाहसस्यार्धं पञ्चशतपणो दण्डो भवेत् ॥२९६॥

क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥२९७॥

For injuring small cattle the fine (shall be) two hundred (*paṇas*); the fine for beautiful wild quadrupeds and birds shall amount to fifty (*paṇas*).

क्षुद्रकाणां पशूनां जातितो विशेषापदिष्टेतरेषां वनचरादीनां वयसा च किशोरादीनां मारणे द्विशतो दण्डः स्यात्। शुभेषु मृगेषु रुरुपृषतादिषु पक्षिषु च शुकहंससारसादिषु पक्षिषु हतेषु पञ्चाशद्दण्डो भवेत् ॥२९७॥

गर्दभाजाविकानां तु दण्डः स्यात्पञ्चमाषिकः।
माषिकस्तु भवेद्दण्डः श्वसूकरनिपातने ॥२९८॥

For donkeys, sheep, and goats the fine shall be five māṣas; but the punishment for killing a dog or a pig shall be one māṣa.

गर्दभच्छागैडकादीनां पुनर्मारणे पञ्चरूप्यमाषकपरिमाणो दण्डः स्यात्। नचात्र हैरण्यमाषग्रहणं, उत्तरोत्तरलघुदण्डाभिधानात्। [सूकरमारणेषु पुना रौप्यमाषपरिमाणो दण्डः स्यात् ॥२९८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भार्या पुत्रश्च दासश्च प्रेष्यो भ्राता च सोदरः।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा॥२९९॥

A wife, a son, a slave, a pupil, and a (younger) brother of the full blood, who have committed faults, may be beaten with a rope or a split bamboo.

भार्यापुत्रादयः कृतापराधा रज्ज्वा वातिलघुवेणुशलाकया ताड्या भवेयुः। शिक्षार्थं ताडनविधानादत्र दण्डापवादः॥२९९॥

पृष्ठतस्तु शरीरस्य नोत्तमान्ने कथंचन।
अतोऽन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्बिषम्॥३००॥

But on the back part of the body (only), never on a noble part; he who strikes them otherwise will incur the same guilt as a thief.

रज्ज्वादिभिरपि देहस्य पृष्ठेदेशे ताडनीयाः नतु शिरसि। उक्तव्यतिरेकेण प्रहरणे वाग्दण्डधनदण्डरूपं चौरदण्डं प्राप्नुयात्॥३००॥

ऐषोऽखिलेनाभिहितो दण्डपारुष्यनिर्णयः।
स्तेनस्यातः प्रवक्ष्यामि विधि दण्डविनिर्णये॥३०१॥

Thus the whole law of assualt (and hurt) has been declared completely; I will now explain the rules for the decision (in cases) of theft.

एष दण्डपारुष्यनिर्णयो निःशेषेणोक्तः। अत ऊर्ध्वं चौरदण्डविनिर्णये विधानं वक्ष्यामि॥३०१॥

परमं यत्नमातिष्ठेत्स्तेनानां निग्रहे नृपः।
स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्धते॥३०२॥

Let the king exert himself to the utmost to punish thieves; for, it he punishes thieves, his fame grows and his kingdom prospers.

चौराणां नियमने राजा परममुत्कृष्टं यत्नं कुर्यात्। यस्माच्चौरनिग्रहाद्राज्ञः ख्यातिर्निरुपद्रवतया राष्ट्रं च वृद्धिमेति॥३०२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अभयस्य हि यो दाता स पूज्यः सततं नृपः।
सत्रं हि वर्धते तस्य सदैवाभयदक्षिणम्॥३०३॥

That king, indeed, is every worthy of honour who ensures the safety (of his subjects); for the sacrificial session (*sattra*, which he, as it were, performs thereby) every grows in length, the safety (of his subjects representing) the sacrificial fee.

हिरवधारणे। चौराणां नियमनेन यो नृपतिः साधूनामभयं ददाति स एव पूज्यः पूर्वेषां श्लाघ्यो भवति। सत्रं गवायनादिक्रतुविशेषः यद्यस्मात्सत्रमिव सत्रं तदभयदानाच्चौरनिग्रहरूपाभयदक्षिणं सर्वदैव तस्य वृद्धिमेति। अन्यद्धि नियतकालीनं नियतदक्षिणं च, एतत्सर्वकालीनमभयदक्षिणं चेति वाक्यं व्यतिरेकालंकारः॥३०३॥

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः॥३०४॥

A king who (duly) protects (his subjects) receives from each and all the sixth part of their spiritual merit; if he does not protect them, the sixth part of their demerit also (will fall on him).

प्रजा रक्षतो राज्ञः सर्वस्य भृतिदातुर्वणिगादेर्भृत्यदातुश्च श्रोत्रियादेः सकाशाद्धर्मषड्भागो भवति। अरक्षतश्चाधर्मादपि लोकेन कृतात्षड्भागः स्यात्। तस्माद्यत्नतः स्तेननिग्रहेण राजा रक्षणं कुर्यात्। न च भृतिक्रीतत्वाद्राज्ञो धर्मषड्भागो न युक्त इति वाच्यम्। भृत्या धर्मषड्भागेन च परिक्रीतत्यस्य शास्त्रीयत्वात्॥३०४॥

यदधीते यद्यजते यद्ददाति यदर्चति।
तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात्॥३०५॥

Whatever (merit a man gains by) reading the Veda, by sacrificing, by charitable gifts, (or by) worshipping (Gurus and gods), the king obtains a sixth part of that in consequence of his duly protecting (his kingdom).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यः कश्चिज्जपयागदानदेवतार्चादीनि करोति तस्य राजा पालनेन षड्भागं प्राप्नोति ॥३०५॥

रक्षन्धर्मेण भूतानि राजा वध्यांश्च घातयन्।
यजतेऽहरहर्यज्ञैः सहस्त्रशतदक्षिणैः ॥३०६॥

A king who protects the created beings in accordance with the sacred law and smites those worthy of corporal punishment, daily offers (as it were) sacrifices at which hundred thousands (are given as) fees.

भूतानि सर्वाणि स्थावरजन्नमादीनि यथाशास्त्रं दण्डप्रणयनरूपेण धर्मेण रक्षन्, वध्यांश्च स्तेनादींस्ताडयन्, प्रत्यहं लक्षगोदक्षिणैर्यज्ञैर्यजते॥ तज्जन्यं पुण्यं प्राप्नोतीति भावः ॥३०६॥

योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः।
प्रतिभागं च दण्डं च स सद्यो नरकं व्रजेत्॥३०७॥

A king who does not afford protection, yet takes his share in kind, his taxes, tolls and duties, daily present and fines, will after death) soon sink into hell.

यो राजा रक्षामकुर्वन् बलिं, धान्यादेः षड्भागं, ग्रामवासिभ्यः प्रतिमासं वा भाद्रपौषनियमेन ग्राह्यं शुल्कं स्थलजलपथादिना वणिज्याकारितेभ्यो नियतस्थानेषु द्रव्यानुसारेण ग्राह्यं दानमिति प्रसिद्धं, प्रतिभागं फलकुसुमशाकतृणाद्युपायनं, प्रतिदिनग्राह्यं दण्डं व्यावहारादौ गृह्णाति स मृतः सन्सद्य एव नरकं याति ॥३०७॥

अरक्षितारं राजानं बलिषड्भागहारिणम्।
तमाहुः सर्वलोकस्य समग्रमलहारकम्॥३०८॥

They declare that a king who affords no protection, (yet) receives the sixth part of the produce, takes upon himself all the foulness of his whole people.

यो राजा न रक्षत्यथ च धान्यादिषड्भागं बलिरूपं गृह्णाति, तं सर्वलोकानां सकलपापहारिणं मन्वादय आहुः ॥३०८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनपेक्षितमर्यादं नास्तिकं विप्रलुम्पकम्।
अरक्षितारमत्तारं नृपं विद्यादधोगतिम्॥३०९॥

Know that a king who heeds not the rules (of the law), who is an atheist, and rapacious, who does not protect (his subjects, but) devours them, will sink low after death).

लंघितशास्त्रमर्यादं परलोकाभावशालिनमनुचितदण्डादिना धनग्राहिणं रक्षणरहितं करबल्यादेर्भक्षितारं राजानं नरकगामिनं जानीयात्॥३०९॥

अधार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः।
निरोधनेन बन्धेन विविधेन वधेन च॥३१०॥

Let him carefully restrain the wicked by three methods,—by imprisonment, by putting them in fetters, and by various (kinds of) corporal punishments.

अधार्मिकं चौरादिकमपराधापेक्षया त्रिभिरुपायैः प्रयत्नेन नियमयेत्। तानाह-कारागारप्रवेशनेन, निगडादिबन्धनेन, करचरणच्छेदनादिनानाप्रकार-हिंसनेन॥३१०॥

निग्रहेण हि पापानां साधूनां संग्रहेण च।
द्विजातय इवेज्याभिः पूयन्ते सततं नृपाः॥३११॥

For by punishing the wicked and by favouring the virtuous, kings are constantly sanctified, just as twice-bron men by sacrifices.

पापशालिनां निग्रहेण, साधूनां संग्रहेण, द्विजातय इव महायज्ञादिभिः सर्वकालं नृपतयः पवित्रीभवन्ति, तस्मादधार्मिकान्निगृह्णीयात्साधूंश्चानु- गृह्णीयात्॥३११॥

क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणाम्।
बालवृद्धातुराणां च कुर्वता हितमात्मनः॥३१२॥

A king who desires his own welfare must always forgive litigants, infants, aged and sick men, who inveigh against him.

कार्यार्थिप्रत्यर्थिनां दुःखेनाक्षेपोक्तिं रचयतां तथा बालवृद्धव्याधिता-नामाक्षिपता वक्ष्यमाणमात्मीयमुपकारमिच्छता प्रभुणा क्षमणीयम्॥३१२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यः क्षिप्तो मर्षयत्यार्त्तैस्तेन स्वर्गे महीयते ॥
यस्त्वैश्वर्यान्न क्षमते नरकं तेन गच्छति ॥ ३१३ ॥

He who, being abused by men in pain, pardons (them), will in reward of the (act) be exalted in heaven; but he who, (proud) of his kingly state, forgives them not, will for that (reason) sink into hell.

दुःखितैराक्षिप्तः सहते यस्तेन स्वर्गलोके पूजां लभते। प्रभुत्वदर्पान्न सहते यः स तेन नरकं गच्छति ॥३१३॥

राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता।
आचक्षाणेन तत्स्तेयमेवंकर्मास्मि शाधि माम् ॥ ३१४ ॥
स्कन्धेनादाय मुसलं लगुडं वापि खादिरम्।
शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा ॥ ३१५ ॥
[गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम्।
वधेन शुध्यते स्तेनो ब्राह्मणस्तपसैव वा ॥ २२ ॥]

A thief shall, running, approach the king, with flying hair, confessing that theft (and saying), 'Thus have I done, punish me'.

(And he must) carry on his shoulder a pestle, or a club of Khadira wood, or a spear sharp at both ends, or an iron staff.

यद्यपि "सूवर्णस्तेयकृद्विप्रः" (अ. ११ श्लो. ९९) इत्यादि प्रायश्चित्तप्रकरणे वक्ष्यति तथापि सुवर्णस्तेयं प्रति राजदण्डरूपतामस्य दण्डप्रकरणे दर्शयितुं पाठः। ब्राह्मणसुवर्णस्य चौरेण मुक्तकेशेन वेगाद्गच्छता मया ब्राह्मणसुवर्णमपहृतमिति संख्यापयता मुसलाख्यमायुधं खादिरमयं वा दण्डमुभयतस्तीक्ष्णां शक्तिं लोहमयं वा दण्डं स्कन्धे गृहीत्वा राजसमीपं गन्तव्यं ततो ब्राह्मणसुवर्णहार्यहमतोऽनेन मुसलादिना मां व्यापादयेत्येवं राज्ञे वक्तव्यम् ॥३१४॥३१५॥

शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते।
अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषम् ॥ ३१६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सकृन्मुसलादिप्रहारेण प्राणपरित्याजनान्मृतककल्पस्य जीवतोऽपि परित्यागाद्वा स चौरस्तस्मात्पापात्प्रमुच्यते। अतएव याज्ञवल्क्यः-"मृतकल्पः प्रहारार्तो जीवन्नपि विशुद्धयति" (अ. ३ श्लो. २४८) इति। तं पुनस्तेनं करुणादिभिरहत्वास्तेनस्य यत्पापं तद्राजा प्राप्नोति॥३१६॥

Whether he be punished or pardoned, the thief is freed from the (guilt of) theft; but the king, if he punishes not, takes upon himself the guiltof the thief.

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्॥३१७॥

ब्रह्महा यस्तत्संबन्धि योऽन्नमत्ति तस्मिन्नसौ स्वपापं संक्रामयति। भ्रूणहान्नभोक्तुः पापं भवतीत्येतदत्र विवक्षितं नतु ब्रह्मघ्नः पापं नश्यति। तथा भार्या व्यभिचारिणी जारपतिं क्षममाणे भर्तरि पापं संश्लेषयति। शिष्यश्च संध्याग्निकार्याद्यकरणजन्यं पापं गुरौ सहमाने न्यस्यति। याज्यश्च विधिमतिक्रामन्याजके क्षममाणे पापं निक्षिपति। स्तेनश्च राजन्युपेक्षमाणे पापं समर्पयति। तस्माद्राज्ञा स्तेनो निग्रहीतव्यः॥३१७॥

The killer of a learned Brāhmaṇa throws his guilt on him who eats his food, and adulterous wife on her (negligent) husband, a (sinning) pupil or sacrificer on (their neligent) teacher (or priest), a thief on the king (who pardons him).

राजभिःकृतदण्डास्तु कृत्वा पापानि मानवाः।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥३१८॥

But men who have committed crimes and have been punished by the king, go to heaven, being pure like those who performed meritorious deeds.

सुवर्णस्तेयादीनि पापानि कृत्वा पश्चाद्राजभिर्विहितदण्डा मनुष्याः सन्तः प्रतिबन्धकदुरितभावात्पूर्वार्जितपुण्यवशेन साधवः सुकृतकारिण इव स्वर्गं गच्छन्ति। एवं प्रायश्चित्तवद्दण्डस्यापि पापक्षयहेतुत्वमुक्तम्॥३१८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्तु रज्जुं घटं कूपाद्धरेद्भिद्याच्च यः प्रपाम्।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन्समाहरेत्॥३२०॥

On him who steals more than ten *kumbhas* of grain corporal punishment (shall be inflicted); in other cases he shall be fined eleven tiems as much, and shall pay to the (owner the value of his) property.

कूपसमीपे रज्जुघटयोर्जलोद्धारणाय धृतयो रज्जुं घटं वा हरेत्। यो वा पानीयदानगृहं विदारयेत्स सौवर्णं माषं दण्डं प्राप्नुयात्। "यन्निर्दिष्टं तु सौवर्णं माषं तत्र प्रकल्पयेत्" इति कात्यायनवचनात्। तच्च रज्ज्वादि तस्मिन्कूपे समर्पयेत्॥३१९॥

धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः।
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम्॥३२१॥

So shall corporal punishment be inflicted for stealing more than a hundred (palas) of articles sold by the weight, (*i.e.*) of gold, silver, and so forth, and of most excellent clothes.

द्विपलशतं द्रोणो विंशतिद्रोणश्च कुम्भः, दशसंख्येभ्यः कुम्भेभ्योऽधिकं धान्यं हरतो वधः। स च हर्तृस्वामिगुणवत्तापेक्षया ताडनान्नच्छेदमारणात्मको ज्ञेयः। शेषे पुनरेकस्मादारभ्य दश कुम्भपर्यन्तहरणे निह्नुतैकादशगुणं दण्डं दाप्यः। स्वामिनश्चापहृतं दाप्यः॥३२०॥

तथा धरिममेयानां शतादभ्यधिके वधः।
सुवर्णरजतादीनामुत्तमानां च वाससाम्॥३२२॥

For (stealing) more than fifty (*palas*) it is enacted that the hands (of the offender) shall be cut off; but in other cases, let him inflict a fine of eleven times the value.

यथा धान्येन वध उक्तस्तथा तुलापरिच्छेद्यानां सुवर्णरजतादीनामुत्कृष्टानां च वाससां पट्टादीनां पलशताधिकेऽपहृते वधः कर्तव्य एव। विषयसमीकरणं चात्र देशकालापहर्तृद्रव्यस्वामिजातिगुणापेक्षया परिहरणीयम्। एवमुत्तरत्रापि ज्ञेयम्॥३२१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते।
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्॥३२२॥

पूर्वोक्तानां पञ्चशदूर्ध्वं शतं यावदपहारे कृते हस्तच्छेदनं मन्वादिभिरभिहितम्। शेषेष्वेकपलादारभ्य पञ्चाशत्पलपर्यन्तापहारे अपहृतगुणादेकादशगुणं दण्डं दाप्यः॥३२२॥

पुरुषाणां कुलीनानां नारीणां च विशेषतः।
मुख्यानां चैव रत्नानां हरणे वधमर्हति॥३२३॥

For stealing men of noble family and especially women and the most precious gems, (the offender) deserves corporal (or capital) punishment.

महाकुलजातानां मनुष्याणां विशेषेण स्त्रीणां महाकुलप्रसूतानां श्रेष्ठानां च रत्नानां वज्रवैदूर्यादीनामपहारे वधमर्हति॥३२३॥

महापशूनां हरणे शस्त्राणामौषधस्य च।
कालमासाद्य कार्यं च दण्ड राजा प्रकल्पयेत्॥३२४॥

For stealing large animals, weapons, or medicines, let the king fix a punishment, after considering the time and the purpose (for which they were destined).

महतां पशूनां हस्त्यश्वादिगोमहिष्यादीनां तथा खड्गादीनां शस्त्राणां कल्याणघृतादेश्चौषधस्य च दुर्भिक्षादिरूपं कालं कार्यं प्रयोजनं च सदसद्विनियोगरूपं निरूप्य राजा ताडनान्नच्छेदवधरूपं दण्डं प्रकल्पयेत्॥३२४॥

गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने।
पशूनां हरणे चैव सद्यः कार्योऽर्धपादिकः॥३२५॥

For (stealing) cows belonging to Brāhmaṇas, for piercing (the nostrils of) a barren cow, and for stealing (other) cattle (belonging to Brāhmaṇas, the offender) shall forthwith lose half his feet.

ब्राह्मणसंबन्धिनीनां गवामपहारे वन्ध्यायाश्च गोर्वाहनार्थं नासाच्छेदने पशूनां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चाजैडकानां दण्डभूयस्त्वाद्यागाद्यर्थानां हरणेऽनन्तरमेव छिन्नार्थपादिकः कार्यः॥३२५॥

सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च।
दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च॥३२६॥
वेणुवैदलभाण्डानां लवणानां तथैव च।
मृनमयानां च हरणे मृदो भस्मन एव च॥३२७॥
मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च।
मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवम्॥३२८॥
अन्येषां चैवमादीनामद्यानामोदनस्य च।
पक्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः॥३२९॥

(For stealing) thread, cotton, drugs causing fermentation, cowdung, molasses, sour milk, sweet milk, butter-milk, water, or grass.

Vessels made of bamboo or other cane, salt of various kinds, earthen vessels), earth and ashes.

Fish, birds, oil, clarified butter, meat, honey, and other things that come from beasts.

Or other things of a similar kind spirituous liquor, boiled rice, and every kind of cooked food, the fine (shall be) twice the value (of the stolen article).

ऊर्णादिसूत्रकार्पासिकस्य च किण्वस्य सुराबीजद्रव्यस्य च सूक्ष्मवेणुखण्डनिर्मितजलाहरणभाण्डादीनां, यदप्यन्यत्पशुसंभवं च मृगचर्मखन्नशृन्नादि, अन्येषामप्येवंविधानामसारप्रायाणां मनःशिलादीनां, मद्यानां द्वादशानां, पक्वान्नानामोदनव्यतिरिक्तानामप्यपूपमोदकादीनां च कार्पासादिशब्दार्थानां प्रसिद्धानां चापहारे कृते मूल्याद्द्विगुणो दण्डः कार्यः॥ (३२६-३२९)

पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च।
अन्येष्वपरिपूतेषु दण्डः स्यात्पञ्चकृष्णलः॥३३०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

For flowers, green corn, shrubs, creepers, trees, and other unhusked (grain) the fine (shall be) five krishnalas.

पुष्पेषु, हरिते क्षेत्रस्थे धान्ये, गुल्मलतावृक्षेष्वपरिवृतेषु अनपावृतवृक्षेषु, वक्ष्यमाणश्लोके धान्यादिषु निर्देशात्परिपवनसंभवाच्च धान्येषु, अन्येषु समर्थपुरुषभारहार्येषु हृतेषु देशकालाद्यपेक्षया सुवर्णस्य रौप्यस्य वा पञ्चकृष्णलमाषपरिमाणो दण्डः स्यात् ॥३३० ॥

परिपूतेषु धान्येषु शाकमूलफलेषु च।
निरन्वये शतं दण्डः सान्वयेऽर्धशतं दमः ॥३३१ ॥

For husked grain, vegetables, roots, and fruit the fine (shall be) one hundred (*panas*) if there is no connexion (between the owner and the thief), fifty (panas) if such a connexion exists.

निष्पुलाकीकृतेषु वृक्षेषु, धान्येषु, शाकादिषु चापहृतेषु अन्वयो द्रव्यस्वामिनां संबन्धः, येन सह कश्चिदपि संबन्धो नास्त्येकग्रामवासादिस्तत्र शतं दण्डयः। सान्वये तु पञ्चाशत्पणो देयः। खलस्थेषु च धान्येष्वयं दण्डस्तत्र हि परिपूर्यते। गृहेष्वेकादशगुणो दण्डः प्रागुक्तः ॥३३१ ॥

स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम्।
निरन्वयं भवेत्स्तेयं हृत्वापव्ययते च यत् ॥३३२ ॥

An offence (of this description), which is committed in the presence (of the owner) and with violence, will be robbery; if (it is committed) in his absence, it will be theft; likewise if (the possession of) anything is denied after it has been taken.

यद्धान्यापहारादिकं कर्म द्रव्यस्वामिसमक्षं बलाद्धृतं तत्साहसं स्यात्, सहो बलं तद्भवं साहसस्। अत इह स्तेयदण्डो न कार्यः। एतदर्थः स्तेयप्रकरणेऽस्य पाठः। यत्पुनः स्वामिपरोक्षापहृतं तत्स्तेयं भवेत्। यच्च हृत्वाऽपह्नुते तदपि स्तेयमेव ॥३३२ ॥

यस्त्वेतान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः।
तमाद्यं दण्डयेद्राजा यश्चाग्निं चोरयेद्गृहात् ॥३३३ ॥

On that man who may steal (any of) the above-men-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

tioned articles, when they are prepared for (use), let the king inflict the first (or lowest) amercement; likewise on him whoi may steal (a sacred) sire out of the room (in which it is kept).

यः पुनरेतानि सूत्रादिद्रव्याण्युपभोगार्थं कृतसंस्काराणि मनुष्यश्चोरयेत्, यश्च त्रेताग्निं गृह्याग्निं वाग्निगृहाच्चोरयेत्तं राजा प्रथमं साहसं दण्डयेत्। अग्निस्वामिनश्चाधानोपक्षयो दातव्यः। गोविन्दराजस्तु लौकिकाग्निमपि चोरयतो दण्ड इत्याह तदयुक्तम्। अल्पापराधे गुरुदण्डस्यान्याय्यत्वात् ॥३३३॥

येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते।
तत्तदेव हरेतस्य प्रत्यादेशाय पार्थिवः॥३३४॥

With whatever limb a thief in any way commits (an offence) against men, even of that (the king) shall deprive him in order to prevent (a repetition of the crime).

येन येनान्नेन हस्तपादादिना येन प्रकारेण संधिच्छेदादिना चौरो मनुष्येषु विरुद्धं धनापहारादिकं चेष्टते तस्य तदेवान्नं प्रसन्ननिवारणाय राजा छेदयेत्। तत्र धनस्वाम्युत्कर्षापेक्षयायमन्नच्छेदः॥३३४॥

पिताऽऽचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः।
नादण्डयो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति॥३३५॥

Neither a father, nor a teacher, nor firend, nor a mother, nor a wife, nor a son, nor a domestic priest must be left unpunished by a king, if they do not keep within their duty.

पित्राचार्यमित्रभ्रातृमातृपत्नीपुत्रपुरोहितानां मध्यात्स्वधर्मे यो नावतिष्ठते स राज्ञोऽदण्डनीयो नास्ति, अपितु दण्डनीय एव॥३३५॥

कार्षापणं भवेद्दण्डयो यत्रान्यः प्राकृतो जनः।
तत्र राजा भवेद्दण्डयः सहस्त्रमिति धारणा॥३३६॥

Where another common man would be fined one kārṣāpaṇa, the king shal be fined one thousand; that is the settled rule.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यत्रापराधे राजव्यतिरिक्तो जनः कार्षापणं दण्डनीयो भवेत्तस्मिन्नपराधे राजा पणसहस्रं दण्डनीय इति निश्चयः। स्वार्थदण्डं त्वप्सु प्रवेशयेद्ब्राह्मणेभ्यो वा दद्यात्। "ईशो दण्डस्य वारुणः" (अ. ९ श्लो. ३४५) इति वक्ष्यमाणत्वात्॥३३६॥

अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम्।
षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य च॥३३७॥
ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत्।
द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः॥३३८॥

In (a case of) theft the guilt of a Śūdra shall be eight-fold, that of Vaiśya sixteenfold, that of a Kṣatriya two-and-thirtyfold.

That of a Brāhmaṇa sixty-fourfold, or quite a hundred-fold, or (even) twice four-and-sixtyfold; (each of them) knowing the nature of the offence.

'तद्दोषगुणविद्धि स' इति सर्वत्र संबध्यते। यस्मिंस्तेये यो दण्ड उक्तःस स्तेयगुणदोषज्ञस्य शूद्रस्याष्टभिरापाद्यते गुण्यत इत्यष्टगुणः कर्तव्यः। षोडशगुणो गुणदोषज्ञस्यवैश्यस्य, द्वात्रिंशद्गुणस्तथाविधक्षत्रियस्य, चतुःषष्टिगुणो गुणदोष-विदुषो ब्राह्मणस्य शतगुणो वाष्टाविंशत्यधिकशतगुणो वा गुणातिशयापेक्षया ब्राह्मणस्यैव॥३३७॥३३८॥

वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च।
तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत्॥३३९॥

(The taking of) roots and of fruit from trees, of wood for a (sacrificial) fire, and of grass for feeding cows, Manu has declared (to be) no theft.

"वीरुद्वनस्पतीनां पुष्पाणि स्ववदादंदीत फलानि चापरिवृतानां" इति गोतमवचनादपरिवृतवानस्पत्यादीनां मूलफलं, होमीयाग्न्यर्थं च दारु, गोग्रासार्थं च तृणं परकीयमस्तेयं मनुराह। तस्मान्न दण्डो नाप्यधर्मः॥३३९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

योऽदत्तादायिनो हस्तालिप्सेत ब्राह्मणो धनम्।
याजनाध्यापनेनापि यथा स्तेनस्तथैव सः॥३४०॥

A Brāhmaṇa, seeking to obtain property from a man who took what was not given to him, either by sacrificing for him or by teaching him, is even like a thief.

अदत्तादायिनश्चौरस्य हस्ताद्यो ब्राह्मणो याजनाध्यापनप्रतिग्रहैरपि परकीयधनं ज्ञात्वा लब्धुमिच्छेत्स चौरवच्चौरतुल्यो ज्ञेयः अतः स इव दण्डष्टः॥३४०॥

द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति॥३४१॥

A twice-born man, who is travelling and whose provisions are exhausted, shall not be fined, if he takes two stalks of sugar-cane or two (esculent) roots from the field of another man.

द्विजातिः पथिकः क्षीणपाथेयो द्वाविक्षुदण्डौ द्वे वा मूलके परकीयक्षेत्राद्गृह्णन् दण्डदानयोग्यो न भवति॥३४१॥

असंदितानां संदाता संदितानां च मोक्षकः।
दासाश्वरथहर्ता च प्राप्तः स्याच्चोरकिल्बिषम्॥३४२॥

He who ties up unbound or sets free tied up (cattle of other men), he who takes a slave, a horse, or a carriage will have incurred the guilt of a thief.

अबद्धानामश्वादीनां परकीयानां यो दर्पेण बन्धयिता, बद्धानां मन्दुरादौ मोचयिता यो दासाश्वरथापहारी स चौरदण्डं प्राप्नुयात्। स च गुरुलघ्वपराधानुसारेण मारणाङ्गच्छेदनधनाद्यपहाररूपो बोद्धव्यः॥३४२॥

अनेन विधिना राजा कुर्वाणः स्तेननिग्रहम्।
यशोऽस्मिन्प्राप्नुयाल्लोके प्रेत्य चानुत्तमं सुखम्॥३४३॥

A king who punishes thieves according to these rules, will gain fame in this world and after death unsurpassable bliss.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनेनोक्तविधानेन राजा चौरनियमनं कुर्वाण इह लोके ख्यातिं परलोके चोत्कृष्टसुखं प्राप्नुयात् ॥३४३॥

इदानीं साहसमाह-

ऐन्द्रं स्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययम्।
नोपेक्षेत क्षणमपि राजा साहसिकं नरम् ॥३४४॥

A king who desires to gain the throne of Indra and imperishable eternal fame, shall not, even for a moment, neglect (to punish) the man who commits violence.

सर्वाधिपत्यलक्षणं पदं ख्यातिं चाविनाशिनीमनुपक्षयां चातिशयेन प्राप्तुमिच्छन्राजाबलेन गृहदाहधनग्रहणकारिणं मनुष्यं क्षणमपि नोपेक्षेत ॥३४४॥

वाग्दुष्टात्तस्कराच्चैव दण्डेनैव च हिंसतः।
साहसस्य नरः कर्ता विज्ञेयः पापकृत्तमः ॥३४५॥

He who commits violence must be considered as the worst offender, (more wicked) than a defamer, than thief, and than he who injures (another) with a staff.

वाक्पारुष्यकृताच्चौराच्च दण्डपारुष्यकारिणश्च मनुष्यात्साहसकृन्मनुष्योऽतिशयेन पापकारी बोद्धव्यः ॥३४५॥

साहसे वर्तमानं तु यो मर्षयति पार्थिवः।
स विनाशं व्रजत्याशु विद्वेषं चाधिगच्छति ॥३४६॥

But that king who pardons the perpetrator of violence, quickly perishes and incurs hatred.

यो राजा साहसे वर्तमानं क्षमते स पापकृतामुपेक्षणादधर्मबुद्ध्या विनश्यति अपक्रियमाणराष्ट्रतया जनविद्वेषं च गच्छति ॥३४६॥

न मित्रकारणाद्राजा विपुलाद्वा धनागमात्।
समुत्सृजेत्साहसिकान्सर्वभूतभयावहान् ॥३४७॥

Neither for friendship's sake, nor for the sake of great

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

lucre, must a king let go perpetrators of violence, who cause terror to all creatures.

मित्रवाक्येन बहुधनप्राप्त्या वा सर्वभूतभयजनकान्साहसिकान् राजा न त्यजेत् ॥३४७॥

शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते।
द्विजातीनां च वर्णानां विप्लवे कालकारिते॥३४८॥
आत्मनश्च परित्राणे दक्षिणानां च संगरे।
स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति॥३४९॥

Twice-born men may take up arms when (they are) hindered (in the fulfilment of) their duties, when destruction (threatens) the twice-born castes (varna) in (evil) times.

In their own defence, in a strife for the fees of officiating priests, and in order to protect women and Brāhmaṇas; he who (under such circumstances) kills in the cause of right, commits no sin.

ब्राह्मणादिभिस्त्रिभिर्वर्णैः खड्गाद्यायुधं ग्रहीतव्यम्। यस्मिन्काले वर्णानामाश्रमिणां च साहसकारादिभिर्धर्मः कर्तुं न दीयते। तथा त्रैवर्णिकानामराजकेषु राष्ट्रेषु परचक्रागमनादिकालजनिते स्त्रीसन्नरादौ प्राप्ते तथात्मरक्षार्थं दक्षिणाधनगवाद्यपहारनिमित्ते च संग्रामे स्त्रीब्राह्मणरक्षार्थं च धर्मयुद्धेनानन्यगतिकतया परान् हिंसन्न दोषभाग्भवति। परमारणेऽप्यत्र साहसदण्डो न कार्यः॥३४८-३४९॥

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥३५०॥
[अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः॥२३॥
उद्यतासिर्विषाग्निभ्यां शापोद्यतकरस्तथा।
आथर्वणेन हन्ता च पिशुनश्चापि राजनि॥२४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भार्यारिक्थापहारी च रन्ध्रान्वेषणतत्परः।
एवमाद्यान्विजानीत्सर्वानेवाततायिनः॥ २५॥]

One may slay without hesitation an assassin who approaches (with murderous intent), whether (he be one's) teacher, a child or an aged man, or a Brāhmaṇa deeply versed in the Vedas.

गुरुबालवृद्धबहुश्रुतब्राह्मणानामन्यतमं वधोद्यतमागच्छन्तं विद्यावित्तादिभिरुत्कृष्टं पलायनादिभिरपि स्वनिस्तरणाशक्तौ निर्विचारं हन्यात्। अतएवोशनाः- "गृहीतशस्त्रमाततायिनं हत्वा न दोषः"। कात्यायनश्च भृगुशब्दोल्लेखेन मनूक्तश्लोकमेव व्यक्तं व्याख्यातवान्-"आततायिनि चोत्कृष्टे तपः स्वाध्यायजन्मनः। वधस्तत्र तु नैव स्यात्पापं हीने वधो भृगुः॥" मेधातिथिगोविन्दराजौ तु "स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति" (अ. ८ श्लो. ३४९) इति पूर्वस्यायमनुवादः। गुर्वादिकमपि हन्यात्किमुतान्यमपीति व्याचक्षाते॥३५०॥

नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति॥ ३५१॥

By killing an assassin the slayer incurs no guilt, whether (he does it) publicly or secretly; in that case fury recoils upon fury.

जनसमक्षं रहसि वा वधोद्यतस्य मारणे हन्तुर्न कश्चिदप्यधर्मदण्डः प्रायश्चित्ताख्यो दोषो भवति। यस्माद्धन्तृगतो मन्युः क्रोधाभिमानिनी देवता हन्यमानगतं क्रोधं विवर्धयति। साहसे चापराधगौरवापेक्षया मारणान्नच्छेदनधनग्रहणादयो दण्डाः कार्याः॥३५१॥

इदानीं स्त्रीसंग्रहणमाह-

परदाराभिमर्शेषु प्रवृत्तान्नॄन्महीपतिः।
उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्॥ ३५२॥

Men who commit adultery with the wives of others,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

the king shall cause to be marked by punishments which cause terror, and afterwards banish.

परदारसंभोगाय प्रवृत्तान्मनुष्यगणानुद्वेजनकरैर्दण्डैर्नासौष्ठकर्तनादिभिरङ्कयित्वा देशान्निःसारयेत् ॥३५२॥

तत्समुत्थो हि लोकस्य जायते वर्णसंकरः।
येन मूलहरोऽधर्मः सर्वनाशाय कल्पते ॥३५३॥

For by (adultery) is caused a mixture of the castes (*varṇa*) among men; thence (follows) sin, which cuts up even the roots and causes the destruction of everything.

यस्मात्परदाराभिगमनात्संभूतो वर्णस्य संकरः संपद्यते। येन वर्णसंकरेण विशुद्धपत्नीकयजमानाभावात् "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति" (अ. ३ श्लो. ७६) अस्याभावे सति वृष्टयाख्यजगन्मूलविनाशोऽधर्मो जगन्नाशाय संपद्यते ॥३५३॥

परस्य पत्न्या पुरुषः संभाषां योजयन्रहः।
पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाहसम् ॥३५४॥

A man formerly accused of (such) offences, who secretly converses with another man's wife, shall pay the first (or lowest) amercement.

तत्स्त्रीप्रार्थनादिदोषैः पूर्वमुत्पन्नाभिरपवादप्रार्थनाभिशापादिभिः पुरुषः उचितकारणव्यतिरेकेण परभार्यया संभाषणं कुर्वन्प्रथमसाहसं दण्डं प्राप्नुयात् ॥३५४॥

यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात्।
न दोषं प्राप्नुया त्किञ्चिन्न हि तस्य व्यतिक्रमः ॥३५५॥

But a man, not before accused, who (thus) speaks with (a woman) for some (reasonable) cause, shall not incur any guilt, since in him there is no transgression.

यः पुनः पूर्वं तत्स्त्रीप्रार्थनाभिशापरहितः केनचित्कारणेन जनसमक्षमभिभाषणं कुर्यान्न स पुनर्दण्डष्टत्वादिदोषं प्राप्नुयात्। तस्मान्न कश्चित्तस्यापराधोऽस्ति ॥३५५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा।
नदीनां वापि संभेदे स संग्रहणमाप्नुयात्॥३५६॥

He who addresses the wife of another man at a *Tīrtha*, outside the village, in a forest, or at the confluence of rivers, shall suffer (the punishment for) adulterous acts (*saṁgrahaṇa*).

तीर्थाद्यरण्यवनादिकं निर्जनदेशोपलक्षणमात्रम्। यः पुरुषः परस्त्रियमुदकावतरणमार्गेऽरण्ये ग्रामाद्बहिर्गुल्मलताकीर्णे निर्जने देशे वने बहुवृक्षसंतते नदीनां संगमे पूर्वमनाक्षारितोऽपि कारणादपि संभाषेत स संग्रहणं सहस्रपणदण्डं वक्ष्यमाणं प्राप्नुयात्। सम्यग्गृह्यते ज्ञायते येन परस्त्रीसंभोगाभिलाष इति संग्रहणम्॥३५६॥

उपचारक्रिया केलिः स्पर्शो भूषणवाससाम्।
सह खट्वासनं चैव सर्वं संग्रहणं स्मृतम्॥३५७॥

Offering presents (to a woman), romping (with her), touching her ornaments and dress, sitting with her on a bed, all (these acts) are considered adulterous acts (*saṁgrahaṇa*).

स्रग्गन्धानुलेपनप्रेषणाद्युपचारकरणं, केलिः परिहासालिन्ननादिः, अलंकारवस्त्राणां स्पर्शनमेकखट्वासनमित्येतत्सर्वं संग्रहणं मन्वादिभिः स्मृतम्॥३५७॥

स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया।
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम्॥३५८॥
[कामाभिपातिनी यातु नरं स्वयमुपव्रजेत्।
राज्ञा दास्ये नियोज्या सा कृत्वा तद्दोषघोषणम्॥२६॥]

If one touches a woman in a place (which ought) not (to be touched) or allows (oneself to be touched in such a spot), all (such acts done) with mutual consent are declared (to be) adulterous (*saṁgrahaṇa*).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यः स्प्रष्टुमनुचिते स्तनजघनादिदेशे स्त्रियं स्पृशेत्तया वा वृषणादिके स्पृष्टः क्षमते, तदान्योन्यान्नीकरणे सर्वं संग्रहणं मन्वादिभिः स्मृतम् ॥३५८॥

अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति।
चतुर्णामपि वर्णानां दारा रक्ष्यतमाः सदा ॥३५९॥

A man who is not a Brāhmaṇa ought to suffer death for adultery (*saṁgrahaṇa*); for the wives of all the four castes even must always be carefully guarded.

अब्राह्मणोऽत्र शूद्रः, दण्डभूयस्त्वात्। ब्राह्मण्यामनिच्छन्त्यामुत्तमं संग्रहणं प्राणान्तं दण्डं प्राप्नोति। चतुर्णामपि ब्राह्मणादीनां वर्णानां धनपुत्रादीनामतिशयेन दाराः सर्वदा रक्षणीयाः। तेन प्रसन्ननिवृत्त्यर्थमुत्कृष्टसंग्रहणादपि सर्ववर्णैर्भार्या रक्षणीया ॥३५९॥

भिक्षुका बन्दिनश्चैव दीक्षिताः कारवस्तथा।
संभाषणं सह स्त्रीभिः कुर्युरप्रतिवारिताः ॥३६०॥

Mendicants, bards, men who have performed the initiatory ceremony of a Vedic sacrifice, and artisans are not prohibited from speaking to married women.

भिक्षाजीविनः, स्तुतिपाठकाः, यज्ञार्थकृतदीक्षकाः, सूपकारादयः, भिक्षादिस्वकार्यार्थं गृहिस्त्रीभिः सह संभषणमनिवारिताः कुर्युः। एवं चैषां संग्रहणाभावः ॥३६०॥

न संभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत्।
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ॥३६१॥

Let no man converse with the wives of others after he has been forbidden (to do so); bu he who converses (with them), in spite of a prohibition, shall be fined one *suvarṇa*.

स्वामिना निषिद्धः स्त्रीभिः संभाषणं न कुर्यात्। प्रतिषिद्धः संभाषणमाचरन्नाज्ञः षोडशमाषात्मकसुवर्णदानयोग्यो भवति ॥३६१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नैष चारणदारेषु विधिर्नात्मोपजीविषु।
सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च॥३६२॥

This rule does not apply to the wives of actors and singers, nor (of) those who live on (the intrigues of) their own (wives); for such men send their wives (to others) or, concealing themselves, allow them to hold criminal intercourse.

"परिस्त्रियं योऽभिवदेत्" (अ. ८ श्लो. ३५६) इत्यादिसंभाषणनिषेधविधिर्नटगायनादिदारेषु नास्ति। तथा "भार्या पुत्रः स्वका तनुः" (अ. ४ श्लो. १८४) इत्युक्तत्वाद्भार्यैवात्माऽनयोपजीवन्ति धनलाभाय तस्या जारं क्षमन्ते ये तेषु, नटादिव्यतिरिक्तेष्वपि ये दारास्तेष्वप्येवं निषेधविधिर्नास्ति। यस्माच्चारणा आत्मोपजीविनश्च परपुरुषानानीय तैः स्वभार्यां संश्लेषयन्ते। स्वयमागतांश्च परपुरुषान्प्रच्छन्ना भूत्वा स्वाज्ञानं विभावयन्तो व्यवहारयन्ति॥३६२॥

किञ्चिचदेव तु दाप्यः स्यात्संभाषां ताभिराचरन्।
प्रैष्यासु चैकभक्तासु रहः प्रव्रजितासु च॥३६३॥

Yet he who secretly converses with such women, or with female slaves kept by one (master), and with female ascetics, shall be compelled to pay a small fine.

निर्जनदेशे चारणात्मोपजीविभिः स्त्रीभिः संभाषणं कुर्वन्स्वल्पदण्डलेशं राज्ञा दाप्यः, तासामपि परदारत्वात्। तथा दासीभिरवरुद्धाभिर्बौद्धाभिर्ब्रह्मचारिणीभिः संभाषां कुर्वन्किंचिद्दण्डमात्रं दाप्यः स्यात्॥३६३॥

योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति।
सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः॥३६४॥

He who violates an unwilling maiden shall instantly suffer corporal punishment; but a man who enjoys a willing maiden shall not suffer corporal punishment, if (his caste be) the same (as hers).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्तुल्यजातिरनिच्छन्तीं कन्यां गच्छति स तत्क्षणादेव ब्राह्मणेतरो लिन्नच्छेदनादिकं वधमर्हति। इच्छन्तीं पुनर्गच्छन्वधार्हो मनुष्यो न भवति ॥३६४॥

कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत्।
जघन्यं सेवमानां तु संयतां वासयेद् गृहे॥३६५॥

From a maiden who makes advances to a (man of) high (caste), he shall not take any fine; but her, who courts a (man of) low (caste), let him force to live confined in her house.

कन्यां संभोगार्थमुत्कृष्टजातिपुरुषं सेवमानां स्वल्पमपि दण्डं न दापयेत्। हीनजातिं पुनः सेवमानां यत्नात्स्थापयेत्। यथा वा निवृत्तकामा स्यात् ॥३६५॥

उत्तमां सेवमानस्तु जघन्यो वधमर्हति।
शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि॥३६६॥

A (man of) low (caste) who makes love to a maiden (of) the highest (caste) shall suffer corporal punishment; he who addresses a maiden (of) equal (caste) shall pay the nuptial fee, if her father desires it.

हीनजातिरुत्कृष्टामिच्छन्हीमनिच्छन्तीं वागच्छत्यपेक्षयान्नच्छेदन-मारणात्मकं वधमर्हति। समानजातीयां पुनरिच्छन्तीं गच्छन्यदि पिता मन्यते तदा पितुः शुल्कानुरूपमर्थं वा दद्यान्न च दण्डष्टः। सा च कन्या तेनैव वोढव्या ॥३६६॥

अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः।
तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतम्॥३६७॥

But if any man through insolence forcibly contaminates a maiden, two of his fingers shall be instantly cut off, and he shall pay a fine of six hundred (*paṇas*).

यो मनुष्यः प्रसह्य बलात्कारेण समानजातीयां गमनवर्जमहंकारेणाङ्गु लिप्रक्षेपमात्रेणैव नाशयेत्तस्य शीघ्रमेवाङ्गु लिद्वयच्छेदः कर्तव्यः। षट्पणशतानि चायं दण्डयः स्यात् ॥३६७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात्।
द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये॥३६८॥

A man (of) equal (caste) who defiles a willing maiden shall not suffer the amputation of his fingers, but shall pay a fine of two hundred (*paṇas*) in order to deter him from a repetition (of the offence).

समानजातिरिच्छन्तीं कन्यामङ्गु लिप्रक्षेपमात्रेणनाशयङ्गाङ्ग लिच्छेदेमाप्नोति। किंत्वतिप्रसक्तिनिवारणाय द्विशतं दण्डं दाप्यः॥३६८॥

कन्यैव कन्यां या कुर्यात्तस्याः स्याद् द्विशतो दमः।
शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद् श॥३६९॥

A damsel who pollutes (another) damsel must be fined two hundred (*paṇas*), pay the double of her (nuptial) fee, and receive ten (lashes with a) rod.

या कन्यैव परामङ्गु लिप्रक्षेपेण नाशयेत्तस्य द्विशतो दण्डः स्यात्। कन्याशुल्कं च द्विगुणं कन्यापितुर्दद्याच्छिफाःप्रहारांश्च दश प्राप्नुयात्॥३६९॥

या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्डयमर्हति।
अङ्गुल्योरेव वा छेदं खरेणोद्वहनं तथा॥३७०॥

But a woman who pollutes a damsel shall instantly have (her head) shaved or two fingers cut off, and be made to ride (through the town) on a donkey.

या पुनः कन्यामङ्गु लिप्रक्षेपेण स्त्री नाशयेत्सा तत्क्षणादेव शिरोमुण्डनं, अनुबन्धापेक्षयाङ्गु ल्योरेव छेदंन, गर्दभेण च राजमार्गे वहनमर्हति॥३७०॥

भर्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते॥३७१॥

If a wife, proud of the greatness of her relatives or (her own) excellence, violates the duty which she owes to her lord, the king shall cause her to be devoured by dogs in a place frequented by many.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

या स्त्री प्रबलधनिकपित्रादिबान्धवदर्पेण सौन्दर्यादिगुणदर्पेण च पतिं पुरुषान्तरोपगमनाल्लङ्घयेत्तां राजा बहुजनाकीर्णे देशे श्वभिर्भक्षयेत् ॥३७१ ॥

पुमांसं दाहयेत्पापं शयने तप्त आयसे।
अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ॥ ३७२ ॥

Let him cause the male offender to be burnt on a red-hot iron bed; they shall put logs under it, (until) the sinner is burned (to death).

अनन्तरोक्तं जारं पापकारिणं पुरुषमयोमयशयने प्रज्ज्वलिते राजा दाहयेत्। तत्र शयने वध्यघातिनः काष्ठानि निःक्षिपेयुर्यावत्पापकारी दग्धः स्यात् ॥३७२ ॥

संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः।
व्रात्यया सह संवासे चाण्डाल्या तावदेव तु ॥ ३७३ ॥

On a man (once) convicted, who is (again) accused within a year, a double fine (must be inflicted); even thus (must the fine be doubled) for (repeated) intercourse with a Vrātyā and Caṇḍālī.

परस्त्रीगमनेन दुष्टस्य पुंसोऽदण्डितस्य च संवत्सरातिक्रमेणाभिशस्तस्य पूर्वदण्डाद्द्विगुणो दमः कार्यः। तथा व्रात्यजायागमने यो दण्डः परिकल्पितः चाण्डाल्या, सह निर्देशाच्चाण्डालीगमनरूपः, तथा चाण्डालीगमने यो दण्डः "सहस्रं त्वन्त्यजस्त्रियम्" (अ. ८ श्लो. ३८५) इति, संवत्सरे त्वतीते यदि तामेव व्रात्यजायां तामेव चाण्डालीं पुनर्गच्छति तदा द्विगुणः कर्तव्यः। एतत्पूर्वस्यैवोदाहरणद्वयं व्रात्यजायागमनेऽपि चाण्डालीगमनदण्डप्रदर्शनार्थम्। सर्वस्यैव तु पूर्वाभिशस्तदण्डितस्य संवत्सरातिक्रमे पुनस्तामेव गच्छतः पूर्वाद्द्विगुणो दण्डो बोद्धव्यः ॥३७३ ॥

शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्।
अगुप्तमङ्गसर्वस्वैर्गुप्तं सर्वेण हीयते ॥ ३७४ ॥

A Śūdra who has intercourse with a woman of a twice-born caste (*varṇa*), guarded or unguarded, (shall be punished in the following manner) : if she was unguarded, he

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

loses the part (offending) and all his property; if she was guarded, everything (even his life).

भर्त्रादिभी रक्षितामरक्षितां वा द्विजातिस्त्रियं यदि शूद्रो गच्छेत्तदा रक्षितां रक्षारहितां गच्छंल्लिन्नसर्वस्वाभ्यां वियोजनीयः। अत्रान्नविशेषाश्रवणेऽपि आर्यस्त्रयभिगमने लिन्नोद्धारः। "सर्वस्वहरणं गुप्तां चेद्वधोऽधिकः" इति गोतमवचनाल्लिन्नच्छेदः। रक्षितां तु गच्छंश्छरीरधनहीनः कर्तव्यः॥३७४॥

वैश्यः सर्वस्वदण्डः स्यात्संवत्सरनिरोधतः।
सहस्रं क्षत्रियो दण्ड्यो मौण्डयं मूत्रेण चार्हति॥३७५॥

(For intercourse with a guarded Brāhmaṇi) a Vaiśya shall forfeit all his property after imprisonment for a year; a Kṣatriya shall be fined on thousand (*paṇas*) and be shaved with the urine (of an ass).

वैश्यस्य गुप्तब्राह्मणीगमने संवत्सरबन्धादनन्तरं सर्वस्वग्रहणरूपो दण्डः कार्यः। क्षत्रियागमने तु "वैश्यश्चेत्क्षत्रियाम्" (अ. ८ श्लो. ३८२) इति वक्ष्यति। क्षत्रियो गुप्तब्राह्मणीगमने सहस्रं दण्डनीयः। खरमूत्रेण चास्य मुण्डनं कर्तव्यम्॥३७५॥

ब्राह्मणीं यद्यगुप्तां तु गच्छेतां वैश्यपार्थिवौ।
वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्त्रिणम्॥३७६॥

If a Vaiśya or a Kṣatriya has connexion with an unguarded Brāhmaṇī, let him fine the Vaiśya five hundred (*paṇas*) and the Kṣatriya one thousand.

अरक्षितां तु ब्राह्मणीं यदि वैश्यक्षत्रियौ गच्छतस्तदा वैश्यं पञ्चशतदण्डयुक्तं कुर्यात्। क्षत्रियं पुनः सहस्रदण्डोपतम्। वैश्ये चायं पञ्चशतदण्डः शूद्राभ्रमादिना निर्गुणजातिमात्रोपजीविब्राह्मणीगमनविषयः। तदितरब्राह्मणीगमने वैश्यस्यापि सहस्रं दण्ड एव॥३७६॥

उभावपि तु तावेव ब्राह्मण्या गुप्तया सह।
विप्लुतौ शूद्रवद्दण्ड्यौ वा कटाग्निना॥३७७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But even these two, if they offend with a Brāhmaṇī (not only) guarded (but the wife of an eminent man), shall be punished like a Śūdra or be burnt in a fire of dry grass.

तावेवोभावपि क्षत्रियवैश्यौ ब्राह्मण्या रक्षितया सह कृतमैथुनौ शूद्रवत्सर्वेण हीयेते इति दण्ड्यौ। तद्वा कटेनावेष्ट्य दग्धव्यौ। तत्र "वैश्यं लोहितदर्भैः क्षत्रियं शरपत्रैर्वावेष्ट्य" इति वसिष्ठोक्तो विशेषो ग्राह्यः। पूर्वं "सहस्रं क्षत्रियो दण्ड्यो" "वैश्यः सर्वस्वम्" इत्युक्तत्वादयं प्राणान्तिकदण्डो गुणवद्ब्राह्मणी-गमनविषयो बोद्धव्यः ॥३७७॥

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन्।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह संगतः ॥ ३७८ ॥

A Brāhmaṇa who carnally knows a guarded Brāhmaṇī against her will, shall be fined one thousand (*paṇas*); but he shall be made to pay five hundred, if he had connexion with a willing one.

रक्षितां विप्रां ब्राह्मणो बलेनोपगच्छन्सहस्रं दण्ड्यः स्यात्। इच्छन्त्या पुनः सकृन्मैथुने पञ्च शतानि दण्डनीयो भवेत् ॥३७८॥

मौण्डयं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते।
इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥ ३७९ ॥

Tonsure (of the head) is ordained for a Brāhmaṇa (instead of) capital punishment; but (men of) other castes shall suffer capital punishment.

ब्राह्मणस्य वधदण्डस्थाने शिरोमुण्डनं दण्डः शास्त्रेणोपदिश्यते। क्षत्रियादीनां पुनरुक्तेन घातेन दण्डो भवति ॥३७९॥

न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम्।
राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् ॥ ३८० ॥

Let him never slay a Brāhmaṇa, though he have committed all (possible) crimes; let him banish such an (offender), leaving all his property (to him) and (his body) unhurt.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणं सर्वपापकारिणमपि कदाचिन्न हन्यादपि तु सर्वस्वयुक्तमक्षतशरीरं राष्ट्रान्निर्वासयेत्॥३८०॥

न ब्राह्मणवधाद् भूयानधर्मो विद्यते भुवि।
तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत्॥३८१॥

No greater crime is known on earth than slaying a Brāhmaṇa; a king, therefore, must not even conceive in his mind the thought of killing a Brāhmaṇa.

ब्राह्मणवधान्महान्पृथिव्यामधर्मो नास्ति। तस्माद्राजा सर्वपापकारिणो ब्राह्मणस्य मनसापि वधं न चिन्तयेत्॥३८१॥

वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः॥३८२॥
[क्षत्रियां चैव वैश्यां च गुप्तां तु ब्राह्मणो व्रजन्।
न मूत्रमुण्डः कर्तव्यो दाप्यस्तूत्तमसाहसम्॥२७॥]

If a Vaiśya approaches a guarded female of the Kṣatriya caste, or a Kṣatriya a (guarded) Vaiśya woman, they both deserve the same punishment as in the caste of an unguarded Brāhmaṇa female.

रक्षितां क्षत्रियां यदि वैश्यो गच्छेत्क्षत्रियो वा यदि रक्षितां वैश्यां तदा तयोर्ब्राह्मण्यामगुप्तायां गमने यौ दण्डावुक्तौ "वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्रिणम्" (अ. ८ श्लो. ३७६) इति द्वावेव दण्डौ वैश्यक्षत्रिययोर्भवतः। अयं च वैश्यस्य रक्षितक्षत्रियागमने पञ्चशतरूपो दण्डो लघुत्वाद्गुणवद्वैश्यस्य निर्गुणजातिमात्रोपजीविक्षत्रियायाः शूद्राभ्रान्त्यादिगमनविषयो बोद्धव्यः। क्षत्रियस्य रक्षितवैश्यायां ज्ञानतो युक्तः सहस्रं दण्डः॥३८२॥

सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्।
शूद्रायां क्षत्रियविशोः सअहस्रो वै भवेद्दमः॥३८३॥

A Brāhmaṇa shall be compelled to pay a fine of one thousand (*paṇas*) if he has intercourse with guarded (fe-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

males of) those two (castes); for (offending with) a (guarded) Śūdra female a fine of one thousand (*paṇas* shall be inflicted) on a Kṣatriya or a Vaiśya.

क्षत्रियावैश्ये रक्षिते ब्राह्मणो व्रजन्सहस्रं दण्डं दापनीयः। शूद्रायां रक्षितायां क्षत्रियवैश्ययोर्गमने सहस्रमेव दण्डः स्यात्॥३८३॥

क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः।
मूत्रेण मौण्डयमिच्छेत्तु क्षत्रियो दण्डमेव वा॥३८४॥

For (intercourse with) an unguarded Kshatriyā a fine of five hundred (*paṇas* shall fall) on a Vaiśya; but (for the same offence) a Kṣatriya shall be shaved with the urine (of a donkey) or (pay) the same fine.

अरक्षितक्षत्रियागमने वैश्यस्य पञ्चशतानि दण्डः स्यात्। क्षत्रियस्य त्वरक्षितागमने गद्रर्भमूत्रेण मुण्डनं पञ्चशतरूपं वा दण्डमाप्नुयात्॥३८४॥

अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन्।
शतानि पञ्च दण्ड्यः स्यात्सहस्रं त्वन्त्यजस्त्रियम्॥३८५॥
[शूद्रोत्पन्नांशपापीयान्न वै मुच्येत किल्बिषात्।
तेभ्यो दण्डाहृतं द्रव्यं न कोशे संप्रवेशयेत्॥२८॥
अयाजिकं तु तद्राजा दद्याद्भृतकवेतनम्।
यथादण्डगतं वित्तं ब्राह्मणेभ्यस्तुलंभयेत्॥२९॥
भार्या पुरोहितस्तेना ये चान्ये तद्विधा जनाः॥३०॥]

A Brāhmaṇa who approaches unguarded females (of the) Kṣatriya or Vaiśya (castes), or a Śūdra female, shall be fined five hundred (paṇas); but (for intercourse with) a female (of the lowest (castes), one thousand.

अरक्षितां क्षत्रियां वैश्यां शूद्रां वा ब्राह्मणो गच्छन्पञ्चशतानि दण्ड्यः स्यात्। अन्ते भवोऽन्त्यजः यस्मादधमो नास्ति चाण्डालादिस्तस्यस्त्रियं गच्छन्सहस्रं दण्ड्यः॥३८५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक्।
न साहसिकदण्डघ्नौ स राजा शक्रलोकभाक्॥३८६॥

That king in whose town lives no thief, no adulterer, no defamer no man gulity of violence, and no committer of assaults, attains the world of Śakra (Indra).

यस्य राज्ञो राष्ट्रे चौरः, परदारगामी, परूषवादी, गृहदाहादिसाहसकारी, दण्डपारुष्यकर्ता च नास्ति स राजा शक्रपुरं याति॥३८६॥

एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके।
साम्राज्यकृत्सजात्येषु लोके चैव यशस्करः॥३८७॥

The suppression of those five in his dominions secures to a king paramount sovereignty among his peers and fame in the world.

एतेषां स्तेनादीनां पञ्चानां स्वराष्ट्रे निग्रहः समानजातीयेषु राजसु मध्ये राजा साम्राज्यकृदिह लोके च यशस्करो भवति॥३८७॥

ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक्त्यजेद्यदि।
शक्तं कर्मण्यदुष्टं च तयोर्दण्डः शतं शतम्॥३८८॥

A sacrificer who forsakes an officiating priests, and an officiating priest who forsakes a sacrificer, (each being) able to perform his work and not contaminated (by grievous crimes), must each be fined one hundred (*paṇas*).

यो याज्यः ऋत्विजं कर्मानुष्ठानसमर्थमतिपातकादिदोषरहितमृत्विग्वा याज्यमदुष्टं त्यजति तयोः शतं शतं दण्डः कार्य इति दण्डप्रसन्नादिद-मुक्तम्॥३८८॥

न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति।
त्यजन्नपतियानेतान्राज्ञा दण्ड्यः शतानि षट्॥३८९॥

Neither a mother, nor a father, nor a wife, nor a son shall be cast off; he who casts them off, unless guilty of a crime causing loss of caste, shall be fined by the king six hundred (*paṇas*).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मातृपितृभार्यापुत्रास्त्यागमपोषणशुश्रूषणाद्यकरणात्मकं नार्हन्ति। तस्मादेतान्पातकादिरहितान्परित्यजन्नैकैकपरित्यागे राज्ञा षट् शतानि दण्ड्यः॥३८९॥

आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः।
न विब्रूयान्नृपो धर्मं चिकीर्षन्हितमात्मनः॥३९०॥

If twice-born men dispute among each other concerning the duty of the orders, a king who desires his own welfare should not (hastily) decide (what is) the law.

द्विजातीनां गार्हस्थ्याद्याश्रमविषये कार्येऽयं शास्त्रार्थो नायं शास्त्रार्थ इति परस्परं जातविवादानां राजा स्वीयहितं चिकीर्षुरयं शास्त्रार्थ इति सदृशान्विशेषेण न ब्रूयात्॥३९०॥

यथार्हमेतानभ्यर्च्य ब्राह्मणैः सह पार्थिवः।
सान्त्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत्॥३९१॥

Having shown them due honour, he should, with (the assistance of) Brāhmaṇas, first soothe them by gentle (speech) and afterwards teach them their duty.

यो यादृशीं पूजामर्हति तं तथा पूजयित्वा अन्यैर्ब्राह्मणैः सह प्रथमं प्रीत्या अपगतकोपं कृत्वा तत एषां यः स्वधर्मस्तं बोधयेत्॥३९१॥

प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे।
अर्हावभोजयन्विप्रो दण्डमर्हति माषकम्॥३९२॥

A Brāhmaṇa who does not invite his next neighbour and his neighbour next but one, (though) both (be) worthy (of the honour), to a festival at which twenty Brāhmaṇas are enterained, is liable to a fine of one māṣa.

निरन्तरगृहवासी प्रातिवेश्यः तदन्तरगृहवास्यनुवेश्यः, यस्मिन्नुत्सवे विंशतिरन्ये ब्राह्मणा भोज्यन्ते तत्र प्रातिवेश्यानुवेश्यौ "प्रातिवेश्यब्राह्मणातिक्रमकारी च" इति विष्णुवचनाद्ब्राह्मणौ भोजनार्हावभोजयन्ब्राह्मण उत्तरत्र हैरण्यादिग्रहणादिह रौप्यमाषं दण्डमर्हति॥३९२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्वभोजयन्।
तदन्नं द्विगुणं दाप्यो हिरण्यं चैव माषकम्॥३९३॥

A Śrotriya who does not entertain a virtuous Śrotriya at auspicious festive rites, shall be made to pay him twice (the value of) the meal and a māṣa of gold (as a fine to the king).

विद्याचारवांस्तथाविधमेव गुणवन्तं विभवकार्येषु विवाहादिषु प्रकृतत्वात्प्रातिवेश्यानुवेश्यावभोजयन् तदन्नं भोजितादिद्विगुणमन्नं दाप्यो हिरण्यमाषकं च राज्ञः॥३९३॥

अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च यः।
श्रोत्रियेषूपकुर्वंश्च न दाप्याः केनचित्करम्॥३९४॥

A blind man, an idiot, (a cripple) who moves with the help of a board, a man full seventy years old, and he who confers benefits on Śrotriyas, shall not be compelled by any (king) to pay a tax.

अन्धो बधिरः पङ्गुः संपूर्णसप्ततिवर्षः। सप्तत्येति "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया। श्रोत्रियेषु धनधान्यशुश्रूषादिनोपकारकाः केनचिदपि क्षीणकोशेनापि राज्ञा त्वनुग्राह्याः करं न दापनीयाः॥३९४॥

श्रोत्रियं व्याधितार्तौ च बालवृद्धावकिञ्चनम्।
महाकुलीनमार्यं च राजा संपूजयेत्सदा॥३९५॥

Let the king always treat kindly a Śrotriya, a sick or distressed man, an infant and an aged or an idigent man, a man of high birth, and an honourable man (Ārya).

विद्याचारवन्तं ब्राह्मणं रोगिणं पुत्रवियोगादिदुःखितं बालवृद्धदरिद्र-महाकुलप्रसूतोदारचरितान् राजा दानमानहितकरणैः संपूजयेत्सदा॥३९५॥

शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत्॥३९६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

A washerman shall wash (the clothes of his employers) gently on a smooth board of Śālmalī-wood; he shall not return the clothes (of one person) for those (of another), nor allow anybody (but the owner) to wear them.

शाल्मल्यादिवृक्षसंबन्धिफलके अपरुषे रजकः शनै शनैर्वासांसि प्रक्षालयेन्न परकीयैर्वस्त्रैरन्यवस्त्राणि नयेन्न चान्यवासांस्यन्यपरिधानार्थं दद्यात्। यद्येवं कुर्यात्तदासौ दण्ड्यः स्यात् ॥३९६॥

तन्तुवायो दशपलं दद्यादेकपलाधिकम्।
अतोऽन्यथा वर्तमानो दाप्यो द्वादशकं दमम् ॥३९७॥

A weaver (who has received) ten palas (of thread); shall return (cloth weighing) one pala more; he who acts differently shall be compelled to pay a fine of twelve (*paṇas*).

तन्तुवायो वस्त्रनिर्माणार्थं दश पलानि सूत्रं गृहीत्वा पिष्टभक्ष्याद्यनुप्रवेशादेकादशपलं वस्त्रं दद्यात्। यदि ततो न्यूनं दद्यात्तदा द्वादश पणान् राज्ञा दाप्यः स्वामिनश्च तुष्टिः कर्तव्यैव ॥३९७॥

शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः।
कुर्युरर्घं यथापण्यं ततो विंश नृपो हरेत् ॥३९८॥

Let the king take one-twentieth of that (amount) which men, well acquainted with the settlement of tolls and duties (and) skilful in (estimating the value of) all kinds of merchandise, may fix as the value for each slaeable commodity.

स्थलजलपथव्यवहारतो राजग्राह्यो भागः शुल्कम्। तस्यावस्थानेषु ये कुशलास्तथा सर्वपण्यानां सारासारज्ञास्ते पण्येषु यमर्धं मूल्यमनुरूपं कुर्युस्ततो लाभधनाद्विंशतिभागं राजा गृह्णीयात् ॥३९८॥

राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च।
तानि निर्हरतो लोभात्सर्वहारं हरेन्नृपः ॥३९९॥

Let the king confiscate the whole property of (a trader) who out of greed exports goods of which the king has a

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

monopoly or (the export of which is) forbidden.

राज्ञः संबन्धितया यानि विक्रेयद्रव्याणि प्रख्यातानि राजोपयोगीनि हस्त्यश्वादीनि च तद्देशोद्भवानि च प्रतिषिद्धानि च। यथा दुर्भिक्षे धान्यं देशान्तरं न नेयमिति तानि लोभाद्देशान्तरं नयतो वणिजः सर्वहरणं राजा कुर्यात्॥३९९॥

शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी।
मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम्॥४००॥

He who avoids a custom-house (or a toll), he who buys or sells at an improper time, or he who makes a false statement in enumerating (his goods), shall be fined eight times (the amount of duty) which he tried to evade.

शुल्कमोषणायोत्पथेन गच्छति। अकाले रात्र्यादौ वा क्रयविक्रयं करोति। शुल्कखण्डनार्थं विक्रेयद्रव्यस्याल्पां संख्यां वक्ति। राजदेयमपलपितमष्टगुणं दण्डरूपतया दाप्यः॥४००॥

आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ।
विचार्य सर्वपण्यानां कारयेत्क्रयविक्रयौ॥४०१॥

Let (the king) fix (the rates for) the purchase and sale of all marketable goods, having (duly) considered whence they come, whither they go, how long they have been kept, the (probable) profit and the (probable) outlay.

कियतो दूरादागतमिति देशान्तरीयद्रव्यस्यागमनं, कियद्दूरं नीयत इति स्वदेशोद्भवस्य निर्गमं, कियत्कालस्थितं कियन्मूल्यं लभत इति स्थितं, तथा कियती वृद्धिरित्यत्र कर्मकाराणां भक्ताच्छादनादिना कियानपक्षय इत्येवं विचार्य, तथा वणिजां क्रेतॄणां यथा पीडा न भवति तथा सर्वपण्यानां क्रयविक्रयौ कारयेत्॥४०१॥

पञ्चरात्रे पञ्चरात्रे पक्षे पक्षेऽथवा गते।
कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः॥४०२॥

Once in five nights, or at the close of each fortnight, let the king publicly settle the prices for the (merchants).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आगमनिर्गमोपाययोगादेः पञ्चरात्रे पण्यानामनियतत्वादस्थिरार्घादीनां पञ्चरात्रे गते स्थिरप्रायार्घाणां पक्षे पक्षे गते वणिजामर्घविदां प्रत्यक्षं नृपतिराप्तपुरुषैर्व्यवस्थां कुर्यात् ॥४०२॥

तुलामानं प्रतीमानं सर्वं च स्यात्सुलक्षितम्।
षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत् ॥४०३॥

All weights and measures must be duly marked, and once a six months let him re-examine them.

तुलामानं सुवर्णादीनां परिच्छेदार्थं यत्क्रियते प्रतिमानं प्रस्थद्रोणादि तत्सर्वं स्वनिरूपितं यथा स्यात्। षट्सु षट्सु मासेषु गतेषु पुनस्तत्सर्वं सभ्यपुरुषैर्नृपतिः परीक्षयेत् ॥४०३॥

पणं यानं तरे दाप्यं पौरुषोऽर्धपणं तरे।
पादं पशुश्च योषिच्च पादार्धं रिक्तकः पुमान् ॥४०४॥

At a ferry an (empty) cart shall be made to pay one *paṇa*, a man's (load) half a *paṇa*, an animal and a woman one quarter of a (*paṇa*), an unloated man one-half of a quarter.

"भाण्डपूर्णानि यानानि" (अ. ८ श्लो. ४०५) इति वक्ष्यति। तेन रिक्तशकटादि यानं तरविषये पणं दाप्यम्। एवं पुरुषभारोऽर्धपणं तरपण्यं दाप्यः। पशुश्च गवादिः पणचतुर्थभागं, भाररहितो मनुष्यः पणाष्टभागं दापनीयः ॥४०४॥

भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः।
रिक्तभाण्डानि यत्किञ्चित्पुमांसश्चापरिच्छदाः ॥४०५॥

Carts (laden) with vessels full (of merchandies) shall be made to pay toll at a ferry according to the value (of the goods), empty vessels and men without luggage some trifle.

पण्यद्रव्यपूर्णानि शकटादीनि द्रव्यगतोत्कर्षापेक्षया तरं दाप्यानि। द्रव्यरहितानि च गोणीकम्बलादीनि यत्किंचित्स्वल्पं तार्यं दाप्यम्। अपरिच्छदा दरिद्रा उक्तपदार्थदानापेक्षया यत्किंचिद्दापनीयाः ॥४०५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्।
नदीतीरेषु तद्विद्यात्समुद्रे नास्ति लक्षणम्॥४०६॥

For a long passage the boat-hire must be proportioned to the places and times; know that this rule refers) to (passages along) the banks of rivers; at sea there is no settled (frieght).

पूर्वं पारावारे तरणार्थमुक्तम्। इदानीं नदीमार्गे दूराध्वनि गन्तव्ये प्रबलवेगस्थिरोदकनद्यादिदेशग्रीष्मवर्षादिकालापेक्षया तरमूल्यं कल्पनीयम्। एतच्च नदीतीरे बोद्धव्यम्। समुद्रे तु वाताधीनपोतगमनत्वात्स्वायत्तत्वाभावे तरपण्यविशेषज्ञापकं नदीवद्द्वियोजनादिकं नास्ति। ततस्तत्रोचितमेव तरपण्यं ग्राह्यम्॥४०६॥

गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः।
ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे॥४०७॥

But a woman who has been pregnant two months or more, an ascetic, a hermit in the forest, and Brāhmaṇas who are students of the Veda, shall not be made to pay toll at a ferry.

संजातगर्भा स्त्री मासद्वयादूर्ध्वं, तथा प्रव्रजितो भिक्षुर्मुनिर्वानप्रस्थो, ब्राह्मणाश्च लिन्निनो ब्रह्मचारिणः तरमूल्यं तरे न दाप्याः॥४०७॥

यन्नावि किञ्चिछाशानां विशीर्येतापराधतः।
तद्दाशैरेव दातव्यं समागम्य स्वतोंऽशतः॥४०८॥

Whatever may be damaged in a boat by the fault of the boatmen, that shall be made good by the boatmen collectively, (each paying) his share.

नौकारूढानां यत्किंचिन्नाविकापराधेन नष्टं द्रव्यं तन्नाविकैरेव मिलित्वा यथाभागं दातव्यम्॥४०८॥

एष नौयायिनामुक्तो व्यवहारस्य निर्णयः।
दाशापराधतस्तोये दैविके नास्ति निग्रहः॥४०९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

This decision in suits (brought) by passengers (holds good only) in case the boatmen are culpably negligent on the water; in the case of (an accident) caused by (the will of) the gods, nofine can be (inflicted on them).

नाविकापराधाद्यदुदके नष्टं तन्नाविकैरेव दातव्यम्। पूर्वोक्तमनूदितं "दैविके नास्ति निग्रहः" इति विधातुं नौयायिनामेष व्यवहारस्य निर्णय उक्तः। दैवोपजातवातादिना नौभन्नेन धनादिनाशे नाविकानां न दण्डः॥४०९॥

वाणिज्यं कारयेद्वैश्यं कुसीदं कृषिमेव च।
पशूनां रक्षणं चैव दास्यं शूद्रं द्विजन्मनाम्॥४१०॥

(The king) should order a Vaiśya to trade, to lend money, to cultivate the land, or to tend cattle, and a Śūdra to serve the twice-born castes.

वाणिज्यं कुसीदकृषिपशुरक्षणानि वैश्यं कारयेत्। शूद्रं च राजा द्विजातीनां दास्यं कारयेत्। अकुर्वाणौ वैश्यशूद्रौ राज्ञो दण्ड्यावित्येवमर्थोऽयमिहोपदेशः॥४१०॥

क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ।
बिभृयादानृशंस्येन स्वानि कर्माणि कारयन्॥४११॥

(Some wealthy) Brāhmaṇa shall compassionately support both a Kṣatriya and a Vaiśya, if they are distressed for a livelihood, employing them on work (which is suitable for) their (castes).

ब्राह्मणः क्षत्रियवैश्यौ भृत्यभावेन पीडितौ करुणया स्वानि कर्माणि रक्षणकृष्यादीनि कारयन् ग्रासाच्छादनादीना पोषयेत्। एवं बलवान्ब्राह्मणस्तावुपगतावबिभ्रन् राज्ञा दण्डनीय इति प्रकरणसामर्थ्यादगम्यते॥४११॥

दास्यं तु कारयँल्लोभाद् ब्राह्मणः संस्कृतान्द्विजान्।
अनिच्छतः प्राभवत्याद्राज्ञा दण्ड्यः शतानि षट्॥४१२॥

But a Brāhmaṇa who, because he is powerful, out of greed makes initiated (men of the) twice-born (castes) against

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

their will do the work of slaves, shall be fined by the king six hundred (*paṇas*).

प्रभवतो भावः प्राभवत्यम्। ब्राह्मणः कृतोपनयनान्द्विजातीननिच्छतः प्रभुत्वेन लोभाद्दास्यकर्म पादधावनादि कारयन् षट् शतानि दण्ड्यः॥४१२॥

शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा।
दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयंभुवा॥४१३॥

But a Śūdra, whether bought or unbought, he may compel to do servile work; for he was created by the Self-existent (Svayambhū) to be the slave of a Brāhmaṇa.

शूद्रं पुनर्भक्तादिभृतमभृतं वा दास्यं कारयेत्। यस्मादसौ ब्राह्मणस्य दास्यायैव प्रजापतिना सृष्टः॥४१३॥

न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते।
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति॥४१४॥

A Śūdra, though emancipated by his master, is not released from servitude; since that is innate in him, who can set him free from it?

यस्मादसौ ध्वजाहृतत्वादिना दासत्वं गतः स तेन त्यक्तः स्वदास्याभावेऽपि शूद्रो ब्राह्मणस्य दास्यान्न विमुच्यते। तस्माद्दास्यं शूद्रस्य सहजम्। कः शूद्रत्वजातिमिव दास्यमपनयति। अदृष्टार्थमप्यवश्यं शूद्रेण ब्राह्मणादिद्विजशुश्रूषा कर्तव्येत्येवपरमेतत्। अन्यथा वक्ष्यमाणदास्यकरणपरिगणनमनर्थकं स्यात्॥४१४॥

ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ।
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः॥४१५॥

There are slaves of seven kinds, (*viz.*) he who is made a captive under a standard, he who serves for his daily food, he who is born in the house, he who is bought and he who is given, he who is inherited from ancestors, and he who is enslaved by way of punishment.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

संग्रामस्वामिसकाशाज्जितो, भक्तलोभाद्युपगतदास्यो भक्तदासः, तथा दासीपुत्रः, मूल्येन क्रीतः, अन्येन दत्तः, पित्रादिक्रमागतः, दण्डादिधनशुद्ध्यर्थं स्वीकृतदास्यभावः, इत्येतानि सप्त ध्वजाहृतत्वादीनि दासत्वकारणानि ॥४१५॥

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥४१६॥

A wife, a son, and a slave, these three are declared to have no property; the wealth which they earn is (acquired) for him to whom they belong.

पुत्रभार्यादासास्त्रयोऽमी निर्धना एव मन्वादिभिः स्मृताः। यस्माद्यद्धनं तेऽर्जयन्ति यस्य ते भार्यादयस्तस्य तद्धनं भवति। एतच्च भार्यादीनां पारतन्त्र्यप्रदर्शनार्थपरम्। अध्यग्न्यादेः षड्विधस्य स्त्रीधनस्य वक्ष्यमाणत्वात् धनसाध्यादृष्टार्थकर्मोपदेशार्थं च भार्यादीनां पत्न्यधिकरणे पत्न्यर्थेऽपि यागाधिकारस्योक्तत्वात्। स्त्रीपुंसयोर्मध्ये एकधने चानुमतिद्वारेण स्त्रिया अपि कर्तृत्वात्॥४१६॥

विस्रब्धं ब्राह्मणः शूद्राद् द्रव्योपादानमाचरेत्।
न हि तस्यास्ति किञ्चित्स्वं भर्तृहार्यधनो हि सः॥४१७॥

A Brāhmaṇa may confidently seize the goods of (his) Śūdra (slave); for, as that (slave) can have no property, his master may take his possessions.

निर्विचिकित्समेव प्रकृताद्दासशूद्राद्धनग्रहणं कुर्याद्ब्राह्मणः। यतस्तस्य किंचिदपि स्वं नास्ति। यस्माद्धर्तृग्राह्यधनोऽसौ। एवं चापदि बलादपि दासाद्ब्राह्मणो धनं गृह्णन् राज्ञा दण्डनीय इत्येवमर्थमेतदुच्यते॥४१७॥

वैश्यशूद्रौ प्रत्यनेन स्वानि कर्माणि कारयेत्।
तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदं जगत्॥४१८॥

(The king) should carefully compel Vaiśyas and Śūdras to perform the work (prescribed) for them; for it these two (castes) swerved from their duties, they would throw this (whole) world into confusion.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वैश्यं कृष्यादीनि शूद्रं च द्विजातिशुश्रूषादीनि कर्माणि यत्नतो राजा कारयेत्। यस्मात्तौ स्वकर्मभ्ययुतावशास्त्रीयोपार्जितधनग्रहणमदादिना जगदाकुलीकुर्याताम् ॥४१८॥

अहन्यहन्यवेक्षेत कर्मान्तान्वाहनानि च।
आयव्ययौ च नियतावाकरान्कोशमेव च॥४१९॥

Let him daily look after the completion of his undertakings, his beasts of burden, and carriages, (the collection of) his revenues and the disbursements, his mines and his treasury.

प्रत्यहं तदधिकृतद्वारेण प्रारब्धदृष्टार्थकर्मणां निष्पत्तिं नृपतिर्निरूपयेत्। तथा हस्तश्वादीनि किमद्य प्रविष्टं किं निःसृतमिति, सुवर्णरत्नोत्पत्तिस्थानानि, भाण्डागारं चावेक्षेत। व्यवहारदर्शनासक्तोऽपि राजा धर्मान्न परित्यजेदिति दर्शयितुमुक्तस्यापि पुनर्वचनम्॥४१९॥

एवं सर्वानिमान्राजा व्यवहारान्समापयन्।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमा गतिम्॥४२०॥

A king who thus brings to a conclusion all the legal business enumerated above, and removes all sin, reaches the highest state (of bliss).

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां राजधर्मे व्यवहारनिर्णय सामान्यव्यवहारो नामाष्टमोध्यायः॥८॥

एवमुक्तप्रकारेणैतान्सर्वानृणादानादीन्व्यवहारांस्तत्त्वतो निर्णयेनान्तं नयन्पापं सर्वमपहाय स्वर्गादिप्राप्तिरूपामुत्कृष्टां गतिं लभते॥४२०॥

इति श्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यामष्टमोऽध्यायः॥८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नवमोऽध्यायः

पुरुषस्य स्त्रियाश्चैव धर्मे वर्त्मनि तिष्ठतोः।
संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान्॥१॥

I will now propound the eternal laws for a husband and his wife who keep to the path of duty, whether they be united or separated.

पुरुषस्य पत्न्याश्च धर्माय हि ते अन्योन्याव्यभिचारिलक्षणे वर्त्मनि वर्तमानायेः संयुक्तवियुक्तयोश्च धर्मान्पारम्पर्यागतत्वेन नित्यान्वक्ष्यामि। दम्पत्योः परस्परधर्मव्यतिक्रमे सत्यन्यतरज्ञाने दण्डेनापि स्वधर्मव्यवस्थानं राज्ञां कर्तव्यमिति व्यवहार मध्येऽस्योपदेशः॥१॥

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम्।
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे॥२॥

Day and night women must be kept in dependence by the males (of) their (families), and, if they attach themselves to sensual enjoyments, they must be kept under one's control.

स्वीयैर्भर्त्रादिभिः सदा स्त्रियः स्वाधीनाः कार्याः अनिषिद्धेष्वपि रूपरसादिविषयेषु प्रसक्ता अपि आत्मवशाः कार्याः॥२॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने।
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्रयमर्हति॥३॥

Her father protect (her) in childhood, her husband protects (her) in youth, and her sons protect (her) in old age; a woman is never fit for independence.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पिता विवाहात्पूर्वं स्त्रियं रक्षेत्पश्चाद्भर्ता तदभावे पुत्राः। तस्मान्न स्त्री कस्यांचिदप्यवस्थायां स्वातन्त्र्यं भजेत्। भर्ता रक्षति यौवने इत्यादि प्रायिकम्। अभर्तृपुत्रायाः संनिहितायाः पित्रादिभिरपि रक्षणात् ॥३॥

कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः।
मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥४॥

Reprehensible is the father who gives not (his daughter in marriage) at the proper time; reprehensible is the husband who approaches not (his wife in due season), and reprehensible is the son who does not protect his mother after her husband has died.

प्रदानकाले पिता तामददन् गर्ह्यो भवति। "प्रदानं प्रागृतोः" इति गौतमवचनादृतोः प्राक्प्रदानकालः। पतिश्च ऋतुकाले पत्नीमगच्छन्गर्हणीयो भवति। पत्यौ मृते मातरमरक्षन्पुत्रो निन्द्यः स्यात् ॥४॥

सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥५॥
[भार्यायां रक्ष्यमाणायां प्रजा भवति रक्षिता।
प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः ॥१॥]

Women must particularly be guarded against evil inclinations, however, trifling (they may appear); for, if they are not guarded, they will bring sorrow on two families.

स्वल्पेभ्योऽपि दुःसन्देभ्यो दौःशील्यसंपादकेभ्यो विशेषेण स्त्रियो रक्षणीयाः किंपुनर्महद्भ्यः। यस्मादुपेक्षितरक्षणाद्द्वयोः पितृभर्तृगणयोः संतापं दापयेतुः ॥५॥

इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम्।
यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि ॥६॥

Considering that the highest duty of all castes, even weak husbands (must) strive to guard their wives.

सर्वेषां ब्राह्मणादिवर्णानां भार्यारक्षणलक्षणं धर्मं वक्ष्यमाणश्लोकरीत्या सर्वधर्मेभ्य उत्कृष्टं जानन्तोऽन्धपङ्ग्वादयोऽपि भार्यां रक्षितुं यतेरन् ॥६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्।
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट्॥१३॥

Drinking (spirituous liquor), associating with wicked people, separation from the husband, rambling abroad, sleeping (at unseasonable hours), and dwelling in other men's houses, are the six causes of the ruin of women.

मद्यपानं, असत्पुरुषसंसर्गः, भर्त्रा सह विरहः, इतस्ततश्च भ्रमणं, अकालस्वापः, परगृहनिवासः, इत्येतानि षट् स्त्रिया व्यभिचाराख्यदोषजनकानि। तस्मादेतेभ्य एता रक्षणीयाः॥१३॥

नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते॥१४॥

Women do not care for beauty, nor is their attention fixed on age; (thinking), '(It is enough that) he is a man,' they give themselves to the handsome and to the ugly.

नैताः कमनीयरूपं विचारयन्ति। न चासां यौवनादिके वयस्यादरो भवति। किंतु सुरूपं कुरूपं वा पुमानित्येतावतैव तमुपभुञ्जते॥१४॥

पौंश्चल्याच्चलचित्ताच्च नैस्नेह्याच्च स्वभावतः।
रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते॥१५॥

Through their passion for men, through their mutable temper, through their natural heartlessness, they become disloyal towards their husbands, however carefully they may be guarded in this (world).

पुंसो दर्शने संभोगाद्यभिलाषशीलत्वात्, चित्तस्थैर्याभावात्, स्वभावतः स्नेहरहितत्वाच्च एता यत्नेनपि लोके रक्षिताः सत्यो व्यभिचाराश्रयणेन भर्तृषु विक्रियां गच्छन्ति॥१५॥

एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम्।
परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति॥१६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Knowing their disposition, which the lord of creatures laid in them at the creation, to be such, (every) man should most strenuously exert himself to guard them.

एवं श्लोकद्वयोक्तमासां स्वभावं हिरण्यगर्भसृष्टिकालजनितं ज्ञात्वा रक्षणार्थं प्रकृष्टं यत्नं पुरुषः कुर्यात् ॥१६॥

शय्यासनमलङ्कारं कामं क्रोधमनार्जवम्।
द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् ॥१७॥

(When creating them) Manu allotted to women (a love of their) bed, (of their) seat and (of) ornament, impure desires, wrath, dishonesty, malice, and bad conduct.

शयनोपवेशनालंकरणशीलत्वं कामक्रोधानार्जवपरहिंसाकुत्सिताचारत्वानि सर्गादौ मनुः स्त्रीभ्यः कल्पितवान्। तस्माद्यत्नतो रक्षणीयाः ॥१७॥

नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितिः।
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः ॥१८॥

For women no (sacramental) rite (is performed) with sacred texrts, thus the law is settled; women (who are) destitute of strength and destitute of (the knowledge of) Vedic texts, (are as impure as) falsehood (itself), that is a fixed rule.

जातकर्मादिक्रिया स्त्रीणां मन्त्रैर्नास्तीत्येषा शास्त्रमर्यादा व्यवस्थिता। ततश्च मन्त्रवत्संस्कारगणाभावान्न निष्पापान्तः करणाः इन्द्रियं प्रमाणं, धर्मप्रमाणश्रुतिस्मृतिरहितत्वान्न धर्मज्ञाः। अमन्त्राः पापापनोदनमन्त्रजपरहित-त्वाज्जातेऽपि पापे तन्निर्णेजनाक्षमाः। अनृतवदशुभाः स्त्रिय इति शास्त्रमर्यादा। तस्माद्यत्नतो रक्षणीया इत्यत्र तात्पर्यम् ॥१८॥

तथा च श्रुतयो बह्वयो निगीता निगमेष्वपि।
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥१९॥

And to this effect many sacred texts are sung also in the Vedas, in order to (make) fully known the true dis-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

position (of women); hear (now those texts which refer to) the expiation of their (sins).

व्यभिचारशीलत्वं स्त्रीणां स्वभाव इत्युक्तं तत्र श्रुतिं प्रमाणतयोपन्यस्यति। तथा बह्वृष्टः श्रुतयो बहूनि श्रुतिवाक्यानि "न चैतद्विद्मो ब्राह्मणाः स्मोऽब्राह्मणा वा" इत्येवमादीनि निगमेषु स्वालक्षण्यं व्यभिचारशीलत्वं तत्परिज्ञानार्थं पठितानि। तासां श्रुतीनां मध्ये या निष्कृतिरूपा व्यभिचारप्रायश्चित्तभूतास्ताः श्रुतीः शृणुत। एकस्याः श्रुतेर्वक्ष्यमाणत्वाच्छ्रुतिं शृणुतेत्यर्थः। "सुपां सुपो भवन्ति" इति द्वितीयैकवचने बहुवचनम्॥१९॥

यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता।
तन्मे रेतः पिता वृक्तामित्यस्यैतन्निदर्शनम्॥२०॥

'If my mother, going astray and unfaithful, conceived illicit desires, may my father keep that seed from me,' that is the scriptural texts.

कश्चित्पुत्रो मातुर्मानसव्यभिचारमवगम्य ब्रूते। मनोवाक्कायकर्मभिः पतिव्यतिरिक्तं पुरुषं या न कामयते सा पतिव्रता ततोऽन्याऽपतिव्रता। मम माता अपतिव्रताऽसती परगृहान्गच्छन्ती यत्प्रलुलुभे परपुरुषं प्रति संजातलोभाभूत्तत्-पुरुषसंकल्पदुष्टं मातृरजोरूपं रेतो मम पिता शोधयत्वित्यस्य स्त्रिया व्यभिचारशीलत्वस्यैतदितिकरणान्तं मन्त्रपादत्रयं ज्ञापकम्। अयं च मन्त्रश्चातुर्मास्यादिषु विनियुक्तः॥२०॥

संप्रति मानसव्यभिचारप्रायश्चित्तरूपतामस्य मन्त्रस्याह-

ध्यायत्यनिष्टं यत्किञ्चित्पाणिग्राहस्य चेतसा।
तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते॥२१॥

If a woman thinks in her heart of anything that would pain her husband, the (above-mentioned text) is declared (to be a means for) completely removing such infidelity.

भर्तुरप्रियं यत्किंचित्पुरुषान्तरगमनं स्त्री मनसा चिन्तयति तस्य मानसस्य व्यभिचारस्यैष प्रकृतो मन्त्रः सम्यक् शोधनो मन्वादिभिरुच्यते। मातेति श्रवणात्पुत्रस्यैवायं प्रायश्चित्तरूपो मन्त्रो न मातुः॥२१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यादृग्गुणेन भर्त्रा स्त्रीः संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा॥२२॥

Whatever be the qualities of the man with whom a woman is united according to the law, such qualities even she assumes, like a river (united) with the ocean.

यथारूपेण भर्त्रा साधुनासाधुना वा स्त्री विवाहविधिना संयुज्यते सा भर्तृसदृशगुणा भवति। यथा समुद्रेण संयुज्यमाना नदी स्वादूदकापि क्षारजला जायते। भर्तुरात्मसंमानाख्यस्त्रीरक्षणोपायान्तरोपदेशार्थमिदम्॥२२॥

अत्रोत्कर्षदृष्टान्तमाह–

अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा।
शारङ्गी मन्दपालेन जगाम्याभ्यर्हणीयताम्॥२३॥

Akṣamālā, a woman of the lowest birth, being united to Vasiṣṭha and Sāraṅgī, (being united) to Mandapāla, became worthy of honour.

अक्षमालाख्या निकृष्टयोनिजा वसिष्ठेन परिणीता, तथा चटका मन्दपालाख्येन ऋषिणा संगता पूज्यतां गता॥२३॥

एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः।
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः॥२४॥

These and other females of low birth have attained eminence in this world by the respective good qualities of their husbands.

यद्यपि द्वे प्रकृते तथापि प्रदर्शनार्थत्वमनयोर्मत्वा एता इति बहुवचनं कृतम्। एताश्चान्याश्च सत्यवत्यादयो निकृष्टप्रसूतयः स्वभर्तृगुणैः प्रकृष्टैरस्मिँल्लोके उत्कृष्टतां प्राप्ताः॥२४॥

एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा।
प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधत॥२५॥

Thus has been declared the ever pure popular usage

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(which regulates the relations) between husband and wife; hear (next) the laws concerning children which are the cause of happiness in this world and after death.

एष लोकाचारो जायापतिविषयः सदा शुभ उक्तः। इदानीमिहलोके परलोके चोत्तरकालशुभसुखहेतून् "किं क्षेत्रिणोऽपत्यमुत बीजिनः" इत्यादीन्प्रजाधर्मान् शृणुत ॥२५॥

प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥२६॥

Between wives (*śriyaḥ*) who (are destined) to bear children, who secure many blessings, who are worthy of worship and irradiate (their) dwellings, and between the goodesses of fortune (*śriyaḥ*, who reside) in the houses (of men), there is no difference whatsoever.

यद्यप्यासां रक्षणार्थं दोषा उक्तास्तथापि शक्यप्रतीकारत्वादिह दोषाभावः। एताः स्त्रियोमहोपकारा गर्भोत्पादनार्थं बहुकल्याणभाजनभूता वस्त्रालंकारादिदानेन संमानार्हाः स्वगृहे शोभाकारिण्यः स्त्रियः श्रियश्च गेहेषु तुल्यरूपाः। नानयोर्विशेषो विद्यते। यथा निःश्रीकं गृहं न राजत्येवं निःस्त्रीकमिति ॥२६॥

अपि च-

उत्पादनमपत्यस्य जातस्य परिपालनम्।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीर्निबन्धनम् ॥२७॥

The production of children, the nurture of those born, and the daily life of men, (of these matters) women is visibly the cause.

अपत्यस्य जननं जातस्य परिपालनं प्रतिदिनं चातिथिमित्रभोजनादेर्लोकव्यवहारस्य प्रत्यक्षं भार्यैव निदानम् ॥२७॥

अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा।
दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह ॥२८॥

Offspring, (the due performance of) religious rites, faith-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ful service, highest conjugal happiness and heavenly bliss for the ancestors and oneself, depend on one's wife alone.

अपत्योत्पादनमुक्तमप्येतदभ्यर्हितत्वज्ञापनार्थं पुनरभिधानम्। धर्मकार्याण्यग्निहोत्रादीनि, परिचर्या, उत्कृष्टा रतिः, पितृणामात्मनश्चापत्यजननादिना स्वर्ग इत्येतत्सर्वं भार्याधीनम्॥२८॥

पतिं या नाभिचरति मनोवाग्देहसंयता।
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते॥२९॥

She who, controlling her thoughts, speech, and acts, violates not her duty towards her lord, dwells with him (after death) in heaven, and in this world is called by the virtuous a faithful (wife, *sādhvī*).

या स्त्री मनोवाग्देहसंयता सतीतिविशेषणोपादानसामर्थ्यान्मनोवाग्देहैरेव न व्यभिचरति सा भर्त्रा सहार्जितान्स्वर्गादिलोकान्प्राप्नोति। इह लोके च विशिष्टैः साध्वीत्युच्यते॥२९॥

व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम्।
सृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते॥३०॥

But for disloyalty to her husband a wife is censured among men, and (in her next life) she is born in the womb of a jackal and tormented by diseases, the punishment of her sin.

पुरुषान्तरसंपर्कात्स्त्री लोके निन्द्यतां जन्मान्तरे च सृगालजातिं प्राप्नोति। पापरोगादिभिश्च पीड्यते। पञ्चमाध्याये स्त्रीधर्मे उक्तमप्येतच्छ्लोकद्वयं सदपत्यसंपत्त्यर्थत्वेन महाप्रयोजनतया पुनः पठितम्॥३०॥

पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः।
विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत॥३१॥

Listen (now) to the following holy discussion, salutary to all men, which the virtuous (of the present day) and the ancient great sages have held concering male offspring.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुत्रमधिकृत्य शिष्टैर्मन्वादिभिः पूर्वमुत्पन्नैश्च महर्षिभिरभिहितमिमं वक्ष्यमाणं सर्वजनहितं विचारं शृणुत ॥३१॥

भर्तुः पुत्रं विजानन्ति श्रुतिद्वैधं तु भर्तरि।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ॥३२॥

They (all) say that the male issue (of a woman) belongs to the lord, but with respect to the (meaning of the term) lord the revealed texts differ; some call the begetter (of the child the lord), others declare (that it is) the owner of the soil.

भर्तुः पुत्रो भवतीति मुनयो मन्यन्ते। भर्तरि द्विःप्रकारा श्रुतिर्वर्तते। केचिदुत्पादकमवोढारमपि भर्तारं तेन पुत्रेण पुत्रिणमाहुः। अन्ये तु वोढारं भर्तारमनुत्पादकमप्यन्यजनितेन पुत्रेण पुत्रिणमाहुः ॥३२॥

क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान्।
क्षेत्रबीजसमायोगात्संभवः सर्वदेहिनाम् ॥३३॥

By the sacred tradition the woman is declared to be the soil, the man is declared to be the seed; the production of all corporeal beings (takes place) through the union of the soil with the seed.

व्रीह्याद्युत्पत्तिस्थानं क्षेत्रं तत्तुल्या स्त्री मुनिभिः स्मृता। पुरुषश्च व्रीह्यादिबीजतुल्यः स्मृतः। यद्यपि रेतो बीजं तथापि तदधिकरणत्वात्पुरुषो बीजमिति व्यपदिश्यते। क्षेत्रबीजसमायोगात्सर्वप्राणिनामुत्पत्तिः। एवं चोभयोः कारणत्वस्याविशिष्टत्वाद्युक्ता विप्रतिपत्तिः, किं यत्संबन्धि क्षेत्रं तस्यापत्यमुत यदीयं बीजं तस्येति ॥३३॥

विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित्।
उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते ॥३४॥

In some cases the seed is more distinguished, and in some the womb of the female; but when both are equal, the offspring is most highly esteemed.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

क्वचिद्बीजं प्रधानं "जाता ये त्वनियुक्तायाम्" इति न्यायेनोत्पन्नो बीजिनो बुध इव सोमस्य। तथा व्यासर्ष्यशृन्नादयो बीजिनामेव सुताः। क्वचित्क्षेत्रस्य प्राधान्यं यथायं तल्पजः प्रमीतस्येति वक्ष्यति। अतएव विचित्रवीर्यक्षेत्रे क्षत्रियायां ब्राह्मणोत्पादिता अपि धृतराष्ट्रादयः क्षत्रियाः क्षेत्रिण एव पुत्रा बभूवुः। यत्र पुनर्बीजयोन्योः साम्यं तत्र वोढैव जनयिता तदपत्यं प्रशस्तं भवति तत्र बीजप्राधान्यापेक्षं तावदाहुः॥३४॥

तत्र बीजप्राधान्यापेक्षं तावदाहुः--

बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते।
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता॥३५॥

On comparing the seed and the receptacle (of the seed), the seed is declared to the more important; for the offspring of all created beings is marked by the characteristics of the seed.

बीजक्षेत्रयोर्बीजं प्रधानमभिधीयते। यस्मात्सर्वेषां भूतारब्धानामुत्पत्तिर्बाजगतवर्णस्वरूपादिचिह्नैरुपलक्षिता दृश्यते॥३५॥

यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते।
तादृग्रोहति तत्तस्मिन्बीजं स्वैर्व्यञ्जितं गुणैः॥३६॥

Whatever (kind of) seed is sown in a field, prepared in due season, (a plant) of that same kind, marked with the peculiar qualities of the seed, springs up in it.

यज्जातीयं बीजं व्रीह्यादि ग्रीष्मादिकाले वर्षादिना संस्कृते क्षेत्रे उप्यते तज्जातीयमेव तद्बीजमात्मीयैर्वर्णादिभिरुपलक्षितं तस्मिन्क्षेत्रे जायते॥३६॥

एवमन्वयप्रकारेण बीजप्राधान्यं प्रदर्श्य व्यतिरेकमुखेन दर्शयितुमाह-

इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते।
न च योनिगुणान्कांश्चिद्बीजं पुष्यति पुष्टिषु॥३७॥

This earth, indeed, is called the primeval womb of created beings; but the seed develops not in its development any properties of the womb.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हिरवधारणे। इयमेव भूमिर्भूतारब्धानां तरुगुल्मलतादीनां नित्या योनिः कारणं क्षेत्रात्मकं सर्वलोकैरुच्यते। नच भूम्याख्ययोनिधर्मान्कांश्चिदपि मृत्स्वरूपत्वादीन्बीजं स्वविकारेष्वङ्कुरकाण्डाद्यवस्थासु भजते। भजत्यर्थत्वात्पुष्यतेः सकर्मता। तस्माद्योनिर्गुणानुवर्तनाभावान्न क्षेत्रप्राधान्यम्॥३७॥

अपि च-

भूमावप्येककेदारे कालोप्तानि कृषीवलैः।
नानारूपाणि जायन्ते बीजानीह स्वभावतः॥३८॥

In this world seeds of different kinds, sown at the proper time in the land, even in one field, come forth (each) according to its kind.

भूमावेकस्मिन्नपि केदारे कर्षकैर्वपनकालोप्तानि व्रीहिमुद्गादीनि नानारूपाण्येव वीजस्वभावाज्जायन्ते नतु भूमेरेकत्वादेकरूपाणि भवन्ति॥३८॥

तथा हि-

व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः।
यथाबीजं प्ररोहन्ति लशुनानीक्षवस्तथा॥३९॥

The rice (called) *vrīhi* and (that called) *śāli, mudga-beans*, sesamum, māṣa-beans, barley, leeks, and sugar-cane, (all) spring up according to their seed.

व्रीहयः षष्टिकाः, शालयः कलमाद्याः, तथा मुद्गादयो बीजस्वभावानतिक्रमेण नाना रूपा जायन्ते॥३९॥

एवं च सति-

अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते।
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति॥४०॥

That one (plant) should be sown and another be produced cannot happen; whatever seed is sown, (a plant of) that kind even comes forth.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्रीहिरुप्तो मुद्गादिर्जायत इत्येतन्न संभवति। यस्माद्यदेव बीजमुप्यते तत्तदेव जायते। एवं बीजगुणानुवर्तनात्क्षेत्रधर्माननुवृत्तेश्च व्रीह्यादौ मनुष्येष्वपि बीज-प्राधान्यम्॥४०॥

संप्रति क्षेत्रप्राधान्यमाह-

तत्प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना।
आयुष्कामेन वप्तव्यं न जातु परयोषिति॥४१॥

Never therefore must a prudent well-trained man, who knows the Veda and its Aṅgas and desires long life, cohabit with another's wife.

तद्बीजं सहजप्रज्ञावता पित्रादिभिरनुशिष्टेन ज्ञानं वेदः, एवं विज्ञानमपि तदन्नादिशास्त्राणि तद्वेदिनायुरिच्छता न कदाचित्परजायायां वपनीयम्॥४१॥

अत्र गाथा वायुगीताः कीर्तयन्ति पुराविदः।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे॥४२॥

With respect to this (matter), those acquainted with the past recite some stanzas, sung by Vāyu (the Wind, to show) that seed must not be sown by (any) man on that which belongs to another.

अतीतकालज्ञा अस्मिन्नर्थे वायुप्रोक्ता गाथाश्छन्दोविशेषयुक्तानि वाक्यानि कथयन्ति। यथा परपुरुषेण परपत्न्यां बीजं न वप्तव्यमिति॥४२॥

नश्यतीषुर्यथा विद्धः खे विद्धमनुविद्ध्यतः।
तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे॥४३॥

As the arrow, shot by (a hunter) who afterwards hits a wounded (deer) in the wound (made by another), is shot in vain, even so the seed, sown on what belongs to another, is quickly lost (to the sower).

यथान्येन विद्धं मृगं कृष्णसारं तस्मिन्नेव छिद्रे पश्चादन्यस्य विद्ध्यत आविद्धः क्षिप्तशरोः निष्फलो भवति पूर्वहन्त्रैव हतत्वात्तस्यैव तन्मृगलाभात्, एवं परपत्न्यामुप्तं बीजं शीघ्रमेव निष्फलं भवति। गर्भग्रहणानन्तरं क्षेत्रिणः सद्यः फललाभात्॥४३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पृथोरपीमां पृथिवीं भार्यां पूर्वविदो विदुः।
स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगम्॥४४॥

(Sages) who know the past call this earth (*pṛthivī*) even the wife of Pṛthu; they declare a field to belong to him who cleared away the timber, and a deer to him who (first) wounded it.

इमामपि पृथ्वीं पृथुना पूर्वं परिगृहीतत्वादनेकराजसंबन्धेऽपि पृथोर्भार्यामित्यतीतज्ञा जानन्ति। तस्मात्स्थाणुं छिन्दति स्थाणुच्छेदः। कर्मण्यण्। येन स्थाणुमुत्पाट्य क्षेत्रं कृतं तस्यैव तत्क्षेत्रं वदन्ति। तथा शरादि शल्यं येन पूर्वं मृगे क्षिप्तं तस्यैव तं मृगमाहुः। एवंच पूर्वपरिग्रहीतुः स्वामित्वाद्वोढुरेवापत्य भवति न जनयितुः॥४४॥

एतावानेव पुरुषो यज्जायात्मा प्रजेति ह।
विप्राः प्राहुस्तथा चैतद्यो भर्ता सा स्मृताङ्गना॥४५॥

He only is a perfect man who consists (of three persons united), his wife, himself, and his offspring; thus (says the Veda), and (learned) Brāhmaṇas propound this (maxim) likewise, 'The husband is declared to be one with the wife.'

नैकः पुरुषो भवति अपि तु भार्यास्वदेहमपत्यानीत्येतत्परिमाण एव पुरुषः। तथाच वाजसनेयब्राह्मणम्-"अर्धो ह वा एष आत्मनस्तस्माद्यज्जायां न विन्दते नैतावत्प्रजायते असर्वो हि तावद्भवति, अथ यदैव जायां विन्दतेऽथ प्रजायते तर्हि सर्वो भवति, तथा चैतद्वेदविदो विप्रा वदन्ति यो भर्ता सैव भार्या स्मृता" इति। एवंच तस्यामुत्पादितं भर्तुरेवापत्यं भवतीति॥४५॥

यतश्च दंपत्योरैक्यमतः-

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते।
एवं धर्मं विजानीमः प्राक्प्रजापतिनिर्मितम्॥४६॥

Neither by sale nor by repudiation is a wife released from her husband; such we know the law to be, which the Lord of creatures (Prajāpati) made of old.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निष्क्रयो विक्रयः विसर्गस्त्यागः न ताभ्यां स्त्री भर्तुर्भार्यात्वादपैत्येवं पूर्वं प्रजापतिना स्मृतं नित्यं धर्मं मन्यामहे। एवं च क्रयादिनापि परस्त्रियमात्मसात्कृत्वा तदुत्पादितापत्यं क्षेत्रिण एव भवति न बीजिनः॥४६॥

सदंशो निपतति सकृत्कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत्॥४७॥

Once is the paritition (of the inheritance) made, (once is) a maiden given in marriage, (and) once does (a man) say, 'I will give;' each of those three (acts is done) once only.

पित्रादिधनविभागो भ्रातृणां धर्मतः कृतः सकृदेव भवति न पुनरन्यथा क्रियत इति। तथा कन्या पित्रादिना सकृदेकस्मै दत्ता न पुनरन्यस्मै दयिते। एवं चान्येन पूर्वमन्यस्मै दत्तायां पश्चात्पित्रादिभिः प्राप्तायामपि जनितमपत्यं न बीजिनो भवतीत्येतदर्थमस्योपन्यासः। तथा कन्यातोऽन्यस्मिन्नपि गवादिद्रव्ये सकृदेव ददानीत्याह न पुनस्तदन्यस्मै दीयत इति त्रीण्येतानि साधूनां सकृद्भवन्ति। यद्यपि कन्यादानस्य "सकृत्करणं प्रकृतोपयुक्तं" तथापि प्रसन्नादंशदानयोरपि सकृत्ताभिधानम् "सकृदाहददानि" (अ. ९ श्लो. ७७) इत्यनेनैव कन्यादानस्यापि सकृत्करणसिद्धौ प्रकृतोपयोगित्वादेव पृथगभिधानम्॥४७॥

यथा गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च।
नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि॥४८॥

As with cows, mares, females camels, slavegirls, buffalo-cows, she-goats, and wes, it is not the begetter (or his owner) who obtains the offspring, even thus (it is) with the wives of others.

यथा गवादिषु परकीयेष्वात्मवृषभादिकं नियुज्य वत्सोत्पादको न तद्भागी तथा परकीयभार्यास्वपि नोत्पादकः प्रजाभागी भवति॥४८॥

येऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः।
ते वै सस्यस्य जातस्य न लभन्ते फलं क्वचित्॥४९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Those who, having no property in a field, but possessing seed-corn, sow it in another's soil, do indeed not receive the grain of the crop which may spring up.

क्षेत्रस्वामिनो ये न भवन्ति अथ बीजस्वामिनः सन्तः परक्षेत्रे बीजं वपन्ति ते तत्र क्षेत्रजातस्य धान्यादेः फलं क्वचिदपि देशे न लभन्त इति प्रकृतस्य दृष्टान्तः ॥४९॥

यदन्यगोषु वृषभो वत्सानां जनयेच्छतम्।
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ॥५०॥

If (one man's) bull were to beget a hundred calves on another man's cows, they would belong to the owner of the cows; in vain would the bull have spent his strength.

यदन्यदीयगवीषु वृषभो वत्सशतमपि जनयेत्सर्वे ते वत्साः स्त्रीगवीस्वामिनो भवन्त्येव न वृषभस्वामिनः। वृषभस्य यच्छुक्रसेचनं तद्वृषभस्वामिनो निष्फलमेव भवति। "यथा गोऽश्वोष्ट्र" (अ. ९ श्लो. ४८) इत्यनेनोत्पादकस्य प्रजाभागित्वं न भवतीत्येतत्परत्वेन दृष्टान्त उक्तः। अयं तु क्षेत्रस्वामिनः प्रजाभागित्वं भवतीत्येतत्परत्वेन अतो न पुनरुक्तिः ॥५०॥

तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥५१॥

Thus men who have no martial property in women, but sow their seed in the soil of others, benefit the owner of the woman; but the giver of the seed reaps no advantages.

यथा गवादिगर्भेषु तथैवापत्यरहिताः सन्तः परकीयभार्यायां ये बीजं वपन्ति ते क्षेत्रस्वामिनामेवापत्यलक्षणमर्थं कुर्वन्ति। बीजसेक्ता त्वपत्याख्यं फलं न लभते ॥५१॥

फलं त्वनभिसंधाय क्षेत्रिणां बीजिनां तथा।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्गरीयसी ॥५२॥

If no agreement with respect to the crop has been made between the owner of the field and the owner of the seed,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

the benefit clearly belongs to the owner of the field; the receptable is more important than the seed.

यदस्यामुत्पत्स्यतेऽपत्यं तदावयोरुभयोरेवैवं यत्र नियमो न कृतस्तत्र निःसंदिग्धमे व क्षेत्रिणोऽपत्यम्। उक्तरीत्या बीजात्क्षेत्रं बलवत्॥५२॥

क्रियाम्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च॥५३॥

But if by a special contract (a field) is made over (to another) for sowing, then the ownder of the seed and the owner of the soil are both considered in this world as sharers of the (crop).

यदत्रापत्यं भविष्यति तदावयोरेवेति नियम्यैतत्क्षेत्रं स्वामिना बीजवपनार्थं यद्बीजिनो दीयते तस्यापत्यस्य लोके बीजिक्षेत्रिणौ द्वावपि भागिनौ दृष्टौ॥५३॥

ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम्॥५४॥

If seed be carried by water or win into somebody's field and germinates (there), the (plant sprung from that) seed belongs even to the owner of the field, the owner of the seed does not receive the crop.

यद्बीजं जलवेगवाताभ्यामन्यदीयक्षेत्रादानीतं यस्य क्षेत्रे जायते तत्क्षेत्रस्वामिन एव तद्बीजं भवति, नतु येन बीजमुप्तं स तत्फलं लभते। एवं च स्वभार्याभ्रमेणापरभार्यागमने ममायं पुत्रो भवितेत्यवगमेऽपि क्षेत्रिण एवापत्यमित्यनेन दर्शितम्॥५४॥

एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च।
विहङ्गमहिषीणां च विज्ञेयः प्रसवं प्रति॥५५॥

Know that such is the law concerning the offspring of cows, mares, slave-girls, female camels, she-goats, and ewes, as well as of females of birds and buffalo-cows.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एषैव व्यवस्था गवाश्वादीनां संततिं प्रति ज्ञातव्या। यत्क्षेत्रस्वाम्येव गवाश्वादेः संततिस्वामी नतु वृषभादिस्वामी। नियमे तु कृते सत्येतयोरेव संततिस्वाम्यम् ॥५५॥

एतद्बः सारफल्गुत्वं बीजयोन्योः प्रकीर्तितम्।
अतः परं प्रवक्ष्यामि योषितां धर्ममापदि ॥५६॥

Thus the comparative importance of the seed and of the womb has been declared to you; I will next propounded the law (applicable) to women in times of misfortune.

एतद्बीजयोन्योः प्राधान्याप्राधान्यं युष्माकमुक्तम्। अतोऽनन्तरं स्त्रीणां संतानाभावे यत्कर्तव्यं तद्वक्ष्यामि ॥५६॥

भ्रातुर्ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा।
यवीयसस्तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ॥५७॥

The wife of an elder brother is for his younger (brother) the wife of a Guru; but the wife of the younger is declared (to be) the daughter-in-law of the elder.

ज्येष्ठस्य भ्रातुर्या भार्या सा कनिष्ठस्य भ्रातुर्गुरुपत्नी भवति। कनिष्ठस्य च भ्रातुर्या भार्या सा ज्येष्ठभ्रातुः स्नुषा मुनिभिः स्मृता ॥५७॥

ज्येष्ठो यवीयसो भार्यां यवीयान्वाग्रजस्त्रियम्।
पतितौ भवतो गत्वा नियुक्तावप्यनापदि ॥५८॥

An elder (brother) who approaches the wife of the younger, and a younger (brother who approaches) the wife of the elder, except in times of misfortune, both become outcasts, even though (they were duly) authorised.

ज्येष्ठकनिष्ठभ्रातराविवरेतरभार्यां गत्वा संतानाभावं विना नियुक्तावपि पतितौ स्याताम् ॥५८॥

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया।
प्रजेप्सिताधिगन्तव्या संतानस्य परिक्षये ॥५९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

On failure of issue (by her husband) a woman who has been authorised, may obtain, (in the) proper (manner prescribed), the desired offspring by (cohabitation with) a brother-in-law or (with some other) *Sapiṇḍa* (of the husband).

संतानाभावे स्त्रिया पत्यादिगुरुनियुक्तया देवरादन्यस्माद्वा सपिण्डाद्वक्ष्यमाणघृताक्तादिनियमवत्पुरुषगमनेनेष्टाः प्रजा उत्पादयितव्याः। ईप्सितेत्यभिधानमर्थात्कार्याक्षमपुत्रोत्पत्तौ पुनर्गमनार्थम् ॥५९॥

विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ॥६०॥

He (who is) appointed to (cohabit with) the widow shall (approach her) at night anointed with clarified butter and silent, (and) beget one son, by no means a second.

विधवायामित्यपत्योत्पादनयोग्यपत्यभावपरमिदम्। जीवत्यपि पत्यौ अयोग्यपत्यादिगुरुनियुक्तो घृताक्तसर्वगात्रो मौनी रात्रावेकं पुत्रं जनयेन्न कथंचिद्द्वितीयम् ॥६०॥

द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः।
अनिर्वृतं नियोगार्थं पश्यन्तो धर्मतस्त्रयोः ॥६१॥

Some (sages), versed in the law, considering the purpose of the appointment not to havebeen attained by those two (on the birth of the first), think that a second (son) may be lawfully procreated on (such) women.

अन्ये पुनराचार्या नियोगात्पुत्रोत्पादनविधिज्ञा अपुत्र एकपुत्र इति शिष्टप्रवादादनिष्पन्नं नियोगप्रयोजनं मन्यमानाः स्त्रीषु पुत्रोत्पादनं द्वितीयं धर्मतो मन्यन्ते ॥६१॥

विधवायां नियोगार्थे निर्वृते तु यथाविधि।
गुरुवच्च स्नुषावच्च वर्तेयातां परस्परम् ॥६२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But when the purpose of the appointment to (cohabit with) the widow has been attained in accordance with the law, those two shall behave towards each other like a father and a daughter-in-law.

विधवादिकायां नियोगप्रयोजने गर्भधारणे यथाशास्त्रं संपन्ने सति ज्येष्ठो भ्राता कनिष्ठभ्रातृभार्यां च परस्परं गुरुवत्स्नुषावच्च व्यवहरेताम् ॥६२॥

नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः।
तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ॥६३॥

If those two (being thus) appointed deviate from the rule and act from carnal desire, they will both become outcasts, (as men) who defile the bed of a daughter-in-law or of a Guru.

ज्येष्ठकनिष्ठभ्रातरौ यौ परस्परभार्यायां नियुक्तौ घृताक्तादिविधानं त्यक्त्वा स्वेच्छातो वर्तेयातां तो स्नुषागगुरुदारगौ पतितौ भवेताम् ॥६३॥

एवं नियोगमभिधाय दूषयितुमाह-

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः।
अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥६४॥

By twice-born men a widow must not be appointed to (cohabit with) any other (than her husband); for they who appoint (her) to another (man), will violate the eternal law.

ब्राह्मणादिभिर्विधवा स्त्री भर्तुरन्यस्मिन्देवरादौ न नियोजनीया। स्त्रियमन्यस्मिन्नियुञ्जानास्ते स्त्रीणामेकपतित्वधर्ममनादिसिद्धं नाशयेयुः ॥६४॥

नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित्।
न विवाहविधावुक्तं विधवावेदनं पुनः ॥६५॥

In the sacred texts which refer to marriage the appointment (of widows) is nowhere mentioned, nor is the re-marriage of widows prescribed in the rules concerning marriage.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

"अर्यमणं नु देवम्" इत्येवमादिषु विवाहप्रयोगजनकेषु मन्त्रेषु क्वचिदपि शाखायां न नियोगः कथ्यते। न च विवाहविधायकशास्त्रेऽन्येन पुरुषेण स पुनर्विवाह उक्तः॥६५॥

अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः।
मनुष्याणामपि प्रोक्तों वेने राज्यं प्रशासति॥६६॥

This practice which is reprehended by the learned of the twice-born castes as fit for cattle is said (to have occurred) even among men, while Vena ruled.

यस्मादयं पशुसंबन्धी मनुष्याणामपि व्यवहारो विद्वद्भिर्निन्दितः। योऽयमधार्मिके वेने राज्ञि राज्यं कुर्वाणे तेन कर्तव्यतया प्रोक्तः। अतो वेनादारभ्य प्रवृत्तोऽयमादिमानिति निन्द्यते॥६६॥

स महीमखिलां भुञ्जन्राजर्षिप्रवरः पुरा।
वर्णानां संकरं चक्रे कामोपहतचेतनः॥६७॥

That chief of royal sages who formerly possessed the whole world, caused a confusion of the castes (*varṇa*), his intellect being destroyed by lust.

स वेनो महीं समग्रां पूर्वं पालयन्नतएव राजर्षिश्रेष्ठो नतु धार्मिकत्वात्, कामोपहतबुद्धिर्भ्रातृभार्यागमनरूपं वर्णसंकरं प्रावर्तयत्॥६७॥

ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम्॥
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः।॥६८॥

Since that (time) the virtuous censure that (man) who in his folly appoints a woman, whose husband died, to (bear) children (to another man).

वेनकालात्प्रभृति यो मृतभर्तृकादिस्त्रियं शास्त्रार्थाज्ञानादपत्यनिमित्तं देवरादौ नियोजयति तं साधवो नियतं गर्हयन्ते। अयं च स्वोक्तनियोगनिषेधः कलियुगविषयः। तदाह बृहस्पतिः- "उक्तो नियोगो मुनिना निषिद्धः स्वयमेव तु। युगक्रमादशक्योऽयं कर्तुमन्यैर्विधानतः। तपोज्ञानसमायुक्ताः कृतत्रेतायुगे नराः। द्वापरे च कलौ नृणां शक्तिहानिर्हि निर्मिता। अनेकधा कृताः पुत्रा ऋषिभिश्च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुरातनैः। न शक्यन्तेऽधुना कर्तुं शक्तिहीनैरिदंतनैः॥'' अतो यद्गोविन्दराजेन युगविशेषव्यवस्थामज्ञात्वा सर्वदैव संतानाभावे नियोगादनियोगपक्षः श्रेयानिति स्वमनीषया कल्पितं तन्मुनिव्याख्याविरोधान्नाद्रियामहे। प्रायशो मनुवाक्येषु मुनिव्याख्यानमेव हि। नापराध्योऽस्मि विदुषां क्वाहं सर्वविदः कुधीः॥६८॥

नियोगप्रकरणत्वात्कन्यागतं विशेषमाह-

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः।
तामनेन विधानेन निजो विन्देत देवरः॥६९॥

If the (future) husband of a maiden dies after troth verbally plighted, her brother-in-law shall wed her according to the following rule.

यस्याः कन्याया वाग्दाने कृते सति भर्ता म्रियेत तामनेन वक्ष्यमाणेनानुष्ठानेन भर्तुः सोदरभ्राता परिणयेत्॥६९॥

यथाविध्यधिगम्यैनां शुल्कवस्त्रां शुचिव्रताम्।
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ॥७०॥

Having, according to the rule, espoused her (who must be) clad in white garments and be intent on purity, he shall approach her once in each proper season until issue (be had).

स देवरो विवाहविधिना एनां स्वीकृत्य शुक्लवस्त्रां कायवाङ्मनः-शौचशालिनीमागर्भग्रहणाद्रहसि ऋतावृतावेकैकवारं गच्छेत्। एवं कन्याया नियोगप्रकारत्वाद्विवाहस्याग्रहाच्च गमनोपदेशाद्यस्मै वाग्दत्ता तस्यैव तदपत्यं भवति॥७०॥

न दत्त्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः।
दत्त्वा पुनः प्रयच्छन्हि प्राप्नोति पुरुषानृतम्॥७१॥

Let no prudent man, after giving his daughter to one (man), give her again to another; for he who gives (his daughter) whom he had before given, incurs (the guilt of) speaking falsely regarding a human being.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कस्मैचिद्वाचा कन्यां दत्त्वा तस्मिन्मृते दानगुणदोषज्ञस्तामन्यस्मै न दद्यात्। यस्मादेकस्मै दत्त्वान्यस्मै ददत् पुरुषानृतं "सहकृम्" (अ. ८ श्लो. १३८) इत्युक्तदोषं प्राप्नोति। सप्तपदीकरणस्याजातत्वाद्भार्यात्वानिष्पत्तेः पुनर्दानाशङ्कायामिदं वचनम्॥७१॥

विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम्।
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम्॥७२॥

Though (a man) may have accepted a damsel in due form, he may abandon (her if she be) blemished, diseased, or deflowered, and (if she have been) given with fraud.

"अद्भिरेव द्विजाग्र्याणाम्" (अ. ३ श्लो. ३५) इत्येवमादिविधिना प्रतिगृह्यापि कन्यां वैधव्यलक्षणोपेतां रोगिणीं क्षतयोनित्वाद्यभिशापवतीमधिकान्नादिगोपनच्छद्मोपपादितां सप्तपदीकरणात्प्राग्ज्ञातां त्यजेत्। ततश्च तत्त्यागे दोषाभाव इत्येतदर्थं नतु त्यागार्थम्॥७२॥

यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत्।
तस्य तद्वितथं कुर्यात्कन्यादातुर्दुरात्मनः॥७३॥

If anybody gives away a maiden possessing blemishes without declaring them, (the bridgeroom) may annul that (contract) with the evil-minded giver.

यः पुनर्दोषवतीं कन्यां दोषाननभिधाय ददाति तस्य कन्यादातुर्दुरात्मनो दानं तत्प्रत्यर्पणेन व्यर्थं कुर्यात्। एतदपि त्यागे दोषाभावकथनार्थम्॥७३॥

विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः।
अवृत्तिकर्षिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि॥७४॥

A man who has business (abroad) may depart after securing a maintenance for his wife; for a wife, even though virtuous, may be corrupted if she be distressed by want of subsistence.

कार्ये सति मनुष्यः पत्न्या ग्रासाच्छादनादि प्रकल्प्य देशान्तरं गच्छेत्। यस्माद्ग्रासाद्यभावपीडिता स्त्री शीलवत्यपि पुरुषान्तरसंपर्कं भजेत्॥७४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता।
प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ॥७५॥

If (the husband) went on a journey after providing (for her), the wife shall subject herself to restraints in her daily life; but if he departed without providing (for her), she may subsist by blameless manual work.

भक्ताच्छादनादि दत्त्वा पत्यौ देशान्तरं गते देहप्रसाधनपरगृहगमनरहिता जीवेत्। अदत्त्वा पुनर्गते सूत्रनिर्माणादिभिरनिन्दितशिल्पेन जीवेत् ॥७५॥

प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः।
विद्यार्थं षड् यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान् ॥७६॥

If the husband went abroad for some sacred duty, (she) must wait for him eight years, if (he went) to (acquire) leanring or fame six (years), if (he went) for pleasure three years.

गुर्वाज्ञासंपादनादिधर्मकार्यनिमित्तं प्रोषितः पतिरष्टौ वर्षाणि पत्न्या प्रतीक्षणीयः, ऊर्ध्वं पतिसंनिधिं गच्छेत्। तदाह वसिष्ठः-"प्रोषितपत्नी पञ्च वर्षाण्युपासीत, ऊर्ध्वं पतिसकाशं गच्छेत्" इति। विद्यार्थं प्रोषितः षड् वर्षाणि प्रतीक्ष्यः। निजविद्याविभाजनेन यशोऽर्थमपि प्रोषितः पतिः षडेव। भार्यान्तरोपभोगार्थं गतस्त्रीणि वर्षाणि ॥७६॥

संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः।
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥७७॥

For one year let a husband bear with a wife who hates him; but after (the lapse of) a year let him deprive her of her property and cease to cohabit with her.

पतिर्विषयसंजातद्वेषां स्त्रियं वर्षं यावत्प्रतीक्षेत। तत ऊर्ध्वमपि द्विषन्तीं स्वदत्तमलंकारादि धनं हृत्वा नोपगच्छेत्। ग्रासाच्छादनमात्रं तु देयमेव ॥७७॥

अतिक्रामेत्प्रमत्तं या मत्तं रोगार्त्तमेव वा।
सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा ॥७८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

She who shows disrespect to (a husband) who is addicted to (some evil) passion, is a drunkand, or diseased, shall be deserted for three months (and be) deprived of her ornaments and furniture.

या स्त्री द्यूतादिप्रमादवन्तं मदजनकपानादिना मत्तं व्याधितं वा शुश्रूषाद्यकरणेनावजानाति सा विगतालंकारशय्यादिपरिच्छदा त्रीन्मासान्नोपगन्तव्या ॥७८॥

उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम्।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनम्॥७९॥

But she who shows aversion towards a mad or outcast (husband), a cunuch, one destitute of manly strnegth, or one afflicted with such diseases as punish crimes, shall neither be cast off nor be deprived of her property.

वातादिक्षोभादप्रकृतिस्थं, पतितमेकादशाध्याये वक्ष्यमाणं, नपुंसकम्, अबीजं बाध्यरेतस्त्वादिना बीजरहितं, कुष्ठाद्युपेतं च पतिमपरिचरन्त्यास्त्यागो न करणीयो न च धनग्रहणं करणीयम्॥७९॥

मद्यपा साधुवृत्ता च प्रतिकूला च या भवेत्॥
व्याधिता वाधिवेत्तव्या हिंस्त्रार्थघ्नी च सर्वदा॥८०॥

She who drinks spirituous liquor, is reload conduct, rebellious, diseased, mischievous, or wasteful, may at any time be superseded (by another wife).

निषिद्धमद्यपानरता, असाध्वाचारा, भर्तुः प्रतिकूलाचरणशीला, कुष्ठादिव्याधियुक्ता, भृत्यादिताडनशीला, सततमतिव्ययकारिणी या भार्या भवेत्साधिवेत्तव्या तस्यां सत्यामन्यो विवाहः कार्यः॥८०॥

वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा॥
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी॥८१॥

A barren wife may be superseded in the eighth year, she whose children (all) die in the tenth, she who bears

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

only daughters in the elventh, but she who is quarrelsome without delay.

प्रथमर्तुमारभ्याविद्यमानप्रसूता अष्टमे वर्षेऽधिवेदनीया, मृतापत्या दशमे वर्षे, स्त्रीजनन्येकादशे, अप्रियवादिनी सद्य एव यद्यपुत्रा भवति। पुत्रवत्यां तु तस्यां "धर्मप्रजासंपन्ने दारे नान्यां कुर्वीत, अन्यतरापाये तु कुर्वीत" इत्यापस्तम्बनिषेधादधिवेदनं न कार्यम् ॥८१॥

या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः।
सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित् ॥८२॥

But a sick wife who is kind (to her husband) and virtuous in her conduct, may be superseded(only) with her own consent and must never be disgraced.

या पुनर्व्याधिता सती पत्युरनुकूला भवति शीलवती च स्यात्तामनुज्ञाप्यान्यो विवाहः कार्यः। कदाचिच्चासौ नावमाननीया ॥८२॥

अधिविन्ना तु या नारी निर्गच्छेद्दुषिता गृहात्।
सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥८३॥

A wife who, being superseded, in anger departs from (her husband's) house, must either be instantly confined or cast off in the presence of the family.

या पुनः कृताधिवेदना स्त्री कुपिता निर्गच्छति सा तदहरेव रज्ज्वादिना बद्धा स्थापनीया आकोपनिवृत्तेः। पित्रादिकुलसंनिधौ वा त्याज्या ॥८३॥

प्रतिषिद्धापि चेद्या तु मद्यमभ्युदयेष्वपि।
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि षट् ॥८४॥

But she who, though having been forbidden, drinks spirituous liquor even at festivals, or goes to public spectacles or assemblies, shall be fined six kṛṣṇalas.

या पुनः क्षत्रियादिका स्त्री भर्त्रादिनिवारिता विवाहाद्युत्सवेष्वपि निषिद्धमद्यं पिबेन्नृत्यादिस्थानजनसमूहौ वा गच्छेत्सा सुवर्णकृष्णलानि षट् व्यवहारप्रकरणाद्राज्ञा दण्डनीया ॥८४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यदि स्वाश्चापराश्चैव विन्देरन्योषितो द्विजाः।
तासां वर्णक्रमेण स्याज्ज्यैष्ठ्यं पूजा च वेश्म च॥८५॥

If twice-born men wed women of their own and of other (lower castes), the seniority, honour, and habitation of those (wives) must be (settled) according to the order of the castes (*varṇa*).

यदि द्विजातयः स्वजातीया विजातीयाश्चोद्वहेयुस्तदा तासां द्विजातिक्रमेण वाक्संमानदायविभागोत्कर्षार्थं ज्येष्ठत्वं पूजा च वस्त्रालंकारादिदानेन गृहं च प्रधानं स्यात्॥८५॥

भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम्।
स्वा चैव कुर्यात्सर्वेषां नास्वजातिः कथंचन॥८६॥

Among all (twice-born men) the wife of equal caste alone, not a wife of a different caste by any means, shall personally attend her husband and assist him in his daily sacred rites.

भर्तुर्देहपरिचर्यामन्नदानादिरूपां धर्मकार्यां च भिक्षादानातिथि- परिवेषण- होमीयद्रव्योपकल्पनादि प्रात्यहिकं सर्वेषां द्विजातीनां सजातिभार्यैव कुर्यान्न तु कदाचिद्विजातीयेति॥८६॥

यस्तु तत्कारयेन्मोहात्सजात्या स्थितयान्यया।
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः॥८७॥

But he who foolishly causes that (duty) to be performed by another, while his wife of equal caste is alive, is declared by the ancients (to be) as (despicable) as a Cāṇḍāla (sprung from the) Brāhmaṇa (caste).

यः पुनः स्वजातीयया संनिहितया देहशुश्रूषादिकं कर्तव्यं विजातीयया मौर्ख्यात्कारयेत्स यथा ब्राह्मण्यां शूद्राज्जातो ब्राह्मणचाण्डालस्तथैव पूर्वैर्ऋषिभिर्दृष्ट इति पूर्वानुवादः॥८७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उत्कृष्टायाभिरूपाय वराय सदृशाय च।
अप्राप्तामपि तां तस्मै कन्या दद्याद्यथाविधि॥८८॥
[प्रयच्छेन्नग्निकां कन्यामृतुकालभयान्वितः।
ऋतुमत्यां हि तिष्ठन्त्यामेनो दातारमृच्छति॥२॥]

The a distinguished, handsome suitor (any equal (caste) should (a father) give his daughter in accordance with the prescribed rule, though she have not attained (the proper age).

कुलाचारादिभिरुत्कृष्टाय सुरूपाय समानजातीयाय वरायाप्राप्तकालामपि "विवाहयेदष्टवर्षामेवं धर्मो न हीयते" इति दक्षस्मरणात्। तस्मादपि कालात्प्रागपि कन्यां ब्राह्मविवाहविधिना दद्यात्॥८८॥

काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि।
नचैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्॥८९॥

(But) the maiden, though marriageable, should rather stop in (the father's) house until death, than that he should ever give her to a man destitute of good qualities.

संजातार्तवापि कन्या वरं मरणपर्यन्तं पितृगृहे तिष्ठेन्न पुनरेनां विद्यागुणरहिताय कदाचित्पित्रादिर्दद्यात्॥८९॥

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम्॥९०॥

Three years leat a damsel wait, though she be marriageable; but after that time let her choose for herself a briedgroom (of) equal (caste and rank).

पित्रादिभिर्गुणवद्वरायादीयमाना कन्या संजातार्तवा सती त्रीणि वर्षाणि प्रतीक्षेत। वर्षत्रयात्पुनरूर्ध्वमधिकगुणवरालाभे समानजातिगुणं वरं स्वयं वृणीत॥९०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम्।
नैनः किञ्चिदवाप्नोति न च यं साऽधिगच्छति॥९१॥

If, being not given in marriage, she herself seeks a husband, she incurs no guilt, nor (does) he whom she weds.

पित्रादिभिरदीयमाना कुमारी यथोक्तकाले यदि भर्तारं स्वयं वृणुते तदा सा न किंचित्पापं प्राप्नोति। न च तत्पतिः पापं प्राप्नोति॥९१॥

अलङ्कारं नानदीत पित्र्यं कन्या स्वयंवरा।
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत्॥९२॥

A maiden who choses for herself, shall not take with her any ornaments, given by her father or her mother, or her brothers; if she carries them away, it will be theft.

स्वयंवृतपतिका कन्या वरस्वीकरणात्पूर्वं पितृमातृभ्रातृभिर्दत्तमलंकारं तेभ्यः समर्पयेत्। यदा नार्पयेत्तदा चौरी स्यात्॥९२॥

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन्।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात्॥९३॥

But he who takes (to wife) a marriageable damsel, shall not pay any nuptial fee to her father; for the (latter) will lose his dominion over her in consequence of his preventing (the legitimate result of the appearance of) her menses.

ऋतुयुक्तां कन्यां वरः परिणयन्पित्रे शुल्कं न दद्यात्। यस्मात्स पिता ऋतुकार्यापत्योत्पत्तिनिरोधात्कन्यायाः स्वामित्वाद्धीयते॥९३॥

त्रिंशद्वर्षोवहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥९४॥

A man, aged thirty years, shall marry a maiden of twelve who pleases him, or a man of twenty-four a girl eight years of age; if (the performance of) his duties would (otherwise) be impeded, (he must marry) sooner.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्रिंशद्वर्षः पुमान् द्वादशवर्षवयस्कां मनोहारिणीं कन्यामुद्वहेत्। चतुर्विंशतिवर्षो वाष्टवर्षां, गार्हस्थ्यधर्मेऽवसादं गच्छति त्वरावान्। एतञ्च योग्यकालप्रदर्शनपरं नतु नियमार्थं, प्रायेणैतावता कालेन गृहीतवेदो भवति त्रिभागवयस्का च कन्या वोढुर्यूनो योग्येति गृहीतवेदश्चोपकुर्वाणको गृहस्थाश्रमंप्रति न विलम्बेतेति सत्वर इत्यस्यार्थः॥९४॥

देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः।
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन्॥९५॥

The husband receives his wife from the gods, (he does not wed her) according to his own will; doing what is agreeable to the gods, he must always support her (while she is) faithful.

"भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः" इत्यादिमन्त्रलिन्नात्, या देवैर्दत्ता भार्या तां पतिर्लभते नतु स्वेच्छया। तां सतीं देवानां प्रियं कुर्वन्ग्रासाच्छादनादिना सदा द्वेषाद्युपेतामपि पोषयेत्॥९५॥

प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवाः।
तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः॥९६॥

To be mothers were women created, and to be fathers men; religious rites, therefore, are ordained in the Veda to be performed (by the husband) together with the wife.

यस्माद्गर्भग्रहणार्थं स्त्रियः सृष्टा गर्भाधानार्थं च मनुष्यास्तस्मादगर्भोत्पादनमेवानयोः, अग्न्याधानादिरपि धर्मः पत्न्या सह साधारणः "क्षौमे वसानावग्नीनादधीयातां" इत्यादिर्वेदेऽभिहितः। तस्माद्भार्यां बिभृयादिति पूर्वोक्तस्य शेषः॥९६॥

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते॥९७॥

If, after the nuptial fee has been paid for a maiden, the giver of the fee dies, she shall be given in marriage to his brother, in case she consents.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कन्यायां दत्तशुल्कायां सत्यामसंजातविवाहायां यदि शुल्कदो वरो म्रियते, तदा देवराय पित्रादिभिर्वासौ कन्या दातव्या यदि सा स्वीकरोति। "यस्या म्रियेत" (अ. ९ श्लो. ६९) इति प्रागुक्तं नियोगरूपं, इदं तु शुल्कग्रहण-विषयम्॥९७॥

आददीत न शूद्रोऽपि शुल्कं दुहितरं ददन्।
शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयम्॥९८॥

Even a Śūdra ought not to take a nuptial fee, when he gives away his daughter; for he who takes a fee sells his daughter, covering (the transaction by another name).

शास्त्रानभिज्ञः शूद्रोऽपि पुत्रीं ददच्छुल्कं न गृह्णीयात्किं पुनः शास्त्रविद्द्विजातिः। यस्माच्छुल्कं गृह्णन्नुप्तं दुहितृविक्रयं कुरुते। "न कन्यायाः पिता" (अ. ३ श्लो. ५१) इत्यनेन निषिद्धमपि शुल्कग्रहणं कन्यायामपि गृहीतशुल्कायां शास्त्रीयनियमदर्शनाच्छुल्कग्रहणे शास्त्रीयत्वशंकायां पुनस्तन्निषिध्यते॥९८॥

एतत्तु न परे चक्रुर्नापरे जातु साधवः।
यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते॥९९॥

Neither ancients nor moderns who were good men have done such (a deed) that, after promising (a daughter) to one man, they gave her to another.

एतत्पुनः पूर्वे शिष्टा न कदाचित्कृतवन्तो नाप्यपरे वर्तमानकालाः कुर्वन्ति यदन्यस्य कन्यामन्नीकृत्य पुनरन्यस्मै दीयत इति। एतच्च गृहीतशुल्ककन्यामदत्त्वा कस्यचित्, कन्यायामिति तु गृहीतशुल्कविषयम्॥९९॥

नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु।
शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयम्॥१००॥

Nor, indeed, have we heard, even in former creations, of such (a thing as) the covert salke of a daughter for a fixed price, called a nuptial fee.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्वकल्पेष्वप्येतद्वृत्तमिति कदाचिद्वयं न श्रुतवन्तो, यच्छुल्काभिधानेन मूल्येन कश्चित्साधुर्गूढं दुहितृविक्रयमकार्षीदिति शुल्कनिषेधार्थवादः ॥१००॥

अन्योन्यस्याव्यभिचारो भवेदामरणान्तिकः।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः ॥१०१॥

'Let mutual fidelity continue until death,' this may be considered as the summary of the highest law for husband and wife.

भार्यापत्योर्मरणान्तं यावद्धर्मार्थकामेषु परस्पराव्यभिचारः स्यादित्येव संक्षेपतः स्त्रीपुंसयोः प्रकृष्टो धर्मो ज्ञातव्यः ॥१०१॥

तथा च सति-

तथा नित्यं यतेयातां स्त्रीपुंसौतु कृतक्रियौ।
यथा नाभिचरेतां तौ वियुक्तावितरेतरम् ॥१०२॥

Let man and woman, united in marriage, constantly exert themselves, that (they may not be) disunited (and) may not violate their mutual fidelity.

स्त्रीपुंसौ कृतविवाहौ तथा सदा यत्नं कुर्यातां यथा धर्मार्थकामविषये वियुक्तौ परस्परं न व्यभिचरेताम् ॥१०२॥

एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः।
आपद्यपत्यप्राप्तिश्च दायभागं निबोधतः ॥१०३॥

Thus has been declared to you the law for a husband and his wife, which is intimately connected with conjugal happiness, and the manner of raising offspring in times of calamity; learn (now the law concerning) the division of the inheritance.

एष भार्यापत्योरन्योन्यानुरागयुक्तो धर्मो युष्माकमुक्तः। संतानाभावे चापत्यप्राप्तिरुक्ता। इदानीं दीयत इति दायः पित्रादिधनं तस्य विभागव्यवस्थां शृणुत ॥१०३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भ्रातरो मिलित्वा पितृमरणादूर्ध्वं पैतृकं मातृमरणादूर्ध्वं मातृकं धनं समं कृत्वा विभजरेन्। ज्येष्ठगोचरतयोद्धारस्य वक्ष्यमाणत्वात् समभागोऽयं ज्येष्ठभ्रातर्युद्धारमनिच्छति बोद्धव्यः। पित्रोर्मरणादूर्ध्वं विभागहेतुमाह-

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः॥१०४॥

After the death of the father and of the mother, the brothers, being assembled, may divide among themselves in equal shares the paternal (and the maternal) estate; for, they have no power (over it) while the parents live.

यस्मात्ते पुत्रा जीवतोः पित्रोस्तदीयधने स्वामिनो न भवन्ति। मातुरपि प्रकृतत्वात्पैतृकमित्यनेन मातृकस्यापि ग्रहणम्। अयं च पितृमरणानन्तरं विभागो जीवतः पितुरिच्छाभावे द्रष्टव्यः। पितुरिच्छया जीवत्यपि तस्मिन्विभागः। तदाह याज्ञवल्क्यः-"विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्" (अ. २ श्लो. ११४) इति॥१०४॥

यदा पुनर्ज्येष्ठो धार्मिको भवति तदा-

ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा॥१०५॥

(Or) the eldest alone may take the whole paternal estate, the others shall live under him just as (they lived) under their father.

ज्येष्ठ एव पितृसंबन्धि धनं गृह्णीयात्। कनिष्ठाः पुनर्ज्येष्ठं भक्ताच्छादनाद्यर्थं पितरमिवोपजीवेयुः। एवं सर्वेषां सहैवावस्थानम्॥१०५॥

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः।
पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति॥१०६॥

Immediately on the birth of his first-born a man is (called) the father of a son and is freed from the debt to the manes; that (son), therefore, is worthy (to receive) the whole estate.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उत्पन्नमात्रेण ज्येष्ठेन संस्काररहितेनापि मनुष्यः पुत्रवान्भवति। ततश्च "नापुत्रस्य लोकोऽस्ति" इति श्रुतेः पुण्यलोकाभावपरिहारो भवति। तथा "प्रजया पितृभ्यः" इति श्रुतेः "पुत्रेण जातमात्रेण पितृणामनृणश्च सः" इति। अतो ज्येष्ठ एव सर्वधनमर्हति पूर्वस्य। अनुजास्तेन साम्ना वर्तेरन्॥१०६॥

यस्मिन्नृणं संमयति येन चानन्त्यमश्नुते।
स एव धर्मजः पुत्रः कामजानितरान्विदुः॥१०७॥

That son alone on whom he throws his debt and through whom he obtains immortality, is begotten for (the fulfilment of) the law; all the rest they consider the offspring of desire.

यस्मिन् जाते ऋणं शोधयति। येन जातेनामृतत्वं प्राप्नोति। तथाच श्रुतिः- "ऋणमस्मिन्समुन्नयत्यमृतत्वं च गच्छति। पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्" इति। स एव पितुर्धर्मेण हेतुना जातः पुत्रो भवति, तेनैकेनैव ऋणापनयनाद्युपकारस्य कृतत्वात्। इतरांस्तु कामजान्मुनयो जानन्ति। ततश्च सर्वं धनं गृह्णीयादित्यस्यैवायमपि विशेषः॥१०७॥

पितेव पालयेत्पुत्राञ्ज्येष्ठो भ्रातॄन्यवीयसः।
पुत्रवच्चापि वर्तेरञ्ज्येष्ठे भ्रातरि धर्मतः॥१०८॥

As a father (supports) his sons, so let the eldest support his younger brothers, and let them also in accordance with the law behave towards their eldest brother as sons (behave towards their father).

ज्येष्ठो भ्राता विभागाभावेऽनुजान् भ्रातॄन्भक्ताच्छादनादिभिः पितेव बिभृयात्। अनुजाश्च भ्रातरः पुत्रा इव ज्येष्ठे भ्रातरि धर्माय वर्तेरन्॥१०८॥

ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः।
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः॥१०९॥

The eldest (son) makes the family prosperous or, on the contrary, brings it to ruin; the eldest (is considered) among men most worthy of honour, the eldest is not treated with disrespect by the virtuous.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अकृतविभागो ज्येष्ठो यदि धार्मिको भवति तदानुजानामपि तदनुयायित्वेन धार्मिकत्वाज्ज्येष्ठः कुलं वृद्धिं नयति। यद्यधार्मिको भवति तदानुजानामपि तदनुयायित्वाज्ज्येष्ठः कुलं नाशयति। तथा गुणवाञ्ज्येष्ठो लोके पूज्यतमः साधुभिश्चागर्हितो भवति॥१०९॥

यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः।
अज्येष्ठवृत्तिर्यस्तु स्यात्स संपूज्यस्तु बन्धुवत्॥११०॥

If the eldest brother behaves as an eldest brother (ought to do), he (must be treated) like a mother and like a father; but if he behaves in a manner unworthy of an eldest brother, he should yet be honoured like a kinsman.

यो ज्येष्ठोऽनुजेषु भ्रातृषु पितृवद्वर्तेत, स पितेव मातेवागर्हणीयो भवति। यः पुनस्तथा न वर्तेत स मातुलादिबन्धुवदर्चनीयः॥११०॥

एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया।
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया॥१११॥

Either let them thus live together, or apart, if (each) desires (to gain) spiritual merit; for (by their living) separate (their) merit increases, hence separation is meritorious.

एवमविभक्ता भ्रातरः सह संवसेयुः। यदि वा धर्मकामनया कृतविभागाः पृथग्वसेयुः। यस्मात्पृथगवस्थाने सति पृथक् पृथक् पञ्चमहायज्ञाद्यनुष्ठानधर्मस्तेषां वर्धते, तस्माद्विभागक्रिया धर्मार्था। तथाच बृहस्पतिः-"एकपाकेन वसतां पितृदेवद्विजार्चनम्। एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे"॥१११॥

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः॥११२॥

The additional share (deducted) for the eldest shall be one-twentieth (of the estate) and the best of all chattels, for the middlemost half of that, but for the youngest one-fourth.

उद्धियत इत्युद्धारः ज्येष्ठस्याविभक्तसाधारणधनादुद्धृत्य विंशतितमो भागः सर्वद्रव्येभ्यश्चः यच्छ्रेष्ठं तद्दातव्यम्। मध्यमस्य चत्वारिंशत्तमो भागो देयः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कनिष्ठस्य पुनरशीतितमो भागो दातव्यः। अवशिष्टं धनं समं कृत्वा विभजनीयम्॥११२॥

ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम्।
येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम्॥११३॥

Both the eldest and the youngest shall take (their shares) according to (the rule just) stated; (each of) those who are between the eldest and the youngest, shall have the share (prescribed for the) middlemost.

ज्येष्ठकनिष्ठौ पूर्वश्लोके यथोक्तमुद्धारं गृह्णीयाताम्। ज्येष्ठकनिष्ठव्यतिरिक्ता ये मध्यमास्तेषामेवावान्तरज्येष्ठकनिष्ठतामनपेक्ष्य मध्यमस्योक्तचत्वारिंशद्भागः प्रत्येकं दातव्यः। मध्यमानामवान्तरज्येष्ठकनिष्ठदेयभागे वैषम्यवारणार्थमिदम्॥११३॥

सर्वेषां धनजातानामाददीताग्रयमग्रजाः।
यच्च सातिशयं किञ्चिदशतश्चाप्नुयाद्वरम्॥११४॥

Among the goods of every kind the eldest shall take the best (article), and (even a single chattel) which is particularly good, as well as the best of ten (animals).

सर्वेषां धनप्रकाराणां मध्याद्यच्छ्रेष्ठं धनं, ज्येष्ठः तद्धनं गृह्णीयात्। "सर्वद्रव्याच्च यद्वरम्" (अ. ९ श्लो. ११२) इत्युक्तमनूदितसमुच्चयबोधनाय। यच्चैकमपि प्रकृष्टं द्रव्यं विद्यते तदपि ज्येष्ठ एव गृह्णीयात्। तथा "दशतः पशूनाम्" इति गोतमस्मरणाद्दशभ्यो गवादिपशुभ्य एकैकं श्रेष्ठं ज्येष्ठो लभते। इदं च यदि ज्येष्ठो गुणवानितरे निर्गुणास्तद्विषयं॥११४॥

सर्वेषां समगुणत्वे तु-

उद्धारो न दशस्वस्ति संपन्नानां स्वकर्मसु।
यत्किंञ्चिदेव देयं तु ज्यायसे मानवर्धनम्॥११५॥

But among (brothers) equally skilled in their occupations, there is no additional share, (consisting of the

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

best animal) among ten; some trifle only shall be given to the eldest as a token of respect.

"दशतश्चाप्नुयाद्वरम्" (अ. ९ श्लो. ११४) इति योऽयमुद्धार उक्तः सोऽयमध्ययनादिकर्मसमृद्धानां भ्रातृणां ज्येष्ठस्य नास्ति। तत्रापि यत्किंचिदस्य देयमिति। द्रव्यं पूजावृद्धिकरं ज्येष्ठाय देयम्। एवंच समगुणेषूद्धारप्रतिषेधदर्शनात्पूर्वत्र गुणोत्कर्षाविशेषापेक्षयोद्धारवैषम्यं बोद्धव्यम् ॥११५॥

एवं समुद्धृतोद्धारे समानंशान्प्रकल्पयेत्।
उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना। ॥११६॥

If additional shares are thus deducted, one must allot equal shares (out of the residue to each); but if no deduction is made, the allotment of the shares among them shall be (made) in the following manner.

एवमुक्तप्रकारेण समुद्धृतविंशद्भागाधिके धने समान्भागान् भ्रातृणां कल्पयेत्। विंशतितमभागादौ पुनरनुद्धृत इयं वक्ष्यमाणभागकल्पना भवेत् ॥११६॥

एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः।
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः ॥११७॥

Let the eldest son take one share in excess, the (brother) born next after him one (share) and a half, the younger ones one share each; thus the law is settled.

एकाधिकमंशं द्वावंशाविति यावत्। ज्येष्ठपुत्रो गृह्णीयात्। अधिकमर्धं यत्रांशे सार्धमंशं ज्येष्ठादनन्तरजातो गृह्णीयात्। कनिष्ठाः पुनरेकैकमंशं गृह्णीयुरिति व्यवस्थितो धर्मः। इदं तु ज्येष्ठतदनुजयोर्विद्यादिगुणवत्त्वापेक्षया, कनिष्ठानां च निर्गुणवत्त्वे बोद्धव्यम्। ज्येष्ठतदनुजयोरधिकदानदर्शनात् ॥११७॥

स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्।
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः ॥११८॥

But to maiden (sisters) the brothers shall severally give (portions) out of their shares, each out of his share one-fourth part; those who refuse to give (it), will become outcasts.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो भ्रातरः स्वजात्यपेक्षया स्वेभ्यश्चतुरोंऽशान् हरेयुः। विप्र इत्यादिना वक्ष्यमाणेभ्यो भागेभ्य आत्मीयादात्मीयाद्भागाञ्चतुर्थभागं पृथक्कन्याभ्योऽनूढाभ्यो भगिनीभ्यो या यस्य सोदर्या भगिनी स तस्या एवं संस्कारार्थमिति एवं दद्युः। सोदर्याभावे विमातृजैरुत्कृष्टैरपकृष्टैरपि संस्कार्यैव। तथाच याज्ञवल्क्यः- "असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्त्वांशं तु तुरीयकम्॥" यदि भगिनीसंस्कारार्थं चतुर्भागं दातुं नेच्छन्ति तदा पतिता भवेयुः। एतेनैकजातीयवैमात्रेयबहुपुत्रभगिनीसद्भावेऽपि सोदर्य-भगिनीभ्यश्चतुर्थभागदानमवगन्तव्यम्॥११८॥

अजाविकं सैकशफं न जातु विषमं भजेत्।
अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते॥११९॥

Let him never divide (the value of) a single goat or sheep, or a (single beast) with uncloven hoofs; it is prescribed (that) a single goat or sheep (remaining after an equal division, belongs) to the eldest alone.

एकशफा अश्वादयः। छागमेषाद्येकशफसहितं विभागकाले समं कृत्वा विभक्तुमशक्यं तन्न विभजेत्किंतु ज्येष्ठस्यैव तत्स्यान्नतु तत्तुल्यद्रव्यान्तरदानेन समीकृत्य विक्रीय वा तन्मूल्यं विभजेत्। अजाविकमिति पशुद्वन्द्वा-द्विभाषैकवद्भावः॥११९॥

यवीयाञ्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि।
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः॥१२०॥

If a younger brother begets a son on the wife of the elder, the division must then be made equally; thus the law is settled.

कनिष्ठो यदि ज्येष्ठभ्रातृभार्यायां नियोगेन पुत्रं जनयेत्तदा तेन पितृव्येण सह तस्य क्षेत्रजस्य समो विभागः स्यान्नतु पितृवत्सोद्धारो भवतीति विभागव्यवस्था नियता। अनियोगोत्पन्नस्यानंशित्वं वक्ष्यति। यद्यपि "समेत्य भ्रातरः समम्" (अ. ९ श्लो. १०४) इत्युक्तं तथाप्यस्मादेव लिन्नात्पौत्रस्यापि मृतपितृकस्य पैतामहे धने पितृव्यवद्विभागोऽस्तीति गम्यते॥१२०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ज्येष्ठभ्रातुः क्षेत्रजः पुत्रोऽपि पितेव सोद्धारविभागी युक्त इतीमां शङ्कां निराकृत्य पूर्वोक्तमेव द्रढयति-

उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते।
पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत्॥१२१॥

The representative (the son begotten on the wife) is not invested with the right of the principal (the eldest brother to an additional share); the principal (became) a father on the procreation (of a son by his younger brother); hence one should give a share to the (son begotten on the wife of the elder brother) according to the rule (stated above).

अप्रधानं क्षेत्रजः पुत्रः प्रधानस्य क्षेत्रिणः पितृधर्मेण सोद्धारविभागग्रहणरूपेण न संबध्यते। क्षेत्र्यपि पिता तद्द्वारेणापत्योत्पादने प्रधानम्। तस्मात्पूर्वोक्तेनैव धर्मेण विभागव्यवस्थारूपेण पितृव्येन सह तं क्षेजं विभजेदिति पूर्वस्यैव शेषः॥१२१॥

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः।
कथं तत्र विभागः स्यादिति चेत्संशयो भवेत्॥१२२॥

If there be a doubt, how the division shall be made, in case the younger son is born of the elder wife and the elder son of the younger wife.

यदि प्रथमोढायां कनीयान्पुत्रो जातः पश्चादूढायां च ज्येष्ठस्तदा तत्र कथं विभागो भवेदिति संशयो यदि स्यात्किं मातुरुद्वाहक्रमेण पुत्रस्य ज्येष्ठत्वमुत स्वजन्मक्रमेणेति तदाह॥१२२॥

एकं वृषभमुद्धारं संहरेत स पूर्वजः।
ततोऽपरे ज्येष्ठवृषास्तदूनानां स्वमातृतः॥१२३॥

(Then the son) born of the first wife shall take as his additional share one (most excellent) bull; the next best bulls (shall belong) to those (who are) inferior on account of their mothers.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो भ्रातरः स्वजात्यपेक्षया स्वेभ्यश्चतुरोंऽशान् हरेयुः। विप्र इत्यादिना वक्ष्यमाणेभ्यो भागेभ्य आत्मीयादात्मीयाद्भागाञ्चतुर्थभागं पृथक्कन्याभ्योऽनूढाभ्यो भगिनीभ्यो या यस्य सोदर्या भगिनी स तस्या एवं संस्कारार्थमिति एवं दद्युः। सोदर्याभावे विमातृजैरुत्कृष्टैरपकृष्टैरपि संस्कार्यैव। तथाच याज्ञवल्क्यः- "असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकम्॥" यदि भगिनीसंस्कारार्थं चतुर्भागं दातुं नेच्छन्ति तदा पतिता भवेयुः। एतेनैकजातीयवैमात्रेयबहुपुत्रभगिनीसद्भावेऽपि सोदर्य-भगिनीभ्यश्चतुर्थभागदानमवगन्तव्यम्॥११८॥

अजाविकं सैकशफं न जातु विषमं भजेत्।
अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते॥११९॥

Let him never divide (the value of) a single goat or sheep, or a (single beast) with uncloven hoofs; it is prescribed (that) a single goat or sheep (remaining after an equal division, belongs) to the eldest alone.

एकशफा अश्वादयः। छागमेषाद्येकशफसहितं विभागकाले समं कृत्वा विभक्तुमशक्यं तन्न विभजेत्किंतु ज्येष्ठस्यैव तत्स्यान्नतु तत्तुल्यद्रव्यान्तरदानेन समीकृत्य विक्रीय वा तन्मूल्यं विभजेत्। अजाविकमिति पशुद्वन्द्वा-द्विभाषैकवद्भावः॥११९॥

यवीयाञ्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि।
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः॥१२०॥

If a younger brother begets a son on the wife of the elder, the division must then be made equally; thus the law is settled.

कनिष्ठो यदि ज्येष्ठभ्रातृभार्यायां नियोगेन पुत्रं जनयेत्तदा तेन पितृव्येण सह तस्य क्षेत्रजस्य समो विभागः स्यान्नतु पितृवत्सोद्धारो भवतीति विभागव्यवस्था नियता। अनियोगोत्पन्नस्यानंशित्वं वक्ष्यति। यद्यपि "समेत्य भ्रातरः समम्" (अ. ९ श्लो. १०४) इत्युक्तं तथाप्यस्मादेव लिन्नात्पौत्रस्यापि मृतपितृकस्य पैतामहे धने पितृव्यवद्विभागोऽस्तीति गम्यते॥१२०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ज्येष्ठभ्रातुः क्षेत्रजः पुत्रोऽपि पितेव सोद्धारविभागी युक्त इतीमां शङ्कां निराकृत्य पूर्वोक्तमेव द्रढयति-

उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते।
पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत्॥१२१॥

The representative (the son begotten on the wife) is not invested with the right of the principal (the eldest brother to an additional share); the principal (became) a father on the procreation (of a son by his younger brother); hence one should give a share to the (son begotten on the wife of the elder brother) according to the rule (stated above).

अप्रधानं क्षेत्रजः पुत्रः प्रधानस्य क्षेत्रिणः पितृधर्मेण सोद्धारविभागग्रहणरूपेण न संबध्यते। क्षेत्र्यपि पिता तद्द्वारेणापत्योत्पादने प्रधानम्। तस्मात्पूर्वोक्तेनैव धर्मेण विभागव्यवस्थारूपेण पितृव्येन सह तं क्षेजं विभजेदिति पूर्वस्यैव शेषः॥१२१॥

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः।
कथं तत्र विभागः स्यादिति चेत्संशयो भवेत्॥१२२॥

If there be a doubt, how the division shall be made, in case the younger son is born of the elder wife and the elder son of the younger wife.

यदि प्रथमोढायां कनीयान्पुत्रो जातः पश्चादूढायां च ज्येष्ठस्तदा तत्र कथं विभागो भवेदिति संशयो यदि स्यात्किं मातुरुद्वाहक्रमेण पुत्रस्य ज्येष्ठत्वमुत स्वजन्मक्रमेणेति तदाह॥१२२॥

एकं वृषभमुद्धारं संहरेत स पूर्वजः।
ततोऽपरे ज्येष्ठवृषास्तदूनानां स्वमातृतः॥१२३॥

(Then the son) born of the first wife shall take as his additional share one (most excellent) bull; the next best bulls (shall belong) to those (who are) inferior on account of their mothers.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्वस्यां जातः पूर्वजः। "डण्यापोः संज्ञाछन्दसोर्बहुलम्" (पा. सू. ६/३/६३) इति ह्रतस्वत्वम्। स कनिष्टोऽप्येकं वृषभमुद्धारं गृह्णीयात्ततः श्रेष्ठवृषभादन्ये ये सन्त्यग्र्याः श्रेष्ठवृषभास्ते तस्माज्ज्यैष्ठिनेयान्मातृत ऊनानां कनिष्ठेयानां प्रत्येकमेकैकशो भवन्तीति मात्रुद्वाहक्रमेण ज्यैष्ठ्यम्॥१२३॥

ज्येष्ठस्तु जातो ज्येष्ठायां हरेद्वृषभषोडशाः।
ततः स्वमातृतः शेषा भजेरन्निति धारणा॥१२४॥

But the eldest (son, being) born of the eldest wife, shall receive fifteen coiws and a bull, the other sons may then take shares according to (the seniority of) their mothers; that is a settled rule.

प्रथमोढायां पुनर्यो जातो जन्मना च भ्रातृभ्यो ज्येष्ठः स वृषभः षोडशो यासां गवां ता गृह्णीयात्। पञ्चदश गा एकं वृषभमित्यर्थः। ततोऽनन्तरं येऽन्ये बह्वीभ्यो जातास्ते स्वमातृभागत ऊढज्येष्ठापेक्षया शेषा भागादि विभजेरन्निति निश्चयः॥१२४॥

सदृशस्त्रीषु जातानां पुत्राणामविशेषतः।
न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते॥१२५॥

Between sons born of wives equal (in caste) (and) without (any other) distinction no seniority in right of the mother exists; seniority is declared (to be) according to birth.

समानजातीयस्त्रीषु जातानां पुत्राणां जातिगतविशेषाभावे सति न मातृक्रमेण ज्यैष्ठ्यमृषिभिरुच्यते। जन्मज्येष्ठानां तु पूर्वोक्त एव विंशतिभागादिरुद्धारो बोद्धव्यः। एवंच मातृज्यैष्ठ्यस्य विहितप्रतिषिद्धत्वात्षोडशीग्रहणाग्रहणवद्विकल्पः। स च गुणवन्निर्गुणतया भ्रातृणां गुरुलघुत्वावगमाद्व्यवस्थितः। अतएव "जन्मविद्यागुणज्येष्ठो त्र्यंशं दायादवाप्नुयात्" इति बृहस्पत्यादिभिर्जन्मज्येष्ठस्य विद्याद्युत्कर्षेणोद्धारोत्कर्ष उक्तः। "निर्गुणस्यैकवृषभम्" इति, मन्दगुणस्य "वृषभषोडशाः" इति मातृज्यैष्ठ्याश्रयणेनोद्धारो बोद्धव्यः। मातृज्यैष्ठ्यविधित्वनुवादं मेधातिथिरवदत्। गोविन्दराजस्त्वन्यमतं जगौ॥१२५॥

न केवलं विभागे जन्मज्यैष्ठ्यं किंतु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम्।
यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता॥१२६॥

And with respect to the Subrahmaṇayā (texts) also it is recorded that the invocation (of Indra shall be made) by the first-born, or twins likewise, (conceived at one time) in the wombs (of their mothers) the sneiority is declared (to depend) on (actual) birth.

सुब्रह्मण्याख्यो मन्त्रो ज्योतिष्टोम इतीन्द्रस्याह्वानार्थं प्रयुज्यते। तत्र प्रथमपुत्रेण पितरमुद्दिश्याह्वानं क्रियते। अमुकपिता यजत इत्येवमृषिभिः स्मृतम्। तथा यमयोर्गर्भ एककालं निषिक्तयोरपि जन्मक्रमेणैव ज्येष्ठता स्मृता गर्भेष्विति बहुवचनं स्त्रीबहुत्वापेक्षया॥१२६॥

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम्॥१२७॥
[अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥३॥]

He who has no son may make his daughter in the following manner an appointed daughter (putrikā, saying to her husband), 'The (male) child, born of her, shall perform my uneral rites.'

अविद्यमानपुत्रो यदस्यामपत्यं जायेत तन्मम श्राद्धाद्यौर्ध्वदेहिककरं स्यादिति कन्यादानकाले जामात्रा सह संप्रतिपत्तिरूपेण विधानेन दुहितरं पुत्रिकां कुर्यात्॥१२७॥

अत्र परप्रतिपत्तिरूपमनुवादमाह–

अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः।
विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः॥१२८॥

According to this rule Dakṣa, himself, lord of created beings, formerly made (all his female offspring) appointed daughters in order to multiply his race.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दक्षः प्रजापतिः पुत्रोत्पादनविधिज्ञः स्ववंशवृद्ध्यर्थमनेनोक्तविधानेन कृत्स्ना दुहितरः पूर्वं पुत्रिकाः स्वयं कृतवान्। कात्स्न्र्येऽथशब्दः॥१२८॥

ददौ स दश धर्माय कश्यपाय त्रयोदश।
सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम्॥१२९॥

He gave ten to Dharma, thirteen to Kaśyapa, twenty-seven to King Soma, honouring (them) with an affectionate heart.

स दक्षो भाविपुत्रिकापुत्रलाभेन प्रीतात्मालंकारादिना सत्कृत्य दश पुत्रिका धर्माय, त्रयोदश कश्यपाय, सप्तविंशतिं चन्द्राय द्विजानामोषधीनां च राज्ञे दत्तवान्। सत्कारवचनमन्येषामपि पुत्रिकाकरणे लिन्नम्। दशेत्यादि च बह्वीनामपि पुत्रिकाकरणज्ञापकम्॥१२९॥

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्॥१३०॥

A son is even (as) oneself, (such) a daughter is equal to a son; how can another (heir) take the estate, while such (an appointed daughter who is even) oneself, lives?

आत्मस्थानीयः पुत्रः "आत्मा वै पुत्रनामासि" इति मन्त्रलिन्नात्तत्समा च दुहिता तस्या अप्यन्नेभ्य उत्पादनात्। अतस्तस्यां पुत्रिकायां पितुरात्मस्वरूपायां विद्यमानायामपुत्रस्य मृतस्य पितुर्धनं पुत्रिकाव्यतिरिक्तः कथमन्यो हरेत्॥१३०॥

मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः।
दौहित्र एव च हरेदपुत्रस्याखिलं धनम्॥१३१॥

But whatever may be the separate property of the mother, that is the share of the unmarried daughter alone; and the son of an (appointed) daughter shall take the whole estate of (his maternal grandfather) who leaves no son.

मातुर्यद्धनं तत्तस्यां मृतायां कुमारीभाग एव स्यान्न पुत्राणां तत्र भागः। कुमारी चानूढाभिप्रेता। तथा गोतमः-"स्त्रीधनं दुहितृणामदत्तानामप्रतिष्ठितानां च अपुत्रस्य च मातामहस्य दौहित्र एव प्रकृतत्वात्पौत्रिकेयः समग्रं धनं गृह्णीयात्" इति॥१३१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत्।
स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च॥१३२॥

The son of an (appointed) daughter, indeed, shall (also) take the estate of his (own) father, who leaves no (other) son; he shall (then) present two furneral cakes to his own father and to his maternal grandfather.

दौहित्रः प्रकृतत्वात्पौत्रिकेय एव, तस्य मातामहधनग्रहणमनन्तरोक्तं जनकधनग्रहणं च। पिण्डदानार्थोऽयमारम्भः, पितृशब्दस्य तत्रैव प्रसिद्धत्वात्। अन्यस्य पात्रिकेयः पुत्रान्तररहितस्य जनकस्य समग्रं धनं गृह्णीयात्स एव पितृमातामहाभ्यां द्वौ पिण्डौ दद्यात्। पिण्डदानं श्राद्धोपलक्षणार्थम्। पौत्रिकेयत्वेन जनकधनग्रहण- पिण्डदानव्यामोहनिरासर्थं वचनम्॥१३२॥

पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः।
तयोर्हि मातापितरौ संभूतौ तस्य देहतः॥१३३॥

Between a son's son and the son of an (appointed) daughter there is no difference, neither with respect to worldly matters nor to sacred duties; for their father and mother both sprang from the body of the same (man).

पौत्रपौत्रिकेययोर्लोके धर्मकृत्ये न कश्चिद्विशेषोऽस्ति। यस्मात्तयोर्मातापितरौ तस्य देहादुत्पन्नाविति पूर्वस्यैवानुवादः॥१३३॥

पुत्रिकायां कृतायां तु यदि पुत्रोऽनु जायते।
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः॥१३४॥

But if, after a daughter has been appointed, a son be born (to her father), the division (of the inheritance) must in that (case) be equal; for there is not right of primogeniture for a woman.

कृतायां पुत्रिकायां यदि तत्कर्तुः पुत्रोऽनन्तरं जायते तदा तयोर्विभागकाले समो विभागो भवेत्। नोद्धारः पुत्रिकायै देयः। यस्माज्ज्येष्ठाया अपि तस्या उद्धारविषये ज्येष्ठता नादरणीया॥१३४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अपुत्रायां मृतायां तु पुत्रिकायां कथंचन।
धनं तत्पुत्रिकाभर्ता हरेतैवाविचारयन्॥१३५॥

But if an appointed daughter by accident dies without (leaving) a son, the husband of the appointed daughter may, without hesitation, take that estate.

अपुत्रायां पुत्रिकायां कथंचन मृतायां तदीयधनं तद्भर्तैवाविचारयन्गृह्णीयात्। पुत्रिकायाः पुत्रसमत्वेनानपत्यस्य पत्नीरहितस्य मृतपुत्रस्य पितुर्धनग्रहणप्रसक्तौ तन्निवारणार्थमिदं वचनम्॥१३५॥

अकृता वा कृता वापि यं विन्देत्सदृशात्सुतम्।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्॥१३६॥

Through that son whom (a daughter), either not appointed or appointed, may bear to (a husband) of equal (caste), his maternal grandfather (has) a son's son; he shall present the funeral cake and take the estate.

अकृता वा कृता वेति पुत्रिकाया एव द्वैविध्यं, तत्र "यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम्" (अ. ९ श्लो. १२७) इत्यभिधाय कन्यादानकाले वरानुमत्या या क्रियते सा कृताभिसंधिमात्रकृता वाग्व्यवहारेण न कृता। तथा गोतमः-"अभिसंधिमात्रात्पुत्रिकामेकेषाम्"। अतएव "पुत्रिकाधर्मशंकया" (अ. ३ श्लो. ११) इति प्रागविवाह्यत्वमुक्तम्। पुत्रिकेव कृताऽकृता वा पुत्रं समानजातीयाद्बोढुरुत्पादयेत्तेन दौहित्रेण पौत्रकार्यकरणात्पौत्रिकेयवान्मातामहः पौत्री। तथा चासौ तस्मै पिण्डं दद्यात्। गोविन्दराजस्तु "अकृता वा" इत्यपुत्रिकैव दुहिता तत्पुत्रोऽपि मातामहधने पौत्रिकेय इव मातामह्यादिसत्त्वेऽप्यधिकारीत्याह। तन्न। पुत्रिकायाः पुत्रतुल्यत्वादपुत्रिकातत्पुत्रयोरतुल्यत्वेन तत्पुत्रयोस्तुल्यत्वायोग्यत्वादिति॥१३६॥

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्॥१३७॥

Through a son he conquers the worlds, through a son's son he obtains immortality, but through his son's grandson

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

he gains the world of the sun.

पुत्रेण जातेन स्वर्गादिलोकान्प्राप्नोतीति पौत्रेण तेष्वेव चिरकालमवतिष्ठते। तदनन्तरं पुत्रस्य पौत्रेणादित्यलोकं प्राप्नोति। अस्य च दायभागप्रकरणेऽभिधानं पितुर्धने पत्न्यादिसद्भावेऽपि पुत्रस्य तदभावे पौत्रस्येत्येवं पुत्रसंतानाधिकार-बोधनार्थम्॥१३७॥

पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा॥१३८॥

Because a son delivers (trāyate) his father from the hell called Put, he was therefore called put-tra (a devliverer from Put) by the Self-existent (Svayambhū) himself.

यस्मात्पुंनामधेयनरकात्सुतः पितरं त्रायते तस्मात्त्राणादात्मनैव ब्रह्मणा पुत्र इति प्रोक्तः। तस्मान्महोपकारकत्वात्पुत्रस्य युक्तं तदीयपुंसंतानस्य दायभागित्वमिति पूर्वदाढर्यार्थमिदम्॥१३८॥

पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते॥
दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत्॥१३९॥

Between a son's son and the son of a daughter there exists in this world no difference; for even the son of a daughter saves him (who has no sons) in the next world, like the son's son.

दौहित्रः पुत्रिकापुत्रः। पुत्रदौहित्रयोर्लोके कश्चिद्विशेषो न संभाव्यते, यस्माद्दौहित्रोऽपि मातामहं परलोके पौत्रवन्निस्तारयति। एतच्च पौत्रिकेयस्य पौत्रेण साम्यप्रतिपादनार्थं पुत्रिकाकरणानन्तरजातपुत्रेण सह धने तुल्यभागबोधनार्थम्॥१३९॥

मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः।
द्वितीयं तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः॥१४०॥

Let the son of an appointed daughter first present a funeral cake to his mother, the second to her father, the third to his father's father.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पौत्रिकेयः प्रथमं मात्रे पिण्डं द्वितीयं मातुः पित्रे, तृतीयं मातुः पितामहाय दद्यात्। पित्रादीनां तु "पित्रे मातामहाय च" (अ. ९ श्लो. १३२) इत्युक्तत्वात्पितृक्रमेणैव पिण्डदानम्॥१४०॥

उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्त्रिमः।
स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः॥१४१॥

Of the man who has an adopted (Datrima) son possessing all good qualities, that same (son) shall take the inheritance, though brought from another family.

"पुत्रा रिक्थहराः पितुः" (अ. ९ श्लो. १८५) इति द्वादश पुत्राणामेव रिक्थहरत्वं वक्ष्यति। "दशापरे तु क्रमशः" (अ. ९ श्लो. १६५) इत्यौरसक्षेत्रजाभावे दत्तस्य पितृ रिक्थहरत्वं प्राप्तमेव। अतः सत्यप्यौरसपुत्रे दत्तकस्य सर्वगुणोपपन्नस्य पितृरिक्थभागप्राप्त्यर्थमिदं वचनम्। यस्य दत्तकः पुत्रोऽध्ययनादिसर्वगुणोपपन्नो भवति सोऽन्यगोत्रादागतोऽपि सत्यप्यौरसे पितृरिक्थभागं गृह्णीयात्। अत्र "एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः" (अ. ९ श्लो. १६३) इत्यौरसस्य सर्वोत्कर्षाभिधानात्तेन नास्य समभागित्वं किंतु क्षेत्रजोक्तषष्ठभागित्वमेवास्य न्याय्यम्। गोविन्दराजस्त्वौरसक्षेत्रजाभावे सर्वगुणोपपन्नस्यैव दत्तकस्य पितृरिक्थभागित्वार्थमिदं वचनमित्यवोचत्। तन्न। कृतिमादीनां निर्गुणानां पितृरिक्थभागित्वं दत्तकस्य तु तत्पूर्वपठितस्यापि सर्वगुणोपपन्नस्यैवेत्यन्याय्यत्वात्॥१४१॥

गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः क्वचित्।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥१४२॥

An adopted son shall never take the family (name) and the estate of his naurla father; (the funeral cake follows the family (name) and the estate, the funeral offerings of him who gives (his son in adoption) cease (as far as that son is concerned).

गोत्रधने जनकसंबन्धिनी दत्तको न कदाचित्प्राप्नुयात्। पिण्डश्च गोत्ररिक्थानुगामी यस्य गोत्ररिक्थे भजते तस्यैव स पिण्डो दीयते। तस्मात्पुत्रं ददतो जनकस्य स्वधापिण्डश्राद्धादि तत्पुत्रकर्तृकं निवर्तते॥१४२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात्।
उभौ तौ नार्हतो भागं जारजातककामजौ ॥१४३॥

The son of a wife, not appointed (to have issue by another), and he whom (an appointed female, already) the mother of a son, bears to her brother-in-law, are both unworthy of a share, (one being) the son of an adulterer and (the other) produced through (mere) lust.

यो गुर्वादिनियोगं विना जातो यश्च सपुत्राया नियोगेनापि देवरादेः कामादुत्पादितस्तावुभौ क्रमेण जारोत्पन्नकामाभिलाषजौ धनभागं नार्हतः ॥१४३॥

नियुक्तायामपि पुमान्नार्यां जातोऽविधानतः।
नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः ॥१४४॥

Even the male (child) of a female (duly) appointed, not begotten according to the rule (given above), is unworthy of the paternal estate; for he was procreated by an outcast.

नियुक्तायामपि स्त्रियां घृताभ्यक्तत्वादिनियोगेतिकर्तव्यतां विना पुत्रो जातः स क्षेत्रिकस्य पितुर्धनं लब्धुं नार्हति। यस्मादसौ पतितेनोत्पादितः। "नियुक्तौ यौ विधि हित्वा" (अ. ९ श्लो. ६३) इत्यनेन पतितस्योक्तत्वात् ॥१४४॥

हरेत्तत्र नियुक्तायां जातः पुत्रो यथौरसः।
क्षेत्रिकस्य तु तद्बीजं धर्मतः प्रसवश्च सः ॥१४५॥

A son (legally) begotten on such an appointed female shall inherit like a legitimate son of the body; for that seed and the produce belong, according to the law, to the owner of the soil.

तत्र नियुक्तायां यो जातः क्षेत्रजः पुत्र औरस इव नं हरेत्। यस्मात्तत्तस्य कारणभूतं बीजं तत्क्षेत्रस्वामिन एव, तत्कार्यकरणत्वात्। अपत्यमपि च धर्मतस्तदीयं तत् "यवीयाञ्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि" (अ. ९ श्लो. १२०) इत्यनेन क्षेत्रजस्य पितामहधने पितृव्येन सह समभागस्य प्रोक्तत्वात्। गुणवतः क्षेत्रजस्य औरसवत्स्वोद्धारभागप्राप्त्यर्थमिदमौरसतुल्यत्वाअभिधानम् ॥१४५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पौत्रिकेयः प्रथमं मात्रे पिण्डं द्वितीयं मातुः पित्रे, तृतीयं मातुः पितामहाय दद्यात्। पित्रादीनां तु "पित्रे मातामहाय च" (अ. ९ श्लो. १३२) इत्युक्तत्वात्पितृक्रमेणैव पिण्डदानम्॥१४०॥

उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्त्रिमः।
स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः॥१४१॥

Of the man who has an adopted (Datrima) son possessing all good qualities, that same (son) shall take the inheritance, though brought from another family.

"पुत्रा रिक्थहराः पितुः" (अ. ९ श्लो. १८५) इति द्वादश पुत्राणामेव रिक्थहरत्वं वक्ष्यति। "दशापरे तु क्रमशः" (अ. ९ श्लो. १६५) इत्यौरसक्षेत्रजाभावे दत्तस्य पितू रिक्थहरत्वं प्राप्तमेव। अतः सत्यप्यौरसपुत्रे दत्तकस्य सर्वगुणोपपन्नस्य पितृरिक्थभागप्राप्त्यर्थमिदं वचनम्। यस्य दत्तकः पुत्रोऽध्ययनादिसर्वगुणोपपन्नो भवति सोऽन्यगोत्रादागतोऽपि सत्यप्यौरसे पितृरिक्थभागं गृह्णीयात्। अत्र "एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः" (अ. ९ श्लो. १६३) इत्यौरसस्य सर्वोत्कर्षाभिधानात्तेन नास्य समभागित्वं किंतु क्षेत्रजोक्तषष्ठभागित्वमेवास्य न्याय्यम्। गोविन्दराजस्त्वौरसक्षेत्रजाभावे सर्वगुणोपपन्नस्यैव दत्तकस्य पितृरिक्थभागित्वार्थमिदं वचनमित्यवोचत्। तन्न। कृतिमादीनां निर्गुणानां पितृरिक्थभागित्वं दत्तकस्य तु तत्पूर्वपठितस्यापि सर्वगुणोपपन्नस्यैवेत्यन्याय्यत्वात्॥१४१॥

गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः क्वचित्।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥१४२॥

An adopted son shall never take the family (name) and the estate of his naurla father; (the funeral cake follows the family (name) and the estate, the funeral offerings of him who gives (his son in adoption) cease (as far as that son is concerned).

गोत्रधने जनकसंबन्धिनी दत्तको न कदाचित्प्राप्नुयात्। पिण्डश्च गोत्ररिक्थानुगामी यस्य गोत्ररिक्थे भजते तस्यैव स पिण्डो दीयते। तस्मात्पुत्रं ददतो जनकस्य स्वधापिण्डश्राद्धादि तत्पुत्रकर्तृकं निवर्तते॥१४२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात्।
उभौ तौ नार्हतो भागं जारजातककामजौ ॥१४३॥

The son of a wife, not appointed (to have issue by another), and he whom (an appointed female, already) the mother of a son, bears to her brother-in-law, are both unworthy of a share, (one being) the son of an adulterer and (the other) produced through (mere) lust.

यो गुर्वादिनियोगं विना जातो यश्च सपुत्राया नियोगेनापि देवरादेः कामादुत्पादितस्तावुभौ क्रमेण जारोत्पन्नकामाभिलाषजौ धनभागं नार्हतः ॥१४३॥

नियुक्तायामपि पुमान्नार्यां जातोऽविधानतः।
नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः ॥१४४॥

Even the male (child) of a female (duly) appointed, not begotten according to the rule (given above), is unworthy of the paternal estate; for he was procreated by an outcast.

नियुक्तायामपि स्त्रियां घृताभ्यक्तत्वादिनियोगेतिकर्तव्यतां विना पुत्रो जातः स क्षेत्रिकस्य पितुर्धनं लब्धुं नार्हति। यस्मादसौ पतितेनोत्पादितः। "नियुक्तौ यौ विधि हित्वा" (अ. ९ श्लो. ६३) इत्यनेन पतितस्योक्तत्वात् ॥१४४॥

हरेत्तत्र नियुक्तायां जातः पुत्रो यथौरसः।
क्षेत्रिकस्य तु तद्बीजं धर्मतः प्रसवश्च सः ॥१४५॥

A son (legally) begotten on such an appointed female shall inherit like a legitimate son of the body; for that seed and the produce belong, according to the law, to the owner of the soil.

तत्र नियुक्तायां यो जातः क्षेत्रजः पुत्र औरस इव नं हरेत्। यस्मात्तत्तस्य कारणभूतं बीजं तत्क्षेत्रस्वामिन एव, तत्कार्यकरणत्वात्। अपत्यमपि च धर्मतस्तदीयं तत् "यवीयाञ्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि" (अ. ९ श्लो. १२०) इत्यनेन क्षेत्रजस्य पितामहधने पितृव्येन सह समभागस्य प्रोक्तत्वात्। गुणवतः क्षेत्रजस्य औरसवत्स्वोद्धारभागप्राप्त्यर्थमिदमौरसतुल्यत्वाअभिधानम् ॥१४५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव च।
सोपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम्॥१४६॥

He who takes care of his dceased brother's estate and of his widow, shall, after raising up a son for his brother, give that property even to that (son).

यो मृतस्य भ्रातुः स्थावरजन्नमं धनं पत्न्या रक्षणाक्षमया समर्पितं रक्षेत्तां च पुष्णीयात्स नियोगधर्मेण तस्यामुत्पादितस्य भ्रातुरपत्यस्य दद्यात्। एतच्च "धनं यो बिभृयाद्भ्रातुः" इत्यभिधानाद्विभक्तभ्रातृविषयम्, "यवीयाञ्ज्येष्ठभार्यायाम्" (अ. ९ श्लो. १२०) इति समभागाभिधानात्॥१४६॥

या नियुक्तान्यतः पुत्रं देवराद्वाप्यवाप्नुयात्।
तं कामजमरिक्थीयं वृथोत्पन्नं प्रचक्षते॥१४७॥

If a woman (duly) appointed bears a son to her brother-in-law or to another (Sapinda), that (son, if he is) begotten through desire, they declare (to be) incapable of inheriting and to be produced in vain.

या स्त्री गुर्वादिभिरनुज्ञाता देवराद्वान्यतो वा सपिण्डात्पुत्रमुत्पादयेत्स यदि कामजो भवति तदा तमरिक्थभाजं मन्वादयो वदन्ति। अकामज एव रिक्थभागी। स च व्याहृतो नारदेन- "मुखान्मुखं परिहरन्नात्रैर्गात्राण्यसंस्पृशन्। कुले तदवशेषे च संतानार्थं न कामतः॥" इति॥१४७॥

एतद्विधानं विज्ञेयं विभागस्यैकयोनिषु।
बह्वीषु चैकजातानां नानास्त्रीषु निबोधत॥१४८॥

The rules (given above) must be understood (to apply) to a distribution among sons of women of the same (caste); hear (now the law) concerning those begotten by one man on many wives of different (castes).

समानजातीयासु भार्यासु एकेन भर्त्रा जातानामेष विभागविधिर्बोद्धव्यः। इदानीं नानाजातीयासु स्त्रीषु बह्वीषूत्पन्नानां पुत्राणां शृणुत॥१४८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः।
तासां पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः॥१४९॥

If there be four wives of a Brāhmaṇa in the direct order of the castes, the rule for the division (of the estate) among the sons born of them is as follows :

ब्राह्मणस्य यदि क्रमेण ब्राह्मण्याद्याश्चतस्रो भार्या भवेयुस्तदा तासां त्रिषूत्पन्नेष्वयं वक्ष्यमाणो विभागविधिर्मन्वादिभिरुक्तः॥१४९॥

कीनाशो गोवृषो यानमलंकारश्च वेश्म च।
विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः॥१५०॥

The (slave) who tills (the field), the bull kept for impregnating cows, the vehicle, the ornaments, and the house shall be given as an additional portion to the Brāhmaṇa (son), and one most excellent share.

कीनाशः कर्षकः, गवां सक्तो वृषः, यानमश्वादि, अलंकारोऽन्न लीयकादि, वेश्म गृहं च प्रधानं यावन्तश्चांशास्तेष्वेकः प्रधानभूतोंऽश इत्येतद्ब्राह्मणीपुत्रस्योद्धारार्थं देयम्। अवशिष्टं वक्ष्यमाणरीत्या विभजनीयम्॥१५०॥

त्र्यंश दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः।
वैश्याजः सार्धमेवांशमंशं शूद्रासुतो हरेत्॥१५१॥

Let the son of the Brāhmaṇī (wife) take three shares of the (remainder of the) estate, the son of the Kṣatriyā two, the son of the Vaiśyā a share and a half, and the son of the Śūdrā may take one share.

त्रीनंशान्ब्राह्मणो धनाद्गृह्णीयात्। द्वौ क्षत्रियापुत्रः सार्धं वैश्यापुत्रः। अंशं शूद्रासुतः। एवंच यत्र ब्राह्मणीक्षत्रियापुत्रौ द्वावेव विद्येते तत्र पञ्चधा कृते धने त्रयो भागा ब्राह्मणस्य, द्वौ क्षत्रियापुत्रस्य। अनयैव दिशा ब्राह्मणीवैश्यापुत्रादौ द्विबहुपुत्रादौ च कल्पना कार्या॥१५१॥

सर्वं वा रिक्थजातं तद्दशधा परिकल्प्य च।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित्॥१५२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Or let him who knows the law make ten shares of the whole estate, and justly distribute them according to the following rule.

यद्वा सर्वं रिक्थप्रकारमनुद्धृतोद्धारं दशधा कृत्वा, विभागधर्मज्ञो धर्मादनपेतं विभागमनेन वक्ष्यमाणविधिना कुर्वीत ॥१५२॥

चतुरोंऽशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः।
वैश्यापुत्रो हरेदद्वयंशमंशं शूद्रासुतो हरेत्॥१५३॥

The Brāhmaṇa (son) shall take four shares, the son of the Kṣatriyā (wife) three, the son of the Vaiśyā shall have two parts, the son of the Śūdrā may take one share.

चतुरो भागान्ब्राह्मणो गृह्णीयात्। त्रीन्क्षत्रियापुत्रः। द्वौ वैश्यापुत्रः। एकं शूद्राजः। अत्रापि ब्राह्मणीक्षत्रियापुत्रसद्भावे सप्तधा धने कृते चत्वारो भागा ब्राह्मणस्य। त्रयः क्षत्रियापुत्रस्य। एवं ब्राह्मणीवैश्यापुत्रादौ द्विबहुपुत्रेषु च कल्पना कार्या॥१५३॥

यद्यपि स्यात्तु सत्पुत्रोऽप्यसत्पुत्रोऽपि वा भवेत्।
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः॥१५४॥

Whether (a Brāhmaṇa) have sons or have no sons (by wives of the twice-born castes), the (heir) must, according to the law, give to the son of a Śūdra (wife) no more than a tenth (part of his estate).

यदि ब्राह्मणो द्विजातिस्त्रीषु सर्वासु विद्यमानपुत्रः स्यादविद्यमानपुत्रो वा तथापि शूद्रापुत्रायानन्तराधिकारी यस्तेषु दशमभागादधिकं धर्मतो न दद्यात्। एवं च शूद्रापुत्रविषये निषेधादि विद्यमानसजातिपुत्रस्य क्षत्रियावैश्यापुत्रौ सर्वरिक्थहरौ स्याताम्॥१५४॥

ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्।
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्॥१५५॥

The son of a Brāhmaṇa, a Kṣatriya, and a Vaiśya by a Śūdra (wife) receives no share of the inheritance; whatever his father may give to him, that shall be his property.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणक्षत्रियवैश्यानां शूद्रापुत्रो धनभाङ्न भवति, किंतु यदेव धनमस्मै पिता दद्यात्तदेव तस्य भवेत्। एवंच पूर्वोक्तविभागनिषेधाद्विकल्पः सच गुणवदगुणापेक्षः। अथवा अनूढशूद्रापुत्रविषयोऽयं दशमभागनिषेधः॥१५५॥

समवर्णासु ये जाताः सर्वे पुत्रा द्विजन्मनाम्।
उद्धारं ज्यायसे दत्त्वा भजेरन्नितरे समम्॥१५६॥

All the sons of twice-born men, born of wives of the same caste, shall equally divide the estate, after the others have given to the eldest an additional share.

द्विजातीनां समानजातिभार्यासु ये पुत्रा जातास्ते सर्वे ज्येष्ठायोद्धारं दत्त्वावविष्टं समभागं कृत्वा ज्येष्ठेन सहान्ये विभजेरन्॥१५६॥

शूद्रस्य तु सवर्णैव नान्या भार्या विधीयते।
तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत्॥१५७॥

For a Śūdra is ordained a wife of his own caste only (and) no other; those born of her shall have equal shares, even if there be a hundred sons.

शूद्रस्य पुनः समानजातीयैव भार्योपदिश्यते नोत्कृष्टावकृष्टा वा। तस्यां च ये जातास्ते यदि पुत्रशतमपि तदा समभागा एव भवेषुः। तेनोद्धारः कस्यचिन्न देयः॥१५७॥

पुत्रान्द्वादश यानाह नृणां स्वायम्भुवो मनुः।
तेषां षड्बन्धुदायादाः षडदायादबान्धवाः॥१५८॥

Among the twelve sons of men whom Manu, sprung from the Self-existent (Svayambhū), enumerates, six are kinsmen and heirs, and six not heirs, (but) kinsmen.

यान्द्वादश पुत्रान्हैरण्यगर्भो मनुराह तेषां मध्यादाद्याः षड् बान्धवाः गोत्रदायादाश्च, तस्माद्बान्धवत्वेन सपिण्डसमानोदकानां पिण्डोदकदानादि कुर्वन्त्यनन्तराभावे च गोत्रदायं गृह्णन्ति। पितृरिक्थभाक्त्वस्य "पुत्रा रिक्थहराः पितुः (अ. ९ श्लो. १८५)" इति द्वादशविधपुत्राणामेव वक्ष्यमाणत्वात्। उत्तरे षट् न गोत्रधनहरा भवन्ति। बान्धवास्तु भवन्ति ततश्च बन्धुकार्यमुदकक्रियादि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुर्वन्ति। मेधातिथिस्तुषडदायादबान्धवाः इत्याद्युत्तरषट्कस्यादायत्वमबान्धवत्वं चाह। तन्न। बाधायनेन बन्धुत्वस्याभिहितत्वात्। तदाह- ''कानीनं च सहोढं च क्रीतं पौनर्भवं तथा। स्वयंदत्तं निषादं च गोत्रभाजः प्रचक्षते'' ॥१५८॥

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्॥१५९॥

The legitimate son of the body, the son begotten on a wife, the son adopted, the son made, the son secretly born, and the son cast off, (are) the six heirs and kinsmen.

औरसादयो वक्ष्यमाणाः षड्रिक्थभाजो बान्धवाश्च भवन्ति ॥१५९॥

कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयं दत्तश्च शौद्रश्च षडदायादबान्धवाः॥१६०॥

The son of an unmarried damsel, the son received with the wife, the son bought, the son begotten on a re-married woman, the son self-given, and the son of a Śūdra female, (are) the six (who are) not heirs, (but) kinsmen.

कानीनादयो वक्ष्यमाणलक्षणाः षन्नोत्ररिक्थहरा न भवन्ति बान्धवाश्च भवन्तीति व्याख्यातम् ॥१६०॥

औरसेन सह क्षेत्रजादीनां पाठात्तुल्यत्वाशङ्कायां तन्निरासार्थमाह-

यादृशं फलमाप्नोति कुप्लवैः संतरञ्जलम्।
तादृशं फलमाप्नोति कुपुत्रैः संतरंस्तमः॥१६१॥

Whatever result a man obtains who (tries to) cross a (sheet of) water in an unsafe boat, even that result obtains he who (tries to) pass the gloom (of the next world) with (the help of) bad (substitutes for a real) son.

तृणादिनिर्मितकुत्सितोडुपादिभिरुदकं तरन्यथाविधं फलं प्राप्नोति तथाविधमेव कुपुत्रैः क्षेत्रजादिभिः पारलौकिकं दुःखं दुरुत्तरं प्राप्नोति। इत्यनेन क्षेत्रजादीनां मुख्यौरसपुत्रवत्संपूर्णकार्यकरणक्षमत्वं न भवतीति दर्शितम् ॥१६१॥

यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ।
यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः॥१६२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

If the two heirs of one man be a legitimate son of his body and a son begotten on his wife, each (of the two sons), to the exclusion of the other, shall take the estate of his (natural) father.

''अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥'' (अ. २ श्लो. १२७) इति याज्ञवल्क्योक्तविषये, यदा क्षेत्रिकस्य पितुः क्षेत्रजानन्तरमौरसः पुत्रो भवति तदा तावौरसक्षेत्रजावेकरिक्थिनावेकस्य पितुर्यद्यपि रिक्थार्हौ भवतस्तथापि यद्यस्य जनकसंबन्धि तदेव स गृह्णीयान्न क्षेत्रजः क्षेत्रिकपितुः। यत्तु वक्ष्यति-''षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्। औरसो विभजन्दायम्'' (अ. ९ श्लो. १६४) इति तत्पुत्रबहुलस्य। यत्तु याज्ञवल्क्येनोभयसंबन्धि रिक्थहरत्वमुक्तं तत्क्षेत्रिकपितुरौरसपुत्राभावे बोद्धव्यम्। मेधातिथिगोविन्दराजौ तु औरसमनियुक्तापुत्रं च विषयीकृत्येमं श्लोकं व्याचक्षाते। तन्न। अनियुक्तापुत्रस्याक्षेत्रजत्वात्। ''अनियुक्तासुतश्च'' (अ. ९ श्लो. १४३) इत्यनेन तस्य रिक्थग्रहणनिषेधात्। ''यद्येकरिक्थिनौ'' इत्यनन्वयाच्च॥१६२॥

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्॥१६३॥

The legitimate son of the body alone (shall be) the owner of the paternal estate; but, in order to avoid harshness, let him allow a maintenance to the rest.

व्याध्यादिना प्रथमौरसपुत्राभावे क्षेत्रजादिषु कृतेषु पश्चादौषधादिना विगतव्याधेरौरस उत्पन्ने सतीदमुच्यते। औरस एवैकः पुत्रः पितृधनस्वामी। शेषाणां क्षेत्रजव्यतिरिक्तानां तस्य षष्ठांशादेर्वक्ष्यमाणत्वात्पापसंबन्धपरिहारार्थं ग्रासाच्छादनं दद्यात्॥१६३॥

षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्।
औरसो विभजन्दायं पित्र्यं पञ्चममेव वा॥१६४॥

But when the legitimate son of the body divides the paternal estate, he shall give one-sxith or one-fifth part of his father's property to the son begotten on the wife.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

औरसः पुत्रः पितृसंबन्धि दायं विभजन्, क्षेत्रजस्य षष्ठमंशं पञ्चमं वा दद्यात्। निर्गुणसगुणापेक्षश्चायं विकल्पः॥१६४॥

औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ।
दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः॥१६५॥

The legitimate son and the son of the wife (thus) share the father's estate; but the other ten become members of the family, and inherit according to their order(each later named on failure of those named earlier).

औरसक्षेत्रजौ पुत्रावुक्तप्रकारेण पितुधनहरौ स्याताम्। अन्ये पुनर्दश दत्तकादयः पुत्रा गोत्रभाजो भवन्ति, "पूर्वाभावे परः परः" (याज्ञ० अ. २ श्लो. १३२) इत्येवं क्रमेण धनांशहराश्च॥१६५॥

स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम्।
तमौरसं विजानीयात्पुत्रं प्रथमकल्पितम्॥१६६॥

Him whom a man begets on his own wedded wife, let him know to be a legitmate son of the body (Aurasa), the first in rank.

स्वभार्यायां कन्यावस्थायामेव कृतविवाहसंस्कारायां यं स्वयमुत्पादयेत्तं पुत्रमौरसं मुख्यं विद्यात्। "सवर्णायां संस्कृतायामुत्पादितमौरसपुत्रं विद्यात्" इति बौधायनदर्शनात्सजातीयायामेव स्वयमुत्पादित औरसो ज्ञेयः॥१६६॥

यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा।
स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः॥१६७॥

He who was begotten according to the peculiar law (of the Niyoga) on the appointed wife of a dead man, of a eunuch, or of one diseased, is called a son begotten on a wife (Kṣetraja).

यो मृतस्य नपुंसकस्य प्रसवविरोधिव्याध्युपेतस्य वा भार्यायां घृताक्तत्वादिनियोगधर्मेण गुरुनियुक्तायां जातः स क्षेत्रजः पुत्रो मन्वादिभिः स्मृतः॥१६७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥१६८॥

That (boy) equal (by caste) whom his mother or his father affectionately give, (confirming the gift) with (a libation of) water, in times of distress(to a man) as his son, must be considered as an asopted son (*Datrima*).

"शुक्रशोणितसंभवः पुरुषो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः" इति वसिष्ठस्मरणान्माता पिता वा परस्परानुज्ञया यं पुत्रं परिग्रहीतुः समानजातीयं तस्यैव पुत्राभावनिमित्तायामापदि प्रीतियुक्तं न तु भयादिना उदकपूर्वं दद्यात्स दत्रिमाख्यः पुत्रो विज्ञेयः॥१६८॥

सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम्।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः॥१६९॥

But he is considered a son made (Kṛtrima) whom (a man) makes his son, (he being) equal (by caste), acqainted with (the distinctions between) right and wrong, (and) endowed with filial virtues.

यं पुनः समानजातीयपित्रोः पारलौकिकश्राद्धादिकरणाकरणाभ्यां गुणदोषौ भवत इत्येवमादिज्ञं, पुत्रगुणैश्च मातापित्रोराराधनादियुक्तं पुत्रं कुर्यात्स कृत्रिमाख्यः पुत्रो वाच्यः॥१६९॥

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः॥१७०॥

If (a child) be born in a man's house and his father be not known, he is a son born secretly in the house (*Gūdhotpanna*), and shall belong to him of whose wife he was born.

यस्य गृहेऽवस्थितायां भार्यायां पुत्र उत्पद्यते, सजातीयोऽयं भवतीति ज्ञानेऽपि कस्मात्पुरुषविशेषाज्जातोऽसाविति न ज्ञायते स गृहेऽप्रकाशमुत्पन्नस्तस्य पुत्रः स्याद्यदीयायां भार्यायां जातः॥१७०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते॥१७१॥

He whom (a man) receives as his son, (after he has been) deserted by his parents or by either of them, is called a son cast off (Apaviddha).

मातापितृभ्यां त्यक्तं, तयोरन्यतरमरणेनान्यतरेण वा त्यक्तं, पुत्रं स्वीकुर्यात्सोपविद्धाख्यः पुत्र उच्यते॥१७१॥

पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम्॥१७२॥

A son whom a damsel secretly bears in the house of her father, one shall name the son of an unmarried damsel (*Kānīna*, and declare) such offspring of an unmarried girl (to belong) to him who weds her (afterwards).

पितृगृहे कन्या यं पुत्रमप्रकाशं जनयेत्तं कन्यापरिणेतुः पुत्रं नाम्ना कानीनं वदेत्॥१७२॥

या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती।
वोढुः स गर्भो भवति सहोढ इति चोच्यते॥१७३॥

If fone marries, either knowingly or unknowingly, a pregnant (bride), the child in her womb belongs to him who weds her, and is called (a son) received with the bride (*Sahodha*).

या गर्भवती अज्ञातगर्भा ज्ञातगर्भा वा परिणीयते, स गर्भस्तस्यां जातः परिणेतुः पुत्रो भवति सहोढ इति व्यपदिश्यते॥१७३॥

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा॥१७४॥

If a man buys a (boy), whether equal or unequal (in good qualities), from his father and mother for the sake of having a son, that (child) is called a (son) bought (*Krītaka*).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यं पुत्रार्थं मातापित्रोः सकाशाद्यं क्रीणीयात्स क्रीतकस्तस्य पुत्रो भवति। क्रेतुर्गुणैस्तुल्यो हीनो भवेन्न तत्र जातितः सादृश्यवैसादृश्ये। "सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः" (अ. २ श्लो. १३३) इति याज्ञवल्क्येन सर्वेषामेव पुत्राणां सजातीयत्वाभिधानत्वेन मानवेऽपि क्रीतव्यतिरिक्ताः सर्वे पुत्राः सजातीया बोद्धव्याः॥१७४॥

या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते॥१७५॥

If a woman abandoned by her husband, or a widow, of her own accord contracts a second marriage and bears (a son), he is called the son of a re-married woman (*Paunarbhava*).

या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छयान्यस्य पुनर्भार्या भूत्वा यमुत्पादेत्स उत्पादकस्य पौनर्भवः पुत्र उच्यते॥१७५॥

सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा।
पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति॥१७६॥

If she be (still) a virgin or one who returned (to her first husband) after leaving him, she is worthy to again perform with her second (or first deserted) husband the (nuptial) ceremony.

सा स्त्री यद्यक्षतयोनिः सत्यन्यमाश्रयेत्तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति। यद्वा कौमारं पतिमुत्सृज्यान्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति॥१७६॥

मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्।
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः॥१७७॥

He who, having lost his parents or being abandoned (by them) without (just) cause, gives himself to a (man), is called a son self-given (*Svayaṁdatta*).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यो मृतमातापितृकस्त्यागोचितकारणं विना द्वेषादिना ताभ्यां त्यक्तो वात्मानं यस्मै ददाति स स्वयंदत्ताख्यस्तस्य पुत्रो मन्वादिभिः स्मृतः ॥१७७॥

यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम्।
सपारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥१७८॥

The son whom a *Brāhmaṇa* begets through lust on a Śūdra female is, (though) alive (*pārayan*), a corpse (sava), and hence called a Pāraśava (a living corpse).

"विन्नास्वेष विधिः स्मृतः" (अ. १ श्लो. ९२) इति याज्ञवल्क्यदर्शनात्परिणीतायामेव शूद्रायां ब्राह्मणः कामार्थं पुत्रं जनयेत्स जीवन्नेव शवतुल्य इति पारशवः स्मृतः। यद्यप्ययं पित्रुपकारार्थं श्राद्धादि करोत्येव तथाप्यसंपूर्णोपकारकत्वाच्छवव्यपदेशः ॥१७८॥

दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्।
सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः ॥१७९॥

A son who is (begotten) by a Śūdra on a female slave, or on the female slave of his slave, may, if permitted (by his father), take a share (of the inheritance); thus the law is settled.

ध्वजाहृताद्युक्तलक्षणायां दास्यां, दाससंबन्धिन्यां वा दास्यां, शूद्रस्य यः पुत्रो जायते स पित्रानुज्ञातपरिणीतापुत्रैः समांशभागो भवान्भवत्वित्यनुज्ञातस्तुल्यभागं लभत इति शास्त्रव्यवस्था नियता ॥१७९॥

क्षेत्रजादीन्सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥१८०॥

These eleven, the son begotten on the wife and the rest as enumerated (above), the wise call substitutes for a son, (taken) in order (to prevent) a failure of the (funeral) ceremonies.

एतान्क्षेत्रजादीनेकादश पुत्रान्, पुत्रोत्पादनविधिलोपः पुत्रकर्तव्यश्राद्धादिलोपश्चमा भूदित्येवमर्थं पुत्रप्रतिच्छन्दकान्मुनय आहुः ॥१८०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः।
यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु॥१८१॥

Those sons, who have been mentioned in connection with (the legitimate son of the body), being begotten by strangers, belong (in reality) to him from whose seed they sprang, but not to the other (man who took them).

य एते क्षेत्रजादयोऽन्यबीजोत्पन्नाः पुत्रा औरसपुत्रप्रसन्नेनोक्तास्ते यद्बीजोत्पन्नास्तस्यैव पुत्रा भवन्ति न क्षेत्रिकादेरिति सत्यौरसे पुत्रे पुत्रिकायां च सत्यां न ते कर्तव्या इत्येवंपरमिदम्, अन्यबीजजा इत्येकादशपुत्रोपलक्षणार्थम्। स्वबीजजातावपि पौनर्भवशौद्रौ न कर्तव्यौ। अत एव वृद्धबृहस्पतिः- "आज्यं विना यथा तैलं सद्भिः प्रतिनिधिः स्मृतः। तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना"॥१८१॥

भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत्।
सर्वास्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥१८२॥

If among brothers, sprung from one (father), one have a son, Manu has declared them all to have male offspring through that son.

भ्रातॄणामेकमातापितृकाणां मध्ये यद्येकः पुत्रवान्स्यादन्ये च पुत्ररहितास्तदा तेनैकपुत्रेण सर्वान्भ्रातॄन्सपुत्रान्मनुराह। ततश्च तस्मिन्सत्यन्ये पुत्रप्रतिनिधयो न कर्तव्याः। स एव पिण्डदोंऽशहरश्च भवतीत्यनेनोक्तम्। एतच्च "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुता" (अ. २ श्लो. १३५) इति याज्ञवल्क्यवचनाद्भ्रातृ-पर्यन्ताभावे बोद्धव्यम्॥१८२॥

सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥१८३॥

If among all the wives of one husband one have a son, manu declares them all (to be) mothers of male children through that son.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकपतिकानां सर्वासां स्त्रीणां मध्ये यद्येका पुत्रवती स्यात्तदा तेन पुत्रेण सर्वास्ताः पुत्रयुक्ता मनुराह। ततश्च सपत्नीपुत्रे सति स्त्रिया न दत्तकादिपुत्राः कर्तव्या इत्येतदर्थमिदम्॥१८३॥

श्रेयसः श्रयसोऽलाभे पापीयान्रिक्थमर्हति।
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः॥१८४॥

On failure of each better (son) each next inferior (one) is worthy of the inheritance; but if there be many (of) equal (rank), they shall all share the estate.

औरसादीनां सर्वेषां पुत्राणां प्रकृतत्वादौरसादीनुपकम्य तेषां पूर्वः पूर्वः श्रेयान्स एव दायहरः, "स चान्यान्बिभृयात्" इति विष्णुवचनात्। औरसादीनां पुत्राणां पूर्वपूर्वाभावे परः परो रिक्थमर्हति। पूर्वसद्भावे परसंवर्धनं स एव कुर्यात्। एवंच सिद्धे शूद्रापुत्रस्य द्वादशपुत्रमध्ये पाठः क्षेत्रजादिसद्भावे धनानर्हत्वज्ञापनार्थत्वेन सार्थकः। अन्यथा तु क्षत्रियावैश्यापुत्रवदौरसत्वात्क्षेत्रजादिसद्भावेऽपि धनं लभेत्पूर्वस्य परसंवर्धनमात्रं चापवादेतरविषये द्रष्टव्यम्। क्षेत्रजगुणवद्दत्तकपुत्रयोः पञ्चमं षष्ठं वा भागमौरसो दद्यादिति विहितत्वात्। यदि तु समानरूपाः पौनर्भवादयो बहवः पुत्रास्तदा सर्व एव विभज्य रिक्थं गृह्णीयुः॥१८४॥

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः।
पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च॥१८५॥

Not brothers, nor fathers, (but) sons take the paternal estate; but the father shall take the inheritance of (a son) who leaves no male issue, and his brothers.

न सोदरभ्रातरो, न पितरः, किंतु औरसाभावे क्षेत्रजादयो गौणपुत्राः पितृरिक्थहरा भवन्तीत्यनेनोच्यते। औरसस्य तु "एक एवौरसः पुत्रः" (अ. ९ श्लो. १६३) इत्यनेनैव सिद्धत्वात्। अविद्यमानमुख्यपुत्रस्य पत्नीदुहितृरहितस्य च पिता धनं गृह्णीयात्तेषां मातुश्चाभावेन भ्रातरो धनं गृह्णीयुः। एतच्चानन्तरं प्रपञ्चयिष्यामः॥१८५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इदानीं क्षेत्रजानामप्यपुत्रपितामहादिधनेऽप्यधिकारं दर्शयितुमाह-

त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते।
चतुर्थः संप्रदातैषां पञ्चमो नोपपद्यते॥१८६॥
[असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः।
पितामह्यश्च ताः सर्वा मातृकल्पाः प्रकीर्तिताः॥४॥]

To three (ancestors) water must be offered, to three the funeral cake is given, the fourth (descendant is) the giver of these (oblations), the fifth has no connection (with them).

त्रयाणां पित्रादीनामुदकदानं कार्यं, त्रिभ्य एव च तेभ्यः पिण्डो देयः। चतुर्थश्च पिण्डोदकयोर्दाता। पञ्चमस्यात्र संबन्धो नास्ति। तस्माद्युक्तोऽपुत्रपितामहादिधने गौणपौत्राणामधिकारः। औरसपुत्रपौत्रयोश्च "पुत्रेण लोकाञ्जयति" (अ. ९ श्लो. ३७) इत्यनेनैवात्र पितामहादिधनभागित्वमुक्तम्॥१८६॥

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्।
अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा॥१८७॥
[हरेरनृत्विजो वापि न्यायवृत्ताश्च याः स्त्रियः॥५॥]

Always to that (relatives within three degress) who is nearest to the (deceased) Sapiṇḍa the estate shall belong; afterwards a Sakulya shall be (the heir, then) the spiritual teacher or the pupil.

अस्य सामान्यवचनस्योक्तौरसादिसपिण्डमात्रविषयत्वे वैयर्थ्यात्तत्तश्चानुक्तपत्न्यादिदायप्राप्त्यर्थमिदम्। सपिण्डमध्यात्संनिकृष्टतरो यः सपिण्डः पुमान् स्त्री वा तस्य मृतधनं भवति। तत्र "एक एवौरसः पुत्रः" (अ. ९ श्लो. १६३) इत्युक्तत्वात्स एव मृतधने स्वाधिकारी। क्षेत्रजगुणवद्दत्तकयोस्तु यथोक्तं पञ्चमं षष्ठं या भागं दद्यात्। कृत्रिमादिपुत्राणां संवर्धनमात्रं कुर्यात्। औरसाभावे पुत्रिका तत्पुत्रश्च "दौहित्र एव च हरेदपुत्रस्याखिलं धनम्" (अ. ९ श्लो. १३२) इत्युक्तत्वादौरसपुत्ररहित एव तत्रापुत्रो विवक्षितः। तदभावे क्षेत्रजादय एकादश पुत्राः क्रमेण पितृधनाधिकारिणः। परिणीतशूद्रापुत्रस्तु दशमभागमांत्राधिकारी "नाधिकं दशमाद्द्याच्छूद्रापुत्राय" (अ. ९ श्लो. १५४) इत्याद्युक्तत्वात्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दशमभागावशिष्टं धनं संनिकृष्टसपिण्डो गृह्णीयात्। त्रयोदशविधपुत्राभावे पत्नी सर्वभर्तृधनभागिनी। यदाह याज्ञवल्क्यः- "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः। एषामभावे पूर्वस्य धनभागुत्तरोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः।" (अ. २ श्लो. १३५-३६) बृहस्पतिरप्याह-"आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः। शरीरार्धं स्मृता जाया पुण्यापुण्यफले समा। यस्य नोपरता भार्या देहार्धं तस्य जीवति। जीवत्यर्धशरीरे तु कथमन्यः स्वमाप्नुयात्। सकुल्यैर्विद्यमानैस्तु पितृमातृ-सनाभिभिः। अपुत्रस्य प्रमीतस्य पत्नी तद्धागहारिणी। पूर्वप्रमीताग्निहोत्रं मृते भर्तरि तद्धनम्। विन्देत्पतिव्रता नारी धर्म एष सनातनः। जन्नमं स्थावरं हेम कुप्यं धान्यमथाम्बरम्। आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकम्। पितृव्यगुरुदौहित्रान्भर्तृस्वस्रीयमातुलान्। पूजयेत्कव्यपूर्ताभ्यां वृद्धानप्यतिथींस्त्रियः। तत्सपिण्डा बान्धवा वा ये तस्याः परिपन्थिनः। हिंस्युर्धनानि तान्नाजा चौरदण्डेन शासयेत्।" वृद्धमनुः- "अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमर्थं लभेत च।" यदुक्तम्-"स्त्रीणां तु जीवनं दद्यात्" इति संवर्धनमात्रवचनं, तदुःशीलाधार्मिकसविकारयौवनस्थपत्नीविषयम्। अतो यन्मेधातिथिना पत्नीनामंशभागित्वं निषिद्धमुक्तं तदसंबद्धम्। "पत्नीनामंशभागित्वं बृहस्पत्यादिसंमतम्। मेधातिथिर्निराकुर्वन्न प्रीणाति सतां मनः।" पत्न्यभावेऽप्यपुत्रिका दुहिता तदभावे पिता माता च तयोरभावे सोदर्यभ्राता तदभावे तत्सुतः। "मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम्" (अ. ९ श्लो. २१७) इति वक्ष्यमाणत्वात्। पितृमाता तदभावेऽन्योऽपि संनिकृष्टसपिण्डो मृतधनं गृह्णीयात्। तद्यथा पितामहसंतानेऽविद्यमाने प्रपितामहसंतान एव। तदप्युक्तम्। अत ऊर्ध्वं सपिण्डसंतानाभावे समानोदक आचार्यः शिष्यश्च क्रमेण धनं गृह्णीयात्॥१८७॥

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः।
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते॥१८८॥

But on failure of all (heirs) Brāhmaṇas (shall) share the estate, (who are) versed in the three Vedas, pure and self-controlled; thus the law is not violated.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एषामभाव इति वक्तव्ये सर्वेषामभाव इति यदुक्तं तत्सब्रह्मचार्यादेरपि धनहारित्वार्थम्। सर्वेषामभावे ब्राह्मणा वेदत्रयाध्यायिनो बाह्यान्तरशौचयुक्ता जितेन्द्रिया धनहारिणो भवन्ति त एव च पिण्डदाः, तथा सति धनिनो मृतस्य श्राद्धादिधर्महानिर्न भवति॥१८८॥

अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः।
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः॥१८९॥

The property of a Brāhmaṇa must never be taken by the king, that is a settled rule; but (the property of man) of other castes the king may take on failure of all (heirs).

ब्राह्मणसंबन्धि धनं न राज्ञा कदाचिद्ग्राह्यमिति शास्त्रमर्यादा। किंतूक्तलक्षणब्राह्मणाभावे ब्राह्मणमात्रेभ्योऽपि देयम्। क्षत्रियादिधनं पुनः पूर्वोक्तरिक्थहराभावे राजा गृह्णीयात्॥१८९॥

संस्थितस्यानपत्यस्य सगोत्रात्पुत्रमाहरेत्।
तत्र यद्रिक्थजातं स्यात्तत्तस्मिन्प्रतिपादयेत्॥१९०॥

(If the widow) of (a man) who died without leaving issue, raises up to him a son by a member of the family (Sagotra), she shall deliver to that (son) the whole property which belonged to the (deceased).

अनपत्यस्य मृतस्य भार्या समानगोत्रात्पुंसो गुरुनियुक्ता सती नियोगधर्मेण पुत्रमुत्पादयेत्। तस्मिन्मृतविषये यद्धनजातं भवेत्तत्तस्मिन्पुत्रे समर्पयेत्। "देवराद्वा सपिण्डाद्वा" (अ. ९ श्लो. ५९) इत्युक्तत्वात्। सगोत्रान्नियोगप्राप्त्यर्थं तज्जस्य च रिक्थभागित्वार्थमिदम्॥१९०॥

द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने।
तयोर्यद्यस्य पित्र्यं स्यात्तत्स गृह्णीत नेतरः॥१९१॥

But if two (sons), begotten by two (different men), contend for the property (in the hands) of their mother, each shall take, to the exclusion of the other, what belonged to his father.

"यद्येकरिक्थिनौ स्याताम्" (अ. ९ श्लो. १६२) इत्यौरसक्षेत्रजयोरुक्तमिदं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्त्वौरसपौनर्भवविषयम्। यदोत्पन्नौरसभर्तुर्मृतत्वाद्बालापत्यतया स्वामिधनं स्वीकृत्य पौनर्भवभर्तुः सकाशात्पुत्रान्तरं जनयेत्तस्यापि च पौनर्भवस्य भर्तुर्मृतत्वाद्रिक्थहरान्तराभावाद्धनं गृहीतवती, पश्चात्तौ द्वाभ्यां जातौ यदि विवदेयातां स्त्रीहस्तगतधने तदा तयोर्यस्य यज्जनकस्य धनं स तदेव गृह्णीयान्न त्वन्यपितृजोऽन्यजनकस्य ॥१९१॥

जनन्यां संस्थितायां तु समं सर्वे सहोदराः।
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः॥१९२॥

But when the mother has died, all the uterine brothers and the uterine sisters shall equally divide the mother's estate.

मातरि मृतायां सोदर्यभ्रातरो भगिन्यश्च सोदर्या अनूढा मातधनं समं कृत्वा गृह्णीयुः। ऊढास्तु धनानुरूपं संमानं लभन्ते। तदाह बृहस्पतिः –"स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी। अपुत्रा चेत्समूढा तु लभते मानमात्रकम्।" ततश्चानूढानां पितृधन इवोढानां मातृधनं भ्रात्रा स्वादंशाच्चतुर्थभागो देयः॥१९२॥

यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः।
मातामह्या धनात्किंञ्चित्प्रदेयं प्रीतिपूर्वकम्॥१९३॥

Even to the daughters of those (daughters) something should be given, as is seemly, out of the estate of their maternal grandmother, on the score of affection.

तासां दुहितॄणां या अनूढा दुहितरस्ताभ्योऽपि मातामहीधनाद्यथा तासां पूजा भवति तथा प्रीत्या किंचिद्दातव्यम्॥१९३॥

अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्॥१९४॥

What (was given) before the (nuptial) fire, what (was given) on the bridal procession, what was given in token of love, and what was received from her brother, mother, or father, that is called the sixfold property of a woman.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अध्यग्नीति "अव्ययं विभक्तिसमीप-" (पा. सू. २/१/६) इत्यादिसूत्रेण समीपार्थेऽव्ययीभावः। विवाहकाले अग्निसंनिधौ यत्पित्रादिदत्तं तदध्यग्नि स्त्रीधनम्। तदाह कात्यायनः-"विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ। तदध्यग्नि कृतं सद्भिः स्त्रीधनं परिकीर्तितम्।" यत्तु पितृगृहाद्भर्तुर्गृहं नीयमानया लब्धं तदध्यावाहनिकं तथाच कात्यायनः- "यत्पुनर्लभते नारी नीयमाना तु पैतृकात्। अध्यावाहनिकं नाम तत्स्त्रीधनमुदाहृतम्।" यत्तु प्रीतिहेतुकर्मणि भर्त्रादिदत्तं तथा भ्रात्रा पित्रा च समयान्तरे यद्दत्तम् एवं षट्प्रकारकं स्त्रीधनं स्मृतम्॥१९४॥

अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत्।
पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत्॥१९५॥

(Such property), as well as a gift subsequent and what was given (to her) by her affectionate husband, shall go to her offspring, (even) if she dies in the lifetime of her husband.

अन्वाधेयं व्याख्यातं कात्यायनेन-"विवाहात्परतो यत्तु लब्धं भर्तृकुले स्त्रिया। अन्वाधेयं तदुक्तं तु सर्वबन्धुकुले तथा।" विवाहादूर्ध्वं भर्तृकुले पितृकुले वा यत्स्त्रिया लब्धं भर्त्रा च प्रीतेन दत्तं, यदध्यग्न्यादि पूर्वश्लोके उक्तं तद्भर्तरि जीवति मृतायाः स्त्रियाः सर्वधनं तदपत्यानां भवति॥१९५॥

ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्वसु।
अप्रजायामतीतायां भर्तुरेव तदिष्यते॥१९६॥

It is ordained that the property (of a woman married) according to the Brāhmaṇ, the Daiva, the Ārṣa, the Gāndharva, or the Prājāpatya rite (shall belong) to her husband alone, if she dies without issue.

ब्राह्मादिषु पञ्चसु विवाहेषूक्तलक्षणेषु यत्स्त्रियाः षड्विधं धनं तदनपत्यायां मृतायां भर्तुरेव मन्वादिभिरिष्यते॥१९६॥

यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु।
अप्रजायामतीतायां मातापित्रोस्तदिष्यते॥१९७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But it is prescribed that the property which may have been given to a (wife) on a Āsura marriage or (one of the) other (blamable marriages, shall go) to her mother and to her father, if she dies without issue.

यत्पुनः स्त्रिया आसुरराक्षसपैशोचषूक्तलक्षणेषु विवाहेषु यत्स्त्रियाः शड्विधं धनमपि तदनपत्यायां मृतायां मातापित्रोरिष्यते ॥१९७॥

स्त्रियां तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन।
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत् ॥१९८॥

Whatever property may have been given by her father to a wife (who has co-wives of different castes), that the daughter (of the) Brāhmaṇī (wife) shall take, or that (daughter's) issue.

ब्राह्मणस्य नानाजातीयासु स्त्रीषु क्षत्रियादिस्त्रियामनपत्यपतिकायां मृतायां, तस्याः पितृदत्तं धनं सजातिविजातिसापत्न्यकन्यापुत्रसद्भावेऽपि ब्राह्मणीसापत्नेयी कन्या गृह्णीयात्। तदभावे तदपत्यस्य तद्धनं भवेत् ॥१९८॥

न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात्।
स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनाज्ञया ॥१९९॥

Women should never make a hoard from (the property of) their families which is common to many, nor from their own (husband's particular) property without permission.

भ्रात्रादिबहुसाधारणात्कुटुम्बधनाद्भार्यादिभिः स्त्रीभि रत्नालंकाराद्यर्थं धनसंचयं न कर्तव्यम्। नापि च भर्तुराज्ञां विना भर्तृधनादपि कार्यम्। ततश्च नेदं स्त्रीधनम् ॥१९९॥

पत्यौ जीवति यः स्त्रीभिरलंकारो धृतो भवेत्।
न तं भजेरन्दायादा भजमानाः पतन्ति ते ॥२००॥

The ornaments which may have been worn by women during their husbands' lifetime, his heirs shall not divide; those who divide them become outcasts.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भर्तरि जीवति तत्संमताभिर्योऽलंकारः स्त्रीभिर्धृतस्तस्मिन्मृते विभागकाले तं पुत्रादयो न भजेरन्। भजमानाः पापिनो भवन्ति॥२००॥

अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥२०१॥

Eunuchs and outcasts, (persons) born blind or deaf, the insane, idiots and the dumb, as well as those deficient is any organ (of action or sensation), receive no share.

नपुंसकपतितंजात्यन्धश्रोत्रविकलोन्मत्तजडमूकाश्च ये च कुणिपङ्ग्वादयो विकलेन्द्रियास्ते पित्रादिधनहरा न भवन्ति। किंतु ग्रासाच्छादनभागिनः॥२०१॥

तदेवाह-

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्॥२०२॥

But it is just that (a man) who knows (the law) should give even to all of them food and raiment without stint, according to his ability; he who gives it not will become an outcast.

सर्वेषामेषां क्लीबादीनां शास्त्रज्ञेन रिक्थहारिणा यावज्जीवं स्वशक्त्या ग्रासाच्छादनं देयम्। अददत्पापी स्यात्॥२०२॥

यद्यर्थिता तु दारैः स्यात्क्लीबादीनां कथंचन।
तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति॥२०३॥

If the eunuch and the rest should somehow or other desire to (take) wives, the offspring of such among them as have children is worthy of a share.

कथंचनेत्यभिधानात्क्लीबादयो विवाहानर्हा इति सूचितम्। यदि कथंचिदेषां विवाहेच्छा भवेत्तदा क्लीबस्य क्षेत्रज उत्पन्नेऽन्येषामुत्पन्नापत्यानामपत्यं धनभाग्भवति॥२०३॥

यत्किंचित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति।
भागो यवीयसां तत्र यदि विद्यानुपालितः॥२०४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Whatever property the eldest (son) acquires (by his own exertion) after the father's death, a share of that (shall belong) to his younger (brothers), provided they have made a due progress in learning.

पितरि मृते सति भ्रातृभिः सहाविभक्तो ज्येष्ठः किंचित्स्वेन पौरुषेण धनं लभते। ततो धनाद्विद्याभ्यासवतां कनिष्ठभ्रातॄणां भागो भवति नेतरेषाम् ॥२०४॥

अविद्याना तु सर्वेषामीहातश्चेद्धनं भवेत्।
समस्तत्र विभागः स्यादपित्र्य इति धारणा॥२०५॥

But if all of them, being unlearned, acquire property by their labour, the division of that shall be equal, (as it is) not property acquired by the father; that is a settled rule.

सर्वेषां भ्रातॄणां कृषिवाणिज्यादिचेष्टया यदि धनं स्यात्तदा पित्र्यवर्जिते तस्मिन्धने स्वार्जिते समो विभागः स्यान्न तूद्धारोऽपित्र्य इति निश्चयः॥२०५॥

विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्।
मैत्र्यमौद्वाहिकं चैव माधुपर्किकमेव च॥२०६॥

Property (acquired) by learning belongs solely to him to whom (it was given), likewise the gift of a friend, a present received on marriage or with the honey-mixture.

विद्यामैत्रीविवाहार्जितं माधुपर्किकं मधुपर्कदानकाले पूज्यतया यल्लब्धं तस्यैव तत्स्यात्। "यत्किंचित्पितरि" (अ. ९ श्लो. २०४) इत्युक्त्वायमपवादः। विद्याधनं च व्याहृतं कात्यायनेन "परभक्तप्रदानेन प्राप्ता विद्या यदान्यतः। तया प्राप्तं च विधिना विद्याप्राप्तं तदुच्यते। उपन्यस्ते च यल्लब्धं विद्यया पणपूर्वकम्। विद्याधनं तु तद्विद्याद्विभागे न विभज्यते। शिष्यादार्त्विज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात्। स्वज्ञानशंसनाद्वादाल्लब्धं प्राज्यधनाच्च यत्। विद्याधनं तु तत्प्राहुर्विभागे न विभज्यते।" अतो यन्मेधातिथिगोविन्दराजाभ्यां माधुपर्किकमार्त्विज्यधनं व्याख्यातं तदयुक्तम्, विद्याधनत्वात्॥२०६॥

भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्मणा।
स निर्भाज्यः स्वकादंशात्किञ्चिद्दत्त्वोपजीवनम्॥२०७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But if one of the brothers, being able (to maintain himself) by his own occupation, does not desire (a share of the family) property, he may be made separate (by the others) receiving a trifle out of his share to live upon.

राजानुगमनादिकर्मणा यो धनमर्जितुं शक्तो भ्रातृणां साधारणं धनं नेच्छति स स्वीयां दशत्किंचिदुपजीवनं दत्त्वा भ्रातृभिः पृथक्कार्यः। तेन तत्पुत्रास्तत्र धने कालान्तरे न विवदन्ते ॥२०७॥

अनुपघ्नन्यितृद्रव्यं श्रमेण यदुपार्जितम्।
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति ॥२०८॥

What one (brother) may acquire by his labour without using the patrimony, that acquisition, (made solely) by his own effort, he shall not share unless by his own will (with his brothers).

पितृधनानुपघातेन यत्कृष्यादिक्लेशादर्जयेत्तत्स्वचेष्टाप्राप्तमनिच्छन्भ्रातृभ्यो दातुं नार्हति ॥२०८॥

पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्।
न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम् ॥२०९॥

But if a father recovers lost ancestral property, he shall not divide it, unless by his own will, with his sons, (for it is) self-acquired (property).

यत्पुनः पितृसंबन्धि धनं तेनासामर्थ्येनोपेक्षितत्वादनवाप्तं पुत्रः स्वशक्त्या प्राप्नुयात्तत्स्वयमर्जितमनिच्छन्पुत्रैः सह न विभजेत् ॥२०९॥

विभक्ताः सह जीवन्तो विभजेरन्पुनर्यदि।
समस्तत्र विभागः स्याज्ज्यैष्ठयं तत्र न विद्यते ॥२१०॥

If brothers, (once) divide and living (again) together (as coparceners), make a second partition, the division shall in that case be equal; in such a case there is no right of primogeniture.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्वं सोद्धारं निरुद्धारं वा विभक्ता भ्रातरः पश्चादेकीकृत्य धनं सह जीवन्तो यदि पुनर्विभागं कुर्वन्ति तदा तत्र समो विभागः कार्यः। ज्येष्ठस्योद्धारो न देयः॥२१०॥

येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः।
म्रियेतान्यतरो वापि तस्य भागो न लुप्यते॥२११॥

If the eldest or the youngest (brother) is deprived of his share, of if either of them dies, his shares is not lost (to his immediate heirs).

येषां भ्रातृणां मध्ये कश्चिद्विभागकाले प्रव्रज्यादिना स्वांशाद्धीयेन्मृतो वा भवेत्तस्य भागो न लुप्यते॥२११॥

किंतु-

सोदर्या विभजेरंस्तं समेत्य सहिताः समम्।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः॥२१२॥

His uterine brothers, having assembled together, shall equally divide it, and those brothers who were reunited (with him) and the uterine sisters.

सोदर्या भ्रातरः समागम्य सहिताः भगिन्यश्च सोदर्यास्तमंशं समं कृत्वा विभजेरन्सोदर्याणां सापत्न्यानामपि मध्याद्ये मिश्रीकृतधनत्वेनैकयोगक्षेमास्ते विभजेयुः समं सर्वे सोदर्याः सपत्न्या वा। एतच्च पुत्रपत्नीपितृमात्रभावे द्रष्टव्यम्॥२१२॥

यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः।
सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः॥२१३॥

An eldest brother who through avarice may defraud the younger ones, shall no (longer hold the position of) the eldest, shall not receive an (eldest son's additional) share, and shall be punished by the king.

यो ज्येष्ठो भ्राता लोभात्कनीयसो भ्रातॄन्वञ्चयेत्स ज्येष्ठभ्रातृपूजाशून्यः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सोद्धारभागरहितश्च राजदण्डयश्च स्यात्॥२१३॥

सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनम्।
न चादत्त्वा कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकम्॥२१४॥

All brothers who habitually commit forbidden acts, are unworthy of (a share of) the property, and the eldest shall not make (anything his) separate property without giving (an equivalent) to his younger borthers.

अपतिता अपि ये भ्रातरो द्यूतवेश्यासेवादिविकर्मासक्तास्ते रिक्थं नार्हन्ति। नच कनिष्ठेभ्योऽननुकल्प्य ज्येष्ठः साधारणधनादात्मार्थमसाधारणधनं कुर्यात्॥२१४॥

भ्रातृणामविभक्तानां यद्युत्थानं भवेत्सह।
न पुत्रभागं विषमं पिता दद्यात्कथंचन॥२१५॥

If undivided brethren, (living with their father,) together make an exertion (for gain), the father shall on no account give to them unequal shares (on a division of the estate).

भ्रातॄणां पित्रा सहावस्थितानामविभक्तानां यदि सह धनार्जनार्थमुत्थानं भवेत्तदा विभागकाले न कस्यचित्पुत्रस्याधिकं पिता कदाचिद्दद्यात्॥२१५॥

ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्।
संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह॥२१६॥

But a son, born after partition, shall alone take the property of his father, or if any (of the othe sons) be reunied with the (father), he shall share with them.

यदा जीवतैव पित्रा पुत्राणामिच्छया विभागः कृतस्तदा विभागादूर्ध्वं जातः पुत्रः पितरि मृते पितृरिक्थमेव गृह्णीयात्। ये कृतविभागाः पित्रा सह पुनर्मिश्रीकृतधनास्तः सहासौ पितरि मृते विभजेत्॥२१६॥

अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्।
मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम्॥२१७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

A mother shall obtain the inheritance of a son (who dies) without leaving issue, and, if the mother be dead, the paternal grandmother shall take the estate.

अनपत्यस्य पुत्रस्य धनं माता गृह्णीयात्पूर्वं "पिता हरेदपुत्रस्य रिक्थम्" (अ. ९ श्लो. १८५) इत्युक्तत्वात्, इह माता हरेदित्यादि यज्ञवल्क्येन "पितरौ" (अ. २ श्लो. १३५) इत्येकशेषकरणात्, विष्णुना च-"अपुत्रस्य धनं पन्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि" इत्येकशेषस्यैव कृतत्वात्, मातापितरौ विभज्य गृह्णीयाताम्। मातरि मृतायां पत्नीपितृभ्रातृभ्रातृजाभावे पितुर्माता धनं गृह्णीयात्॥२१७॥

ऋणे धने च सर्वस्मिन्प्रविभक्ते यथाविधि।
पश्चाद् दृश्येत यत्किञ्चित्तत्सर्वं समतां नयेत्॥२१८॥

And if, after all the debts and assets have been duly distributed according to the rule, and (property) be afterwards discovered, one must divide it equally.

ऋणे पित्रादिधार्यमाणे धने च तदीये सर्वस्मिन्यथाशास्त्रं विभक्ते सति पश्चाद्यत्किंचित्पैतृकं ऋणं धनं वा विभागकालेऽज्ञातमुपलभ्येत तत्सर्वं समं कृत्वा विभजनीयं, नतु शोध्यं ग्राह्यं न वा ज्येष्ठस्योद्धारो देयः॥२१८॥

वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः।
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते॥२१९॥

A dress, a vehicel, ornaments, cooked food, water, and female (slaves), property destined for pious uses or sacrifices, and a pasture-ground, they declare to be indivisible.

वस्त्रं वाहनमाभरणमविभागकाले यद्येनोपभुक्तं तत्तस्यैव न विभाज्यम्। एतच्च नातिन्यूनाधिकमूल्यविषयम्। यत्तु बहुमूल्यमाभरणादिकं तद्विभाज्यमेव। तद्विषयमेव "विक्रीय वस्त्राभरणम्" इति बृहस्पतेर्विभागवचनम्। कृतान्नमादनसक्त्वादि तन्न विभजनीयम्। तत्रातिप्रचुरतरमूल्यं सक्त्वादि तावन्मात्रमूल्यधनेन 'कृतानं चाकृतान्नेन परिवर्त्य विभज्यते" इति बृहस्पतिवचनाद्विभजनीयमेव। उदकं कूपादिगतं सर्वैरुपभोग्यमविभजनीयम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्त्रियो दास्याद्या यास्तुल्यभागा न भवन्ति ता न विभाज्याः। किंतु तुल्यं कर्म कारयितव्याः। योगक्षेमं मन्त्रिपुरोहितादि योगक्षेमहेतुत्वात् प्रचारो गवादीनां प्रचारमार्गः एतत्सर्वं मन्वादयोऽविभाज्यमाहुः॥२१९॥

अयमुक्तो विभागो वः पुत्राणां च क्रियाविधिः।
क्रमशः क्षेत्रजादीनां द्यूतधर्मं निबोधत॥२२०॥

The division (of the property) and the rules for allotting (shares) to the (several) sons, those begotten on a wife and the rest, in (due) order, have been thus declared to you; hear (now) the laws concerning grambling.

एष दायभागः पुत्राणां क्षेत्रजादीनां क्रमेण विभागकरणप्रकारो युष्माकमुक्तः। इदानीं द्यूतव्यवस्थां शृणुत॥२२०॥

द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत्।
राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम्॥२२१॥

Gambling and betting let the king exclude from his realm; those two vices cause the destruction of the kingdoms of princes.

द्यूतसमाह्वयौ वक्ष्यमाणलक्षणौ राजा स्वराष्ट्रान्निवर्तयेत्। यस्मादेतौ द्वौ दोषौ राज्ञां राज्यविनाशकारिणौ॥२२१॥

प्रकाशमेतत्तास्कर्यं य द्देवनसमाह्वयौ।
तयोर्नित्यं प्रतिघाते नृपतिर्यत्नवान्भवेत्॥२२२॥

Gambling and betting amount to open theft; the king shall always exert himself in suppressing both (of them).

प्रकटमेतच्चौर्यं यद्द्यूतसमाह्वयौ, तस्मात्तन्निवारणे राजा नित्यं यत्नयुक्तः स्यात्॥२२२॥

अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः॥२२३॥

When inatimate (things) are used (for staking money on them), that is called among men gambling (dyūta), when

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

animate beings are used (for he same purpose), one must know that to be betting (*samāhvaya*).

अक्षशलाकादिभिरप्राणैर्यत्क्रियते तल्लोके द्यूतं कथ्यते। यः पुनः प्राणिभिर्मेषकुक्कुटादिभिः पणपूर्वकं क्रियते स समाह्वयो ज्ञेयः। लोकप्रसिद्धयोरप्यनयोर्लक्षणकथनं परिहारार्थम् ॥२२३॥

द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा।
तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥२२४॥

Let the king corporally punish all those (persons) who either gamble and bet or afford (an opportunity for it), likewise Śūdras who assume the distinctive marks to twice-born (men).

द्यूतसमाह्वयौ यः कुर्याद्यो वा सभिकः कारयेत्तेषामपराधापेक्षया राजा हस्तच्छेदादि वधं कुर्यात्। यज्ञोपवीतादिद्विजचिह्नधारिणः शूद्रान्हन्यात् ॥२२४॥

कितवान्कुशीलवान्क्रूरान्पाषण्डस्थांश्च मानवान्।
विकर्मस्थाञ्छौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् ॥२२५॥

Gamblers, dancers and singers, cruel men, men belonging to an heretical sect, those following forbidden occupations, and sellers of spirituous liquor, let him instantly baish from his town.

द्यूतादिसेविनो, नर्तकगायकान्, वेदविद्विषः, श्रुतिस्मृतिबाह्यव्रतधारिणः, अनापदि परकर्मजीविनः, शौण्डिकान्मद्यकरान्मनुष्यान् क्षिप्रं राजा राष्ट्रान्निर्वासयेदिति। कितवप्रसन्नेनान्येषामप्यभिधानम् ॥२२५॥

अत्र हेतुमाह-

एते राष्ट्रे वर्तमाना राज्ञः प्रच्छन्नतस्कराः।
विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः ॥२२६॥

If such (persons who are) secret thieves, dwell in the realm of a king, they constantly harass his good subjects by their forbidden practices.

एते कितवादयो गूढचौरा राष्ट्रे वसन्तो नित्यं वञ्चनात्मकक्रियया सज्जनान्पीडयन्ति ॥२२६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं महत्।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान्॥२२७॥

In a former Kalpa this (vice of) gambling has been seen to cause great enmity; a wise man, therefore, should not practise it even for amusement.

नेदानीमेव परं किंतु पूर्वस्मिन्नपि कल्पे द्यूतमेतदतिशयेन वैरकरं दृष्टम्। अतः प्राज्ञः परिहासार्थमपि तन्न सेवेत॥२२७॥

प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः।
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा॥२२८॥

On every man who addicts himself to that (vice) either secretly or openly, the king may inflict punishment according to his discretion.

यो मनुष्यस्तद्द्यूतं गूढं प्रकटं वा कृत्वा सेवेत तस्य यथा नृपतेरिच्छा भवति तथाविधो दण्डो भवति॥२२८॥

इदानीं पराजितानां धनाभावे सतीदमाह-

क्षत्रविट्शूद्रयोनिस्तु दण्डं दातुमशक्नुवन्।
आनृण्यं कर्मणा गच्छेद्विप्रो दद्याच्छनैः शनैः॥२२९॥

But a Kṣatriya, a Vaiśya, and Śūdra who are unable to pay a fine, shall discharge the debt by labour; a Brāhmaṇa shall pay it by instalments.

क्षत्रवैश्यशूद्रजातीयो निर्धनत्वेन दण्डं दातुमसमर्थस्तदुचितकर्मकरणेन दण्डशोधनं कुर्यात्। ब्राह्मणः पुनर्यथालाभं क्रमेण दद्यान्न कर्म कारयितव्यः॥२२९॥

स्त्रीबालोन्मत्तवृद्धानां दरिद्राणां च रोगिणाम्।
शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमम्॥२३०॥

On women, infants men of disordered mind, the poor and the sick, the king shall inflict punishment with a whip, a cane, or a rope and the like.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्त्रीबालादीनां पुनः शिफावेणुदलप्रहाररज्जुबन्धनादिभिर्दमनं राजा कुर्यात्॥२३०॥

ये नियुक्तास्तु कार्येषु हन्युः कार्याणि कार्यिणाम्।
धनोष्मणा पच्यमानास्तान्निः स्वान्कारयेन्नृपः॥२३१॥

But those appointed (to administer public) affairs, who, baked by the fire of wealth, mar the business of suitors, the king shall deprive of their property.

ये व्यवहारावेक्षणादिषु कार्येषु राज्ञा नियुक्ता उत्कोचधनतेजसा विकारं भजन्तः स्वाम्यादीनां कार्यं नाशयेयुस्तान्गृहीतसर्वस्वान् राजा कारयेत्॥२३१॥

कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान्।
स्त्रीबालब्राह्मणघ्नांश्च हन्याद् द्विट्सेविनस्तथा॥२३२॥

Forgers of royal deicts; those who corrupt his ministers, those who slay women, infants, or Brāhmaṇas, and those who serve his enemies, the king shall put to death.

कूटराजाज्ञालेखकान् अमात्यानां च भेदकान्, स्त्रीबालब्राह्मणघातिनः शत्रुसेविनश्च राजा हन्यात्॥२३२॥

तीरितं चानुशिष्टं च यत्र क्वचन यद्भवेत्।
कृतं तद्धर्मतो विद्यान्न तद्भूयो निवर्तयेत्॥२३३॥
[तीरितं चानुशिष्टं च यो मन्येत विकर्मणा।
द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत्॥६॥]

Whenever any (legal transaction) has been completed or (a punishment) been inflicted according to the law, he shall sansction it and not annul it.

यत्र क्वचिदृणादानादिव्यवहारे यत्कार्यं धर्मतस्तीरितम्। "पार तीर कर्मसमाप्तौ" इति चुरादौ पठ्यते। शास्त्रव्यवस्थानिर्णीतम्। अनुशिष्टं दण्डपर्यन्ततां च नीतं स्यात्तत्कृतमन्नीकुर्यान्न पुनर्निवर्तयेत्। एतच्चाकारणात्। अतः कारणकृतं निवर्तयेदेव॥२३३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा।
तत्स्वयं नृपतिः कुर्यात्तान्सहस्रं च दण्डयेत्॥२३४॥

Whatever matter his ministers or the judge may settle improperly, that the king himself shall (re-)settle and fine (them) one thousand (*panas*).

राजामात्याः प्राड्विवाको वा व्यवहारेक्षणे नियुक्तो यदसम्यग्व्यवहारनिर्णयं कुर्युस्तत्स्वयं राजा कुर्यात्पणसहस्रं च तान्दण्डयेत्। इदं चोत्कोचधनग्रहणेतरविषयम्। उत्कोचग्रहणे "ये नियुक्तास्तु" (अ. ९ श्लो. २३१) इत्युक्तत्वात्॥२३४॥

ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः।
एते सर्वे पृथक्ज्ञेया महापातकिनो नराः॥२३५॥

The slayer of a Brāhmaṇa, (a twice-born man) who drinks (the spirituous liquor called) Surā, he who steals (the gold of a Brāhmaṇa), and he who violates a Guru's bed, must each and all be considered as men who committed mortal sins (*mahāpātaka*).

यो मनुष्यो ब्राह्मणं हतवान्स ब्रह्महा, सुरापो द्विजातिः पैष्टयाः पाता ब्राह्मणश्च पैष्टीमाध्वीगौडीनां, तस्करो ब्राह्मणसुवर्णहारी मनुष्यः, यश्च कश्चिद्गुरुपत्नीगामीत्येते सर्वे प्रत्येक महापातकिनो बोद्धव्याः॥२३५॥

चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम्।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत्॥२३६॥

On those four even, if they do not perform a penance, let him inflict corporal punishment and fines in accordance with the law.

चतुर्णामप्येषां महापातकिनां प्रायश्चित्तमकुर्वतां शारीरं धनग्रहणेन च धनसंबन्धमपराधानुसारेण धर्मादनपेतं वक्ष्यमाणं दण्डं कुर्यात्॥२३६॥

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः।
स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान्॥२३७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

For violating a Guru's bed, (the mark of) a female part shall be (impressed on the forehead with a hot iron); for drinking (the spirituous liquor called) Surā, the sign of a tavern; for stealing (the gold of a Brāhmaṇa), a dog's foot; for murdering a Brāhmaṇa, a headless corpse.

"नाङ्क्या राज्ञा ललाटे स्युः" (अ. ९ श्लो. २४०) इति वक्ष्यमाणत्वाल्ललाटमेवाङ्कनस्थानमवगम्यते। तत्र गुरुपत्नीगमने यावज्जीवस्थायि तप्तलोहेन ललाटे भगाकृति गुरुपत्नीगमनचिह्नं कार्यम्। एवं सुरापाने कृते पातुर्दीर्घ सुराध्वजाकारं, सुवर्णापहारे सत्यपहर्तुः कुक्कुरपादरूपं कार्यम्। ब्रह्महणि कबन्धः पुमान्कर्तव्यः॥२३७॥

असंभोज्या ह्यसंयाज्या असंपाठयाविवाहिनः।
चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः॥२३८॥

Exculded from all fellowship at meals, excluded from alls sacrifices, excluded from instruction and from matrimonial alliances, abject and excluded from all religious duties, let them wanter over (this) earth.

अन्नादिकं नैते भोजयितव्याः, न चैते याजनीयाः, नाप्येतेऽध्यापनीयाः, नाप्येतैः कन्यादानसंबन्धः कर्तव्यः। एते च निर्धनत्वाद्याचनादिदैन्ययुक्ताः सर्वश्रौतादिकर्मवर्जिताः पृथिवीं पर्यटेयुः॥२३८॥

ज्ञातिसंबन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः।
निर्दया निर्नमस्कारास्तन्मनोरनुशासनम्॥२३९॥

Such (persons) who have been branded with (indelible) marks must be cast off by their paternal and maternal relations, and receive neither compassion nor a salutation; that is the teahcing of Manu.

ज्ञातिभिः संबन्धिभिर्मातुलाद्यैरेते कृतांकास्त्यजनीयाः, नचैषां दया कार्या, नाप्येते नमस्कार्या इतीयं मनोराज्ञा॥२३९॥

प्रायश्चित्तं तु कुर्वाणाः सर्ववर्णा यथोदितम्।
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसम्॥२४०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But (men of) all castes who perform the prescribed penances, must not be branded on the forehead by the king, but shall be made to pay the highest amercement.

शास्त्रविहितं प्रायश्चितं पुनः कुर्वाणा ब्राह्मणादयस्त्रयो वर्णा राज्ञा ललाटेऽङ्कनीया न भवेयुः। उत्तमसाहसं पुनर्दण्डनीयाः॥२४०॥

आगःसु ब्राह्मणस्यैव कार्यो मध्यमसाहसः।
विवास्यो वा भवेद्राष्ट्रात्सद्रव्यः सपरिच्छदः॥२४१॥

For (such) offences the middlemost amercement shall be inflicted on a Brāhmaṇa, or he may be banished from the realm, keeping his money and his chattels.

"इतरे कृतवन्तस्तु" इत्युत्तरश्लोके श्रूयमाणम् "अक्रामतः" (अ. ९ श्लो. २४२) इति चात्रापि योजनीयम्। तेनाकामत इत्येतेष्वपराधेषु गुणवतो ब्राह्मणस्य मध्यमसाहसो दण्डः कार्यः। पूर्वोक्तस्तूत्तमसाहसो निर्गुणस्य द्रष्टव्यः। कामतस्तेष्वपराधेषु धनधान्यादिपरिच्छदसहितो ब्राह्मणो देशान्निर्वास्यः॥२४१॥

इतरे कृतवन्तस्तु पापान्येतान्यकामतः।
सर्वस्वहारमर्हन्ति कामतस्तु प्रवासनम्॥२४२॥

But (men of) other (castes), who have unintentionally committed such crimes, ought to be deprived of their whole property; if (they committed them) intentionally, they shall be banished.

ब्राह्मणादन्ये पुनः क्षत्रियादय एतानि पापान्यनिच्छन्तः कृतवन्तः सर्वस्वहरणमर्हन्ति। इदं च सर्वस्वहरणं पूर्वोक्तेनोत्तमसाहसेन वृत्तापेक्षया व्यवस्थापनीयम्। इच्छया पुनरेषामेतेष्वपराधेषु प्रवासनं वधोऽर्हति। "प्रवासनं परासर्नं निषूदनं निहिंसनम्" (अमरकोषे क्षत्रियवर्गे श्लो. ११३) इति वधपर्यायं प्रवासनशब्दं पठन्त्याभिधानिकाः॥२४२॥

नाददीत नृपः साधुर्महापातकिनो धनम्।
आददानस्तु तल्लोभात्तेन दोषेण लिप्यते॥२४३॥

A virtuous king must not take for himself the property

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

of a man guilty of mortal sin; but if he takes it out of greed, he is tainted by that guilt (of the offender).

धार्मिको राजा महापातकसंबन्धि धनं दण्डरूपं न गृह्णीयात्। लोभात्पुनस्तद्-गृह्णन्महापातकदोषेण संयुज्यते ॥२४३॥

का तर्हि दत्तधनस्य प्रतिपत्तिरित्येतदर्थमाह-

अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत्।
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत्॥२४४॥

Having thrown such a fine into the water, let him offer it to Varuna, or let him bestow it on a learned and virtuous Brāhmaṇa.

तद्दण्डधनं नद्यादिजले प्रक्षिपेद्वरुणाय दद्याच्छ्रुतवृत्तसंपन्नब्राह्मणाय वा दद्यात्॥२४४॥

ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः।
ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः॥२४५॥

Varuṇa is the lord of punishment, for he holds the sceptre even over kings; a Brāhmaṇa who has learnt the whole Veda is the lord of the whole world.

महापातकिदण्डधनस्य वरुणः स्वामी यस्माद्राज्ञामपि दण्डधारित्वात्प्रभुः। तथा ब्राह्मणः समस्तवेदाध्यायी सर्वस्य जगतः प्रभुः। अतः प्रभुत्वात्तौ दण्डधनमर्हतः॥२४५॥

यत्र वर्जयते राजा पापकृद्भ्यो धनागमम्।
तत्र कालेन जायन्ते मानवा दीर्घजीविनः॥२४६॥
निष्पद्यन्ते च सस्यानि यथोप्तानि विशां पृथक्।
बालाश्च न प्रमीयन्ते विकृतं न च जायते॥२४७॥

In that (country), where the king avoids taking the property of (mortal) sinners, men are born in (due) time (and are) long-lived.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

And the crops of the husbandmen spring up, each as it was sown, and the children die not, and no misshaped (offspring) is born.

यत्र देशे प्रकृतं महापातकिधनं राजा न गृह्णाति तत्र परिपूर्णेन कालेन मनुष्या उत्पद्यन्ते, दीर्घायुषश्च भवन्ति। वैश्यानां च यथैव धान्यादिसस्यान्युप्तानि तथैव पृथक् पृथक् जायन्ते। अकाले न बाला म्रियन्ते। दीर्घजीविन इत्युक्तेऽप्यादरार्थं बालानां पुनर्वचनम्। व्यन्नं च न किंचिद्भूतमुत्पद्यते ॥२४६ ॥२४७ ॥

ब्राह्मणान्बाधमानं तु कामादवरवर्णजम्।
हन्याच्चित्रैर्वधोपायैरुद्वेजनकरैर्नृपः ॥२४८ ॥

But the king shall inflict on a base-born (Śūdra), who intentionally gives pain to Brāhmaṇas, various (kinds of) corporal punishment which cause terror.

शरीरपीडाधनग्रहणादिना शूद्रमिच्छातो ब्राह्मणान्बाधमानं छेदादिभिरुद्वेगकरैर्वधोपायैर्नृपो हन्यात् ॥२४८ ॥

यावानवध्यस्य वधे तावान्वध्यस्य मोक्षणे।
अधर्मो नृपतेर्दृष्टो धर्मस्तु विनियच्छतः ॥२४९ ॥

When a king punishes an innocent (man), his guilt is considered as great as when he sets free a fuilty man; but (he acuires) merit when he punishes (justly).

अवध्यस्य वधे यावानधर्मो नृपतेः शास्त्रेण ज्ञातस्तावानेव वध्यस्य त्यागेऽपि। यथाशास्त्रं दण्डं तु कुर्वतो धर्मः स्यात्तस्मात्तं कुर्यात् ॥२४९ ॥

उदितोऽयं विस्तरशो मिथो विवदमानयोः।
अष्टादशसु मार्गेषु व्यवहारस्य निर्णयः ॥२५० ॥

Thus the (manner of) deciding suits (falling) under the eighteen titles, between two litigant parties, has been declared at length.

अष्टादशसु ऋणादानादिषुव्यवहारपदेषु परस्परं विवदमानयोरर्थिप्रत्यर्थिनोः कार्यनिर्णयोऽयं विस्तरेणोक्तः ॥२५० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एवं धर्म्याणि कार्याणि सम्यक्कुर्वन्महीपतिः।
देशानलब्धाँल्लिप्सेत लब्धांश्च परिपालयेत्॥२५१॥

A king who thus duly fulfils his duties in accordance with justice, may seek to gain countries which he has not yet gained, and shall duly protect them when he has gained them.

अनेनोक्तप्रकारेण धर्मादनपेतान् व्यवहारान् निर्णयन् राजा जनानुरागादलब्धान्देशांल्लब्धुमिच्छेल्लब्धांश्च सम्यक्पालयेत्। एवं सम्यग्व्यवहार-दर्शनस्यालब्धप्रदेशप्राप्त्यर्थत्वमुक्तम्॥२५१॥

सम्यङ् निविष्टदेशस्तु कृतदुर्गश्च शास्त्रतः।
कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम्॥२५२॥

Having duly settled his country, and having built forst in accordance with the Institutes, he shall use his utmost exertions to remove (those men who are nocuous like) thorns.

"जान्नलं सस्यसंपन्नम्" (अ. ७ श्लो. ६९) इत्युक्तरीत्या सम्यगाश्रितदेशस्तत्र सप्तमाध्यायोक्तप्रकारेण कृतदुर्गश्चौरसाहसिकादिकण्टक-निराकरणे प्रकृष्टं यत्नं सदा कुर्यात्॥२५२॥

रक्षणादार्यवृत्तानां कण्टकानां च शोधनात्।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः॥२५३॥

By protecting those who live asd (becomes) Āryans and by removing the thorns, kings, solely intent on guarding their subjects, reach heaven.

यस्मात्साध्वाचाराणां रक्षणाच्चोरादीनां च शासनात्प्रजापालनोद्युक्ता राजानः स्वर्गं गच्छन्ति। तस्मात्कण्टकोद्धरणं यत्नं कुर्यात्॥२५३॥

अशासंस्तस्करान्यस्तु बलिं गृह्णाति पार्थिवः।
तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते॥२५४॥

The relam of that king who takes his share in kind, though he does not punish thieves, (will be) disturbed and he (will) lose heaven.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथा पुनर्नृपतिश्चौरादीननिराकुर्वन् षड्भागाद्युक्तं करं गृह्णाति तस्मै राष्ट्रवासिनो जनाः कुप्यन्ति। कर्मान्तरार्जिताप्यस्य स्वर्गप्राप्तिरनेन दुष्कृतेन प्रतिबध्यते ॥२५४॥

निर्भयं तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम्।
तस्य तद्वर्धते नित्यं सिच्यमान इव द्रुमः ॥२५५॥

But if his kingdom be secure, protected by the strength of his arm, it will constantly flourish like a (well)-watered tree.

यस्य राज्ञो बाहुवीर्याश्रयेण राष्ट्रं चौरादिभयरहितं भवति तस्य नित्यं तद्वृद्धिं गच्छति। उदकसेकेनेव वृक्षः ॥२५५॥

द्विविधांस्तस्करान्विद्यात्परद्रव्यापहारकान्।
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः ॥२५६॥

Let the king who sees (everything) through his spies, discover the two sorts of thieves who deprive others of their property, both those who (show themselves) openly and those who (lie) concealed.

चार एव चौरज्ञानहेतुत्वाच्चक्षुरिव यस्यासौ राजा, चारैरेव प्रकटतया गूढतया द्विप्रकारान्न्यायेन परधनग्राहिणो जानीयात् ॥२५६॥

प्रकाशवञ्चकास्तेषां नानापण्योपजीविनः।
प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः ॥२५७॥

Among them, the open rogues (are those) who subsist by (cheating in the sale of) various marketable commodities, but the concealed rouges are burglars, robbers in forests, and so forth.

तेषां पुनश्चौरादीनां मध्याद्ये तुलाप्रतिमानलोष्टचयादिना हिरण्यादिपण्यविक्रयिण परधनमनुचितेन गृह्णन्ति ते प्रकाशवञ्चकाः स्तेनाश्चौराः सद्विच्छेदादिना गुप्ताटव्या श्रयाश्च परधनं गृह्णन्ति ते प्रच्छन्नवञ्चकाः ॥२५७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

किंच-

उत्कोचकाश्चौपधिका वञ्चकाः कितवास्तथा।
मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह॥ २५८॥
असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः।
शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः॥ २५९॥
एवमादीन्विजानीयात्प्रकाशांल्लोककण्टकान्।
निगूढचारिणश्चान्याननार्यानार्यलिङ्गिनः॥ २६०॥

Those who take bribes, cheats and rogues, gamblers, those who live by teaching (the performance of) auspicious ceremonies, sanctimonious hypocrites and fortune-tellers.

Officials of high rank and physicians who act impropely, men living by showing their proficiency in arts, and clever harlots.

These and the like who show themselves openly, as well as others who walk in disguise (such as) non-Āryan who wear the marks of Āryans, he should know to be thorns (in the side of his people).

उत्कोचका ये कार्यिभ्यो धनं गृहीत्वा कार्यमयुक्तं कुर्वन्ति। औपधिका भयदर्शनाद्ये धनमुपजीवन्ति। वञ्चका ये सुवर्णादि द्रव्यं गृहीत्वा परद्रव्यप्रक्षेपेण वञ्चयन्ति। कितवा द्यूतसमाह्वयदेविनः। धनपुत्रलाभादिमन्नलमादिश्य ये वर्तन्ते ते मन्नलदेशवृत्ताः। भद्राः कल्याणाकारप्रच्छन्नपापा ये धनग्राहिणः। ईक्षणिका हस्तरेखाद्यवलोकनेन शुभाशुभफलकथनजीविनः। महामात्रा हस्तिशिक्षाजीविनः। चिकित्सकाश्चिकित्साजीविनः असम्यक्कारिण इति महामात्रचिकित्सक-विशेषणम्। शिल्पोपचारयुक्ताश्चित्रलेखाद्युपायजीविनः तेऽप्यनुपजीव्यमान-शिल्पोपायप्रोत्साहनेन धनं गृह्णन्ति। पण्यस्त्रियश्च परवशीकरणकुशला इत्येवमादीन्प्रकाशं लोकवञ्चकांश्चारैर्जानीयात्। अन्यानपि प्रच्छन्नचारिणः शूद्रादीन्ब्राह्मणादिवेषधारिणो धनग्राहिणो जानीयात्॥२५८-२५९-२६०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तान्विदित्वा सुचरितैर्गूढैस्तत्कर्मकारिभिः।
चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत्॥२६१॥

Having detected them by means of trustworthy persons, who, disguising, themselves, (pretend) to follow the same occupations and by means of spies, wearing various disguises, he must cause them to be instigaged (to commit offences), and bring them into his power.

तानुक्तान्वञ्चकान्सभ्यैः प्रच्छन्नैस्तत्कर्मकारिभिर्वणिजां स्तेये वणिग्भिरित्येवमादिभिः पुरुषैरेतद्व्यतिरिक्तैः सप्तमाध्यायोपदिष्टकापटिकादिभिश्चारैरनेकस्थानस्थैर्ज्ञात्वा प्रोत्साद्य स्ववशान्कुर्यात्॥२६१॥

तेषां दोषानभिख्याप्य स्वे स्वे कर्मणि तत्त्वतः।
कुर्वीत शासनं राजा सम्यक्सारापराधतः॥२६२॥

Then having caused the crimes, which they committed by their several actions, to be proclaimed in accordance with the facts, the king shall duly punish them according to their strength and their crimes.

तेषां प्रकाशाप्रकाशतस्काराणां स्वकर्मणि चौर्यादौ ये पारमार्थिका दोषाः संधिच्छेदादयस्ताँल्लोके प्रख्याप्य तद्गतधनशरीरादिसामर्थ्यापेक्षयाऽपराधापेक्षया च राजा दण्डं कुर्यात्॥२६२॥

नहि दण्डादृते शक्यः कर्त्तुं पापविनिग्रहः।
स्तेनानां पापबुद्धीनां निभृतं चरतां क्षितौ॥२६३॥

For the wickedness of evil-minded thieves, who secretly prowl over this earth, cannot be restrained except by punishment.

यस्माच्चौराणां पापाचरणबुद्धीनां विनीतवेषेण पृथिव्यां चरतां दण्डव्यतिरेकेण पापक्रियायां नियमं कर्तुमशक्यमत एषां दण्डं कुर्यात्॥२६३॥

सभाप्रपापूपशालावेशमद्यान्नविक्रयाः।
चतुष्पथाश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च॥२६४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च।
शून्यानि चाप्यगाराणि वनान्युपवनानि च॥२६५॥
एवंविधान्नृपो देशान्गुल्मैः स्थावरजङ्गमैः।
तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत्॥२६६॥

Assembly-houses, houses where water is distributed or cakes are sold, brothels, traverns and victualler's shops, cross-roads, well-known trees, festive assemblies, and ply-houses and concert rooms.

Old gardens, forests, the shops of artisans, empty dwellings, natural and artificial groves.

These and the like places the king shall cause to be guarded by companies of soldiers, both stationary and patrolling, and by spies, in order to keep away thieves.

सभा ग्रामनगरादौ नियतं जनसमूहस्थानं, प्रपा जलदानगृहं, अपूपविक्रयवेश्म, पण्यस्त्रीगृहं, मद्यान्नविक्रयस्थानानि, चतुष्पथाः, प्रख्यातवृक्षमूलानि, जनसमूहस्थानानि, जीर्णवाटिका, अटव्यः, शिल्पगृहाणि, शून्यगृहाणि, आम्रादिवनानि, कृत्रिमोद्यानानि। एवं प्रकारान्देशान्सैन्यैः पदातिसमूहैः स्थावरजन्नमैरेकस्थानस्थितैः प्रचारिभिश्चान्यैश्चारैस्तस्करनिवारणार्थं चारयेत्। प्रायेणैवंविधे देशेऽन्नपानस्त्रीसंभोगस्वन्न प्रहर्त्राद्यन्वेषणार्थं तस्करा अवतिष्ठन्ते॥२६४-२६६॥

तत्सहायैरनुगतैर्नानाकर्मप्रवेदिभिः।
विद्यादुत्सादयेच्चैव निपुणैः पूर्वतस्करैः॥२६७॥

By the means of clever reformed thieves, who associate with such (rogues), follow them and know their various machinations, he must detect and destroy them.

तेषां साहाय्यं प्रतिपद्यमानैस्तच्चरितानुवृत्तिभिः संधिच्छेदादिकर्मानुष्ठानवेदिभिः पूर्वचौरैश्चाररूपैश्चारमायानिपुणैस्तस्काराज्ञानीयादुत्सादयेत् च॥२६७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भक्ष्यभोज्योपदेशैश्च ब्राह्मणानां च दर्शनैः।
शौर्यकर्मापदेशैश्च कुर्युस्तेषां समागमम्॥२६८॥

Under the pretext of (offering them) various dainties, of introducing them to Brāhmaṇas, and on the pretence of (showing them) feats of strength, the (spies) must make them meet (the officers of justice).

ते पूर्वचौराश्चरभूता आगच्छतास्मद्गृहं गच्छामस्तत्र मोदकपायसादीन्यश्नीम इत्येवं भक्ष्यभोज्यव्याजेन, अस्माकं देशे ब्राह्मणोऽस्ति सोऽभिलषितार्थसिद्धिं जानाति तं पश्याम इत्येवं ब्राह्मणानां दर्शनैः, कश्चिदेक एव बहुभिः सह योत्स्यते तं पश्याम इत्येवं शौर्यकर्मव्याजेन तेषां चौरणां राज्ञो दण्डधारकपुरुषाः समागमं कुर्युर्ग्राहयेयुश्च॥२६८॥

ये तत्र नोपसर्पेयुर्मूलप्रणिहिताश्च ये।
तान्प्रसह्य नृपो हन्यात्समित्रज्ञातिबान्धवान्॥२६९॥

Those among them who do not come, and those who suspect the old (thieves employed by the king), the king shall attack by force and slay together with their friends, blood relations, and connexions.

ये चौरास्तत्र भक्ष्यभोज्यादौ निग्रहणशङ्कया नोपसर्पन्ति ये च मूले राजनियुक्तपुराणचौरवर्गे प्रणिहिताः सावधानभूताः तैः सह संगतिं भजन्ते तांश्चौरांस्तेभ्य एव ज्ञात्वा तदेकतापन्नमित्रपित्रादिज्ञातिस्वजनसहितान्बलादाक्रम्य राजा हन्यात्॥२६९॥

न होढेन विना चौरं घातयेद्धार्मिको नृपः।
सहोढं सोपकरणं घातयेदविचारयन्॥२७०॥

A just king shall not cause a thief to be put to death, (unless taken) with the stolen goods (in his possession); him who (is taken) with the stolen goods and the implements (of burglary), he may, without hestiation, cause to be slain.

धार्मिको राजा हृतद्रव्यसंधिच्छेदोपकरणव्यतिरेकेणानिश्चितचौरभावं न घातयेत्किंतु हृतद्रव्येण चौर्योपकरणेन च निश्चितचौरभावमविचारयन्-घातयेत्॥२७०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः।
भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत्॥ २७१॥

All those also who in villages give food to thieves or grant them room for (concealing their impletements), he shall cause to be put to death.

ग्रामादिष्वपि ये केचिच्चौराणां चौरत्वं ज्ञात्वा भक्तदाः, चौर्योपयुक्तभाण्डादि गृहावस्थं ये ददति तानपि नैरन्तर्याद्यपराधगोचरापेक्षया घातयेत्॥२७१॥

राष्ट्रेषु रक्षाधिकृतान्सामन्तांश्चैव चोदितान्।
अभ्याघातेषु मध्यस्थान्शिष्याच्चौरानिव द्रुतम्॥ २७२॥

Those who are appointed to guard provinces and his vassals who have been ordered (to helps), he shall speedily punish like thieves, (if they remain) inactive in attacks (by robbers).

ये राष्ट्रेषु रक्षानियुक्ताः, ये च सीमान्तवासिनः क्रूराः सन्तश्चौर्योपदेशे मध्यस्था भवन्ति तांश्चौरवत्क्षिप्रं दण्डयेत्॥२७२॥

यश्चापि धर्मसमयात्प्रच्युतो धर्मजीवनः।
दण्डेनैव तमप्योषेत्स्वकाद्धर्माद्धि विच्युतम्॥ २७३॥

Moreover if (a man), who subsists by (the fulfilment of) the law, departs from the established rule of the law, the (king) shall severely punish him by a fine, (because he) violated his duty.

याजनप्रतिग्रहादिना परस्य यागदानादिधर्ममुत्पाद्य यो जीवति स धर्मजीवनो ब्राह्मणः सोऽपि यो धर्ममर्यादायाश्च्युतो भवति तमपि स्वधर्मात्परिभ्रष्टं दण्डेनोपतापयेत्॥२७३॥

ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने।
शक्तितो नाभिधावन्तो निर्वास्याः सपरिच्छदाः॥ २७४॥

Those who do not give assitance according to their ability when a village is being plundered, a dyke is being de-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

stroyed, or a higheway robbery committed, shall be bnaished with their goods and chattels.

ग्रामलुण्ठने तस्करादिभिः क्रियमाणे, हिताभन्ने जलसेतुभन्ने जाते। "क्षेत्रोत्पन्नसस्यनाशने वृत्तिभन्ने च" इति मेधातिथिः। पथि चौरदर्शने तन्निकटवर्तिनो यथाशक्तितो ये रक्षां न कुर्वन्ति ते शय्यागवाश्वादिपरिच्छदसहिता देशान्निर्वासनीयाः॥२७४॥

राज्ञः कोषापहर्तॄंश्च प्रतिकूलेषु च स्थितान्।
घातयेद्विविधैर्दण्डैररीणां चोपजापकान्॥२७५॥

On those who rob the king's treasury and those who persevere in opposing (his commands), he shall inflict various kinds of capital punishment, likewise on those who conspire with his enemies.

राज्ञो धनगृहाद्धनापहारिणस्तथा तदाज्ञाव्याघातकारिणः शत्रूणां च राज्ञा सह वैरिवृद्धिकारिणोऽपराधापेक्षया करचरणजिह्वाच्छेदनादिभिर्नानाप्रकारदण्डैर्घातयेत्॥२७५॥

संधिं छित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः।
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत्॥२७६॥

But the king shall cut off the hands of those robbers who, breaking into houses, commit thefts at night, and cause them to be impaled on a pointed stake.

ये रात्रौ संधिच्छेदं कृत्वा परधनं तस्करा मुष्णन्ति तेषां राजा हस्तद्वयं छित्त्वा तीक्ष्णे शूले तानारोपयेत्॥२७६॥

अङ्गुलीर्ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे।
द्वितीये हस्तचरणौ तृतीये वधमर्हति॥२७७॥

On the first conviction, let him cause two fingers of a cut-purse to be amputated; on the second, one hand and one foot; on the third, he shall suffer death.

पटप्रान्तादिस्थितं सुवर्णादिकं ग्रन्थिमोक्षणेन यश्चोरयति स ग्रन्थिभेदस्तस्य प्रथमे द्रव्यग्रहणेऽङ्गुलीश्छेदयेत्। तेचाङ्गुष्ठतर्जन्यौ "उत्क्षेपकग्रन्थिभेदौ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

करसंदंशहीनकौ'' (अ. २ श्लो. २७४) इति याज्ञवल्क्यवचनात्। द्वितीये ग्रहणे हस्तपादौ छेदयेत्। तृतीये ग्रहणे वधार्हो भवति ॥२७७॥

अग्निदान्भक्तदांश्चैव तथा शस्त्रावकाशदान्।
संनिधातृंश्च मोषस्य हन्याच्चौरमिवेश्वरः ॥ २७८ ॥

Those who give (to thieves) fire, food, arms, or shelter, and receivers of stolen goods, the ruler shall punish like thieves.

ग्रन्थिभेदादिकारिणो विज्ञायाग्निभक्तशस्त्रावस्थानप्रदान्मुष्यत इति मोषश्चौरधनं तस्यावस्थापकांश्चौरवद्राजा निगृह्णीयात् ॥२७८॥

तडागभेदकं हन्यादप्सु शुद्धवधेन वा।
यद्वापि प्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसम् ॥ २७९ ॥

Him who breaks (the dam of) a tank he shall slay (by drowning him) in water or by (some other) simple (mode of) capital punishment; or the offender may repair the (damage), but shall be made to pay the highest amercement.

यः स्नानदानादिना जनोपकारकं तडागं सेतुभेदादिना विनाशयति तमप्सु मज्जनेन प्रकारान्तरेण वा हन्यात्। यद्वा यदि तडागं पुनः संस्कुर्यात्तदोक्तमसाहसं दण्डयः ॥२७९॥

कोष्ठागारायुधागारदेवतागारभेदकान्।
हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन् ॥ २८० ॥

Those who break into a (royal) storehouse, an armoury, or a temple, and those who steal elephants, horses, or chariots, he shall slay without hesitation.

राजसंबन्धिधान्यादिषु धनागारायुधगृहयोर्देवप्रतिमागृहस्य च बहुधनव्ययसाध्यस्य विनाशकान्हस्त्यश्वरथस्य चापहर्तॄञ्शीघ्रमेव हन्यात्। यत्तु संक्रमध्वजयष्टिदेवताप्रतिमाभेदिनः पञ्चशतदण्डं वक्ष्यति सोऽस्मादेव देवतागारभेदकस्य वधविधानान्मृन्मयपूजितोज्झितदेवताप्रतिमाविषयोऽत्र द्रष्टव्यः ॥२८०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

seven limbs (*aṅga*).

स्वामी राजा, अमात्यो मन्त्र्यादिः, पुरं राज्ञः कृतदुर्गनिवासनगरं, राष्ट्रं देशः, कोशोवित्तनिचयः, दण्डो हस्त्यश्वरथपादातं, मित्रं त्रिविधं सप्तमाध्यायोक्तमित्येताः सप्त प्रकृतयोऽन्यानि। सप्तान्नमिदं राज्यमित्युच्यते॥२९४॥

ततः किमित्याह-

सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम्।
पूर्वं पूर्वं गुरुतरं जानीयाद्व्यसनं महत्॥२९५॥

But let him know (that) among these seven constitutent parts of a kingdom (which have been enumerated) in due order, each earlier (named) is more important and (its destruction) the greater calamity.

आसां राज्यप्रकृतीनां सप्तानां क्रमोक्तानामुत्तरस्याविनाशमपेक्ष्य पूर्वस्याः पूर्वस्या विनाशविषये गरीयो व्यसनं जानीयात्। तथाहि। मित्रव्यसनात्सबलव्यसनं गरीयः, संपन्नबलस्यैवामित्रानुग्रहे सामर्थ्यात्। एवं बलात्कोशो गरीयान्, कोशनाशे बलस्यापि नाशात्। कोशाद्राष्ट्रं गरीयः, राष्ट्रनाशे कुतः कोशोत्पत्तिः। एवं राष्ट्राद्दुर्गनाशोऽपि, दुर्गादेव यवसन्धनादिसंपन्नाद्राज्यरक्षासिद्धिः। दुर्गादमात्यो गरीयान्, प्रधानामात्यनाशे सर्वान्नवैकल्यात्। अमात्यादप्यात्मा, सर्वस्यात्मार्थत्वात्। तस्मादुत्तरापेक्षया पूर्वं यत्नतो रक्षेत्॥२९५॥

सप्तान्नस्येह राज्यस्य विष्टब्धस्य त्रिदण्डवत्।
अन्योन्यगुणवैशेष्यान्न किञ्चिच्चदतिरिच्यते॥२९६॥

Yet in a kingdom, containing seven constituent parts, which is upheld like the triple staff (of an ascetic), there is no (single part) more important (than the others), by reason of the importance of the qualities of each for the others.

उक्तसप्तान्नवतो लोके राष्ट्रस्य त्रिदण्डवदन्योन्यसंबन्धस्य परस्परविलक्षणोपकारणान्न किंचिदन्नमधिकं भवति। यद्यपि पूर्वश्लोके

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्वपूर्वान्नस्याधिक्यमुक्तं तथाप्येषामन्नानां मध्यादन्यस्यान्नसंबन्धिनमपकारमन्यदन्नं कर्तुं न शक्नोति, तस्मादुत्तरोत्तरान्नमप्यपेक्षणीयमित्येवंपरोऽयमाधिक्यनिषेधः। अत्र प्रसिद्धं यतित्रिदण्डमेव दृष्टान्तः तद्धि चतुरङ्गु लगोवालवेष्टनादन्योन्यसंबन्धं, न च तन्मध्ये त्रिदण्डधारणशास्त्रार्थे कश्चिद्दण्डोऽधिको भवति॥२९६॥

तेषु तेषु तु कृत्येषु तत्तदङ्गं विशिष्यते।
येन यत्साध्यते कार्यं तत्तस्मिन् श्रेष्ठमुच्यते॥२९७॥

For each part is particularly qualified for (the accomplishment of) certain objects, (and thus) each is declared to be the most important for that particular purpose which is effected by tis means.

यस्मात्तेषु तेषु संपाद्येषु कार्येषु तत्तदन्नस्यातिशयो भवति, तत्कार्यमन्येन कर्तुमशक्तेः। एवं च येनान्नेन यत्कार्यं संपाद्यते तस्मिन्कार्ये तदेव प्रधानमुच्यते। ततश्चान्योन्यगुणविशेषादि यदुक्तं तदेवानेन स्फुटीकृतम्॥२९७॥

चारेणोत्साहयोगेन क्रिययैव च कर्मणाम्।
स्वशक्तिं परशक्तिं च नित्यं विद्यान्महीपतिः॥२९८॥

By spies, by a (pretended) display of energy, and by carrying out (various) undertakings, let the king constantly ascertain his own and his enemy's strength.

सप्तमाध्यायोक्तकापटिकादिना बलस्योत्साहयोगेन कर्मणां च हस्तिबन्धवणिक्पथादीनामनुष्ठानेन जातां शत्रोरात्मनश्च शक्तिं राजा सदा जानीयात्॥२९८॥

पीडनानि च सर्वाणि व्यसनानि तथैव च।
आरभेत ततः कार्यं संचिन्त्य गुरुलाघवम्॥२९९॥

Moreover, all calamities and vices; afterwards, when he has fully considered their relative importance, let him begin his operations.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पीडनानि मारकादीनि कामक्रोधोद्भवानि, दुःखानि च स्वपरचक्रगतानि तेषां च गुरुलघुभावं पर्यालोच्य संधिविग्रहादि कार्यमारभेत ॥२९९॥

आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः।
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥३००॥

(Though he be) ever so much tired (by repeated failures), let him begin his operations again and again; for fortune greatly favours the man who (strenuously) exerts himself in his undertakings.

राजा स्वराज्यवृद्धिपरापचयनिमित्तानि कार्याणि कथंचिदिदं संजातमिति छलान्यप्यारभ्यात्मना खिन्नः पुनः पुनस्तान्यारभेतैव। यस्मात्कर्माणि सृज्यमानं पुरुषं श्रीर्नितरां सेवते। तथा नाब्राह्मणे नानाश्रये श्रीरस्तीति प्ररोहितापि शोषमेति, ॥३००॥

नच युगानुरूपेण कर्माणि फलन्तीति राज्ञोदासितव्यं यतः-

कृतं त्रेतायुगं चैव द्वापरं कलिरेव च।
राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते ॥३०१॥

The various ways in which a king behaves (resemble) the Kṛta, Tretā, Dvāpara, and Kali ages; hence the king is identified with the ages (of the world).

कृतत्रेताद्वापरकलयो राज्ञ एव चेष्टितविशेषास्तैरेव सत्यादिविशेषप्रवृतेः। तस्माद्राजैव कृतादियुगमभिधीयते ॥३०१॥

कीदृक्चेष्टितः कृतादियुगमित्यत आह-

कलिः प्रसुप्तो भवति स जाग्रद्द्वापरं युगम्।
कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम् ॥३०२॥

Sleeping he represents the Kali (or iron age), waking the Dvāpara (or brazen) age, ready to act the Tretā (or silver age), but moving (actively) the Kṛta (or golden) age.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अज्ञानालस्यादिना यदा निरुद्यमो राजा भवति तदा कलिः स्यात्। यदा जानन्नपि नानुतिष्ठति तदा द्वापरम्। यदा कर्मानुष्ठानेऽवस्थितस्तदा त्रेता। यथाशास्त्रं पुनः कर्माण्यनुतिष्ठन्विचरति तदा कृतयुगम्। तस्माद्राज्ञा कर्मानुष्ठानपरेण भाव्यमित्यत्र तात्पर्यं नतु वास्तवकृतयुगाद्यपलापे ॥३०२॥

इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च।
चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ॥३०३॥

Let the king emulate the energetic action of Indra, of the Sun, of the Wind, of Yama, of Varuṇa, of the Moon, of the Fire, and of the Earth.

इन्द्रादिसंबन्धिनो वीर्यस्यानुरूपं चरितं राजानुतिष्ठेत्। तथाच राजा कण्टकोद्धारेण प्रतापानुरागाभ्यां संयुक्तः स्यात् ॥३०३॥

कथमिन्द्रादिचरितमनुतिष्ठेदित्याह-

वार्षिकांश्चतुरो मासान्यथेन्द्रोऽभिप्रवर्षति।
तथाभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ॥३०४॥

As Indra sends copious rain during the four months of the rainy season, even so let the king, taking upon himself the office of Indra, shower benefits on his kingdom.

ऋतुसंवत्सरपक्षाश्रयणेनेदमुच्यते। यथा श्रावणादींश्चतुरो मासानिन्द्रः सस्यादिसिद्धये वर्षत्येवमिन्द्रचरितमनुतिष्ठन् राजा स्वदेशायातसाधूनभिलषितार्थैः पूरयेत् ॥३०४॥

अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः।
तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥३०५॥

As the Sun during eight months (imperceptibly) draws up the water with his rays, even so let him gradually draw his taxes from his kingdom; for that is the office in which he resembles the Sun.

यथा सूर्यो मार्गशीर्षाद्यष्टमासान् रश्मिभिः स्तोकं स्तोकं रसमीषत्तापेनादत्ते,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्तु पूर्वनिविष्टस्य तडागस्योदकं हरेत्।
आगमं वाप्यपां भिद्यात्स दाप्यः पूर्वसाहसम्॥२८१॥

But he who shall take away the water of a tank, made in ancient times, or shall cut off the supply of water, must be made to pay the first (or lowest) amercement.

यः पुनः प्रजार्थं पूर्वं केनचित्कृतस्य तडागस्योदकमेव गृह्णाति कृत्स्नतडागोदकनाशने वधदण्डः प्रागुक्तः। तथोदकगमनमार्गं सेतुबन्धादिना यो नाशयति स प्रथमसाहसं दण्ड्यः॥२८१॥

समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि।
स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत्॥२८२॥

But he who, except in a case of extreme necessity, drops filth on the king's high-road, shall pay two kārṣāpaṇas and immediately remove (that) filth.

अनार्तः सन्यो राजपथेषु पुरीषं कुर्यात्स कार्षापणद्वयं दण्डं दद्यात्स चामेध्यं शीघ्रमेवापसारयेत्॥२८२॥

आपद्गतोऽथवा वृद्धा गर्भिणी बाल एव वा।
परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः॥२८३॥

But a person in urgent necessity, an aged man, a pregnant woman, or a child, shall be reprimanded and clean the (place); that is a settled rule.

व्याधितवृद्धगर्भिणीबाला न दण्डनीयाः किंतु ते पुनः किंकृतमिति परिभाषणीयाः। तच्चमेध्यं शोधनीया इति शास्त्रमर्यादा॥२८३॥

चिकित्सकानां सर्वेषां मिथ्या प्रचरतां दमः।
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः॥२८४॥

All physicians who treat (their patients) wrongly (shall pay) a fine; in the case of animals, the first (or lowest); in the case of human beings, the middlemost (amercement).

सर्वेषां कायशल्यादिभिषजां दुश्चिकित्सां कुर्वतां दण्डः कर्तव्यः। तत्र

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गवाश्वादिविषये दुश्चिकित्सायां प्रथमसाहसदण्डो मानुषविषये पुनर्मध्यमसाहसः॥२८४॥

संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः।
प्रतिकुर्याच्च तत्सर्वं पञ्च दद्याच्छतानि च॥२८५॥

He who destroys a bridge, the flag (of a temple or royal palace), a pole, or images, shall repair the whole (damage) and pay five hundred (paṇas).

संक्रमो जलोपरि गमनार्थं काष्ठशिलादिरूपः, ध्वजचिह्नं राजद्वारादौ, यष्टिः पुष्करिण्यादौ, प्रतिमाश्च क्षुद्रा मृन्मय्यादयस्तासां विनाशकः पञ्चशतपणान्दद्यात्तच्च विनाशितं सर्वं पुनर्नवं कुर्यात्॥२८५॥

अदूषितानां द्रव्याणां दूषणे भेदने तथा।
मणीनामपवेधे च दण्डः प्रथमसाहसः॥२८६॥

For adulterating unadulterated commodities, and for breaking gems or for improperly boring (them), the fine is the first (or lowest) amercement.

अदुष्टद्रव्याणामपद्रव्यप्रक्षेपेण दूषणे, मणीनां च माणिक्यादीनामभेद्यानां विदारणे, वेध्यानामपि मुक्तादीनामनवस्थानवेधने प्रथमसाहसो दण्डः कार्यः। सर्वन्न परकीयद्रव्यनाशे द्रव्यान्तरदानादिना स्वामितुष्टिः कार्या॥२८६॥

समैर्हि विषमं यस्तु चरेद्वै मूल्यतोऽपि वा।
समाप्नुयाद्दमं पूर्वं नरो मध्यममेव वा॥२८७॥

But that man who behaves dishonestly to honest (customers) or cheats in his prices, shall be fined in the first or in the middlemost amercement.

समैः सममूल्यदातृभिः सहोत्कृष्टापकृष्टद्रव्यदानेन यो विषमं व्यवहरति सममूल्यं द्रव्यं दत्त्वा यः कस्यचिद्बहुमूल्यं कस्यचिदल्पमूल्यमिति विषमं मूल्यं गृह्णाति सोऽनुबन्धविशेषापेक्षया प्रथमसाहसं मध्यमसाहसं वा दण्डं प्राप्नुयात्॥२८७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बन्धनानि च सर्वाणि राजा मार्गे निवेशयेत्।
दुःखिता यत्र दृश्येरन्विकृताः पापकारिणः॥२८८॥
प्राकारस्य च भेत्तारं परिखाणां च पूरकम्।
द्वाराणां चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत्॥२८९॥

Let him place all prisons near a high-road, where the suffering and disfigured offenders can be seen.

Him who destroys the wall (of a town), or fills up the ditch (round a town), or breaks a (town)-gate, he shall instantly banish.

बन्धनगृहाणि सर्वजनदृश्ये राजमार्गे कुर्यात् यत्र निगडबन्धनाद्युपेताः क्षुत्तृष्णाभिभूता दीर्घकेशनखश्मश्रवः कृशाः पापकारिणोऽन्यैरकार्यकारिभिरकार्यनिवृत्त्यर्थं दृश्यरेन् राजगृहपुरादिसंबन्धिनः प्राकारस्य भेदकं तदीयानामेव परिखाणां पूरयितारं तद्गतानां द्वाराणां भष्टकं शीघ्रमेव देशान्निर्वासयेत्॥२८८-२८९॥

अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः।
मूलकर्मणि चानाप्तेः कृत्यासु विविधासु च॥२९०॥

For all incantations intended to destroy life, for magic rites with roots (practised by persons) not related (to him against whom they are directed), and for various kinds of sorcerty, a fine of two hundred (*paṇas*) shall be infliced.

अभिचारहोमादिषु शास्त्रीयेषु मारणोपायेषु लौकिकेषु च मूलनिखननपदपांशुग्रहणादिषु कृतेष्वनुत्पन्नमरणफलेषु द्विशतपणग्रहणरूपो दण्डः कर्तव्यः। मरणे तु मानुषमारणदण्डः। एवं मातृपितृभार्यादिव्यतिरिक्तैरसत्यैर्व्यामोह्य धनग्रहणाद्यर्थं वशीकरणे तथा कृत्यासूच्चाटनापाटवादिहेतुषु क्रियमाणासु नानाप्रकारासु द्विशतपणदण्ड एव कर्तव्यः॥२९०॥

अबीजविक्रयी चैव बीजोत्कृष्टं तथैव च।
मर्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधम्॥२९१॥

He who sells (for seed-corn that which is) not seed-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

corn, he who takes up seed (already sown), and he who destroys a boundary(-mark), shall be punished by mutilation.

अबीजं बीजप्ररोहासमर्थं व्रीह्यादि प्ररोहसमर्थमिति कृत्वा यो विक्रीणीते, तथापकृष्टमेव कतिपयोत्कृष्टप्रक्षेपेण सर्वमिदं सोत्कर्षमिति कृत्वा यो विक्रीणीते यश्च ग्रामनगरादिसीमां विनाशयति स विकृतनासाकरचरणकर्णादिरूपं वधं प्राप्नुयात् ॥२९१॥

सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः।
प्रवर्तमानमन्याये छेदयेल्लवशः क्षुरैः॥२९२॥

But the king shall cause a goldsmith who behaves dishonestly, the most nocuous of all the thorns, to be cut to pieces with razors.

सर्वकण्टकानां मध्येऽतिशयेन पापतमं सुवर्णकारं तुलाच्छद्मकषपरिवर्तापद्रव्यप्रक्षेपादिना हेमादिचौर्ये प्रवर्तमानमनुबन्धापेक्षयान्नाविशेषेण सर्वदेहं वा खण्डशश्छेदयेत् ॥२९२॥

सीताद्रव्यापहरणे शस्त्राणामौषधस्य च।
कालमासाद्य कार्यं च राजा दण्डं प्रकल्पयेत्॥२९३॥

For the theft of agricultural implements, of arms and of medicines, let the king award punishment, taking into account the time (of the offence) and the use (of the object).

कृष्यमाणभूमिद्रव्याणां हलकुद्दालादीनामपहरणे, खड्गादीनां च शस्त्राणां, औषधस्य च कल्याणघृतादेश्चौर्ये सत्युपयोगकालेतरकालापेक्षया प्रयोजनापेक्षया च राजा दण्डं कुर्यात् ॥२९३॥

स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते॥२९४॥

The king and his minister, his capital, his realm, his treasury, his army, and his ally are the seven constitutent parts (of a kingdom); (hence) a kingdom is said to have

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु।
सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत्॥३१९॥

Thus, though Brāhmaṇas employ themselves in all (sorts of) mean occupations, they must be honoured in every way; for (each of) them is a very great deity.

एवं कुत्सितकर्मस्वपि सर्वेषु यद्यपि ब्राह्मणाः प्रवर्तन्ते तथापि सर्वप्रकारेण पूज्याः। यस्मात् प्रकृष्टं तद्दैवतम्। स्तुत्यर्थत्वाच्चास्य न यथाश्रुतार्थविरोधः शङ्कनीयः॥३१९॥

क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणान्प्रति सर्वशः।
ब्रह्मैव संनियन्तृ स्यात्क्षत्रं हि ब्रह्मसंभवम्॥३२०॥

When the Kṣatriyas become in any way overbearing towards the Brāhmaṇas, the Brāhmaṇas themselves shall duly restrain them; for the Kṣatriyas sprang from the Brāhmaṇas.

क्षत्रियस्य ब्राह्मणान्प्रति सर्वथा पीडानुवृत्तस्य ब्राह्मणा एव शापाभिचारादिना सम्यन्नियन्तारः। यस्मात्क्षत्रियो ब्राह्मणात्संभूतः, ब्राह्मणबाहुप्रसूतत्वात्॥३२०॥

तथाच-

अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति॥३२१॥

Fire sprang from water, Kṣatriyas from Brāhmaṇas, iron from stone; the all-penetrating force of those (three) has no effect on thatg whence they were produced.

जलब्राह्मणपाषाणेभ्योऽग्निक्षत्रियशस्त्राणि जातानि तेषां संबन्धि तेजः सर्वत्र दहनाभिभवच्छेदनार्थकं कार्यं करोति। स्वकारणेषु जलब्राह्मणपाषाणाख्येषु दहनाभिभवच्छेदनात्मकं कार्यं न करोति॥३२१॥

नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते।
ब्रह्म क्षत्रं च संपृक्तमिह चामुत्र वर्धते॥३२२॥

Kṣatriyas propser not without Brāhmaṇas, Brāhmaṇas

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

propser not without Kṣatriyas; Brāhmaṇas and Kṣatriyas, being closely united, prosper in this (world) and in the next.

ब्राह्मणरहितक्षत्रियो वृद्धिं न याति, शान्तिकपौष्टिक- व्यवहारेक्षणादिधर्म-विरहात्। एवं क्षत्रियरहितोऽपि ब्राह्मणो न वर्धते, रक्षां विना यागादिकर्मानिष्पत्तेः। किंतु ब्राह्मणः क्षत्रियश्च परस्परसंबद्ध एवेह लोके परलोके च धर्मार्थकाममोक्षावाप्त्या वृद्धिमेति। दण्डप्रकरणे चेयं ब्राह्मणस्तुतिर्ब्राह्मणानामपराधिनामपि लघुदण्डप्रयोगनियमार्था ॥३२२॥

यदा तु विशिष्टदर्शनेनाचिकित्स्यव्याधिना वासन्नमृत्युर्भवति तदा-

दत्त्वा धनं तु विप्रेभ्यः सर्वदण्डसमुत्थितम्।
पुत्रे राज्यं समासृज्य कुर्वीत प्रायणं रणे ॥३२३॥

But (a king who feels his end drawing nigh) shall bestow all his wealth, accumulated from fines, on Brāhmaṇas, make over his kingdom to his son, and then seek death in battle.

महापातकिधनव्यतिरिक्तविनियुक्तावशिष्टसर्वदण्डधनं ब्राह्मणेभ्यो दत्त्वा, पुत्रे राज्यं समर्प्यासन्नमृत्युः फलातिशयप्राप्तये संग्रामे प्राणत्यागं कुर्यात्। संग्रामासंभवे त्वनशनादिनापि ॥३२३॥

एवं चरन्सदा युक्तो राजधर्मेषु पार्थिवः।
हितेषु चैव लोकस्य सर्वान्भृत्यान्नियोजयेत् ॥३२३॥

Thus conducting himself (and) ever intent on (discharging) his royal duties, a king shall order all his servants (to work) for the good of his people.

एवमध्यायत्रयोक्तराजधर्मेषु व्यवहार्यमाणो राजा सर्वदा यत्नवान्प्रजाहितेषु सर्वान्भृत्यान्विनियोजयेत् ॥३२४॥

एषोऽखिलः कर्मविधिरुक्तो राज्ञः सनातनः।
इमं कर्मविधिं विद्यात्क्रमशो वैश्यशूद्रयोः ॥३२५॥

Thus the eternal law concerning the duties of a king

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

has been fully declared; know that the following rules apply in (due) order to the duties of Vaiśyas and Śūdras.

एतद्राज्ञः कर्मानुष्ठानं पारंपर्यागततया नित्यं समग्रमुक्तम्। इदानीं वैश्यशूद्रक्रमेण वक्ष्यमाणमिदं कर्मानुष्ठानं जानीयात्॥३२५॥

वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्।
वार्तायां नित्ययुक्तः स्यात्पशूनां चैव रक्षणे॥३२६॥

After a Vaiśya has received the sacraments and has taken a wife, he shall be always attentive to the business whereby he may subsist and to (that of) tending cattle.

वैश्यः कृतोपनयनपर्यन्तसंस्कारो विवाहादिकं कृत्वा जीविकायां वक्ष्यमाणायां कृष्यादिकार्यार्थं पशुपालने च सदा समायुक्तः स्यात्। पशुरक्षणस्य वार्तात्वेऽपि प्राधान्यख्यापनार्थं पृथग्विधानम्। तथा चोत्तरश्लोकाभ्यां प्राधान्यं दर्शयति॥३२६॥

प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून्।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः॥३२७॥

For when the Lord of creatures (Prajāpati) created cattle, he made them over o the Vaiśya; to the Brāhmaṇa, and to the king he entrusted all created beings.

यस्माद्ब्रह्मा पशून्सृष्ट्वा रक्षणार्थं वैश्याय दत्तवानतो वैश्येन रक्षणीयाः पशव इति पूर्वानुवादः। प्रजाश्च सर्वाः सृष्ट्वा ब्राह्मणाय राज्ञे च रक्षणार्थं दत्तवानिति प्रसन्नादेतदुक्तम्॥३२७॥

न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति।
वैश्ये चेच्छति नान्येन रक्षितव्याः कथंचन॥३२८॥

A Vaiśya must never (conceive this) wish, 'I will not keep cattle;' and if a Vaiśya is willing (to keep them), they must never be kept by (men of) other (castes).

पशुरक्षणं न करोमीति वैश्येनेच्छा न कार्या। अतः कृष्यादिवृत्तिसंभवेऽपि वैश्येन पशुरक्षणमवश्यं करणीयम्। वैश्ये च पशुरक्षणं कुर्वत्यन्यः पशुरक्षणं न कारयितव्यः॥३२८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

किंच-

मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च।
गन्धानां च रसानां च विद्यादर्घबलाबलम्॥३२९॥

(A Vaiśya) must know the respective value of gems, of pearls, of coral, of metals, of (cloth) made of thread, of perfumes, and of condiments.

मणिमुक्ताविद्रुमलोहवस्त्राणां, गन्धानां कर्पूरादीनां, रसानां लवणादीनामुत्तममध्यमानां देशकालापेक्षया मूल्योत्कर्षापकर्षं वैश्यो जानीयात्॥३२९॥

बीजानामुप्तिविच्च स्यात्क्षेत्रदोषगुणस्य च।
मानयोगं च जानीयात्तुलायोगांश्च सर्वशः॥३३०॥

He must be acqainted with the (manner of) sowing of seeds, and of the good and bad qualities of fields, and he must perfectly know all measures and weights.

बीजानां सर्वेषां वपनविधिज्ञः स्यात्। इदं बीजमस्मिन्काले तत्र संहतं चोप्तं प्ररोहत्यस्मिन्नेत्येवं तथेदमूषरमिदं सस्यप्रदमित्यादि क्षेत्रदोषगुणज्ञश्च स्यात्। मानोपायांश्च प्रस्थद्रोणादीन्तुलोपायांश्च सर्वान् तत्त्वतो जानीयात्। यथान्यो न वञ्चयति॥३३०॥

सारासारं च भाण्डानां देशानां च गुणागुणान्।
लाभालाभं च पण्यानां पशूनां परिवर्धनम्॥३३१॥

Moreover, the excellence and defects of commodities, the advantages and disadvantages of (different) countries, the (probable) profit and loss on mercandise, and the means of properly rearing cattle.

इदमुत्कृष्टमेतदपकृष्टमित्येकजातीनामपि द्रव्याणां विशेषं जानीयात्तथा देशानां प्राक्पश्चिमादीनां क्व किमल्पमूल्यं किं बहुमूल्यं चेत्यादि देशगुणदोषौ बुध्येत। विक्रयद्रव्याणां चेतया कालेन इयानपचय उपचयो वेति विद्यात्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथा राजा शास्त्रीयकरानपीडया सदा राष्ट्राद्गृह्णीयात्। यस्मादेतदस्यार्क-व्रतम्॥३०५॥

प्रविश्य सर्वभूतानि यथा चरति मारुतः।
तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम्॥३०६॥

As the Wind moves (everywhere), entering (in the shape of the vital air) all created beings, even so let him penetrate (everywhere) through his spies; that is the office in which he resembles the Wind.

यथा प्राणाख्यो वायुः सर्वजन्तुष्वन्तः प्रविश्य विचरत्येवं चारद्वारेण स्वपरमण्डलजालेषु चिकीर्षितार्थज्ञानार्थमन्तः प्रवेष्टव्यम्। यस्मादेतन्मारुतं चरितम्॥३०६॥

यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति।
तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम्॥३०७॥

As Yama at the appointed time subjects to his rule both friends and foes, even so all subjects must be controlled by the king; that is the office in which he resembles Yama.

यद्यपि यमस्य शत्रुमित्रे न स्तस्तथापि तन्निन्दकार्चकयोः शत्रुमित्रयोर्यथा यमः शत्रुमित्रमरणकाले तुल्यवन्नियमयत्येवं राज्ञाऽपराधकाले रागद्वेषपरिहारेण प्रजाः प्रमापणीयाः। यस्मादेतदस्य याम्यं व्रतम्॥३०७॥

वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते॥
तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम्॥३०८॥

As (a sinner) is seen bound with ropes by Varuṇa, even so let him punish the wicked; that is his office in which he resembles Varuṇa.

यो वरुणस्य रज्जुभिर्बन्धयितुमिष्टः स यथा तेनाविशङ्कितः पाशैर्बद्ध एव लक्ष्यते। तथा पापकारिणोऽविशङ्कितानेव यावन्न पारयन्ते तावच्छासयेत्। यस्मादेतदस्य वारुणं व्रतम्॥३०८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः।
तथा प्रकृतयो यस्मिन्स चान्द्रव्रतिको नृपः॥३०९॥

He is a king, taking upon himself the office of the Moon, whose (appearance) his subjects (greet with as great joy) as men feel on seeing the full moon.

यथा पूर्णेन्दुदर्शनेन मनुष्या हर्षमुत्पादयन्त्येवममात्यादयो यस्मिन्दृष्टे तुष्टिमुपगच्छन्ति स चन्द्राचारचारी नरेन्द्रः॥३०९॥

प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु।
दुष्टसामन्तहिंस्रश्च तदाग्नेयं व्रतं स्मृतम्॥३१०॥

(If) he is ardent in wrath against criminals and endowed with brilliant energy, and destroys wicked vassals, then his character is said (to resemble) that of Fire.

पापकारिषु सदा दण्डपातेन प्रचण्डोऽसहनः स्यात्तथा प्रतिकूलामात्यहिंसनशीलो भवेत्। तदस्याग्निसंबन्धि व्रतं स्मृतम्॥३१०॥

यथा सर्वाणि भूतानि धरा धारयते समम्।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं वृतम्॥३११॥

As the Earth supports all created beings equally, thus (a king) who supports all his subjects, (takes upon himself) the office of the Earth.

यथा पृथिवी सर्वाण्युच्चवचानि स्थावरजन्नमान्युत्कृष्टापकृष्टानि समं कृत्वा धारयते तद्वद्विद्वद्धनिकगुणवद्भूतानि तदितराणि च दीनानाथादिसर्वभूतानि रक्षणधनदानादिना सामान्येन धारयतः पृथिवीसंबन्धि व्रतं भवति॥३११॥

एतैरुपायैरन्यैश्च युक्तो नित्यमतन्द्रितः।
स्तेनान्राजा निगृह्णीयात्स्वराष्ट्रे पर एव च॥३१२॥

Employing these and other means, the king shall, ever untried, restrain theieves both in his own dominions and in (those of) others.

एतैरुक्तौपायैरन्यैश्चानुक्तैरपि स्वबुद्धिप्रयुक्तो राजानलसः सन् स्वराष्ट्रे ये

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चौरा वसन्ति, ये च परराष्ट्रे वसन्तस्तद्देशमागत्य मुष्णन्ति, तानुभयप्रकारान्निगृह्णीयात्। "सोऽग्निर्भवति वायुश्च" (अ. ७ श्लो. ७) इत्यादिना पूर्वसिद्धवदुक्तमग्न्यादिरूपत्वमिह तु तद्गुणयोगेन स्फुटीकृतमित्य-पुनरुक्तिः॥३१२॥

परामप्यापदं प्राप्तो ब्राह्मणान्न प्रकोपयेत्।
ते ह्येनं कुपिता हन्युः सद्यः सबलवाहनम्॥३१३॥

Let him not, though fallen into the deepest distress, provoke Brāhmaṇas to anger; for they, when angered, could instantly destroy him together with his army and his vehicles.

कोशक्षयादिना प्रकृष्टामप्यापदं प्राप्तो राजा ब्राह्मणान्न प्रकोपयेत्। यस्मात्ते रुष्टाः सबलवाहनमेनं सद्य एव शापाभिचाराभ्यां हन्युः॥३१३॥

तथाहि-

यैः कृतः सर्वभक्ष्योऽग्निरपेयश्च महोदधिः।
क्षयी चाप्यायितः सोमः को न नश्येत्प्रकोप्य तान्॥३१४॥

Who could escape destruction, when he provokes to anger those (men), by whom the fire was made to consume all things, by whom the (water of the) ocean was made undrinkable, and by whom the moon was made to wane and to increase again?

यैर्ब्राह्मणैरभिशापेन सर्वभक्ष्योऽग्निः कृतः, समुद्रश्चापेयजलः, चन्द्रश्च क्षययुक्तः पश्चात्पूरितस्तान्कोपयित्वा को न नश्येत्॥३१४॥

किंच-

लोकानन्यान्सृजेयुर्ये लोकपालांश्च कोपिताः।
देवान्कुर्युरदेवांश्च कः क्षिण्वंस्तान्समृध्नुयात्॥३१५॥

Who could prosper, while he injures those (men) who provoked to anger, could create other worlds and other guardians of the world, and deprive the gods of their divine station?

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ये स्वर्गादिलोकान्परानन्यांश्च लोकपालान्सृजन्तीति संभाव्यते। देवांश्च शापेन मानुषादीन्कुर्वन्ति तान्पीडयन्कः समृद्धिं प्राप्नुयात्॥३१५॥

अपिच-

यानुपाश्रित्य तिष्ठन्ति लोका देवाश्च सर्वदा।
ब्रह्म चैव धनं येषां को हिंस्यात्तांञ्जिजीविषुः॥३१६॥

What man, desirous of life, would injure them to whose support the (three) worlds and the gods ever owe their existence, and whose wealth is the Veda?

यान्ब्राह्मणान्यजनयाजनकर्तृकानाश्रित्य "अग्नौ प्रास्ताहुतिः" (अ. ३ श्लो. ७६) इति न्यायेन पृथिव्यादिलोका देवाश्च स्थितिं लभन्ते, वेद एव च येषां धनमभ्युदयसाधनतया याजनाध्यापनादिना धनोपायत्वाच्च, तांञ्जीवितुमिच्छन्को हिंस्यात्॥३१६॥

एवं तर्हि विद्वांसं ब्राह्मणं सेवेतेत्यत आह-

अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत्।
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत्॥३१७॥

A Brāhmaṇa, be he ignorant or learned, is a great divinity, just as the fire, whether carried forth (for the performance of a burnt-oblation) or not carried forth, is a great divinity.

यथाहितोऽनाहितो वाग्निर्महती देवता एवं मुर्खो विद्वाश्चं ब्राह्मणः प्रकृष्टा देवतेति॥३१७॥

श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति।
हूयमानश्च यज्ञेषु भूय एवाभिवर्धते॥३१८॥

The brilliant fire is not contaminated even in burial-places, and, when presented with oblations (of butter) at sacrifices, it again increases mightily.

यथाग्निर्महातेजाः श्मशाने शवं दहन्कार्येऽपि नैव दुष्टो भवति किन्तु पुनरपि यज्ञेषु हूयमानोऽभिवर्धते॥३१८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तथास्मिन् देशे कालेऽनेन च तृणोदकयवादिना पशवो वर्धन्तेऽनेन क्षीयन्त इत्येतदपि जानीयात्॥३३१॥

भृत्यानां च भृतिं विद्याद्भाषाश्च विविधा नृणाम्।
द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च॥३३१॥

He must be acquainted with the (proper) wages of servants, with the various languages of men, with the manner of keeping goods, and (the rules of) purchase and sale.

गोपालमहिषपालानामितीदमस्य देयमिति देशकालकर्मानुरूपं वेतनं जानीयात्। गौडदाक्षिणात्यादीनां च मनुष्याणां नानाप्रकारा भाषा विक्रयाद्यर्थं विद्यात्तथेदं द्रव्यमेवं स्थाप्यतेऽनेन च संयुक्तं चिरं तिष्ठतीति बुद्ध्येत, तथेदं द्रव्यमस्मिन्देशे काले चेयता विक्रीयत इत्येतदपि जानीयात्॥३३२॥

धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमम्।
दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः॥३३२॥

Let him exert himself to the utmost in order to increase his property in a righeous manner, and let him zealously give food to all created beings.

धर्मेण विक्रयादिनोक्तप्रकारेण धनवृद्धौ प्रकष्टं यत्नं कुर्यात्। हिरण्यादिदानमपेक्ष्यान्नमेव प्राणिभ्यो विशेषेण दद्यात्॥३३३॥

विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम्।
शुश्रूषैव तु शूद्रस्य धर्मो नैःश्रेयसः परः॥३३४॥

But to serve Brāhmaṇas (who are) learned in the Vedas, householders, and famous (for virtue) is the highest duty of a Śūdra, which leads to beatitude.

शूद्रस्य पुनर्वेदविदां गृहस्थानां स्वधर्मानुष्ठानेन यशोयुक्तानां ब्राह्मणानां या परिचर्या सव प्रकृष्टस्वर्गादिश्रेयोहेतुर्धर्मः॥३३४॥

शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः।
ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते॥३३५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(A Śūdra who is) pure, the servant of his betters, gentle in his speech, and free from pride, and always seeks a refuge with Brāhmaṇas, attains (in his next life) a higher caste.

बाह्याभ्यन्तरशौचोपेतः, स्वजात्यपेक्षयोत्कृष्टद्विजातिपरिचरणशीलः, अपरुषभाषी, निरहंकारः, प्राधान्येन ब्राह्मणाश्रयस्तदभावे क्षत्रियवैश्याश्रयोऽपि स्वजातित उत्कृष्टां जातिं प्राप्नोति ॥३३५॥

एषोऽनापदि वर्णानामुक्तः कर्मविधिः शुभः।
आपद्यपि हि यस्तेषां क्रमशस्तन्निबोधत ॥३३६॥

The excellent law for the conduct of the (four) castes (*varṇa*), (when they are) not in distress, has been thus promulgated; now hear in order their (several duties) in times of distress.

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां नवमोऽध्यायः ॥९॥

एष वर्णानामनापदि चतुर्णामपि कर्मविधिर्धर्म उक्तः, आपद्यपि यस्तेषां धर्मः तं संकीर्णश्रवणादूर्ध्वं च क्रमेण शृणुत ॥३३६॥ क्षे. श्लो. ॥६॥

इति श्रीकुल्लकभट्टविरचितायां मन्वर्थमुक्तावल्यां नवमोऽध्यायः ॥९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दशमोऽध्यायः

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः।
प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः॥१॥

Let the three twice-born castes (*varṇa*), discharging their (prescribed) duties, study (the Veda); but among them the Brāhmaṇa (alone) shall teach it, not the other two; that is an established rule.

वैश्यशूद्रधर्मानन्तरं "संकीर्णानां च संभवम्" (अ. १ श्लो. ११६) इति प्रतिज्ञातत्वात्तस्मिन्वाच्ये वर्णेभ्य एव संकीर्णानामुत्पत्तेः वर्णानुवादार्थं त्रैवर्णिकस्य प्रधानधर्ममध्ययनं ब्राह्मणस्य चाध्यापनमनुवदति। ब्राह्मणादयस्त्रयो वर्णा अध्ययनानुभूतस्वकर्मानुष्ठातारो वेदं पठेयुः। एषां पुनर्मध्ये ब्राह्मण एवाध्यापनं कुर्यान्न क्षत्रियवैश्यावित्ययं निश्चयः। प्रब्रूयाद्ब्राह्मणस्त्वेषामित्यनेनैव क्षत्रियवैश्ययोरध्यापन निषेधसिद्धौ नेतराविति पुनर्निषेधवचनं प्रायश्चित्त-गौरवार्थम्॥१॥

किंच-

सर्वेषां ब्राह्मणो विद्याद्वृत्त्युपायान्यथाविधि।
प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत्॥२॥

The Brāhmaṇa must know he means of subnsistence (prescribed) by law for all, instruct the others, and himself live according to (the law).

सर्वेषां वर्णानां जीवनोपायं यथाशास्त्रं ब्राह्मणो जानीयात्तेभ्यश्चोपदिशेत्स्वयं च यथोक्तवन्नियममनुतिष्ठेत्॥२॥

अत्रानुवादः-

वैशेष्यात्प्रकृतिश्रैष्ठ्यान्नियमस्य च धारणात्।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभु.॥३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

On account of his pre-eminence, on account of the superiority of his origin, on account of his observance of (particular) restrictive rules, and on account of his particular sanctification the Brāhmaṇa is the lord of (all) castes (*varṇa*).

जात्युत्कर्षात्, प्रकृतिः कारणं हिरण्यगर्भोत्तमान्नरूपकारणोत्कर्षात्, नियम्यतेऽनेनेति नियमो वेदस्तस्याध्ययनाध्यापनव्याख्यानादियुक्तसातिशयवेदधारणात्। अतएव "ब्रह्मणश्चैव धारणात्" (अ. १ श्लो. ९३) इति सातिशयवेदधारणेनैव ब्राह्मणोत्कर्ष उक्तः। गोविन्दराजस्तु स्नातकव्रतानां धारणादिति व्याख्यातवान्। तन्न। क्षत्रियादिसाधारण्यात्। संस्कारस्योपनयनाख्यस्य क्षत्रियाद्यपेक्षया प्राधान्यविधाने विशेषाद्वर्णानामध्यापनवृत्त्युपदेशयोर्ब्राह्मण एवेश्वरः॥३॥

ब्राह्मणः क्षत्रियोवैश्यस्त्रयो वर्णा द्विजातयः।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः॥४॥

The Brāhmaṇa, the Kṣatriya, and the Vaiśya castes (*varṇa*) are the twice-born ones, but the fourth, the Śūdra, has one birth only; there is no fifth (caste).

ब्राह्मणदयस्त्रयो वर्णा द्विजाः, तेषामुपनयनविधानात्। शूद्रः पुनश्चतुर्थो वर्ण एकजातिः, उपनयनाभावात्। पञ्चमः पुनर्वर्णो नास्ति। संकीर्णजातीनां त्वश्वतरवन्मातापितृजातिव्यतिरिक्तजात्यन्तरत्वान्न वर्णत्वम्। अयं च जात्यन्तरोपदेशः शास्त्रे संव्यवहरणार्थः॥४॥

सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु।
आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते॥५॥

In all castes (*varṇa*) those (children) only which are begotten in the direct order on wedded wives, equal (in caste and married as) virgins, are to be considered as belonging to the same caste (as their fathers).

ब्राह्मणादिषु वर्णेषु चतुर्ष्वपि, समानजातीयासु यथाशास्त्रं परिणीतास्वक्षतयोनिष्वानुलोम्येन ब्राह्मणेन ब्राह्मण्यां क्षत्रियेण क्षत्रियायामित्यनेनानुक्रमे ये जातास्ते मातापित्रोर्जात्या युक्तास्तज्जातीया एव ज्ञातव्याः। आनुलोम्यग्रहणं चात्र

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मन्दोपयुक्तमुत्तरश्लोक उपयोक्ष्यते। गवाश्वादिवदवयवसंनिवेशस्य ब्राह्मण-जात्यभिव्यञ्जकाभावादेतद्ब्राह्मणादिलक्षणमुक्तम्। अत्र च पत्नीग्रहणादन्य-पत्नीजनितानां न ब्राह्मणादिजातित्वम्। तथाच देवलः- ''द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते। अववाट इति ख्यातः शूद्रधर्मा स जातितः। व्रतहीना न संस्कार्याः स्वतन्त्रास्वपि ये सुताः उत्पादिताः सवर्णेन व्रात्या इव बहिष्कृताः।'' व्यासः-''ये तु जाताः समानासु संस्कार्याः स्युरतोऽन्यथा।'' याज्ञवल्क्योऽपि-''सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः'' (अ. १ श्लो. ९०) इत्यभिधाय ''विन्नास्वेष विधिः स्मृतः'' (या. अ. १ श्लो. ९२) इति ब्रुवाणः प्रत्युत्पादितस्यैव ब्राह्मणादिजातित्वं निश्चिकाय॥५॥

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान्।
सदृशानेव तानाहुर्मातृदोषविगर्हितान्॥६॥

Sons, begotten by twice-born men on wives of the next lower castes, they declare to be similar (to their fathers, but) blamed on account of the fault (inherent) in their mothers.

आनुलोम्येनाव्यवहितवर्ण- जातीयासु भार्यासु द्विजातिभिर्ये उत्पादिताः पुत्राः, यथा ब्राह्मणेन क्षत्रियायां, क्षत्रियेण वैश्यायां वैश्येन शूद्रायां तान्मातुर्हीनजातीयत्वदोषाद्ग्रर्हितान्पितृसदृशान्न तु पितृसजातीयान्मन्वादय आहुः। पितृसदृशग्रहणान्मातृजातेरुत्कृष्टाः पितृजातिनो निकृष्टा ज्ञेयाः। एतेषां च नामानि मूर्धावसिक्तमाहिष्यकरणाख्यानि याज्ञवल्क्यादिभिरुक्तानि, वृत्तयश्चैषामुशनसोक्ताः- हस्त्यश्वरथशिक्षा अस्त्रधारणं च मूर्धाभिषिक्तानां, नृत्यगीतनक्षत्रजीवनं सस्यरक्षा च माहिष्याणां, द्विजातिशुश्रूषा धनधान्याध्यक्षता राजसेवादुर्गान्तःपुररक्षा च पारशवोग्रकरणानामिति॥६॥

अनन्तरासु जातानां विधिरेष सनातनः।
द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम्॥७॥

Such is the eternal law concerning (children) born of wives one degree lower (than their husbands); know (that) the following rule (is applicable) to those born of women two or three degrees lower.

एष पारम्पर्यागततया नित्यो विधिरनन्तरजातिभार्योत्पन्नानामुक्तः एकेन

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वाभ्यां च वर्णाभ्यां व्यवहितासूत्पन्नानां यथा ब्राह्मणेन वैश्यायां क्षत्रियेण शूद्रायां ब्राह्मणेन शूद्रायामिमं वक्ष्यमाणं धर्मादनपेतं विधिं जानीयात् ॥७॥

ब्राह्मणाद्वैश्यकन्यायाममम्बष्ठो नाम जायते।
निषादः शूद्रकन्यायां यः पारशव उच्यते ॥८॥

Form a Brāhmaṇa with the daughter of a Vaiśya is born (a son) called an Ambaṣṭha, with the daughter of a Śūdra a Niṣāda, who is also called a Pāraśava.

कन्याग्रहणादत्रोढायामित्यध्याहार्यम्। "विन्नास्वेष विधिः स्मृतः" (अ. १ श्लो. ९२) इति याज्ञवल्क्येन स्फुटीकृतत्वाच्च। ब्राह्मणाद्वैश्यकन्यायामूढायाममम्बष्ठाख्यो जायते। शूद्रकन्यायामूढायां निषाद उत्पद्यते। यः संज्ञान्तरेण पारशवश्चोच्यते ॥८॥

क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्।
क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ॥९॥

From a Kṣatriya and the daughter of a Śūdra springs a being, called Ugra, resembling both a Kṣatriya and a Śūdra, ferocious in his manners, and delighting in cruelty.

क्षत्रियाच्छूद्रकन्यायामूढायां क्रूरचेष्टः क्रूरकर्मरतिश्च क्षत्रशूद्रस्वभाव उग्राख्यः पुत्रो जायते ॥९॥

विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः।
वैश्यस्य वर्णे चैकस्मिन्षडेतेऽपसदाः स्मृताः ॥१०॥

Children of a Brāhmaṇa by (women of) the three (lower) castes, of a Kṣatriya by (wives of) the two (lower) castes, and of a Vaiśya by (a wife of) the one caste (below him) are all six called base-born (*apasada*).

ब्राह्मणस्य क्षत्रियादित्रयस्त्रीषु, क्षत्रियस्य वैश्यादिवर्णद्वयोः स्त्रियोः, वैश्यस्य च शूद्रायां, वर्णत्रयाणामेते षट् पुत्राः सवर्णपुत्रकार्यापेक्षयापसदा अवसन्ना निकृष्टाः स्युः ॥१०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एवमनुलोमानुक्त्वा प्रतिलोमानाह-

क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ॥११॥

From a Kṣatriya by the daughter of a Brāhmaṇa is born (a son called) according to his caste (jāti) a Sūta; from a Vaiśya by females of the royal and the Brāhmaṇa (castes) spring a Māgadha and a Vaideha.

अत्र विवाहासंभवात्कन्याग्रहणं स्त्रीमात्रप्रदर्शनार्थम्। अत्रैव श्लोके राजविप्राननासुताविति ब्राह्मण्यां क्षत्रियाज्जात्या सूतनामा संजायते। वैश्याद्यथाक्रमं क्षत्रियाब्राह्मण्योर्मागधवैदेहाख्यौ पुत्रौ भवतः। एषां च वृत्तयो मनुनैवाभिधास्यन्ते॥११॥

शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्।
वैश्यराजन्यविप्रासु जायन्ते वर्णसंकराः॥१२॥

From a Śūdra are born an Āyogava, a Kṣattṛ, and a Cāṇḍāla, the lowest of men, by Vaiśya, Kṣatriya, and Brāhmaṇa females, (sons who owe their origin to) a confusion of the castes.

शूद्राद्वैश्याक्षत्रियाब्राह्मणीषु क्रमेणायोगवः क्षत्ता नृणामधमश्चण्डालश्च वर्णानां संकरो येषु जनयितव्येषु ते वर्णसंकरा जायन्ते॥१२॥

एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ।
क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि॥१३॥

As an Ambaṣṭha and an Ugra, (begotten) in the direct order on (women) one degree lower (than their husbands) are declared (to be), even so are a Kṣattṛ and a Vaidehaka, though they were born in the inverse order of the castes (from mothers one degree higher than the fathers).

एकान्तरेऽपि वर्णे ब्राह्मणाद्वैश्यकन्यायामम्बष्ठः, क्षत्रियाच्छूद्रकन्यायानुग्रः, एतावानुलोम्येन यथा स्पर्शाद्यर्हौ तद्वदेकान्तरे प्रतिलोमजननेऽपि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शूद्रात्क्षत्रियायां क्षत्ता, वैश्याद्ब्राह्मण्यां वैदेहः, एतावपि स्पर्शादियोग्यौ विज्ञेयौ। एकान्तरोत्पन्नयोः स्पर्शाद्यनुज्ञानादनन्तरोत्पन्नानां सूतमागधायोगवानां स्पर्शादियोग्यत्वं सिद्धं भवति। अतश्चण्डाल एवैकः प्रतिलोमतः स्पर्शादौ निरस्यते॥१३॥

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्।
तानन्तरनाम्नस्तु मातृदोषात्प्रचक्षते॥१४॥

Those sons of the twice-born, begotten on wives of the next lower castes, who have been enumerated in due order, they call by the names Anantaras (belonging to the next lower caste), on account of the blemish (inherent) in their mothers.

मातुर्दोषादिति हेतुपन्यासादनन्तरग्रहणमनन्तरवच्चैकान्तरद्व्यन्तरप्रदर्शनार्थम्। ये द्विजातीनामनन्तरैकान्तरद्व्यन्तरजातिस्त्रीष्वानुलोम्येनोत्पन्नाः पूर्वमुक्ताः पुत्रास्तान्हीनजातिमातृदोषान्मातृजातिव्यपदेश्यानाचक्षते। मातापितृव्यतिरिक्त-संकीर्णजातित्वेऽप्येषां मातृजातिव्यपदेशकथनं मातृजातिसंस्कारादिधर्म-प्राप्त्यर्थम्॥१४॥

ब्राह्मणादुग्रकन्यायामावृतो नाम जायते।
आभीरोऽम्बष्ठकन्यायामायोगव्यां तु धिग्वणः॥१५॥

A Brāhmaṇa begets on the daughter of an Ugra and Āvṛta, on the daughter of an Ambaṣṭha an Ābhīra, but on a female of the Āyogava (caste) a Dhigvaṇa.

क्षत्रियेण शूद्रायामुत्पन्नोग्रा उग्रा चासौ कन्या चत्युग्रकन्या तस्यां ब्राह्मणादावृतनामा जायते। ब्राह्मणेन वैश्यायामुत्पन्नाम्बष्ठा तस्यां ब्राह्मणादाभीराख्यो जायते। शूद्रेण वैश्यायामुत्पन्ना आयोगवी तस्यां ब्राह्मणाद्धिग्वर्णो जायते॥१५॥

आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम्।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः॥१६॥

From a Śūdra spring in the inverse order (by females of the higher castes) three base-born (sons, *apasada*), an

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Āyogava, a Kshattṛ, and a Cāṇḍāla, the lowest of men.

आयोगवः क्षत्ता चण्डालश्च मनुष्याणामधम इत्येते त्रयो व्युत्क्रमेण वैश्याक्षत्रियाब्राह्मणीषु पुत्रकार्यादपगतास्त्रयः शूद्रा जायन्ते। पुत्रकार्याक्षमत्वप्रतिपादनार्थमुक्तनामप्येषां पुनर्वचनम्। एवमुत्तरश्लोकोक्तानामपि ॥१६॥

वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु।
प्रतीपमेते जायन्ते परेऽयपसदास्त्रयः ॥१७॥

From a Vaiśya are born in the inverse order of the castes a Māgadha and a Vaideha, but from a Kṣatriya a Sūta only; these are three other baseborn ones (*apasada*).

क्षत्रियाब्राह्मण्योर्मागधवैदेहौ क्षत्रियाद्ब्राह्मण्यां सूत इत्येवं प्रातिलोम्येनापरेऽपि त्रयः पुत्रकार्यादपसदा जायन्ते ॥१७॥

जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः।
शूद्राज्जातो निषाद्यां तु स वै कुक्कुटकः स्मृतः ॥१८॥

The son of a Niṣāda by a Śūdra female becomes a Pukkasa by caste (*jāti*), but the son of a Śūdra by a Niṣāda female is declared to be a Kukkuṭaka.

निषादाच्छूद्रायां जातो जात्या पुक्कसो भवति। निषाद्यां पुनः शूद्राद्यो जातः स कुक्कुटकनामा स्मृतः ॥१८॥

क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥१९॥

Moreover, the son of a Kṣattṛ by an Ugra female is called a Śvapāka; but one begotten by a Vaidehaka on an Ambaṣṭha female is named a Veṇa.

शूद्रेण वैश्यायां जातः क्षत्ता। क्षत्रियेण शूद्रायां जाता उग्रा। तेन तस्यां जातः श्वपाक इत्युच्यते। वैदेहकेनाम्बष्ठ्यां ब्राह्मणेन वैश्याजातायां वेण इति कथ्यते ॥१९॥

द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान्।
तान्सावित्रीपरिभ्रष्टान्व्रात्यानिति विनिर्दिशेत् ॥२०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Those (sons) whom the twice-born beget on wives of equal caste, but who, not fulfilling their sacred duties, are excluded from Sāvitrī, one must designate by the appellation Vrātyas.

द्विजातयः सवर्णासु स्त्रीषु यान्पुत्रानुत्पादयन्ते ते चेदुपनयनाख्यव्रतहीना भवन्ति तदा तानकृतोपनयनान्वात्येत्यनया संज्ञया व्यपदिशेत्। "अत ऊर्ध्वं त्रयोऽप्येते" (अ. २ श्लो. ३९) इत्युक्तमपि व्रात्यलक्षणं प्रतिलोमजपुत्रवदस्याप्युपकाराक्षमपुत्रत्वप्रदर्शनार्थमस्मिन्संकीर्णप्रकरणेऽनूदितम्॥२०॥

व्रात्यात्तु जायते विप्रात्पापात्मा भूर्जकण्टकः।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च॥२१॥

But from a Vrātya (of the) Brāhmaṇa (caste) spring the wicked Bhṛjjakaṇṭaka, the Āvantya, the Vāṭadhāna, the Puṣpadha, and the Śaikha.

व्रात्याद्ब्राह्मणात् 'सवर्णासु" (अ. १० श्लो. २०) इत्यनुवृत्तेर्ब्राह्मण्यां पापस्वभावो भूर्जकण्टको जायते। तथा आवन्त्यवाटधानपुष्पधशैखा जायन्ते। एकस्य चैतानि देशभेदप्रसिद्धानि नामानि॥२१॥

झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसौ द्रविड एव च॥२२॥

From a Vrātya (of the) Kṣatriya (caste), the Jhalla, the Malla, the Licchivi, the Naṭa, the Karaṇa, the Khasa, and the Draviḍa.

क्षत्रियाद्व्रात्यात्सवर्णायां झल्लमल्लनिच्छिविनटकरणखसद्रविडाख्या जायन्ते। एतान्यप्येकस्यैव नामानि॥२२॥

वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च॥२३॥

From a Vrātya (of the) Vaiśya (caste) are born a Sudhanvan, an Ācārya, a Kāruṣa, a Vijanman, a Maitra, and a Sātvata.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वैश्यात्पुनर्व्रात्यात्सवर्णायां सुधन्वाचार्यकारुषविजन्ममैत्रसात्वताख्या जायन्ते। एकस्य चैतान्यपि नामानि ॥२३॥

व्यभिचारेण वर्णानामवेद्यावेदनेन च।
स्वकर्मणां च त्यागेन जायन्ते वर्णसंकराः ॥२४॥

By adultery (committed by persons) of (different) castes, by marriages with women who ought not to be married, and by the neglect of the duties and occupations (prescribed) to each, are produced (sons who owe their origin) to a confusion of the castes.

ब्राह्मणादिवर्णानामन्योन्यस्त्रीगमनेन, सगोत्रादिविवाहेन, उपनयनरूप-स्वकर्मत्यागेन वर्णसंकरो नाम जायते। अतो युक्तमस्मिन्प्रकरणे व्रात्यानामभिधानम् ॥२४॥

संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः।
अन्योन्यव्यतिषक्ताश्च तान्प्रवक्ष्याम्यशेषतः ॥२५॥

I will (now) fully enumerate those (sons) of mixed origin, who are born of Anulomas and of Pratilomas, and (thus) are mutually connected.

ये संकीर्णयोनयः प्रतिलोमैरनुलोमैश्च परस्परसंबन्धाज्जायन्ते तान्विशेषेण वक्ष्यामि ॥२५॥

सूतो वैदेहकश्चैव चण्डालश्च नराधमः।
मागधः क्षत्रजातिश्च तथाऽयोगव एव च ॥२६॥

The Sūta, the Vaidehaka, the Caṇḍāla, that lowest of mortals, the Māgadha, he of the Kṣatṛ caste (jāti), and the Āyogava.

एते षडुक्तलक्षणाः सुतादय उत्तरार्थमनूद्यन्ते ॥२६॥

एते षट् सदृशान्वर्णाञ्जनयन्ति स्वयोनिषु।
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥२७॥

These six (Pratilomas) beget similar races (*varṇa*) on

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

women of their own (caste), they (also) produce (the like) with females of their mothers' caste (*jāti*), and with females (of) higher ones.

एते पूर्वोक्ता: षट् प्रतिलोमजा: स्वयोनिषु सुतोत्पत्तिं कुर्वन्ति। यथा शूद्रेण वैश्यायां जात आयोगव:, आयोगव्यामेव। मातृजातौ वैश्यायां, प्रवरासु क्षत्रियाब्राह्मणीयोनिषु, चकारादपकृष्टायामपि शूद्रजातौ, सर्वत्र सदृशान्वर्णाञ्जनयन्ति। सदृशत्वं च न पित्रपेक्षया किंतु मातृजात्यादिषु चातुर्वर्ण्यस्त्रीष्वेव पितृतोऽधिकगर्हितपुत्रोत्पत्तेर्वक्ष्यमाणत्वात्, तत्सदृशान्पितृतोऽधिकगर्हितान्, स्वजातावपि जनयन्तीत्येतावदेवाप्राप्तत्वादनेन विधीयते। किंतु जघन्यवर्णेनोत्तमवर्णस्त्रीषु जनितत्वात्क्रियादुष्टा आयोगवाद्या: प्रतिलोमजा: क्रियादुष्टाभ्यां मातापितृभ्यां तुल्याभ्यामपि जनिते आयोगवादिपुत्रे ब्रह्महन्त्रनन्तरजनितो ब्रह्महन्तृमातापितृजनितवदधिकदुष्ट एव न्याय्य:। शुद्धब्राह्मणादिजातीयेन शुद्धब्राह्मण्यादिसजातीयायां जनित: पितृतुल्यएवोचितो नतु क्रियादुष्टोभयजनितोऽपि ॥२७॥

यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते।
आनन्तर्यात्स्वयोन्यां तु तथा बाह्येष्वपि क्रमात्॥२८॥

As a (Brāhmaṇa) begets on (females of) two out of the three (twice-born castes a son similar to) himself, (but inferior) on account of the lower degree (of the mother), and (one equal to himself) on a female of his own race, even so is the order in the case of the excluded (races, *vāhya*).

यथा त्रयाणां वर्णानां क्षत्रियवैश्यशूद्राणां मध्याद्द्वयोर्वर्णयो: क्षत्रियवैश्ययोर्गमने ब्राह्मणस्यानुलोम्याद्द्विज उत्पद्यते, सजातीयायां च द्विजो जायते। एवं बाह्येष्वपि क्षत्रियवैश्याभ्यां वैश्यक्षत्रियाभ्यां क्षत्रियाब्राह्मण्योर्जातेषूत्कर्षापक्रमो भवति। शूद्रजातप्रतिलोमापेक्षया द्विजाद्युत्पन्नप्रतिलोमप्राशस्त्यार्थमिदम्। मेधातिथिस्तु- द्विजत्वप्रतिपादकमेतदेषां वचनमुपनयनार्थमित्याह। तन्न। "प्रतिलोमजास्तु धर्महीना:" इति गौतमेन संस्कारनिषेधात्॥२८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ते चापि बाह्यान्सुबहूंस्ततोऽप्यधिकदूषितान्।
परस्परस्य दारेषु जनयन्ति विगर्हितान्॥२९॥

Those (six mentioned above) also beget, the one on the females of the other, a great many (kinds of) despicable (sons), even more sinful than their (fathers), and excluded (from the Āryan community *vāhya*).

ते चायोगवादयः षट् परस्परजातीयासु भार्यासु सुबहूनानुलोम्येऽप्यधिक-दुष्टान्सत्क्रियाबहिर्भूताञ्जनयन्ति। तद्यथा। आयोगवः क्षत्तृजायायामात्मनो हीनतरं जनयति, तथा क्षत्ताप्यायोगव्यामात्मनो हीनतरमुत्पादयति। एवमन्येष्वपि प्रतिलोमेषु द्रष्टव्यम्॥२९॥

यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते।
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते॥३०॥

Just as a Śūdra begets on a Brāhmaṇa female a being excluded (from the Āryan community), even so (a person himself excluded procreates with (females of) the four castes (*varṇa*, sons) more (worthy of being) excluded (than he himself).

यथा ब्राह्मण्यां शूद्रोऽपकृष्टं चण्डालाख्यं प्राणिनं प्रसूयते जनयत्येवं बाह्यश्चण्डालादिवर्णचतुष्टये चण्डालादिभ्योऽप्यपकृष्टं पुत्रं प्रसूयते॥३०॥

एतदेव विस्तारयति-

प्रतिकूलं वर्तमाना बाह्या बाह्यतरान्पुनः।
हीना हीनान्प्रसूयन्ते वर्णान्पष्ठचदशैव तु॥३१॥

But men excluded (by the Āryans, *vāhya*), who approach females of higher rank, beget races (*varṇa*) still more worthy to be excluded, low men (hina) still lower races, even fifteen (in number).

अत्र मेधातिथिगोविन्दराजयोर्व्याख्यानं-चातुर्वर्ण्यबाह्याश्चण्डाल-क्षत्रायोगवाः शूद्रप्रभवास्त्रयश्चातुर्वर्ण्ये गच्छन्त आत्मनो हीनतरान्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परस्परापेक्षयापकृष्टोत्कृष्टवर्णप्रभवत्वात्पञ्चदशवर्णान्संपादयन्ति। तद्यथा चण्डालः शूद्रायामात्मनो हीनतरं वैश्याक्षत्रियाब्राह्मणीजातेभ्य उत्कृष्टं जनयति, एव वैश्यायां तूतोऽप्यपसदं, क्षत्रियायां ब्राह्मणीजातादुत्कृष्टं जनयति, ततोऽपसदं क्षत्रियायां ब्राह्मणीजातादुष्कृष्टं, ततोऽपि हीनं ब्राह्मण्यां जनयति, एवं क्षत्रायोगवावपि चातुर्वर्ण्ये चतुरश्चतुरो जनयतः। इत्येते शूद्रप्रभवचण्डाल-क्षत्रायोगवेभ्यश्चातुर्वर्ण्यद्वादशप्रभेदा उत्पद्यन्ते। आत्मना च चण्डालक्षत्रायोगवास्त्रय इत्येवं शूद्रप्रभवाः पञ्चदश उत्पद्यन्ते। एवं वैश्यक्षत्रियब्राह्मणप्रभवाः प्रत्येकं पञ्चदशं संभवन्ति। एवं षष्टिश्चातुर्वर्ण्येन सह चतुःषष्टिप्रभेदा भवन्ति। ते तु परस्परगमनेन नानावर्णाञ्जनयन्तीति। नैतन्मनोहरम्। पूर्वश्लोके षण्णां प्रतिलोमजानां प्रकृतत्वात्तद्विस्तार-कथनत्वाच्चास्य। अत्रापि श्लोके प्रतिकूलं वर्तमाना इत्युपादानात्प्रतिलोमज-मात्रविषयोऽयं श्लोको नानुलोमजविषयः। तथा च वैश्यक्षत्रियब्राह्मणप्रभवाश्च प्रत्येकं पञ्चदश संभवन्त्येवं षष्टिरिति न संगच्छते। नच संभवमात्रेणैवेयं षष्टिरुक्ता न दुष्टतया, शूद्रप्रभवायोगवक्षत्तृचण्डाला एव चातुर्वर्ण्यसंतानोपेताः पञ्चदश गर्हिता इति वाच्यम्। यतो वैश्यक्षत्रियाभ्यामपि प्रतिलोमत उत्पादितानां त्रयाणां हीनत्वात्तैरपि चातुर्वर्ण्ये जनितानां गर्हितत्वस्य संभवात् ''तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते'' (अ. १० श्लो. ३०) इति मनुनैवानन्तरं स्फुटमुक्तत्वात्। युवाभ्यामपि तथैव व्याख्यातत्वाच्चातुर्वर्ण्येन सह चतुःषष्टिरिति सर्वथैवाप्रकृतम्। नहि संकीर्णप्रकरणे शुद्धचातुर्वर्ण्यगणनोचिता। किंच ''वर्णान्पञ्चदश प्रसूयन्त'' इति श्रूयमाणद्वादशजनानुक्त्वा ते चात्मना चण्डालक्षत्रायोगवास्त्रय इत्येवं शूद्रप्रभवाः पञ्चदशेति न युक्तम्। अपि चात्मना सह पञ्चदश संपादयन्तीति न संगच्छते। असंपाद्यत्वादात्मनः पञ्चदश संपद्यन्त इति च व्याख्यानेऽध्याहार एव दोषस्तस्मादेवं व्याख्यायते। प्रतिकूलं वर्तमानाः प्रतिलोमजाः बाह्याः, द्विजप्रतिलोमजेभ्यो निकृष्टत्वात्। शूद्रप्रभवायोगवक्षत्तृचण्डालास्त्रयः। पूर्वश्लोकादनुवर्तमाने चातुर्वर्ण्ये स्वजातौ ''एते षट् सदृशान्'' (अ. १० श्लो. २७) इत्यत्र सजात्युत्पन्नस्य पितृतो गर्हितत्वाभिधानादात्मापेक्षया बाह्यान्तरान्प्रत्येकं पञ्चदश पुत्राष्टनयन्ति। तद्यथा आयोगवश्चातुर्वर्ण्यस्त्रीषु चायोगव्यामात्मनो निकृष्टान्पञ्च पुत्राष्टनयन्ति। एवं क्षत्तृचाण्डालावपि प्रत्येकं पञ्च पुत्राञ्जनयतः। इत्थं बाह्यास्त्रयः पञ्चदश पुत्राञ्जनयन्ति। तथानुलोमजेभ्यो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हीना वैश्यक्षत्रियप्रभवा मागधवैदेहसूता आत्मापेक्षया हीनान्पूर्ववच्चातुर्वर्ण्यस्त्रीषु सजातौ प्रत्येकं पञ्च पुत्राञ्जनयन्तौ हीना अपि त्रयः पञ्चदशैव पुत्राञ्जनयन्ति। एवं त्रिंशदेते भवन्ति। अथवा बाह्यशब्दो हीनशब्दश्च षडेव प्रतिलोमजानाह। अत्र बाह्याश्चण्डालक्षत्रायोगववैदेहमागधसूताः षडयथोत्तरमुत्कर्षान्प्रातिलोम्येन स्त्रीषु वर्तमाना बाह्यतरान्पञ्चदशैव पुत्राञ्जनयन्ति। तद्यथा-चण्डालः क्षत्रियादिषु पञ्चसु स्त्रीषु, क्षत्तायोगव्यादिषु चतसृषु, आयोगवो वैदेह्यादितिसृषु, वैदेहो मागधीसूत्योः, मागधः सूत्यां, सूतस्तु प्रतिलोमाभावात्प्रातिलोम्येन पञ्चदशैव पुत्राञ्जनयति। पुनरिति निर्देशाद्धीना सूतादयश्चण्डालान्ताः षडयथोत्तरमपकर्षादानुलोम्येनापि प्रतिलोमोक्तरीत्या स्वापेक्षया हीनान्पञ्चदशैव पुत्राञ्जनयन्ति। एवं त्रिंशदेते भवन्ति॥३१॥

प्रसाधनोपचारज्ञमदासं दासजीवनम्।
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे॥३२॥

A Dasyu begets on a Āyogava (woman) a Sairandhra, who is skilled in adorning and attending (his master), who, (though) not a slave, lives like a slave, (or) subsists by snaring (animals).

केशरचनादिः प्रसाधनस्तस्योपचारज्ञं अदासमुच्छिष्टभक्षणादिदासकर्मरहितमन्नसंवाहनादिदासकर्मजीवनं पाशबन्धनेन मृगादिवधाख्यवृत्त्यन्तरजीवनं सैरिन्ध्रनामानं "मुखबाहूरुपज्जानाम्" (अ. १० श्लो. ४५) इति श्लोके वक्ष्यमाणो दस्युरायोगवस्त्रीजातौ शूद्रेण वैश्यायामुत्पन्नायां जनयति, तच्चास्य मृगादिमारणं देवपित्रौषधार्थं वेदितव्यम्॥३२॥

मैत्रेयकं तु वैदेहो माधूकं संप्रसूयते।
नृन्प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये॥३३॥

A Vaideha produces (with the same) a sweet voiced Maitreyaka, who, ringing a bell at the appearance of dawn, continually praises (great) men.

वैश्याद्ब्राह्मण्यां जातो वैदेहः प्रकृतायामायोगव्यां मैत्रेयाख्यं मधुरभाषिणं जनयति। यः प्रातर्घण्टामाहत्य राजप्रभृतीन्सततं वृत्त्यर्थं स्तौति॥३३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निषादो मार्गवं सूते दासं नौकर्मजीविनम्।
कैवर्तमिति यं प्राहुरार्यावर्तनिवासिनः॥३४॥

A Niṣādha begets (on the same) a Mārgava (or) Dāśa, who subsists by working as a boatman, (and) whom the inhabitants of Āryāvarta call a Kaivarta.

ब्राह्मणेन शूद्रायां जातो निषादः प्रागुक्तायामायोगव्यां मार्गवं दासापरनामानं नौव्यहारजीविनं जनयति। आर्यावर्तदेशवासिनः कैवर्तशब्देन यं कीर्तयन्ति॥३४॥

मृतवस्त्रभृत्सु नारीषु गर्हितान्नाशनासु च।
भवन्त्यायोगवीष्वेते जातिहीनाः पृथक्त्रयः॥३५॥

Those three base-born ones are severally begot on Āyogava women, who wear the clothes of the dead, are wicked, and eat reprehensible food.

सैरिन्ध्रमैत्रेयमार्गवा हीनजातीयास्त्रयः मृतवस्त्रपरिधानासु क्रूरासूच्छिष्टादिभक्तान्नाशनायोगवीषु पितृभेदाद्भिन्ना भवन्ति॥३५॥

कारावरो निषादात्तु चर्मकारः प्रसूयते।
वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ॥३६॥

From a Niṣāda springs (by a woman of the Vaideha caste) a Kārāvara, who works in leather; and from a Vaidehaka (by women of the Kārāvara and Niṣāda castes), an Andhra and a Meda, who dwell outside the village.

"वैदेह्यामेव जायते" (अ. १० श्लो. ३७) इत्युत्तरत्र श्रवणात्, अत्राप्याशङ्कायां सैव संबध्यते। निषादाद्वैदेह्यां जातः कारावराख्यश्चर्मच्छेदनकारी जायते। अतएव औशनसे कारावराणां चर्मच्छेदनाचरणमेव वृत्तित्वेनोक्तम्। वैदेहकादन्ध्रमेदाख्यौ ग्रामबहिर्वासिनौ। अन्तरानिर्देशाद्वैदेहकेन च वैदेह्यां जातस्य गर्हितवैदेहकस्याप्युचितत्वात्, कारावरनिषादजात्योश्चात्र श्लोके संनिधानात्, कारावरनिषादस्त्रियोरेव क्रमेण जायते॥३६॥

चण्डालात्पाण्डुसोपाकस्त्वक्सारव्यवहारवान्।
आहिण्डिको निषादेन वैदेह्यामेव जायते॥३७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

From a Caṇḍāla by a Vaideha woman is born a Pāṇḍusopāka, who deals in cane; from a Niṣāda (by the same) an Āhiṇḍīka.

वैदेह्यां चण्डालात्पाण्डुसोपाकाख्यो वेणुव्यवहारजीवी जायते। निषादेन च वैदेह्यामेवाहिण्डिकाख्यो जायते। अस्य च बन्धनस्थानेषु बाह्य-संरक्षणादाहिण्डिकानामित्यौशनसे वृत्तिरुक्ता। समानमातापितृकत्वेऽपि कारावराहिण्डिकयोर्वृत्तिभेदसंश्रवणाद्व्यपदेशभेदः ॥३७॥

चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥३८॥

But from a Caṇḍāla by a Pukkasa woman is born the sinful Sopāka, who lives by the occupations of his sire, and is ever despised by good men.

शूद्रायां निषादेन जातायां पुक्कस्यां चण्डालेन जातः सोपाकाख्यः पापात्मा, सर्वदा साधुभिर्निन्दितो, मारणोचितापराधस्य मूलं वध्यस्तस्य व्यसनं राजादेशेन मारणं तेन वृत्तिर्यस्य स जायते ॥३८॥

निषादस्त्री तु चण्डालात्पुत्रमन्त्यावसायिनम्।
श्मशानगोचरं सूते बाह्यानामपि गर्हितम् ॥३९॥

A Niṣāda woman bears to a Caṇḍāla a son (called Antyāvasāyin, employed in burial-grounds, and despised even by those excluded (from the Āryan community).

निषादी चण्डालादन्त्यावसायिसंज्ञं चण्डालादिभ्योऽपि दुष्टतमं श्मशानवासिनं तद्वृत्तिं च जनयति ॥३९॥

संकरे जातयस्त्वेताः पितृमातृप्रदर्शिताः।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः ॥४०॥

These races, (which originate) in a confusion (of the castes and) have been described according to their fathers and mothers, may be known by their occupations, whether they conceal or openly show themselves.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वर्णसंकरविषये एता जातयो, यस्येयं जनयित्री अयं जनकः स एवंजातीय इत्येवं पितृमातृकथनपूर्वकं दर्शिताः। तथा गूढाः प्रकटा वा तज्जात्युदित-कर्मानुष्ठानेन ज्ञातव्याः ॥४०॥

सजातिजानन्तरजाः षट् सुता द्विजधर्मिणः।
शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ॥४१॥

Six sons, begotten (by Āryans) on women of equal and the next lower castes (Anantara), have the duties of twice-born men; but all those born in consequence of a violation (of the law) are, as regards their duties, equal to Śūdras.

द्विजातिसमानजातीयासु जाताः, तथानुलोम्येनोत्पन्नाः ब्राह्मणेन क्षत्रियावैश्ययोः क्षत्रियेण वैश्यायामेवं षट् पुत्रा द्विजधर्मिण उपनेयाः। "तानन्तरनाम्नास्तु" (अ. १० श्लो. १४) इति यदुक्तं तत्तज्जातिव्यपदेशार्थं न संस्कारार्थमिति कस्यचिद्भ्रमः स्यादत एषां द्विजातिसंस्कारार्थमिदं वचनम्। ये पुनरन्ये द्विजात्युत्पन्ना अपि सूतादयः प्रतिलोमजास्ते शूद्रधर्माणो नैषामुपनयनमस्ति ॥४१॥

तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे।
उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ॥४२॥

By the power of austerities and of the seed (from which they sprang), these (races) obtain here among men more exalted or lower rank in successive births.

सजातिजानन्तरजाः, तपःप्रभावेण विश्वामित्रवत्, बीजप्रभावेण ऋष्य शृन्यादिवत्, कृतत्रेतादौ मनुष्यमध्ये जात्युत्कर्षं गच्छन्ति। अपकर्षं च वक्ष्यमाणहेतुना यान्ति ॥४२॥

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥४३॥

But in consequence of the omission of the sacred rites, and of their not consulting Brāhmaṇas, the following tribes of Kṣatriyas have gradually sunk in this world to the condition of Śūdras.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इमा वक्ष्यमाणाः क्षत्रियजातय उपनयनादिक्रियालोपेन ब्राह्मणानां च याजनाध्यापनप्रायश्चित्ताद्यर्थदर्शनाभावेन शनैः शनैर्लोके शूद्रतां प्राप्ताः ॥४३॥

पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ॥४४॥

(Viz.) the Pauṇḍrakas, the Coḍas, the Draviḍas, the Kāmbojas, the Yavanas, the Śakas, the Pāradas, the Pahalavas, the Cīnas, the Kirātas, and the Daradas.

पौण्ड्रादिदेशोद्भवाः सन्तः क्रियालोपादिना शूद्रत्वमापन्नाः ॥४४॥

मुखबाहूरुपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥४५॥

All those tribes in this world, which are excluded from (the community of) those born from the mouth, the arms, the thighs, and the feet (of Brāhmaṇ), are called Dasyus, whether they speak the language of the Mlecchas (barbarians) or that of the Āryans.

ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रियालोपादिना या जातयो बाह्या जाता म्लेच्छभाषायुक्ता आर्यभाषोपेता वा ते दस्यवः सर्वे स्मृताः ॥४५॥

ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः।
ते निन्दितैर्वर्त्तयेयुर्द्विजानामेव कर्मभिः ॥४६॥

Those who have been mentioned as the baseborn (offspring, *apasada*) of Āryans, or as produced in consequence of a violation (of the law, *apadhvaṁsaga*), shall subsist by occupations reprehended by the twice-born.

ये द्विजानामानुलोम्येनोप्तन्नाः "षडेतेऽपसदाः स्मृताः" (अ. १० श्लो. १०) इति। तेषामपि पितृतो जघन्यत्वेनापसदशब्देन प्रागभिधानादपध्वंसजास्ते द्विजात्युपकारकैरेव निन्दितैर्वक्ष्यमाणैः कर्मभिर्जीवेयुः ॥४६॥

सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सनम्।
वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ॥४७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

To Sūtas (belongs) the management of horses and of chariots; to Ambaṣṭhas, the art of healing; to Vaidehakas, the service of women; to Māgadhas, trade.

सूतानामश्वदमनयोजनादि रथसारथ्यं जीवनार्थम्। अम्बष्ठानां रोगशान्त्यादि चिकित्सा, वैदेहकानामन्तःपुररक्षणम्, मागधानां स्थलपथवणिज्या ॥४७॥

मत्स्याघातो निषादानां त्वष्टिस्त्वायोगवस्य च।
मेदान्ध्रचुष्टचुमद्गूनामारण्यपशुहिंसनम्॥४८॥

Killing fish to *Niṣādas*; carpenters' work to the *Āyogava*; to Medas, Andhras, Cuñcus, and Madgus, the slaughter of wild animals.

निषादानामुक्तानां मत्स्यवधः, आयोगवस्य काष्ठतक्षणं, मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुमारणम्। चुञ्चुर्मदनू वैदेहकबन्दिस्त्रियोर्ब्राह्मणेन जातौ बौधायनेनोक्तौ बौद्धव्यौ। बन्दिस्त्री च क्षत्रियेण शूद्रायां जाता सोग्रैव ग्राह्या ॥४८॥

क्षत्रुग्रपुक्कसानां तु बिलौकोवधबन्धनम्।
धिग्वणानां चर्मकार्यं वेणानां भाण्डवादनम्॥४९॥

To Kṣattṛs, Ugras, and Pukkasas, catching and killing (animals) living in holes; to Dhigvaṇas, working in leather; to Venas, playing drums.

क्षत्रादीनां बिलनिवासिगोधादिवधबन्धनं, धिग्वेणानां चर्मकरणं "चर्मकार्यं तद्विक्रयश्च जीवनं धिग्वणानाम्" इत्यौशनसदर्शनात्। अतएव कारावरेभ्य एषां वृत्तिच्छेदः। वेणानां कांस्यमुरजादिवाद्यभाण्डवादनम् ॥४९॥

चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च।
वसेयुरेते विज्ञाना वर्तयन्तः स्वकर्मभिः॥५०॥

Near well-known trees and burial-grounds, on mountains and ing roves, let these (tribes) dwell, known (by certain marks), and subsisting by their peculiar occupations.

ग्रामादिसमीपे ख्यातवृक्षश्चैत्यद्रुमः तन्मूले श्मशानपर्वतवनसमीपेषु चामी प्रकाशकाः स्वकर्मभिर्जीवन्तो वसेयुः॥५०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चण्डालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम्॥५१॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
काष्णायसमलङ्कारः परिव्रज्या च नित्यशः॥५२॥

But the dwellings of Caṇḍālas and Svapacas shall be outside the village, they must be made Apapātras, and their wealth (shall be) dogs and donkeys.

Their dress (shall be) the garments of the dead, (they shall eat) their food from broken dishes, black iron (shall be) their ornaments, and they must always wander from place to place.

प्रतिश्रयो निवासः चण्डालश्वपाकानां तु ग्रामाद्बहिर्निवासः स्यात्। पात्ररहिताः कर्तव्या यत्र लोहादिपात्रे तैर्भुक्तं तत्संस्कृत्यापि न व्यवहर्तव्यं, धनं चैषां कुक्कुरखरं न वृषभादि, वासांसि च शववस्त्राणि, भिन्नशरावादिषु च भोजनं, लौहवलयादि चालंकरणं, सर्वदा च भ्रमणशीलत्वम्॥५१-५२॥

न तैः समयमन्विच्छेत्पुरुषो धर्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥५३॥

A man who fulfils a religious duty, shall not seek intercourse with them; their transactions (shall be) among themselves, and their marriages with their equals.

धर्मानुष्ठानसमये चण्डालश्वपाकैः सह दर्शनादिव्यवहारं न कुर्यात्। तेषां च ऋणदानग्रहणादिव्यवहारो विवाहश्च समानजातीयैः सहान्योन्यं स्यात्॥५३॥

अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च॥५४॥

Their food shall be given to them by others (than an Āryan giver) in a broken dish; at night they shall not walk about in villages an in towns.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अन्नमेषां परायत्तं कार्यं, साक्षादेभ्यो न देयं किंतु प्रेष्यैर्भिन्नपात्रे दातव्यम्। ते च रात्रौ ग्रामनगरयोर्न पर्यटेषुः ॥५४॥

दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः।
अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ॥५५॥

By day they may go about for the purpose of their work, distinguished by marks at the king's command, and they shall carry out the corpses (of persons) who have no relatives; that is a settled rule.

दिवा ग्रामादौ क्रयविक्रयादिकार्यार्थं राजाज्ञया चिह्नाङ्किताः सन्तः पर्यटेषुः। अनाथं च शवं ग्रामान्निर्हरेयुरिति शास्त्रमर्यादा ॥५५॥

वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥५६॥

By the king's order they shall always execute the criminals, in accordance with the law, and they shall take for themselves the clothes, the beds, and the ornaments of (such) criminals.

वध्यांश्च शास्त्रानतिक्रमेण शूलारोपणादिना सर्वदा राजाज्ञया हन्युस्तद्वस्त्रशय्यालंकारांश्च गृह्णीयुः ॥५६॥

वर्णापेतमविज्ञातं नरं कलुषयोनिजम्।
आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् ॥५७॥

A man of impure origin, who belongs not to any caste, (*varṇa*, but whose character is) not known, who, (though) not an Āryan, has the appearance of an Āryan, one may discover by his acts.

वर्णत्वादपेतं मनुष्यं संकरजातं लोकतस्तथात्वेनाविज्ञातमतएवार्यसदृशं वस्तुतः पुनरनार्यं, निन्दितयोन्यनुरूपाभिश्चेष्टाभिर्वक्ष्यमाणाभिर्निश्चिनुयात् ॥५७॥

अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥५८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Behaviour unworthy of an Āryan, harshness, cruelty, and habitual neglect of the prescribed duties betray in this world a man of impure origin.

निष्ठुरत्वपरुषभाषित्वहिंस्रत्वविहिताननुष्ठातृत्वानि संकरजातित्वं अस्मिँल्लोके प्रकटीकुर्वन्ति ॥५८॥

यस्मात्-

पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा।
न कथंचन दुर्योनिः प्रकृतिं स्वां नियच्छति ॥५९॥

A base-born man either resembles in character his father, or his mother, or both; he can never conceal his real nature.

असौ संकरजातो दुष्टयोनिः पितृसंबन्धि दुष्टस्वभावत्वं सेवते मातृसंबन्धि वोभयसंबन्धि वा। न कदाचिदसावात्मकारणं गोपयितुं शक्नोति ॥५९॥

कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसंकरः।
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥६०॥

Even if a man, born in a great family, sprang from criminal intercourse, he will certainly possess the faults of his (father), be they small or great.

महाकुलप्रसूतस्यापि यस्य योनिसंकरः प्रच्छन्नो भवति स मनुष्यो जनकस्वभावं स्तोकं प्रचुरं वा सेवत एव ॥६०॥

यत्र त्वेते परिध्वंसाज्जायन्ते वर्णदूषकाः।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥६१॥

But that kingdom in which such bastards, sullying (the purity of) the castes, are born, perishes quickly together with its inhabitants.

यस्मिन्राष्ट्रे एते वर्णसंकरा वर्णानां दूषका जायन्ते तद्राष्ट्रं राष्ट्रवासिजनैः सह शीघ्रमेव नाशमेति। तस्माद्राज्ञा वर्णानां संकरो निरसनीयः ॥६१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः।
स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम्॥६२॥

Dying, without the expectation of a reward, for the sake of Brāhmaṇas and of cows, or in the defence of women and children, secures beatitude to those excluded (from the Āryan community, *vāhya*).

गोब्राह्मणस्त्रीबालानामन्यतरस्यापि परित्राणार्थं दुष्टप्रयोजनानपेक्षः प्राणत्यागः प्रतिलोमजानां स्वर्गप्राप्तिकारणम्॥६२॥

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
[श्राद्धकर्मातिथेयं च दानमस्तेयमार्जवम्।
प्रजनं स्वेषु दारेषु तथा चैवानसूयता॥१॥]
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥६३॥

Abstention from injury (creatures), veracity, absetention from unlawfully appropriating (the goods of others), purity, and control of the organs, Manu has declared to be the summary of the law for the four castes.

हिंसात्यागो, यथार्थाभिधानम्, अन्यायेन परधनस्याग्रहणं, मृज्जलादिना विशुद्धिः, इन्द्रियसंयम इत्येवं धर्मं संक्षेपतश्चातुर्वर्ण्यानुष्ठेयं मनुराह। प्रकरणसामर्थ्यात्संकीर्णानामप्ययं धर्मो वेदितव्यः॥६३॥

इदानीं "सर्ववर्णेषु तुल्यासु" (अ. १० श्लो. ५) इत्युक्तलक्षणव्यतिरेकेणापि ब्राह्मण्यादि दर्शयितुमाह-

शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायते।
अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात्॥६४॥

If (a female of the caste), sprung from a Brāhmaṇa and a Śūdra female, bear (children) to one of the highest caste, the inferior (tribe) attains the highest caste within the seventh generation.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शूद्रायां ब्राह्मणाज्जातः पारशवाख्यो वर्णः प्रजायत इति सामर्थ्यात्स्त्रीरूपः स्यात्। सा यदि स्त्री ब्राह्मणेनोढा सती प्रसूयते सा दुहितरमेव जनयति। साप्यन्येन ब्राह्मणेनोढा सती दुहितरमेव जनयति। साप्येवमेव सप्तमेयुगे जन्मनि स पारशवाख्यो वर्णो बीजप्राधान्याद्ब्राह्मण्यं प्राप्नोति। आसप्तमाद्युगादित्यभिधानात्सप्तमे जन्मनि ब्राह्मणः संपद्यत इत्यर्थः॥६४॥

शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्।
क्षत्रियाज्जातमेवं तु विद्याद्वैश्यात्तथैव च॥६५॥

(Thus) a Śūdra attains the rank of a Brāhmaṇa, and (in a similar manner) a Brāhmaṇa sinks to the level of a Śūdra; but know that it is the same with the offspring of a Kṣatriya or of a Vaiśya.

एवं पूर्वश्लोकोक्तरीत्या शूद्रो ब्राह्मणतां याति ब्राह्मणश्च शूद्रतामेति। ब्राह्मणोऽत्र ब्राह्मणाच्छूद्रायामुत्पन्नः पारशवो ज्ञेयः। स यदि पुमान्केवलशूद्रोद्वाहेन तस्यां पुमांसमेव जनयति, सोऽपि केवलशूद्रोद्वाहेनापरं पुमांसमेव जनयति, सोऽप्येवं, तदा स ब्राह्मणः सप्तमं जन्म प्राप्तः केवलशूद्रतां बीजनिकर्षात्क्रमेण प्राप्नोति। एवं क्षत्रियाद्वैश्याच्च शूद्रायां जातस्योत्कर्षापकर्षौ जानीयात्। किंतु जातेरपकर्षात् "जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा" (अ. १ श्लो. ९६) इति याज्ञवल्क्यदर्शनाच्च क्षत्रियाज्जातस्य पञ्चमे जन्मन्युत्कर्षापकर्षौ बोद्धव्यौ। वैश्याज्जातस्य ततोऽप्युत्कर्षात्। याज्ञवल्क्येनापि वाशब्देन पक्षान्तरस्य संगृहीतत्वाद्वृद्धव्याख्यानुरोधाच्च तृतीयजन्मन्युत्कर्षापकर्षौ ज्ञेयौ। अनेनैव न्यायेन ब्राह्मणेन वैश्यायां जातस्य पञ्चमे जन्मन्युत्कर्षापकर्षौ, क्षत्रियायां जातस्य तृतीये, क्षत्रियेण वैश्यायां जातस्य तृतीय एव बोद्धव्यौ॥६५॥

अनार्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया।
ब्राह्मण्यामप्यनार्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत्॥६६॥

If (a doubt) should arise, with whom the pre-eminence (is, whether) with him whom an Āryan by chance begot on a non-Āryan female, or (with the son) of a Brāhmaṇa woman by a non-Āryan.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकः शूद्रायां यदृच्छया अनूढायामपि ब्राह्मणादुत्पन्नोन्यश्च ब्राह्मण्यां शूद्राज्जातः द्वयोर्मध्ये क्वचोत्पन्नस्य श्रेयस्त्वमिति चेत्संशयः स्यात्संशयबीजं च यथा बीजोत्कर्षात्। ब्राह्मणाच्छूद्रायां जातः साधुः शूद्रः, एवं क्षेत्रोत्कर्षाद्ब्राह्मण्यामपि शूद्रेण जातः किमिति साधुः शूद्रो न स्यात्॥६६॥

तत्र निर्णयमाह-

जातो नार्यामनार्यायामार्यादार्यो भवेद्गुणैः।
जातोऽप्यनार्यादार्यायामनार्य इति निश्चयः॥६७॥

The decision is as follows : 'He who was begotten by an Āryan on a non-Āryan female, may become (like to) an Āryan by his virtues; he whom an Āryan (mother) bore to a non-Āryan father (is and remains) unlike to an Āryan.'

शूद्रायां स्त्रियां ब्राह्मणाज्जातः स्मृत्युक्तैः पाकयज्ञादिभिर्गुणैरनुष्ठीयमानैर्युक्तः प्रशस्यो भवति। शूद्रेण पुनर्ब्राह्मण्यां जातः प्रतिलोमत उत्पन्नतया शूद्रधर्मेष्वप्यनधिकारादप्रशस्य इति निश्चयः। न्यायप्राप्तोऽप्यर्थो वचनप्रामाण्यादत्र बोध्यते॥६७॥

तावुभावप्यसंस्कार्याविति धर्मो व्यवस्थितः।
वैगुण्याज्जन्मनः पूर्व उत्तरः प्रतिलोमतः॥६८॥

The law prescribes that neither of the two shall recieve the sacraments, the first (being excluded) on account of the lowness of his origin, the second (because the union of his parents was) against the order of the castes.

पारशवचण्डालौ द्वावप्यनुपनेयाविति व्यवस्थिता शास्त्रमर्यादा। पूर्वः पारशवः शूद्राजातत्वेन जातिवैगुण्यादनुपनेयः। प्रातिलोम्येन शूद्रेण ब्राह्मण्यां जातत्वादित्युत्तरत्वेनानुपनेयः॥६८॥

सुबीजं चैव सुक्षेत्रे जातं संपद्यते यथा।
तथाऽर्याज्जात आर्यायां सर्वं संस्कारमर्हति॥६९॥

As good seed, springing up in good soil, turns out per-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

fectly well, even so the son of an Āryan by an Āryan woman is worthy of all the sacraments.

यथा शोभनबीजं शोभनक्षेत्रे जातं समृद्धं भवत्येवं द्विजातेर्द्विजातिस्त्रियां सवर्णायामानुलोम्येन च क्षत्रियावैश्ययोर्जातः सवर्णसंस्कारं क्षत्रियवैश्यसंस्कारं च सर्वं श्रौतं स्मार्तं चार्हति। नच पारशवचण्डालाविति पूर्वोक्तदार्ढ्यार्थमेतत्॥६९॥

दर्शनान्तराण्युक्तस्थैवार्थस्य स्थैर्यार्थमाह-

बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः।
बीजक्षेत्रे तथैवान्ये तत्रेयं तु व्यवस्थितिः॥७०॥

Some sages declare the seed to be more important, and others the field; again others (assert that) the seed and the field (are equally important); but the legal decision on this point is as follows.

केचित्पण्डिता बीजं स्तुवन्ति, हरिण्याद्युत्पन्नऋष्यशृन्नादेर्ब्रह्ममुनित्वदर्शनात्। अपरे पुनः क्षेत्रं स्तुवन्ति, क्षेत्रस्वामिपुत्रत्वदर्शनात्। अन्ये पुनर्बीजक्षेत्रे उभे अपि स्तुवन्ति, सुबीजस्य सुक्षेत्रे समृद्धिदर्शनात्। एतस्मिन्मतभेदे वक्ष्यमाणेयं व्यवस्था ज्ञेया॥७०॥

अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति।
अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत्॥७१॥

Seed, sown on barren ground, perishes in it; a (fertile) field also, in which no (good) seed (is sown), will remain barren.

ऊषरप्रदेशे बीजमुप्तं फलमददन्तराल एव विनश्यति। शोभनमपि क्षेत्रं बीजरहितं स्थण्डिलमेव केवलं स्यान्न तु सस्यमुत्पद्यते। तस्मात्प्रत्येकनिन्दया "सुबीजं चैव सुक्षेत्रम्" (अ. १० श्लो. ६९) इति प्रागुक्तमुभयप्राधान्यमेवाभिहितम्॥७१॥

इदानीं बीजप्रधान्यपक्षे दृष्टान्तमाह-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्माद्बीजप्रभावेण तिर्यग्जा ऋषयोऽभवन्।
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते॥७२॥

As through the power of the seed (sons) born of animals became sages who are honoured and prasied, hence the seed is decalred to be more important.

यस्माद्बीजमाहात्म्येन तिर्यग्जातिहरिण्यादिजाता अपि ऋष्यशृन्नादयो मुनित्वं प्राप्ताः, पूजिताश्चाभिवाद्यत्वादिना, वेदज्ञानादिना प्रशस्ता वाचा संस्तुतास्तस्माद्बीजं प्रस्तूयते। एतच्च बीजप्राधान्यनिगमनं बीजयोन्योर्मध्ये बीजोत्कृष्टा जातिः प्रधानमित्येवंपरतया बोद्धव्यम्॥७२॥

अनार्यमार्यकर्माणमार्यं चानार्यकर्मिणम्।
संप्रधार्याब्रवीद्धाता न समौ नासमाविति॥७३॥

Having considered (the case of) a non-Āryan who acts like an Āryan, and (that of) an Āryan who acts like a non-Āryan, the creator declared, 'Those two are neither equal nor unequal.'

शूद्रं द्विजातिकर्मकारिणं द्विजातिं च शूद्रकर्मकारिणं ब्रह्मा विचार्य "न समौ नासमौ" इत्यवोचत्। यतः शूद्रो द्विजातिकर्मापि न द्विजातिसमः, तस्यानधिकारिणो द्विजातिकर्माचरणेऽपि तत्साम्याभावात्। एवं शूद्रकर्मापि द्विजातिर्न शूद्रसमः, निषिद्धसेवनेन जात्युत्कर्षस्यानपायात्। नाप्यसमौ निषिद्धाचरणेनोभयोः साम्यात्। तस्माद्यद्यस्य विगर्हितं तत्तेन न कर्तव्यमिति संकरपर्यन्तवर्णधर्मोपदेशः॥७३॥

इदानीं ब्राह्मणानामापद्धर्मं प्रतिपादयिष्यन्निदमाह-

ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः।
ते सम्यगुपजीवेयुः षट्कर्माणि यथाक्रमम्॥७४॥

Brāhmaṇas who are intent on the means (of gaining union with) Brāhmaṇ and firm in (dischargeing) their duties, shall live by duly performing the following six acts, (which are enumerated) in their (proper) order.

ये ब्राह्मणा ब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठाः स्वकर्मानुष्ठाननिरताश्च ते षट्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कर्माणि वक्ष्माणान्यध्यापनादीनि क्रमेण सम्यगनुतिष्ठेषुः ॥७४॥

तानि कर्माण्याह-

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥७५॥

Teaching, studying, sacrificing for himself, sacrificing for others, making gifts and receiving them are the six acts (prescribed) for a Brāhmaṇa.

अध्यापनाध्ययने सान्नस्य वेदस्य, तथा यजनयाजने, दानप्रतिग्रहौ चेत्येतानि षट् कर्माणि ब्राह्मणस्य वेदितव्यानि ॥७५॥

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥७६॥

But among the dix acts (ordained) for him three are his means of subsistence, (*viz.*) sacrificing for others, teaching, and accepting gifts from pure men.

अस्य ब्राह्मणस्यैषामध्यापनादीनां षण्णां कर्मणां मध्याद्याजनमध्यापनं विशुद्धप्रतिग्रहः "द्विजातिभ्यो धनं लिप्सेत्प्रशस्तेभ्यो द्विजः" इति वचननिर्देशाद्विजातेः प्रतिग्रह इत्येतानि त्रीणि कर्माणि जीवनार्थानि ज्ञेयानि ॥७६॥

त्रयो धर्मा निवर्तन्ते ब्राह्मणात्क्षत्रियं प्रति।
अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ॥७७॥

(Passing) from the Brāhmaṇa to the Kṣatriya, three acts (incumbent on the former) are forbidden, (*viz.*) teaching, sacrificing for others, and, thirdly, the acceptance of gifts.

ब्राह्मणापेक्षया क्षत्रियस्याध्यापनयाजनप्रतिग्रहाख्यानि वृत्त्यर्थानि त्रीणि कर्माणि निवर्तन्ते। अध्ययनयागदानानि तु तस्यापि भवन्ति ॥७७॥

वैश्यं प्रति तथैवैते निवर्तेरन्निति स्थितिः।
न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः ॥७८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

The same are likewise forbidden to a Vaiśya, that is a settled rule; for Manu, the lord of creatures (Prajāpati), has not prescribed them for (men of) those two (castes).

यथा क्षत्रियस्याध्यापनयाजनप्रतिग्रहा निवर्तन्ते तथा वैश्यस्यापीति शास्त्रव्यवस्था। यस्मान्मनुः प्रजापतिस्तौ क्षत्रियवैश्यौ प्रति तानि वृत्त्यर्थानि कर्माणि कर्तव्यत्वेन नोक्तवान्। एवं वैश्यस्याप्यध्ययनयागदानानि भवन्ति ॥७८॥

शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषिर्विशः।
आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः ॥७९॥

To carry arms for striking and for throwing (is prescribed) for Kṣatriyas as a means of subsistence; to trade, (to rear) cattle, and agriculture for Vaiśyas; but their duties are liberality, the study of the Veda, and the performance of sacrifices.

शस्त्रं खड्गादि अस्त्रं बाणादि एतद्धारणं प्रजारक्षणाय क्षत्रियस्य च वृत्त्यर्थम्। वाणिज्यपशूरक्षणकृषिकर्माणि वैश्यस्य जीवनार्थानि। धर्मार्थाः पुनरनयोर्दानाध्ययनयागा भवन्ति ॥७९॥

वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम्॥
वार्ता कर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ॥८०॥

Among the several occupations the most commendable are, teaching the Veda, for a Brāhmaṇa, protecting (the people) for a Kṣatriya, and trade fro a Vaiśya.

वेदाभ्यासो वेदाध्यापनं रक्षावार्ताभ्यां वृत्यर्थाभ्यां सहोपदेशात्तद्ब्राह्मणस्य, प्रजारक्षणं क्षत्रियस्य, वाणिज्यं पाशुपाल्यं वैश्यस्य, एतान्येतेषांवृत्त्यर्थकर्मसु श्रेष्ठानि ॥८०॥

अधुना आपद्धर्ममाह-

अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा।
जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥८१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But a Brāhmaṇa, unable to subsist by his peculiar occupations just mentioned, may live according to the law applicable to Kṣatriyas; for the latter is next to him in rank.

यथोक्तेनाध्यापनादिस्वकर्मणा ब्राह्मणो नित्यकर्मानुष्ठानकुटुम्बसंवर्धनपूर्वकमजीवन्, क्षत्रियकर्मणा ग्रामनगररक्षणादिना जीवेत्। यस्मात्क्षत्रियधर्मोऽस्य संनिकृष्टा वृत्तिः॥८१॥

उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत्।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम्॥८२॥

If it be asked, 'How shall it be, if he cannot maintain himself by either (of these occupations?' the answer is), he may adopt a Vaiśya's mode of life, employing himself in agriculture and rearing cattle.

ब्राह्मण उभाभ्यां स्ववृत्तिक्षत्रियवृत्तिभ्यामजीवन्केन प्रकारेण वर्तेतेति यदि संशयः स्यात्तदा कृषिपशुरक्षणे आश्रित्य वैश्यस्य वृत्तिमनुतिष्ठेत्। कृषिगोरक्षग्रहणं वाणिज्यदर्शनार्थम्। तथाच विक्रयाणि वक्ष्यति। स्वयंकृतं चेदं कृष्यादि ब्राह्मणापद्वृत्तिः। अस्वयंकृतस्य "ऋतामृताभ्यां जीवेत" (अ. ४ श्लो. ४) इत्यनापद्येव विहितत्वात्॥८२॥

संप्रति कृष्यादेर्बलाबलमाह-

वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोऽपि वा।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत्॥८३॥

But a Brāhmaṇa, or a Kṣatriya, living by a Vaiśya's mode of subsistence, shall carefully avoid (the pursuit of) agriculture, (which causes) injury to many beings and depends on others.

ब्राह्मणः क्षत्रियोऽपि वा वैश्यवृत्त्यापि जीवन्भूमिष्ठजन्तुहिंसाबहुलां बलीवर्दादिपराधीनां कृषिं यत्नतस्त्यजेत्। अतः पशुपालनाद्यभावे कृषिः कार्येति द्रष्टव्यम्। क्षत्रियोऽपि वा इत्युपादानात्क्षत्रियस्याप्यात्मीयवृत्त्यभावे वैश्यवृत्तिरस्तीत्यभिगम्यते॥८३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम्॥८४॥

(Some) declare that agriculture is something excellent, (but) that means of subsistence is blamed by the virtuous; (for) the wooden (implement) with iron point injures the earth and (the beings) living in the earth.

साध्विदं जीवनमिति कृषिं केचिन्मन्यन्ते, सा पुनर्जीविका साधुभिर्निन्दिता, यस्माद्धलकुद्दालादिलोहप्रान्तं काष्ठं भूमिं भूमिष्ठजन्तूंश्च हन्ति॥८४॥

इदं तु वृत्तिवैकल्यात्त्यजतो धर्मनैपुणम्।
विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्धनम्॥८५॥

But he who, through a want of means of subsistence, gives up the strictness with respect to his duties, may sell, in order to increase his wealth, the commodities sold by Vaiśyas, making (however) the (following) exceptions.

ब्राह्मणस्य क्षत्रियस्य चात्मीयवृत्तेरसंभवे, धर्मं प्रति यथोक्तनिष्णातत्त्वं त्यजतो वैश्येन यद्विक्रेतव्यं द्रव्यजातं तद्वक्ष्यमाणवर्जनीयवर्जितं धनवृद्धिकरं विक्रेयम्॥८५॥

तानि वर्जनीयान्याह-

सर्वान्रसानपोहेत कृतान्नं च तिलैः सह।
अश्मनो लवणं चैव पशवो ये च मानुषाः॥८६॥

He must avoid (selling) condiments of all sorts, cooked food and sesamum, stones, salt, cattle, and human (beings).

सर्वानचोद्यमानानधर्मान् यथा सिद्धार्थतिलपाषाणलवणपशुमनुष्यान् न विक्रीणीत रसत्वेनैव लवणस्य निषेधसिद्धौ विशेषेण निषेधो दोषगौरवज्ञापनार्थः। तच्च प्रायश्चित्तगौरवार्थमेवमन्यस्यापि पृथङ्निषेधो व्याख्येयः॥८६॥

सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च।
अपि चेत्स्युररक्तानि फलमूले तथौषधीः॥८७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

All dyed cloth, as well as cloth made of hemp, or flax, or wool, even though they be not dyed, fruit, roots, and (medical) herbs.

सर्वं तन्तुनिर्मितं वस्त्रं कुसुम्भादिरक्तं वर्जयेत्। शणक्षुमातन्तुमयानि विकलोमभवानि च यद्यलोहितान्यपि भवेयुस्तथापि न विक्रीणीत। तथा फलमूलगुडूच्यादीनि वर्जयेत्॥८७॥

अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान्॥८८॥

Water, weapons, poison, meat, Soma, and perfumes of all kinds, fresh milk, honey, sour milk, clarified butter oil, wax, sugar, KuŚa-grass.

जललोहविषमांससोमक्षीरदधिघृततैलगुडदर्भान् तथा गन्धवन्ति सर्वाणि कर्पूरादीनि, क्षौद्रं माक्षिकं, मधु मधुच्छिष्टं "सभ्रामरमधुच्छिष्टम्" इति याज्ञवल्क्येन पठितं वर्जयेत्॥८८॥

आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च।
मद्यं नीलि च लाक्षां च सर्वाश्चैकशफांस्तथा॥८९॥
[त्रपुसीसं तथा लोहं तैजसानि च सर्वशः।
वालांश्चर्म तथास्थीनि सस्नायूनि विवर्जयेत्॥२॥]

All beasts of the forest, animals with fangs or tusks, birds, spirituous liquor, indigo, lac, and all one-hoofed beasts.

आरण्यान्सर्वान्पशून्हस्त्यादीन्, दंष्ट्रिणः सिंहादीन्, तथा पक्षिजलजन्तून्, मद्यादीन्, एकशफांश्चाश्वादीन् न विक्रीणीत॥८९॥

काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः।
विक्रीणीत तिलाञ्छुद्रान्धर्मार्थमचिरस्थितान्॥९०॥

But he who subsists by agriculture, may at pleasure sell unmixed sesamum grains for sacred purposes, provided he himself has grown them and has not kept them long.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कर्षक: स्वयमेव कर्षणेन तिलानुत्पाद्य, द्रव्यान्तरेण मिश्रानुत्पत्यनन्तरमेव नतु लाभार्थं कालान्तरं प्रतीक्ष्य धर्मनिमित्तमिच्छतो विक्रीणीत, निषिद्धस्य तिलविक्रयस्य धर्मार्थमयं प्रतिप्रसव: ॥९०॥

भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः।
कृमिभूतः श्वविष्ठायां पितृतिः सह मज्जति ॥९१॥

If he applies sesamum to any other purpose but food, anointing, and charitable gifts, he will be born (again) a sa worm and, together with his ancestors, be plunged into the ordure of dogs.

भोजनाभ्यन्नदानव्यतिरिक्तं यदन्यन्निषिद्धं विक्रयादि तिलानां कुरुते, तेन पितृभि: सह कृमित्वं प्राप्त: कुक्कुरपुरीषे मज्जति ॥९१॥

सद्यः पतति मांसेन लाक्षया लवणेन च।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥९२॥

By (selling) flesh, slat, and lac a Brālımaṇa at once becomes an outcast; by selling milk he becomes (equal to) a Śūdra in three days.

मांसलाक्षालवणविक्रयैर्ब्राह्मणस्तत्क्षणादेव पततीति दोषगौरव-व्याख्यानार्थमेतत्, पञ्चानामेव महापातकिनां पातित्यहेतूनां वक्ष्यमाणत्वात्। क्षीरविक्रयात्त्रयहेण शूद्रतां प्राप्नोति। एतदपि दोषगौरवाप्रायश्चितगौरव-ख्यापनार्थम् ॥९२॥

इतरेषां तु पण्यानां विक्रयादिह कामतः।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥९३॥

ब्राह्मण उक्तेभ्यो मांसादिभ्योऽन्येषां प्रतिषिद्धानां पण्यानामिच्छातो नतु प्रमादाद्द्रव्यान्तरसंश्लिष्टानां सप्तरात्रविक्रयणेन वैश्यत्वं गच्छति ॥९३॥

रसा रसैर्निमातव्या न त्वेव लवणं रसैः।
कृतान्नं चाकृतान्नेन तिला धान्येन तत्समाः ॥९४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Condiments may be bartered for condiments, but by no means salt for (other) condiments; cooked food (may be exchanged) for (other kinds of) cooked food, and sesamum seeds for grain in equal quantities.

रसा गुडादयो रसैर्घृतादिभिः परिवर्तनीयाः। लवणं पुना रसान्तरेण न परिवर्तनीयं, सिद्धान्नं चामान्नेन परिवर्तनीयं, तिला धान्येन धान्यप्रस्थेनेत्येवं तत्समाः परिवर्तनीयाः॥९४॥

जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः।
न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित्॥९५॥

A Kṣatriya who has fallen into distress, may subsist by all these (means); but he must never arrogantly adopt the mode of life (prescribed for his) betters.

क्षत्रियः आपदं प्राप्तः एतेनेत्यभिधाय सर्वेण इत्यभिधानाद्ब्राह्मणगोचरतया निषिद्धेनापि रसादिविक्रयणेन वैश्यवज्जीवेन्न पुनः कदाचिद्ब्राह्मण-जीविकामाश्रयेत्। न केवलं क्षत्रियः क्षत्रियवदन्योऽपि॥९५॥

यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः।
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत्॥९६॥

A man of low caste who through covetousness lives by the occupations of a higher one, the king shall deprive of his property and banish.

यो निकृष्टजातिः सन्, लोभादुत्कृष्टजातिविहितकर्मभिर्जीवेत्तं राजा गृहीतसर्वस्वं कृत्वा तदानीमेव देशान्निःसारयेत्॥९६॥

वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः।
परधर्मेण जीवन्हि सद्यः पतति जातितः॥९७॥

It is better (to discharge) one's own (appointed) duty incompletely than to perform completely that of another; for he who lives according to the law of another (caste) is instantly excluded from his own.

विगुणमपि स्वकर्म कर्तुं न्याय्यं, न परकीयं संपूर्णमपि।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्माज्जात्यन्तरविहितकर्मणा जीवन् तत्क्षणादेव स्वजातितः पततीति दोषो वर्जनार्थः ॥९७॥

वैश्योऽजीवन्स्वधर्मेण शूद्रवृत्त्यापि वर्तयेत्।
अनाचरन्नकार्याणि निवर्तेत च शक्तिमान्॥९८॥

A Vaiśya who is unable to subsist by his own duties, may even maintain himself by a Śūdra's mode of life, avoiding (however) acts forbidden (to him), and he should give it up, when he is able (to do so).

वैश्यः स्ववृत्त्या जीवितुमशक्नुवन् शूद्रवृत्त्यापि द्विजातिशुश्रूषयोच्छिष्टभोजनादीन्यकुर्वन् वर्तेत निस्तीर्णापत्क्रमशः शूद्रवृत्तितो निवर्तेत ॥९८॥

अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम्।
पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः॥९९॥

But a Śūdra, being unable to find service with the twice-born and threatened with the loss of his sons and wife (through hunger), may maintain himself by handicrafts.

शूद्रः द्विजातिशुश्रूषां कर्तुमक्षमः क्षुदवसन्नपुत्रकलत्रः सूपकारादिकर्मभिर्जीवेत् ॥९९॥

यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः।
तानि कारुककर्माणि शिल्पानि विविधानि च॥१००॥

(Let him follow) those mechanical occupations and those various practical arts by following which the twice-born are (best) served.

पूर्वोक्तकारुककर्मविशेषाभिधानार्थमिदम्। यैः कर्मभिः कृतैर्द्विजातयः परिचर्यन्ते तानि च कर्माणि तक्षणादीनि शिल्पानि च चित्रलिखितादीनि नानाप्रकाराणि कुर्यात् ॥१००॥

वैश्यवृत्तिमनातिष्ठन्ब्राह्मणः स्वे पथि स्थितः।
अवृत्तिकर्षितः सीदन्निमं धर्मं समाचरेत्॥१०१॥

A Brāhmaṇa who is distressed through a want of means

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

of subsistence and pines (with hunger), (but) unwilling to adopt a Vaiśya's mode of life and resolved to follow his own (prescribed) path, may act in the following manner.

ब्राह्मणो वृत्त्यभावपीडितोऽवसादं गच्छन् क्षत्रियवैश्यवृत्तिमनातिष्ठन् "वरं स्वधर्मो विगुणः" (अ. १० श्लो. ९७) इत्युक्तत्वात्स्ववृत्तावेव वर्तमान इमां वक्ष्यमाणं वृत्तिमनुतिष्ठेत्। अतश्च विगुणप्रतिग्रहादिस्ववृत्त्यसंभवे परवृत्त्याश्रयणं ज्ञेयम्॥१०१॥

सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः।
पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते॥१०२॥

A Brāhmaṇa who has fallen into distress may accept (gifts) from anybody; for according to the law it is not possible (to assert) that anything pure can be sullied.

ब्राह्मण आपदं प्राप्तः सर्वेभ्योऽपि निन्दिततमेभ्यः क्रमेण प्रतिग्रहं कुर्यात् अत्रार्थान्तरन्यासो नामालंकारः। यस्मात्पवित्रं गन्नादि रथ्योदकादिना दुष्यतीत्येतच्छास्त्रस्थित्या नोपपद्यते॥१०२॥

यस्मात्–

नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात्।
दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते॥१०३॥

By teaching, by sacrificing for, and by accepting gifts from despicable (men) Brāhmaṇas (in distress) commit not sin; for they (are as pure) as fire and water.

ब्राह्मणानामापदि गर्हिताध्यापनयाजनप्रतिग्रहैरधर्मो न भवति। यस्मात्स्वभावतः पवित्रत्वेनाग्न्युदकतुल्यास्ते॥१०३॥

जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः।
आकाशमिव पङ्केन न स पापेन लिप्यते॥१०४॥

He who, when in danger of losing his life, accepts food from any person whatsoever, is no more tainted by sin than the sky by mud.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यः प्राणात्ययं प्राप्तः प्रतिलोमजादन्नमश्नाति सोऽन्तरिक्षमिव कर्दमेन पापेन न संबध्यते ॥१०४॥

अत्र परकृतिरूपार्थवादमाह-

अजीगर्तः सुतं हन्तुमुपासर्पद्बहुभुक्षितः।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन्॥१०५॥

Ajīgarta, who suffered hunger, approached in order to slay (his own) son, and was not tainted by sin, since he (only) sought a remedy against famishing.

ऋषिरजगिर्ताख्यो बुभुक्षितः सन्, पुत्रं शुनःशेपनामानं स्वयं विक्रीतवान् यज्ञे गोशतलाभाय यज्ञयूपे बद्धा विशसिता भूत्वा हन्तुं प्रचक्रमे। न च क्षुत्प्रतीकारार्थं तथा कुर्वन्पापेन लिप्तः। एतच्च बह्वृचब्राह्मणे शुनःशेपाख्यानेषु व्यक्तमुक्तम्॥१०५॥

श्वमांसमिच्छन्नार्तोऽत्तुं धर्माधर्मविचक्षणः।
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान्॥१०६॥

Vāmadeva, who well knew right and wrong, did not sully himself when, tormented (by hunger), he desired to eat the flesh of a dog in order to save his life.

वामदेवाख्य ऋषिर्धर्माधर्मज्ञः क्षुधार्तः प्राणत्राणार्थं श्वमांसं खादितुमिच्छन्दोषेण न लिप्तवान्॥१०६॥

भरद्वाजः क्षुधार्तस्तु सपुत्रो विजने वने।
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः॥१०७॥

Bharadvāja, a performer of great austerities, accepted many cows from the carpenter Bribu, when he was starving together with his sons in a lonely forest.

भरद्वाजाख्यो मुनिः महातपस्वी पुत्रसहितो निर्जने वनेऽरण्ये उषित्वा क्षुत्पीडितो वृधुनाम्नस्तक्ष्णो बह्वीर्गाः प्रतिगृहीतवान्॥१०७॥

क्षुधार्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम्।
चण्डालहस्तादादाय धर्माधर्मविचक्षणः॥१०८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Viśvāmitra, who well knew what is right or wrong, approached, when he was tormented by hunger, (to eat) the haunch of a dog, receiving it from the hands of a Caṇḍāla.

ऋषिर्विश्वामित्रो धर्माधर्मज्ञः क्षुत्पीडितश्चण्डालहस्ताद्गृहीत्वा कुक्कुरजघनमांस भक्षितुमध्यवसितवान् ॥१०८॥

प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि।
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥१०९॥

On (comparing) the acceptance (of giftrs from low men), sacrificing (for them), and teaching (them), the acceptance of gifts is the meanest (of those acts) and (most) reprehensible for a Brāhmaṇa (on account of its results) in the next life.

गर्हितानामप्यध्यापनयाजनप्रतिग्रहाणां मध्याद्ब्राह्मणस्यासत्प्रतिग्रहो निकृष्टः परलोके नरकहेतुः। ततश्चापदि प्रथमं निन्दिताध्यापनयाजनयोः प्रवर्तितव्यं तदसंभवे त्वसत्प्रतिग्रहः इत्येवंपरमेतत् ॥१०९॥

अत्र हेतुमाह-

याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम्।
प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ॥११०॥

(For) assisting in sacrifices and teaching are (two acts) always performed for men who have received the sacraments; but the acceptance of gifts takes place even in (case the giver is) a Śūdra of the lowest class.

याजनाध्यापने आपद्यनापदि च उपनयनसंस्कृतात्मनां द्विजातीनामेव क्रियेते। प्रतिग्रहः पुनर्निकृष्टजातेः शूद्रादपि क्रियते तस्मादसौ ताभ्यां गर्हितः ॥११०॥

जपहोमैरपैत्येनो याजनाध्यापनैः कृतम्।
प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च ॥१११॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

The guilt incurred by offering sacrifices for teaching (unworthy men) is removed by muttering (sacred texts) and by burnt offerings, but that incurred by accepting gifts (from them) by throwing (the gifts) away and by austerities.

एनोग्रहणादसत्प्रतिग्रहयाजनाध्यापनैर्यदुपपन्नं पापं तत्प्रायश्चित्तप्रकरणे वक्ष्यमाणक्रमेण जपहोमैर्नश्यति। असत्प्रतिग्रहजनितं पुनः प्रतिगृहीतद्रव्यत्यागेन 'मांस गोष्ठे पयः पीत्वा' इत्येवमादिवक्ष्यमाणतपसापगच्छति ॥१११॥

शिलोञ्छमप्याददीत विप्रोऽजीवन्यतस्ततः।
प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ॥११२॥

A Brāhmaṇa who is unable to maintain himself, should (rather) glean ears or grains from (the field of) any (man); gleaning ears is better than accepting gifts, picking up single grains is declared to be still more laudable.

ब्राह्मणः स्ववृत्त्याऽजीवन्यतस्ततोऽपि शिलोञ्छं गृह्णीयान्न तु तत्संभवेऽसत्प्रतिग्रहं कुर्यात्। यस्तादसत्प्रतिग्रहाच्छिलः प्रशस्तः। मञ्जर्यात्मकानेकधान्योन्नयनं शिलस्ततोऽप्युञ्छः श्रेष्ठः। एकैकधान्यादिगुडकोञ्छयनमुञ्छः॥११२॥

सीदद्भिः कुप्यमिच्छद्भिर्धने वा पृथिवीपतिः।
याच्यः स्यात्स्नातकैर्विप्रैरदित्संस्त्यागमर्हति ॥११३॥

If Brāhmaṇas, who are Snātakas, ar epinning with hunger, or in want of (utensils made of) common metals, or of other property, they may ask the king for them; he is not disposed to be liberal, he must be left.

स्नातकैर्ब्राह्मणैर्धनाभावाद्धर्मार्थं कुटुम्बावसादं गच्छद्भिः सुवर्णरजतव्यतिरिक्तं धान्यवस्त्रादि कुप्यं धनु यागाद्युपयुक्तं हिरण्याद्यप्यापत्प्रकरणात्क्षत्रियोऽप्युच्छास्त्रवर्ती याचितव्यः स्यात्। यश्च दातुं नेच्छति कृपणत्वेनावधारितः स त्याज्यो न याचनीय इत्यर्थः। मेधातिथिगोविन्दराजौ तु "त्यागमर्हतीति तस्य देशे न वस्तव्यम्" इति व्याचक्षाते॥११३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अकृतं च कृतात्क्षेत्राद्गौरजाविकमेव च।
हिरण्यं धान्यमन्नं च पूर्वं पूर्वमदोषवत्॥११४॥

(The acceptance of) an untilled field is less blamable than (that of) a tilled one; (with respect to) cows, goats, sheep, gold, grain and cooked food, (the acceptance of) each earlier-named (article is less blamable than of the following ones).

अकृतमनुप्तसस्यं क्षेत्रं तत्कृतादुप्तसस्यात्प्रतिग्रहे दोषरहितं तथा गोछागमेषहिरण्यधान्यसिद्धान्नानां मध्यात्पूर्वं पूर्वमदुष्टम्। ततश्चैषां पूर्वपूर्वासंभवे परः परो ज्ञेयः॥११४॥

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च॥११५॥

There are seven lawful modes of acquiring property, (*viz.*) inheritance, finding or friendly donation, purchase, conquest, lending at interest, the performance of work, and the acceptance of gifts from virtuous men.

दायाद्याः सप्त धनागमाः यथाधनाधिकारं धर्मादनपेताः तत्र दायोऽन्वयागतधनं, लाभो निध्यादेः मैत्र्यादिलब्धस्य च, क्रयः प्रसिद्धः, एते त्रयश्चतुर्णामपि वर्णानां धर्म्याः। जयधनं विजयत्वेन क्षत्रियस्य, धर्म्यः प्रयोगो वृद्ध्यादिधनस्य, कर्मयोगश्च कृषिवाणिज्ये, एतौ प्रयोगौ वैश्यस्य धर्म्यौ, सत्प्रतिग्रहो ब्राह्मणस्य धर्म्यः। एवं चैतेषां धर्मत्ववचनादेतदभावेऽनयेष्वनापद्विहितेषु वृत्तिकर्मसु प्रवर्तितव्यम्। तदभावे चापद्विहितेषु प्रकृतेष्वित्येतदर्थमेतदिहोच्यते॥११५॥

विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः।
धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः॥११६॥

Learning, mechanical arts, work for wages, service, rearing cattle, traffic, agriculture, contentment (with little), alms, and receiving interest on money, are the ten modes of sub-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

sistence (permitted to all men in times of distress).

आपत्प्रकरणाज्जीवनहेतव इति निर्देशादेषां मध्ये यया वृत्त्या यस्यानापदि न जीवनं तया तस्यापद्यभ्यनुज्ञायते। यथा ब्राह्मणस्य भृतिसेवादि। एवं शिल्पादावपि ज्ञेयम्। विद्या वेदविद्याव्यतिरिक्ता वैद्यतर्कविषापनयनादिविद्या सर्वेषामापदि जीवनार्थं न दुष्यति। शिल्पं गन्धयुक्त्यादिकरणं, भृतिः प्रैष्यभावेन वेतनग्रहणं, सेवा पराज्ञासंपादनं, गोरक्ष्यं पशुपाल्यं, विपणिर्वणिज्या, कृषिः स्वयं कृता, वृतिः संतोषस्तस्मिन्सत्यल्पकेनापि जीव्यते, भैक्ष्यं भिक्षासमूहः, कुसीदं वृद्ध्या धनप्रयोगः स्वयं कृतोऽपीत्येभिर्दशभिरापदि जीवनीयम्॥११६॥

ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत्।
कामं तु खलु धर्मार्थं दद्यात्पापीयसेऽल्पिकाम्॥११७॥

Neither a Brāhmaṇa, nor a Kṣatriya must lend (money at) interest; but at his pleasure (either of them) may, in times of distress (when he requires money) for sacred purposes, lend to a very sinful man at a small interest.

ब्राह्मणः क्षत्रियो वापि वृद्ध्यादिधनमापद्यपि न प्रयुञ्जीत किंतु निकृष्टकर्मणा धर्मार्थमल्पिकया वृद्ध्या प्रयुञ्जीत॥११७॥

इदानीं राज्ञामापद्धर्ममाह-

चतुर्थमाददानोऽपि क्षत्रियो भागमापदि।
प्रजा रक्षन्परं शक्त्या किल्बिषात्प्रतिमुच्यते॥११८॥

A Kṣatriya (king) who, in times of distress, takes even the fourth part (of the crops), is free from guilt, if he protects his subjects to the best of his ability.

राज्ञो धान्यादीनामष्टम इत्याद्युक्तं स आपदि धान्यादेश्चतुर्थमपि भागं करार्थं गृह्णन्परया शक्त्या प्रजा रक्षन्नधिककरग्रहणपापेन न संबध्यते॥११८॥

कस्मात्पुनरापद्यपि राज्ञोऽपि रक्षणमुच्यते यस्मात्-

स्वधर्मो विजयस्तस्य नाहवे स्यात्पराङ्मुखः।
शस्त्रेण वैश्यान्रक्षित्वा धर्म्यमाहारयेद्बलिम्॥११९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

His peculiar duty is conquest, and he must not turn back in danger; having protected the Vaiśyas by his weapons, he may cause the legal tax to be collected.

राज्ञः शत्रुविजयः स्वधर्मो विजयफलं युद्धमित्यर्थः। प्रजारक्षणप्रयुक्तस्य यदि कुतश्चिद्भयं स्यात्तदा स युद्धपराङ्मुखो न भवेत्। एवं च शस्त्रेण वैश्यान्दस्युभ्यो रक्षित्वा तेभ्यो धर्मादनपेतमाप्तपुरुषैर्बलिमाहारयेत्॥११९॥

कोऽसौ बलिस्तमाह-

धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणावरम्।
कर्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा॥१२०॥

(*Viz.*) from Vaiśyas one-eighth as the tax ongrain, one-twentieth (on the profits on gold and cattle), which amount at least to one Kārṣāpaṇa; Śūdras, artisans, and mechanics (shall) benefit (the king) by (doing) work (for him).

धान्ये विंश उपचये (?) वैश्यानामष्टमं भागं शुल्कमाहारयेत्। धान्यानां द्वादशोऽपि भाग उक्तः। आपद्ययमष्टम उच्यते। अत्यन्तापदि प्रागुक्तश्चतुर्थो वेदितव्यस्तत्रापि विंशं ग्राह्यम्। तथा हिरण्यादीनां कार्षापणान्तानां विंशतितमं भागं शुल्कं गृह्णीयात्तत्रापि "पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः" (अ. ७ श्लो. १३०) इत्यनापदि पञ्चाशद्भाग उक्तः। आपद्ययं विंश उच्यते। तथा शूद्राः, कारवः सूपकारादयः, शिल्पिनः तक्षादयः, कर्मणैवोपकुर्वन्ति नतु तेभ्य आपद्यपि करो ग्राह्यः॥१२०॥

शूद्रस्तु वृत्तिमाकाङ्क्षन्क्षत्रमाराधयेद्यदि।
धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत्॥१२१॥

If a Śūdra, (unable to subsist by serving Brāhmaṇas), seeks a livelihood, he may serve Kṣatriyas, or he may also seek to maintain himself by attending on a wealthy Vaiśya.

शूद्रो ब्राह्मणशुश्रूषयाऽऽजीवन्यदि वृत्तिमाकांक्षेत्तदा क्षत्रियं परिचर्य तदभावे धनिनं वैश्यं परिचर्य जीवितुमिच्छेत्। द्विजातिशुश्रूषणासामर्थ्ये तु प्रागुक्तानि कर्माणि कुर्यात्॥१२१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः।
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता॥१२२॥

But let a (Śūdra) serve Brāhmaṇas, either for the sake of heaven, or with a view to both (this life and the next); for he who is called the servant of a Brāhmaṇa thereby gains all his ends.

स्वर्गप्राप्त्यर्थं स्वर्गस्ववृत्तिलिप्सार्थं वा ब्राह्मणानेव शूद्रः परिचरेत्। तस्माज्जातो ब्राह्मणाश्रितोऽयमिति शब्दो यस्य। शाकपार्थिवादित्वात्समासः। सास्य शूद्रस्य कृतकृत्यता तद्व्यपदेशतयासौ कृतकृत्यो भवति॥१२२॥

यत एवमतः-

विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते।
यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम्॥१२३॥

The service of Brāhmaṇas alone is declared (to be) an excellent occupation for a Śūdra; for whatever else besides this he may perform will bear him no fruit.

ब्राह्मणपरिचर्यैव शूद्रस्य कर्मान्तरेभ्यः प्रकृष्टं कर्म शास्त्रेऽभिधीयते। यस्मादेतद्व्यतिरिक्तं यदसौ कर्म कुरुते तदस्य निष्फलं भवतीति पूर्वस्तुत्यर्थं न त्वन्यनिवृत्तये। पाकयज्ञादीनामपि तस्य विहितत्वात्॥१२३॥

प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः।
शक्तिं चावेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहम्॥१२४॥

They must allot to him out of their own family (-property) a suitable maintenance, after considering his ability, his industry, and the number of those whom he is bound to support.

तस्य परिचारकशूद्रस्य परिचर्यासामर्थ्यं कर्मोत्साहं पुत्रदारादिभर्तव्यपरिमाणं चावेक्ष्य तैर्ब्राह्मणैः स्वगृहादनुरूपा जीविका कल्पनीया॥१२४॥

उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च।
पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः॥१२५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

The remnants of their food must be given to him, as well as their old clothes, the refuse of their grain, and their old houshold furniture.

तस्मै प्रकृताश्रितशूद्राय भुक्तावशिष्टान्नं ब्राह्मणैर्देयम्। एवं च "न शूद्राय मतिं दद्यान्नोच्छिष्टम्" (अ. ४ श्लो. ८०) इत्यनाश्रितशूद्रविषयमवतिष्ठते। तथा जीर्णवस्त्रासारधान्यजीर्णशय्यापरिच्छदा अस्मै देयाः॥१२५॥

न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति।
नास्याधिकारो धर्मेऽस्ति न धर्मात्प्रतिषेधनम्॥१२६॥

A Śūdra cannot commit an offence, causing loss of caste (*pātaka*), and he is not worthy to receive the sacraments; he has no right to (fulfil) the sacred law (of the Āryans, yet) there is no prohibition against (his fulfilling certain portions of) the law.

लशुनादिभक्षणेन शूद्रे न किंचित्पातकं भवति नतु ब्रह्मवधादावपि। "अहिंसा सत्यं" (याज्ञ० अ. १ श्लो. १२२) इत्यादेश्चातुर्वर्ण्यसाधारणत्वेन विहितत्वात्। नचाप्युपनयनादिसंस्कारमर्हति, नास्याग्निहोत्रादिधर्मेऽधिकारोऽस्ति, अविहितत्वात्। नच शूद्रविहितात्वात्पाकयज्ञादिधर्मादस्य निषेधः एवं चास्य सर्वस्य सिद्धार्थत्वादयं श्लोक उत्तरार्थोऽनुवादः॥१२६॥

धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तमनुष्ठिताः।
मन्त्रवर्ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च॥१२७॥

(Śūdra) who are desirous to gain merit, and know (their) duty, commit no sin, but gain praise, if they imitate the practice of virtuous men without reciting sacred texts.

ये पुनः शूद्राः स्वधर्मवेदिनो धर्मप्राप्तिकामास्त्रैवर्णि- कानामाचारमनिषिद्ध-माश्रितास्ते "नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्" (अ. १ श्लो. १२१) इति याज्ञवल्क्यवचनान्नमस्कारमन्त्रेण मन्त्रान्तररहितं पञ्चयज्ञादि धर्मान्कुर्वाणा न प्रत्यवयन्ति, ख्यातिं च लोके लभन्ते॥१२७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथायथा हि सद्वृत्तमातिष्ठत्यनसूयकः।
तथातथेमं चामुं च लोकं प्राप्नोत्यनिन्दितः॥१२८॥

The more a (Śūdra), keeping himself free from envy, imitates the behaviour of the virtuous, the more he gains, without being censured, (exaltation in) this world and the next.

परगुणानिन्दकः शूद्रो यथायथा द्विजात्याचारमनिषिद्धमनुतिष्ठति तथा तथा जनैरनिन्दित इह लोके उत्कृष्टः स्मृतः स्वर्गादिलोकं च प्राप्नोति॥१२८॥

शक्तेनापि हि शूद्रेण न कार्यो धनसंचयः।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते॥१२९॥

No collection of wealth must be made by a Śūdra even though he be able (to do it); for a Śūdra who has acquired wealth, gives pain to Brāhmaṇas.

धनार्जनसमर्थेनापि शूद्रेण पोष्यवर्गसंवर्धनपञ्चयज्ञाद्युचितादधिकबहुधनसंचयो न कर्तव्यः। यस्माच्छूद्रो धनं प्राप्य शास्त्रानभिज्ञत्वेन धनमदाच्छुश्रूषायाश्चाकरणाद्ब्राह्मणानेव पीडयतीत्युक्तस्यानुवादः॥१२९॥

एते चतुर्णां वर्णानामापद्धर्माः प्रकीर्त्तिताः।
यानसम्यगनुतिष्ठन्तो व्रजन्ति परमां गतिम्॥१३०॥

The duties of the four castes (varṇa) in times of distress have thus been declared, and if they perform them well, they will reach the most blessed state.

अमी चतुर्णां वर्णानामापद्यनुष्ठेया धर्मा उक्ताः। यान्सम्यगाचरन्तो विहितानुष्ठानान्निषिद्धानाचरणाच्च निष्पापतया ब्रह्मज्ञानलाभेन परमां गतिं मोक्षलक्षणां लभन्ते॥१३०॥

एष धर्मविधिः कृत्स्नश्चातुर्वर्ण्यस्य कीर्त्तितः।
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम्॥१३१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Thus all the legal rules for the four castes have been proclaimed; I next will promulgate the auspicious rules for penances.

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां दशमोऽध्यायः ॥१०॥

अयं चतुर्णां वर्णानामाचारः समग्रः कथितः। अत ऊर्ध्वं प्रायश्चित्तानुष्ठानं शुभमभिधास्याभि ॥१३१॥ क्षे. श्लो. २॥

इति श्रीकुल्लकभट्टविरचितायां मन्वर्थमुक्तावल्यां मनुवृत्तौ
दशमोऽध्यायः ॥१०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकादशोऽध्यायः।

सान्तानिकं यक्ष्यमाणमध्वगं सर्ववेदसम्।
गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः॥१॥
नवैतान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान्।
निःस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः॥२॥

Him who wishes (to marry for the sake of having) offspring, him who wishes to perform a sacrifice, a traveller, him who has given away all his property, him who begs for the sake of this teacher, his father, or his mother, a student of the Veda, and a sick man.

These nine Brāhmaṇas one should consider as Snātakas, begging in order to fufil the sacred law; to such poor men gifts must be given in proportion to their learning.

ननु "अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम्" (अ. १० श्लो. १३१) इति प्रायश्चित्तस्य वक्तव्यतया प्रतिज्ञातत्वात्सांतानिकादिभ्यो देयमित्यादेः कः प्रस्ताव उच्यते। "दानेनाकार्यकारिणः" (अ. ५ श्लो. १०७) इति प्रागुक्तत्वात् "दानेन वधनिर्णेकं सर्पादीनामशक्नुवन्" (अ. ११ श्लो. १३९) इत्यादेश्च वक्ष्यमाणत्वात्प्रकृष्टप्रायश्चित्तात्मकदानपात्रोपन्यासः प्रकृतोपयुक्त एव। वर्णाश्रमधर्मादिव्यतिरिक्तप्रायश्चित्तादिनैमित्तिकधर्मकथनार्थत्वाच्चाध्यायस्यान्यस्यापि नैमित्तिकधर्मस्यात्रोपन्यासो युक्तः। संतानप्रयोजनत्वाद्विवाहस्य सांतानिको विवाहार्थी, यक्ष्यमाणोऽवश्यकर्तव्यज्योतिष्टोमादि यागं चिकीर्षुः, अध्वगः पान्थः, सर्ववेदसः कृतसर्वस्वदक्षिणविश्वजिद्यागः, विद्यागुरोर्ग्रासाच्छादनाद्यर्थः प्रयोजनं यस्य स गुर्वर्थः, एवं पितृमात्रर्थावपि, स्वाध्यावर्थी स्वाध्यायाध्ययनकालीनाच्छादनाद्यर्थी, ब्रह्मचारी, उपतापी रोगी, एतान्नव ब्राह्मणान्धर्मभिक्षा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शीलान्स्नातकाञ्ज्ञानीयात्। एतेभ्यो निर्धनेभ्यो गोहिरण्यादि दीयत इति दानं विद्याविशेषानुरूपेण दद्यात् ॥१ ॥२ ॥

एतेभ्यो हि द्विजाग्र्येभ्यो देयमन्नं सदक्षिणम्।
इतरेभ्यो बहिर्वेदि कृतान्नं देयमुच्यते ॥ ३ ॥

To these most excellent among the twice-born, food and presents (of money) must be given; it is declared that food must be given to others outside the sacrificial enclosure.

एतेभ्यो नवभ्यो ब्राह्मणश्रेष्ठेभ्योऽन्तर्वेदि सदक्षिणमन्नं दातव्यम्। एतद्व्यतिरिक्तेभ्यः पुनः सिद्धान्नं बहिर्वेदि देयत्वेनोपदिश्यते। धनदाने त्वनियमः ॥३ ॥

सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत्।
ब्राह्मणान्वेदविदुषो यज्ञार्थं चैव दक्षिणाम् ॥ ४ ॥

But a king shall bestow, as is proper, jewels of all sorts, and presents for the sake of sacrifices on Brāhmaṇas learned in the Vedas.

राजा पुनः सर्वरत्नानि मणिमुक्तादीनि यागोपयोग्यानि च दक्षिणार्थं धनं विद्यानुरूपेण वेदविदो ब्राह्मणान्स्वीकारयेत् ॥४ ॥

कृतदारोऽपरान्दारान्भिक्षित्वा योऽधिगच्छति।
रतिमात्रं फलं तस्य द्रव्यदातुस्तु संततिः ॥ ५ ॥

If a man who has a wife weds a second wife, having begged money (to defray the marriage expenses, he obtains) no advantage but sensual enjoyment; but the issue (of his second marriage belongs) to the giver of the money.

यः सभार्यः संतत्यार्थादिनिमित्तमन्तरेणापरान्दारान् भिक्षित्वा करोति तस्य रतिमात्रं फलं, धनदातुः पुनस्तदुत्पन्नान्यपत्यानि भवन्तीति निन्दातिशयः। नैवंविधेन धनं याचित्वान्यो विवाहः कर्तव्यो नाप्येवंविधाय नियमतो धनं देयमिति ॥५ ॥

धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत्।
वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते ॥ ६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

One should give, according to one's ability, wealth of Brāhmaṇas learned in the veda and living alone; (thus) one obtains after death heavenly bliss.

धनानि गोभूहिरण्यादीनि शक्त्यनतिक्रमेण ब्राह्मणेषु वेदज्ञेषु विविक्तेषु पुत्रकलत्राद्यवसक्तेषु प्रतिपादयेत्तद्वशाच्च स्वर्गप्राप्तिर्भवतीति ॥६॥

यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥७॥

He who may possess (a supply of) food sufficient to maintain those dependant on him during three years or more than that, is worthy to drink the Soma-juice.

यस्यावश्यपोष्यभरणार्थं वर्षत्रयपर्याप्तं तदधिकं वा भक्तादि स्यात्स काम्यसोमयागं कर्तुमर्हति। नित्यस्य पुनर्यथाकथंचिदवश्यकर्तव्यत्वान्नायं निषेधः। अत एव "समान्ते सौमिकैर्मखैः (अ. ४ श्लो. २६) इति नित्यविषयत्वमुक्तवान् ॥७॥

अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः।
स पीतसोमपूर्वोऽपि न तस्याप्नोति तत्फलम् ॥८॥

But a twice-born man, who, though possessing less than that amount of property, neverthless drinks the Soma-juice, does not derive any benefit from that (act), though he may have formerly drunk the Soma-juice.

त्रैवार्षिकधनादल्पधने सति यः सोमयागं करोति तस्य प्रथमसोमयागो नित्योऽपि न संपन्नो भवति। सुतरां द्वितीययागः काम्यः ॥८॥

शक्तः परजने दाता स्वजने दुःखजीविनि।
मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ॥९॥

(If) an opulent man (is) liberal towards strangers, while his family lives in distress that counterfeit virtue will first make him taste the sweets (of fame, but afterwards) make him swaliow the poison (of punishment in hell).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यो बहुधनत्वाद्दानशक्तः सन्न वश्यभरणीये पितृमात्रादिज्ञातिजने दौर्गत्याद्दुःखोपेते सति यशोऽर्थमन्येभ्यो ददाति स तस्य दानविशेषो धर्मप्रतिरूपको नतु धर्म एव। मध्वापातो मधुरोपक्रमः प्रथमं यशस्करत्वात्। विषास्वादश्चान्ते, नरकफलत्वात्तस्मादेतन्न कार्यम् ॥९॥

भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदेहिकम्॥
तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च॥१०॥
[वृद्धो च मातापितरौ साध्वी भार्या शिशुः सुतः।
अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्॥१॥]

If (a man) does anything for the sake of his happiness in another world, to the detriment of those whom he is bound to maintain, that produces evil results for him, both while he lives and when he is dead.

पुत्रदाराद्यवश्यभर्तव्यपीडनेन यत्पारलौकिकधर्मबुद्ध्या दानादि करोति तस्य दातुर्जीवतो मृतस्य च तद्दानं दुःखफलं भवतीति पूर्वं कीर्त्यादिदृष्टार्थदानप्रतिषेधः। अयं त्वदृष्टार्थदानप्रतिषेधः॥१०॥

यज्ञश्चेत्प्रतिरुद्धः स्यादेकेनाङ्गेन यज्वनः।
ब्राह्मणस्य विशेषेण धार्मिके सति राजनि॥११॥
यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः।
कुटुम्बात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये॥१२॥

If a sacrifice, (offered) by (any twice-born) sacrificer, (and) especially by a Brāhmaṇa, must remain incomplete through (the want of) one reqsite, while a righeous king rules.

That article (required) for the completion of the sacrifice, may be taken (forcibly) from the house any Vaiśya, who possesses a large number of cattle, (but) neither performs the (minor) sacrices nor drinks the Soma-juice.

क्षत्रियादेर्यजमानस्य विशेषतो ब्राह्मणस्य यदि यज्ञ इतरान्नसंपत्तौ सत्यामेकेनान्नेनासंपूर्णः स्यात्तदा यो वैश्यो बहुपश्वादिधनः पाकयज्ञादि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रहितोऽसोमयाजी तस्य गृहात्तदन्नोचितं द्रव्यं बलेन चौर्येण वा हरेत्। एतच्च धर्मप्रधाने सति राजनि कार्यम्। स हि शास्त्रार्थमनुतिष्ठन्तं न निगृह्णाति ॥११ ॥१२ ॥

आहरेत्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः।
न हि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः ॥१३ ॥

(Or) the (sacrificer) may take at his pleasure two or three (articles required for a sacrifice) from the house of a Śūdra; for a Śūdra has no business with sacrifices.

यज्ञस्य द्वित्र्यन्नवैकल्ये सति तानि त्रीणि चान्नानि द्वे वान्ने वैश्यादलाभे सति निर्विशङ्कं शूद्रस्य गृहाद्बलेन चौर्येण वा हरेत्। यस्माच्छूद्रस्य क्वचिदपि यज्ञसंबन्धो नास्ति। "न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत" (अ. ११ श्लो. २४) इति वक्ष्यमाणप्रतिषेधः शूद्राद्याचनस्य नतु बलग्रहणादेः ॥१३ ॥

योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः।
तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् ॥१४ ॥

If (a man) possessing one hundred cows, kindles not the sacred fire, or one possessing a thousand cows, drinks not the Soma-juice, a (sacrificer) may unhesitatingly take (what he requires) from the houses of those two, even (though they be Brāhmaṇas or Kṣatriyas).

योऽनाहिताग्निर्गोशतपरिमाणधन आहिताग्निर्वाऽसोमयाजी गोसहस्रपरिमितधनः द्वयोरपि गृहाभ्यां प्रकृतमन्नद्वयं त्रयं वा शीघ्रं संपादयितुं ब्राह्मणेन द्वाभ्यामाहरणीयं ब्राह्मणक्षत्रियाभ्यामपि ब्राह्मण आहरेत्। क्षत्रियस्य तु अदस्युक्रियावद्ब्राह्मणस्वहरणं निषेधयिष्यति ॥१४ ॥

आदाननित्याच्चादातुराहरेदप्रयच्छतः।
यथा यशोऽस्य प्रथते धर्मश्चैव प्रवर्धते ॥१५ ॥

(Or) he may take (it by force or fraud) from one who always takes and never gives, and who refuses to give it; thus the fame (of the taker) will spread and his merit increase.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रतिग्रहादिना आदानं धनग्रहणं नित्यं यस्यासावादाननित्यो ब्राह्मणस्तस्मादिष्टापूर्तदानरहिताद्यज्ञान्नद्वयत्रयार्थायां याचनायां कृतायामददतो बलेन चौर्येण वा हरेत्। तथा कृतेऽपहर्तुः ख्यातिः प्रकाशते धर्मश्च वृद्धिमेति ॥१५॥

तथैव सप्तमे भक्ते भक्तानि षडनश्नता।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥१६॥

Likewise he who has not eaten at (the time of) six meals, may take at (the time of) the seventh meal (food) from a man who neglects his sacred duties, without (however) making a provision for the morrow.

सायंप्रातर्भोजनोपदेशान्त्रिरात्रोपवासे वृत्ते चतुर्थेऽहनि प्रातः सप्तमे भक्ते दानादिधर्मरहितादेकदिनपर्याप्तमर्थं चौर्यादिना हर्तव्यम् ॥१६॥

खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते।
आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति ॥१७॥

Either from the threshing-floor, a field, or out of the house, or wherever he finds it; but if (the owner) asks him, he must confess to him that (deed and its cause).

धान्यादिमर्दनस्थानात्क्षेत्राद्वा गृहाद्वा यतो वान्यस्मात्प्रदेशाद्धान्यं हीनकर्मसंबन्धि लभ्यते ततो हर्तव्यं, यदि वासौ धनस्वामी पृच्छति किंनिमित्तं कृतमिति पृच्छते निमित्तं चौर्यादि वक्तव्यम् ॥१७॥

ब्राह्मणस्वं न हर्तव्यं क्षत्रियेण कदाचन।
दस्युनिष्क्रिययोस्तु स्वमजीवन्हर्तुमर्हति ॥१८॥

(On such occasions) a Kṣatriya must never take the property of a (virtuous) Brāhmaṇa; but he who is starving may appropriate the possessions of a Dasyu, or of one who neglects his sacred duties.

उक्तेष्वपि निमित्तेषु क्षत्रियेण ब्राह्मणस्य धनं ततोऽपकृष्टत्वान्न हर्तव्यं, समानन्याः यतया तु वैश्यशूद्राभ्यामुत्कृष्टजातितो न हर्तव्यम्। [illegible]-कृद्विहिताननुष्ठायिनोपुनर्ब्राह्मणक्षत्रिययोरत्यन्ता[illegible]दि क्षत्रियो हर्तुमर्हति ॥१८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

योऽसाधुभ्योऽर्थमादाय साधुभ्यः संप्रयच्छति।
स कृत्वा प्लवमात्मानं संतारयति तावुभौ॥१९॥

He who takes property from the wicked and bestows it on the virtuous, transforms himself into a boat, and carries both (over the sea of misfortune).

यो हीनकर्मादिभ्य उत्कृष्टेभ्योऽभिहितेष्वपि निमित्तेषूक्तानुरूपं यज्ञान्नादि साधनं कृत्वा साधुभ्य उत्कृष्टेभ्य ऋत्विगादिभ्यो धनं ददाति स यस्यापहरति तद्दुरितं नाशयति यस्मै तद्ददाति तद्दौर्गत्याभिघातादित्येवं द्वावप्यात्मानमुडुपं कृत्वा दुःखान्मोचयति॥१९॥

यद्धनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः।
अयज्वनां तु यद्वित्तमासुरस्वं तदुच्यते॥२०॥

The property of those who zealously offer sacrifices, the wise call the property of the gods; but the wealth of those who perform no sacrifices is called the property of the Āsuras.

यज्ञशीलानां यद्धनं तद्यागादौ विनियोगाद्देवस्वं विद्वांसो मन्यन्ते। यागादिशून्यानां तु यद्द्रव्यं तद्धर्मविनियोगाभावादासुरस्वमुच्यते। अतस्तदप्यपहृत्य यागसंपादनात्तद्देवस्वं कर्तव्यम्॥२०॥

न तस्मिन्धारयेद्दण्डं धार्मिकः पृथिवीपतिः।
क्षत्रियस्य हि बालिश्याद्ब्राह्मणः सीदति क्षुधा॥२१॥

On him (who, for the reasons stated, appropriates anothers's possessions), a righeous king shall not inflict punishment; for (in that case) a Brāhmaṇa pines with hunger through the Kṣatriya's want of care.

तस्मिन्नुक्तनिमित्ते चौर्यबलात्कारं कुर्वाणे धर्मप्रधानो राजा दण्डं न कुर्यात्। यस्माद्राज्ञो मूढत्वाद्ब्राह्मणः क्षुधावसादं प्राप्नोति॥२१॥

ततश्च–

तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः।
श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत्॥२२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Having ascertained the number of those dependent on such a man, and having fully considered his learning and his conduct, the king shall allow him, out of his own property, a maintenance whereon he may live according to the law.

तस्य ब्राह्मणस्यावश्यभरणीयपुत्रादिवर्गं ज्ञात्वा श्रुताचारोचिततदनुरूपां वृत्तिं स्वगृहाद्राजा कल्पयेत् ॥२२॥

कल्पयित्वाऽस्य वृत्तिं च रक्षेदेनं समन्ततः।
राजा हि धर्मषड्भागं तस्मात्प्राप्नोति रक्षितात् ॥२३॥

And after allotting to him a maintenance, the king must protect him in every way; for he obtains from such (a man) whom he protects, the sixth part of his spiritual merit.

अस्य ब्राह्मणस्य जीविकां विधाय शत्रुचौरादेः सर्वतो रक्षयेत्। यस्माद्ब्राह्मणाद्रक्षितात्तस्य धर्मषड्भागं प्राप्नोति ॥२३॥

न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत कर्हिचित्।
यजमानो हि भिक्षित्वा चण्डालः प्रेत्य जायते ॥२४॥

A Brāhmaṇa shall never beg from a Śūdra property for a sacrifice; for a sacrifice, having begged (it from such a man), after death is born (again) as a Caṇḍāla.

यज्ञसिद्धये धनं ब्राह्मणः कदाचिन्न शूद्राद्याचेत। यस्माच्छूद्राद्याचित्वा यज्ञं कुर्वाणो मृतश्चण्डालो भवति। अतो याचननिषेधाच्छूद्रादयाचितोपस्थितं यज्ञार्थमप्यविरुद्धम् ॥२४॥

यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति।
स याति भासतां विप्रः काकतां वा शतं समाः ॥२५॥

A Brāhmaṇa who, having begged any property for a sacrifice, does not use the whole (for that purpose), becomes for a hundred years a (vulture of the kind called) Bhāsa, or a crow.

यज्ञसिद्धर्थं धनं याचित्वा यो यज्ञे सर्वं न विनियुङ्क्ते स शतं वर्षाणि भासत्वं काकत्वं वा प्राप्नोति ॥२५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥२६॥

That sinful man, who, through covetousness, seizes the property of the gods, or the property of Brāhmaṇa, feeds in another world on the leavings of vultures.

प्रतिमादिदेवतार्थमुत्सृष्टं धनं देवस्वं, ब्राह्मणस्वं च यो लोभादपहरति स पापस्वभावो जन्मान्तरे गृध्रोच्छिष्टेन जीवति॥२६॥

इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये।
क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे॥२७॥

In case the prescribed animal and Soma-sacrifices cannot be performed, let him always offer at the change of the year a Vaiśvānarī Iṣṭi as a penance (for the omission).

समाप्ते वर्षे द्वितीयवर्षस्य प्रवृत्तिरब्दपर्ययं चैत्रशुक्लादिवर्षप्रवृत्तिस्तत्र वर्षान्तरे वैश्वानरीमिष्टिं विहितसोमयागासंभवे तदकरणदोषनिर्हरणार्थं सर्वदा शूद्रादितो धनग्रहणेन उक्तरूपमिष्टिं कुर्यात्॥२७॥

आपत्कल्पेन यो धर्मं कुरुते नापदि द्विजः।
स नाप्नोति फलं तस्य परत्रेति विचारितम्॥२८॥

But a twice-born, who, without being in distress, performs his duties according to the law for times of distress, obtains no reward for them in the next world; that is the opinion (of the sages).

आपद्विहितेन विधिना योऽनापदि धर्मानुष्ठानं द्विजः कुरुते तत्परलोके निष्फलं भवतीति मन्वादिभिर्विचारितम्॥२८॥

विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः।
आपत्सु मरणाद्भीतैर्विधेः प्रतिनिधिः कृतः॥२९॥

By the Viśve-devas, by the Sādhyas, and by the great sages (of the) Brāhmaṇa (caste), who were afraid of perishing in times of distress, a substitute was made for the (principal) rule.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विश्वेदेवाख्यैर्देवैः साध्यैश्च तथा महर्षिभिर्ब्राह्मणैर्मरणाद्धीतैरापत्सु मुख्यस्य विधेः सोमादेर्वैश्वानर्यादिः प्रतिनिधिरनुष्ठितोऽसौ मुख्यासंभवे कार्यो न तु मुख्यसंभवे ॥२९॥

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम् ॥३०॥

That evil-minded man, who being able (to fulfil) the original law, lives according to the secondary rule, reaps no reward for that after death.

यो मुख्यानुष्ठानसंपन्नः सन्नापद्विहितेन प्रतिनिधिनानुष्ठानं करोति तस्य दुर्बुद्धेः पारलौकिकमभ्युदयरूपं प्रत्यवायपरिहारार्थं फलं च न भवति। "आपत्कल्पेन यो धर्मम्" (अ. ११ श्लो. २८) इत्यनेनोक्तमप्येतच्छास्त्रादरार्थं पुनरुच्यते ॥३०॥

न ब्राह्मणोऽवेदयेत किञ्चिद्राजनि धर्मवित्।
स्ववीर्येणैव ताञ्छिष्यान्मानवानपकारिणः ॥३१॥

A Brāhmaṇa who knows the law need not bring any (offence) to the notice of the king; by his own power alone he can punish those men who injure him.

धर्मज्ञो ब्राह्मणः किंचिदप्यपकृतं न राज्ञः कथयेत्। अपि तु स्वशक्त्यैव वक्ष्यमाणाभिचारादिनाऽपकारिणो मनुष्यान्निगृह्णीयात्। ततश्च स्वकीयधर्मविरोधादपकृष्टापराधकरणे सत्यभिचारादि न दोषायेत्येवंपरमेतत्। न त्वभिचारो विधीयते राजनिवेदनं वा निषिध्यते ॥३१॥

स्ववीर्याद्राजवीर्याच्च स्ववीर्यं बलवत्तरम्।
तस्मात्स्वेनैव वीर्येण निगृह्णीयादरीन्द्विजः ॥३२॥

Hiw oen power is greater than the power of the king; the Brāhmaṇa, therefore, may punish his foes by his own power alone.

यस्मात्स्वसामर्थ्याद्राजसामर्थ्याच्च पराधीनराजसामर्थ्यापेक्षया स्वसामर्थ्यमेव

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वाधीनत्वाद्बलीयः। तस्मात्स्वेन वीर्येणैव शत्रून्ब्राह्मणो निगृह्णीयात् ॥३२॥

तत्किं स्ववीर्यमित्याह-

श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यविचारयन्।
वाक्शस्त्रं वै ब्राह्मणस्य तेन हन्यादरीन्द्विजः ॥३३॥
[तदस्त्रं सर्ववर्णानामनिवार्यं च शक्तितः।
तपोवीर्यप्रभावेण अवध्यानपि बाधते ॥२॥]

Let him use without hesitation the sacred texts, revealed by Atharvan and by Aṅgiras; speech, indeed, is the weapon of the Brāhmaṇa, with that he may slay his enemies.

अथर्ववेदस्य आङ्गिरसीर्दुष्टाभिचारश्रुतीरविचारयन्कुर्यात्। तदर्थमभिचार-मनुतिष्ठेदित्यर्थः। यस्मादभिचारमन्त्रोच्चारणात्मिका ब्राह्मणस्य वागेव शस्त्रकार्यकरणाच्छस्त्रं तेन ब्राह्मणः शत्रून्हन्यान्नतु शत्रुनियमाय राजा वाच्यः॥३३॥

क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः।
[तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् ॥३॥]
धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ॥३४॥

A Kṣatirya shall pass through misfortunes which have befallen him by the strength of his arms, a Vaiśya and a Śūdra by their wealth, the chief of the twice-born by muttered prayers and burnt-oblations.

क्षत्रियः स्वपौरुषेण शत्रुतः परिभवलक्षणामात्मन आपदं निस्तरेत्। वैश्यशूद्रो पुनः प्रतिकर्त्रे धनदानेन। ब्राह्मणस्त्वभिचारात्मकैर्जपहोमैः॥३४॥

विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते।
तस्मै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ॥३५॥

The Brāhmaṇa is declared (to be) the creator (of the world), the punisher, the teacher, (and hence) a benefactor

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(of all created beings); to him let no man say anything unpropitious, nor use any harsh words.

विहितकर्मणामनुष्ठाता, पुत्रशिष्यादीनां शास्ता, प्रायश्चित्तादिधर्माणां वक्ता, सर्वभूतमैत्रीप्रधानो ब्राह्मण उच्यते। तस्मै निगृह्यतामयमित्येवमनिष्टं न ब्रूयान्नापि साक्रोशां वाचं वाग्दण्डधिग्रूपां तस्योच्चारयेत् ॥३५॥

न वै कन्या न युवतिर्नाल्पविद्यो न बालिशः।
होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा ॥३६॥

Neither a girl, nor a (married) young woman, nor a man of little learning, nor a fool, nor a man in great suffering, nor one uninitiated, shall offer an Agnihotra.

कन्याऽनूढा ऊढापि तरुणी, तथा अल्पाध्यायिमूर्ख- व्याध्यादिपीडितानुपनीताः श्रौतान्सायंप्रातर्होमान्न कुर्युः। "हावयेत्" इति प्रसक्तावयं कन्यादीनां प्रतिषेधः ॥३६॥

नरके हि पतन्त्येते जुह्वन्तः स च यस्य तत्।
तस्माद्वैतानकुशलो होता स्याद्वेदपारगः ॥३७॥

For such (persons) offering a burnt-oblation sink into hell, as well as he to whom that (Agnihotra) belongs; hence the person who sacrifices (for another) must be skilled in (the performance of) Vaitāna (rites), and know the whole Veda.

एते कन्यादयो होमं कुर्वाणा नरकं गच्छन्ति। यस्य तदग्निहोत्रं प्रतिनिधिरूपेण कुर्वन्ति सोऽपि नरकं गच्छति तस्माच्छ्रौतकर्मप्रवीणः समस्तवेदाध्यायी होता कार्यः ॥३७॥

प्राजापत्यमदत्त्वाश्वमग्न्याधेयस्य दक्षिणाम्।
अनाहिताग्निर्भवति ब्राह्मणो विभवे सति ॥३८॥

A Brāhmaṇa who, though wealthy, does not give, as fee for the performance of an Agnyādheya, a horse sacred to Prajāpati, becomes (equal to one) who has not kindled the sacred fires.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आधाने प्राजापत्यमश्वं प्रजापतिदेवताकं धनसंपत्तौ सत्यां ब्राह्मणो दक्षिणामदत्त्वा कृतेऽप्याधानेऽनाहिताग्निर्भवत्याधानफलं न लभते। तस्मादाधानेऽश्व दक्षिणां दद्यात्॥३८॥

पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः।
न त्वल्पदक्षिणैर्यज्ञैर्यजेतेहह कथंचन॥३९॥

Let him who has faith and controls his senses perform other meritorious acts, but let him on no accofunt offer sacrifices at which he gives smaller fees (than those prescribed).

श्रद्धावान्वशी जितेन्द्रियो यज्ञव्यतिरिक्तानि तीर्थयात्रादीनि कर्माणि पुण्यानि कुर्वीत ननु शास्त्रोक्तदक्षिणातोऽल्पदक्षिणैर्यजेत। परोपकारार्थत्वाद्दक्षिणायाः स्वल्पेनापृत्विगादिदोषनिषेधार्थमिदं वचनम्॥३९॥

इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून्।
हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत्॥४०॥
[अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजः।
दीक्षितं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः॥४॥]

The organs (of sense and action), honour, (bliss in) heaven, longevity, fame, offspring, and cattle are destroyed by a sacrifice at which (too) small sacrificial fees are given; hence a man of small means should not offer a (Śrauta) sacrifice.

चक्षुरादीनीन्द्रियाणि, जीवतः ख्यातिरूपं यशः, स्वर्गायुषी, मृतस्य ख्यातिरूपां कीर्तिं, अपत्यानि, पशूंश्चाल्पदक्षिणो यज्ञो नाशयति। तस्मादल्पदक्षिणादानेन यागं न कुर्यात्॥४०॥

अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः।
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत्॥४१॥

A Brāhmaṇa who, being an Agnihotrin, voluntarily neglects the sacred fires, shall perform a lunar penance during one month; for that (offence) is equal to the slaughter

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

of a son.

अग्निहोत्री ब्राह्मण इच्छातोऽग्निषु सायंप्रातर्होमानकृत्वा मांस चान्द्रायणं चरेत्। यस्माद्वीरः पुत्रस्तस्य हत्या हननं तत्तुल्यमेतत्। तथाच श्रुतिः -"वीरहा वा एष देवानां भवति योऽग्निमुद्वासयते" अन्ये तु मासमपविध्येति समर्थयन्ति॥४१॥

ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते।
ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः॥४२॥

Those who, obtaining wealth from Śūdras, (and using that) offer an Agnihotra, are priests officiating for Śūdras, (and hence) censured among those who recite the Veda.

ये शूद्रादधिगम्यार्थं प्राप्य सामान्याभिधानेन याचनेन वार्थं स्वीकृत्य "वृषलाग्न्युपसेविनाम्" (अ. ११ श्लो. ४२) इति वक्ष्यमाणलिन्नादाधानपूर्वक-मग्निहोत्रमनुतिष्ठन्ति ते शूद्राणामेव याजका नतु तेषां तत्फलं भवत्यतस्ते वेदवादिषु निन्दिताः॥४२॥

तेषां सततमज्ञानां वृषलाग्न्युपसेविनाम्।
पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत्॥४३॥

Treading with his foot on the heads of those fools who worship a fire (kindled at the expense) of a Śūdra, the giver (of the wealth) shall always pass over his miseries (in the next world).

तेषां शूद्रधनाहिताग्निपरिचारिणां मूर्खाणां मूर्ध्नि पादं दत्त्वा शूद्रस्तेन दानेन सततं परलोके दुःखेभ्यो निस्तरति नतु यजमानानां फलं भवति॥४३॥

अकुर्वन्विहितं कर्म निन्दितं च समाचरन्।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः॥४४॥

A man who omits a prescribed act, or performs a blamable act, or cleaves to sensual enjoyments, must perform a penance.

नित्यं यद्विहितं संध्योपासनादि, नैमित्तिकं च शवस्पर्शादौ, स्नानादि,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तदकुर्वन् तथा प्रतिषिद्धं हिंसाद्यनुतिष्ठन्नविहितनिषिद्धेष्वत्यन्तासक्तिं कुर्वन्नरो मनुष्यजातिमात्रं प्रायश्चित्तमर्हति। ननु "इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः" (अ. ४ श्लोक १६) इति निषेधान्निन्दित पदेनैव प्रसक्तश्चेन्द्रियार्थेष्वित्यपि संगृहीतमतः पृथङ्न वक्तव्यम्। उच्यते। अस्य स्नातकव्रतेषु पाठात्तत्र "व्रतानीमानि धारयेत्" (अ. ४ श्लो. १३) इत्युपक्रमान्नायं प्रतिषेधः किंतु व्रतविधिः। तर्हि "अकुर्वन्विहितं कर्म" इत्यनेनैव प्राप्तत्वात्पृथङ्न वक्तव्यमिति चेन्न। स्नातकेतरविषयत्वेनास्य सविषयत्वात् ॥४४॥

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥४५॥

(All) sages prescribe a penance for a sin unintenionally committed; some declare, on the evidence of the revealed texts, (that it may be performed) even for an intentional (offence).

अबुद्धिकृते पापे प्रायश्चित्तं भवतीत्याहुः पण्डिताः। एके पुनराचार्याः कामतः कृते पापे प्रायश्चित्तं भवतीत्याहुः। एतच्च पृथक्कृत्याभिधानं प्रायश्चित्तगौरवार्थं श्रुत्तिनिदर्शनादिति। "इन्द्रो यतीन्सालावृकेभ्यः प्रायच्छत्तमश्लीला वागेत्यावदत्स प्रजापतिमुपाधावत्तस्मात्तमुपहव्यं प्रायच्छत्" इति। अस्यार्थः। इन्द्रो यतीन् बुद्धिपूर्वकं श्वभ्यो दत्तवान्, स प्रायश्चितार्थं प्रजापतिसमीपगमत्, तस्मै प्रजापतिरुपहव्याख्यं कर्म प्रायश्चित्तं दत्तवान्। अतः कामकारकृतेऽप्यस्ति प्रायश्चित्तम् ॥४५॥

अकामतः कृतं पापं वेदाभ्यासेन शुध्यति।
कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः ॥४६॥

A sin unintentionally committed is expiated by the recitation of Vedic texts, but that which (men) in their folly commit intentionally, by various (special) penances.

अनिच्छतः कृतं पापं वेदाभ्यासेन शुध्यति नश्यति। वेदाभ्यासेनेति कामकृतविषयप्रायश्चित्तापेक्षया लघुप्रायश्चित्तापलक्षणार्थम्। प्रायश्चित्तान्तराणामपि विधानाद्रद्रागद्वेषादिव्यामूढतया पुनरनिच्छतः कृतं नानाप्रकारैः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रायश्चित्तैर्विद्याधनतपोभिः शुध्यतीति गुरुप्रायश्चित्तपरम्। अतः पूर्वोक्तस्यैवायं व्याकारः। यद्यप्यधिकारनिरूपणं प्रकृतं प्रायश्चित्त त्वनन्तरं वक्ष्यति तथाप्यज्ञानाल्लघुप्रायश्चित्ताधिकारी ज्ञानाद्गुरुप्रायश्चित्तेऽधिक्रियत इत्यधिकारि-निरूपणमेवेदम् ॥४६॥

प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा।
न संसर्गं व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः ॥४७॥
[प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥५॥]

A twice-born man, having become liable to perform a penance, be it by (the decree of) fate or by (an act) committed in a former life, must not, before the penance has been performed, have intercourse with virtuous men.

दैवात्प्रमादादन्यशरीरकृतेन पूर्वजन्मार्जितदुष्कृतेन क्षयरोगादिभिः सूचितेन प्रायश्चित्तीयतां प्राप्याकृते प्रायश्चित्ते साधुभिः सह याजनादिना संसर्गं न गच्छेत् ॥४७॥

इह दुश्चरितैः केचित्केचित्पूर्वकृतैस्तथा।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम् ॥४८॥

Some wicked men suffer a change of their (natural) appearance in consequence of crimes committed in this life, and some in consequence of those committed in a former (existence).

इह जन्मनि निषिद्धाचरणैः केचित्पूर्वजन्मकृतैर्दुष्टस्वभावा मनुष्या कौनख्यादिकं रूपविपर्ययं प्राप्नुवन्ति ॥४८॥

सुवर्णचौरः कोनख्यं सुरापः श्यावदन्तताम्।
ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ॥४९॥
पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

धान्यचौरोऽङ्गहीनत्वमातिरेक्यं तु मिश्रकः ॥५०॥
अन्नहर्ताऽऽमयावित्वं मौक्यं वागपहारकः।
वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः ॥५१॥
[दीपहर्ता भवेदन्धः काणो निर्वापको भवेत्।
हिंसया व्याधिभूय स्त्वमरोगित्वमहिंसया ॥६॥]
एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः।
जडमूकान्धबधिरा विकृताकृतयस्तथा ॥५२॥

He who steals the gold (of a Brāhmaṇa) has diseased nails; a drinker of(the spirituous liquor called) Surā, black teeth; the slayer of a Brāhmaṇa, consumption the violator of a Guru's bed, a diseased skin.

An informer, a foul-smelling nose; a calcumniator, a stinking breath; a stealer of grain, deficiency in limbs; he who adulterates (grain), redundant limbs.

A stealer of (cooked) food, dyspepsia; a stealer of the worlds (of the Veda), dumbness; a stealer of clothes, white leprosy; a horse-stealer, lameness.

The stealer of a lamp will become blind; he who extinguishes it will become one-eyed; injury (to sentient beings) is punished by general sickliness; an adulterer (will have) swellings (in his limbs).

ब्राह्मणसुवर्णचौरः कुत्सितनखत्वं प्राप्नोति। निषिद्धसुरापः श्यावदन्ततां, ब्रह्महा क्षयरोगित्वं, गुरुभार्यागामी विकोशमेहनत्वम्, पिशुनो विद्यमानदोषाभिधायी दुर्गन्धिनासत्वं, अविद्यमानदोषाभिधायको दुर्गन्धिमुखत्वं, धान्यचौरोऽन्नहीनत्वं, धान्यादेरपद्रव्येण मिश्रणकर्ताऽतिरिक्तान्नत्वं, अन्नचौरो मन्दानलत्वं, अननुज्ञाताध्यायी मूकत्वं, वस्त्रचौरः श्वेतकुष्ठत्वं, अश्वचौरः खञ्जत्वम्। एवं बुद्धिवाक्यचक्षुःश्रोत्रविकला विकृतरूपाः साधुविगर्हिताश्च प्राजन्मार्जितोपभुक्तदुष्कृतशेषेणोत्पद्यन्ते। "दीपहर्ता भवेदन्धः काणो निर्वापकस्तथा। हिंसारुचिः सदा रोगी वातान्नः पारदारिकः॥" ॥४९-५२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये।
निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः॥५३॥

Thus in consequence of a remnant of (the guilt of former) crimes, are born idiots, dumb, blind, deaf, and deformed men, who are (all) despised by the virtuous.

यस्मादनिष्कृतमनाशितमेनो यैस्तेऽनिष्कृतैनसोऽकृतप्रायश्चित्ताः परलोकोपभुक्तदुष्कृतशेषेण निन्द्यैर्लक्षणैः कुनखित्वादिभिर्युक्ता जायन्ते। तस्माद्विशुद्धये पापनिर्हरणार्थं प्रायश्चित्तं सदा कर्तव्यम्। एवं "भिन्ने जुहोति" इतिवन्न नैमित्तिकमात्रं प्रायश्चित्तं किंत्वनिष्कृतैनस इत्युपादानात्तथा विशुद्धये चरितव्यमित्युपदेशात्पापक्षयार्थिन एवाधिकारः। तथाहि;प्रायश्चित्तं हि चरितव्यमिति विधावधिकारापेक्षायां फलमात्रे निर्देशादिति रात्रिसत्रन्यायेन श्रूयमाणमेव विशुद्धय इति फलमधिकारिविशेषणं युक्तम्। इममेवार्थं स्फुटयति याज्ञवल्क्यः-"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति। तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये॥" (अ. ३ श्लो. २१९-२२०) पतनमृच्छति पापं प्राप्नोतीत्यर्थः। विशुद्धये पापविनाशाय। "बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात्। संसारान्प्रतिपद्यन्ते महापातकिनस्त्विमान्॥" (अ. १२ श्लो. ५४) इत्यादिना महापातक्यादीनां नरकादिप्राप्तिं वक्ष्यति। न तन्नैमित्तिकमात्रत्वं प्रायश्चित्तानां संगच्छते। तस्माद्ब्रह्मवधादिजनितपापक्षयार्थिन एव प्रायश्चित्तविधावधिकार इति ज्ञेयम्॥५३॥

ब्रह्महत्या सुरापानं स्तेयं गुर्वन्ननागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥५४॥

Penances, therefore, must always be performed for the sake of purification, because those whose sins have not been expiated, are born (again) with disgraceful marks.

ब्राह्मणप्राणवियोगफलको व्यापारो ब्रह्महत्या स च साक्षादन्यं वा नियुज्य तथा गोहिरण्यग्रहणादिनिमित्तकार्यकस्यापि तदुद्देशेन ब्राह्मणमरणे ब्रह्महत्या। नन्वेवमिषुकारस्यापीषूत्पादनद्वारेण तथा वध्यस्यापि हन्तृगतमन्यूत्पादनद्वारा ब्रह्महत्या स्यात्। उच्यते। शास्त्रतो यस्य ब्राह्मणहन्तृत्वं प्रतीयते स एव ब्रह्महन्ता।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अत एव शातातपः -"गोभूहिरण्यग्रहणे स्त्रीसंबन्धकृतेऽपि वा। यमुद्दिष्य त्यजेत्प्राणास्तमाहुर्ब्रह्मघातकम्॥" एवं चान्यान्यपि शास्त्रीयाण्येव ब्रह्मवधनिमित्तानि ज्ञेयानि। तथा "रागाद्द्वेषात्प्रमादाद्वा स्वतः परत एव वा। ब्राह्मणं घातयेद्यस्तु तमाहुर्ब्रह्मघातकम्॥" इति प्रयोजकस्यापि हन्तृत्वं शास्त्रीयम्। तथा निषिद्धसुरापानं, ब्राह्मणसुवर्णहरणं, गुरुभार्यागमनं, गुरुश्च पिता निषेकादीनि कर्माणीत्यादिना तस्य गुरुत्वेन विधानात्। तैश्च सह संसर्गः संवत्सरेण पततीत्येतानि महापातकान्याहुः। महापातकसंज्ञा चेयं वक्ष्यमाणस्योपपातकादिसंज्ञालाघवार्थम्॥५४॥

अनृतं च समुत्कर्षे राजगामि च पैशुनम्।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया॥५५॥

Killing a Brāhmaṇa, drinking (the spirituous liquor called) Surā, stealing (the gold of a Brāhmaṇa), adultery with a Guru's wife, and associating with such (offenders), they declare (to be) mortal sins (*mahāpātaka*).

जात्युत्कर्षनिमित्तमुत्कर्षभाषणं यथा ब्राह्मणोऽहमिति अब्राह्मणो ब्रवीति, राजनि वा स्तेनादीनां परेषां मरणफलकं दोषाभिधानं, गुरोश्चानृताभिशंसनम्। तथाच गौतमः -"गुरोरनृताभिशंसनम्" इति। महापातकसमानीत्येतानि ब्रह्महत्यासमानीति॥५५॥

ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः।
गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट्॥५६॥

Falsely attributing to oneself high birth, giving information to the king (regarding a crime), and falsely accusing one's teacher, (are offences) equal to slaying a Brāhmaṇa.

ब्रह्मणोऽधीतवेदस्यानभ्यासेन विस्मरणम्, असच्छास्त्राश्रयणेन वेदकुत्सनम्, साक्ष्ये मृषाभिधानम्, मित्रस्याब्राह्मणस्य वधः, निषिद्धस्य लशुनादेर्भक्षणम्, अनाद्यस्य पुरीषादेरदनम्। मेधातिथिस्तु-न भोक्ष्यत इति संकल्प यद्भुज्यते तदनाद्यमित्याचष्टे। एतानि सुरापानसमानि॥५६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निक्षेपस्यापहरणं नराश्वरजतस्य च।
भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतम्॥५७॥

Forgetting the Veda, reviling the Vedas, giving false evidence, slaying a friend, eating forbidden food, or (swallowing substances) unfit for food, are six (offences) equal to drinking Surā.

ब्राह्मणसुवर्णव्यतिरिक्तनिक्षेपस्य हरणं तथा मनुष्यतुरगरूप्यभूमिहीरकमणीनां हरणं सुवर्णस्तेयतुल्यम्॥५७॥

रेतः सेकः स्वयोनीषु कुमारीष्वन्त्यजासु च।
सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः॥५८॥

Stealing a deposit, or men, a horse, and silver, land, diamonds and (other) gems, is declared to be equal to stealing the gold (of a Brāhmaṇa).

सोदर्यभगिनीकुमारीचण्डालीसखिपुत्रभार्सु यो रेतःसेकस्तं गुरुभार्यागमनसमानमाहुः। एतेषां भेदेन समीकरणं यद्येन समीकृतं तस्य तेन प्रायश्चित्तार्थम्। यत्कौटसाक्ष्यसुहृद्वधयोः सुरापानसमीकृतयोर्ब्रह्महत्याप्रायश्चित्तं वक्ष्यति तद्विकल्पार्थम्, यत्पुनर्गुरोरलीकनिर्बन्धस्य ब्रह्महत्यासमीकृतस्य पुनरुपरिष्टाद्ब्रह्महत्याप्रायश्चित्तनिर्देशः। तत्समीकृतानां न्यूनप्रायश्चित्तं भवतीति ज्ञापनार्थम्। तथा च लोके राजसमः सचिव इत्युक्ते सचिवस्य न्यूनतैव गम्यते। अत्रौपदेशिकप्रायश्चित्तेभ्य आतिदेशिकप्रायश्चित्तानां तन्न्यूनं प्रायश्चित्तं समीकृतानां च॥५८॥

इदानीमुपपातकान्याह—

गोवधोऽयाज्यसंजाज्यपारदार्यात्मविक्रयाः।
गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च॥५९॥
परिवित्तितानुजेऽनूढे परिवेदनमेव च।
तयोर्दानं च कन्यायास्तयोरेव च याजनम्॥६०॥
कन्याया दूषणं चैव वार्धुष्यं व्रतलोपनम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तडागारामदाराणामपत्यस्य च विक्रयः ॥६१॥
व्रात्यता बान्धवत्यागो भृत्याध्यापनमेव च।
भृत्या चाध्ययनादानमपण्यानां च विक्रयः ॥६२॥
सर्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्।
हिंसौषधीनां स्त्रयाजीवोऽभिचारो मूलकर्म च ॥६३॥
इन्धनार्थमशुष्काणां द्रुमाणामवपातनम्।
आत्मार्थं च क्रियारम्भो निन्दितान्नादनं तथा ॥६४॥
अनाहिताग्निता स्तेयमृणानामनपक्रिया।
असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया ॥६५॥
धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम्।
स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकम् ॥६६॥

Carnal intercourse with sisters by the same mother, with (unmarried) maidens, with females of the lowest castes, with the wives of a friend, or of a son, they declare to be equal to the violation of a Guru's bed.

Slaying kine, sacrificing for those who are unworthy to sacrifice, adultery, selling onself, casting off one's teacher, mother, father, or son, giving up the (daily) study of the Veda, and neglecting the (sacred domestic) fire.

Allowing one's younger brother to marry first, marrying before one's elder brother, giving a daughter to, or sacrificing for, (either brother).

Defiling a damsel, usury, breaking a vow, selling a tank, a garden, one's wife, or child.

Living as a Vrātya, casting off a relative, teaching (the Veda) for wages, learning (the Veda) from a paid teacher, and selling goods which one ought not to sell.

Superintending mines (or factories) of any sort, executing great mechanical works, injuring (living) plants, subsisting on (the arnings of) one's wife, sorcery (by means of sacrifices), and working (magic by means of) roots, (and so

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

forth).

Cutting down green trees for fireword, doing acts for one's own advantage only, eating prohibited food.

Neglecting to kindle the sacred fires, theft, non-payment of (the three) debts, studying bad books, and practising (the arts of) dancing and singing.

गोहननं, जातिकर्मदुष्टानां याजनं, परपत्नीगमनं, आत्मविक्रवः, मातृपितृगुरूणा च शुश्रूषाद्यकरणं, सर्वदा ब्रह्मयज्ञत्यागः न वेदविस्मरणं "ब्रह्मोज्झता (अ. ११ श्लो. ५६) इत्यनेनोक्तत्वात्। अग्नेश्च स्मार्तस्य त्यागः, श्रौतानां "अग्निहोत्रयपविध्याग्नीन्" (अ. ११ श्लो. ४१) इत्युक्तत्वात्, सुतस्य च संस्कारभरणाद्यकरणं, कनीयसा आदौ विवाहे कृते ज्येष्ठस्य परिवित्तित्वं भवति। "दाराग्निहोत्रसंयोगः" (अ. ३ श्लो. १७१) इत्यादिना प्रागुक्तं कनिष्ठस्य परिवेत्तृत्वं तयोश्च कन्याया दानं तयोरेव- विवाहहोमादियागेष्वार्त्विज्यं, कन्याया मैथुनवर्जमङ्गु लिप्रक्षेपादिना दूषणं, रेतःसेकपर्यन्तमैथुनेषु तु "रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च" (अ. ११ श्लो. ५८) इत्युक्तत्वात्प्रतिषिद्धं, वृद्धिजीवनं, ब्रह्मचारिणो मैथुनं, तडागोद्यानभार्यापत्यानां विक्रयः, यथाकालमनुपयनयनं व्रात्यता। तथा चोक्तम्-"अत ऊर्ध्वं त्रयोप्येते यथाकालमसंस्कृताः" (अ. २ श्लो. ३९) इति। बान्धवानां पितृव्यादीनामननुवृत्तिः, प्रतिनियतवेतनग्रहण-पूर्वकमध्यापनं, प्रतिनियतवेतनप्रदानपूर्वकमध्ययनं च अविक्र"यादीनां तिलादीनां विक्रयः, सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाऽधिकारः, महतां प्रवाहप्रतिबन्धहेतूनां सेतुबन्धादीनां प्रवर्तनं, औषधीनां जातिमात्रादीनां हिंसनम् एवच्च ज्ञानपूर्वकाभ्यासक्रियायां प्रायश्चित्तगौरवात्। यत्तु "कृष्टजानामौषधीनां" (अ. ११ श्लो. १४४) इत्यादिना वक्ष्यति तत्सकृद्धिंसायां प्रायश्चित्तलाघवात्। भार्यादिस्त्रीणां वेश्यात्वं कृत्वा तदुपजीवनं, श्येनादियज्ञेनानपराद्धस्य मारणं, मन्त्रौषधिना वशीकरणं, पाकादिदृष्टप्रयोजनार्थमात्रेमेव वृक्षच्छेदनं, अनातुरस्य देवपित्राद्युद्देशमन्तरेण पाकाद्यनुष्ठानं, निन्दितान्नस्य लशुनादेः सकृदनिच्छया भक्षणम्, इच्छापूर्वकाभ्यासभक्षणे पुनः "गर्हितानाद्ययोर्जग्धिः" (अ. ११ श्लो. ५६) इत्युक्तत्वात्। सत्यधिकारेऽग्न्यनाधानं, सुवर्णादन्यस्य सारद्रव्यस्यापहरणं, ऋणानां च ऋणैस्त्रिभिर्ऋणवान्नरो जायते तदनपकरणं,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्रुतिस्मृतिविरुद्धशास्त्रशिक्षणं, नृत्यगीतवादित्रोपसेवनं, धान्यताम्रलोहादेः पशूनां च चौर्यं, द्विजातीनां पीतमद्यायाः स्त्रिया गमनं, स्त्रीशूद्रवैश्यक्षत्रियहननं, अदृष्टार्थकर्माभावबुद्धिः, एतत्प्रत्येकमुपपातकम्। ''बान्धवत्यागः'' (अ. ११ श्लो. ६२) इत्यनेनैव मात्रादीनां त्यागप्राप्तौ पृथग्वचनं निन्दार्थम्। पितृव्यादिबान्धवत्यागेनावश्यमेव प्रायश्चित्तं भवति किंतु मात्रादित्यागप्रायश्चित्तान्यूनमपि भवति॥५९-६६॥

ब्राह्मणस्य रुजः कृत्या घ्रातिरघ्रेयमद्ययोः।
जैह्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम्॥६७॥

Stealing grain, base metals, or cattle, intercourse with women who drink spirituous liquor, slaying women, Śūdras, Vaiśyas, or Kṣatriyas, and atheism, (are all) minor offences, causing loss of caste (Upapātaka).

ब्राह्मणस्य दण्डहस्तादिना पीडाक्रिया, यदतिशयदुर्गन्धितयाप्रेयं लशुनपुरीषादि तस्य मद्यस्य चाघ्राणं, कुटिलत्वं वक्रता, पुंसि च मुखादौ मैथुनमित्येतत्प्रत्येकं जातिभ्रंशकरं स्मृतम्॥६७॥

खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा।
संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च॥६८॥

Giving pain to a Brāhmaṇa (by a blow), smelling at things which ought not to be smelt at, or at spirituous liquor, cheating, and an unnatural offence with a man, are declared to cause the loss of caste (Jātibhraṁśa).

गर्दभतुरगोष्ट्रमृगहस्तिच्छागमेषमत्स्यसर्पमहिषाणां प्रत्येकं वधः संकरीकरणं ज्ञेयम्॥६८॥

निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्।
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम्॥६९॥

Killing a donkey, a horse, a camel, a deer, an elephant, a goat, a sheep, a fish, a snake, or a buffalo, must be known to degrade (the offender) to a mixed caste (Saṁkarīkaraṇa).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अप्रतिग्राह्यधनेभ्यः प्रतिग्रहो वाणिज्यं शूद्रस्य परिचर्या अनृताभिधानमित्येतत्प्रत्येकमपात्रीकरणं ज्ञेयम्॥६९॥

कृमिकीटवयोहत्या मद्यानुगतभोजनम्।
फलैधः कुसुमस्तेयमधैर्यं च मलावहम्॥७०॥

Accepting presents from blamed men, trading, serving Śūdras, and speaking a falsehood, make (the offender) unworthy to receive gifts (Apātra).

कृमद्यः क्षुद्रजन्तवस्तेभ्य ईषत्स्थूलाः कीटास्तेषां वधः, पक्षिणां च। मद्यानुगयद्भोज्यमपि शाकाद्येकत्र पिटकादौ कृत्वा मद्येन सहानीतं तस्य भोजनम्। मेधातिथिस्तु-मद्यानुगतं मद्यसंस्पृष्टमाह तन्न, तत्र प्रायश्चित्तगौरवात्। फलकाष्ठपुष्पाणां च चौर्यमल्पेऽपच्येऽप्यत्यन्तवैक्लव्यम्। एतत्सर्वं प्रत्येकं मलिनीकरणम्॥७०॥

एतान्येनांसि सर्वाणि यथोक्तानि पृथक्पृथक्।
यैर्यैर्व्रतैरपोह्यन्ते तानि सम्यङ्निबोधत॥७१॥

Killing insects, small or large, or brids, eating anything kept close to spirituous liquors, stealing fruit, firewood, or flowers, (are offences) which make impure (Malāvaha).

एतानि ब्रह्महत्यादीनि सर्वाणि पापानि भेदेन यथोक्तानि यैर्यैर्व्रतैः प्रायश्चित्तरूपैर्नाश्यन्ते तानि यथावत् शृणुत॥७१॥

ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत्।
भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्॥७२॥

Learn (now) completely those penances, by means of which all the several offences mentioned (can) be expiated.

यो ब्राह्मणं हतवान्स वने कुटीं कृत्वा हतस्य शिरःकपालं तदभावेऽन्यस्यापि चिह्नं कृत्वारण्ये भैक्षभुगात्मनः पापनिर्हरणाय द्वादश वर्षाणि वसेद्व्रतं कुर्यात्। अत्रापि कृतवापनो निवसेदिति वक्ष्यति। मुन्यन्तरोक्ता अपि विशेषा ग्राह्याः। तथाच यमः- "सप्तागाराण्यपूर्वाणि यान्यसंकल्पितानि च। संविशेत्तानि शनकैर्विधूमे भुक्तवज्जने। भ्रूणघ्ने देहि मे भिक्षामेनो विख्याप्य संचरेत्। एककालं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चरेद्व्रैक्ष्यं तदलब्ध्वोदकं पिबेत्।'' अयं च द्वादशवार्षिकविधिर्ब्राह्मणस्याज्ञानकृतब्राह्मणवधे ''इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्'' (अ. ११ श्लो. ८९) इति वक्ष्यमाणत्वात्। क्षत्रियवैश्यशूद्राणां तु क्रमेणैतद्द्वादशवार्षिकं द्विगुणं त्रिगुणं चतुर्गुणं च द्रष्टव्यम्। यथोक्तं भविष्यपुराणे-''द्विगुणाः क्षत्रियाणां तु वैश्यानां त्रिगुणाः स्मृताः। चतुर्गुणास्तु शूद्राणां पर्षदुक्ता महात्मनाम्। पर्षदुक्तव्रतं प्रोक्तं शुद्धये पापकर्मणाम्।'' यावद्भिर्ब्राह्मणैर्ब्राह्मणानां सभा, ततो द्विगुणैः क्षत्रियाणां द्रष्टव्यव्यवहारदर्शनाद्यर्था सभा भवेत्, त्रिगुणैर्वैश्यैर्वैश्यानां, चतुर्भिः शूद्रैः शूद्राणामिति संभवाच्च क्षत्रियादीनां त्रयाणां व्रतमपि द्विगुणत्रिगुणचतुर्गुणमित्यर्थः। एतानि च मनूक्तब्रह्मवधप्रायश्चित्तवचनानि गुणवत्कृतनिर्गुणब्राह्मणहननविषयत्वेन भविष्यपुराणे व्याख्यातानि। ''हन्ता चेद्गुणवान्वीर अकामान्निर्गुणो हतः। कर्तव्यानि मनूक्तानि कृत्वा वै आश्वमेधिकम्। ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्। गच्छेदवभृथं वापि अकामान्निर्गुणे हते। जातिशक्तिगुणापेक्षं सकृद्बुद्धिकृतं तथा। अनुबन्धादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत्।'' इति विश्वामित्रवचनात्प्रायश्चित्ताधिक्यमूहनीयम्। कामकृते तु ब्राह्मणवधे द्विगुणं ब्रह्मवधप्रायश्चित्तं चतुर्विंशतिवर्षम्। तदाहान्निराः-''अकामतः कृते पापे प्रायश्चित्तं न कामतः। स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वके'' ॥७२॥

लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः।
प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः ॥७३॥

For his purification the slayer of a Brāhmaṇa shall make a hut in the forest and dwell (in it) during twelve years, subsisting on alms and making the skull of a dead man his flag.

धनुःशराद्यायुधधारिणां ब्रह्मवधपापक्षयार्थमयं लक्ष्यभूत इत्येवं जानतां स्वेच्छया बाणलक्ष्यभूतो वावतिष्ठेत। यावन्मृतो मृतकल्पो वा विशुध्येत्। तदाह याज्ञवल्क्यः-''संग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात्। मृतकल्पः प्रहारार्तो जीवन्नपि विशुद्धष्टयति।'' (अ. ३ श्लो. २४८) अग्नौ प्रदीप्ते वाधोमुखस्त्रीन्वारान्शरीरं प्रक्षिपेत्। ''तथा प्रास्येत यथा म्रियेत'' इत्यापस्तम्बवचनादेवं प्रक्षिपेत्। एतत्प्रायश्चित्तद्वयमनन्तरे वक्ष्यमाणं च ''यजेत

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाश्वमेधेन (अ० ११, श्लोक. ७४) इत्येवं प्रायश्चित्तत्रयमिदं कामतः क्षत्रियस्य ब्राह्मणवधविषयम्। मनुश्लोकमेव लिखित्वा व्याख्यानं भविष्यपुराणे- ''लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः। प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः। यजेत वाश्वमेधेन क्षत्रियो विप्रघातकः। प्रायश्चित्तत्रयं ह्येतत्क्षत्रियस्य प्रकीर्तितम्। क्षत्रियो निर्गुणो धीरं ब्राह्मणं वेदपारगम्। निहत्य कामतो वीर लक्ष्यः शस्त्रभृतो भवेत्। चतुर्वेदविदं धीरं ब्राह्मणं चाग्निहोत्रिणम्। निहत्य कामादात्मानं क्षिपेदग्नावावाक्शिराः। निर्गुणं ब्राह्मणं हत्वा कामतो गुणवान्गुह। यष्ट्वा वा आश्वमेधेन क्षत्रियो यो महीपतिः''॥७३॥

यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा॥७४॥

Or let him, of his own free will, become (in a battle) the target of archers who know (his purpose); or he may thrice throw himself headlong into a blazing fire.

''यजेत वाश्वमेधेन'' इत्यनन्तरं व्याख्यातम्। स्वर्णिता यागविशेषेण गोसवेन अभिजिता विश्वजिता वा त्रिवृताग्निष्टुता वा याजयेत्। एतानि चाज्ञानतो ब्रह्मवधे प्रायश्चित्तानि त्रैवर्णिकस्य विकल्पितानि। तदुक्तं भविष्यपुराणे- ''स्वर्जितादेश्च यद्वीर कर्मणां पृतनापते। अनुष्ठानं द्विजातीनां वधे ह्यमतिपूर्वके''॥७४॥

जपन्वान्यतमं वेदं योजनानां शतं व्रजेत्।
ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः॥७५॥

Or he may offer a horse-sacrifice, a Svarjit, a Gosava, and Abhijit, a Viśvajit, a Trivṛt, or an Agniṣṭut.

वेदानां मध्यादेकं वेदं जपन्स्वल्पाहारः संयतेन्द्रियो ब्रह्महत्यापापनिर्हरणाय योजनानां शतं गच्छेत्। एतदप्यज्ञानकृते जातिमात्रब्राह्मणवधे त्रैवर्णिकस्य प्रायश्चित्तम्। तथाच भविष्यपुराणे अयमेव श्लोकः पठितो व्याख्यातश्च-''जातिमात्रं यदा विप्रं हन्यादमतिपूर्वकम्। वेदविच्चाग्निहोत्री च तदा तस्य भवेदिदम्''॥७५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत्।
धनं वा जीवनायालं गृहं वा सपरिच्छदम्॥७६॥

Or, in order to remove (the guilt of) slaying a Brāhmaṇa, he may walk one hundred yojanas, reciting one of the Vedas, eating little, and controlling his organs.

सर्वस्वं वा वेदविदे ब्राह्मणाय दद्यात्। यावद्धनं जीवनाय समर्थं। गृहं वा गृहोपयोगिधनधान्यादियुतम् अतः सर्वस्वं वा गृहं वा सपरिच्छदं दद्यात्। जीवनायालमिति वचनाज्जीवनपर्याप्तं सर्वस्वं गृहं वा दद्यान्न ततोऽल्पम्। एतच्चाज्ञानतो जातिमात्रब्राह्मणवधे ब्राह्मणस्य प्रायश्चित्तम्। तथाच भविष्यपुराणम्-"जातिमात्रं यदा हन्याद्ब्राह्मणं ब्राह्मणो गुह। वेदाभ्यासविहीनो वै धनवानग्निवर्जितः। प्रायश्चित्तं तदा कुर्यादिदं पापविशुद्धये। धनं वा जीवनायालं गृहं वा सपरिच्छदम्"॥७६॥

हविष्यभुग्वाऽनुसरेत्प्रतिस्रोतः सरस्वतीम्।
जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम्॥७७॥

Or he may present to a Brāhmaṇa, learned in the Vedas, his whole property, as much wealth as suffices for the maintenance (of the recipient), or a house together with the furniture.

नीवारादिहविष्यान्नभोजी विख्यातप्रस्रवणादारभ्यापश्चिमोदधेः स्रोतः प्रतिसरस्वतीं यायात्। एतच्च जातिमात्रब्राह्मणवधे ज्ञानपूर्वके। तथा भविष्यपुराणे-"जातिमात्रे हते विप्रे देवेन्द्र मतिपूर्वकम्। हन्ता यदा वेदहीनो धनेन च भवेद्धृतः। तदैतत्कल्पयेत्तस्य प्रायश्चित्तं निबोध मे। हविष्यभुक्चरेद्वापि प्रतिस्रोतः सरस्वतीम्। अथवा परिमिताहारस्त्रीन्वारान्वेदसंहिताम्।" संहिताग्रहणात्पदक्रमव्युदासः। अत्रापि भविष्यपुराणीयो विशेषः- "जातिमात्रं तु यो हन्याद्विप्रं त्वमतिपूर्वकम्। ब्राह्मणोऽत्यन्तगुणवांस्तेनेदं परिकल्पयेत्। जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम्। ऋचो यजूंषि सामानि त्रैविद्याख्यं सुरोत्तम"॥७७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इदानीम् "समाप्ते द्वादशे वर्षे" (अ. ११ श्लो.) इत्युपदेशाद्द्वादश-वार्षिकस्य विशेषमाह-

कृतवापनो निवसेत्ग्रामान्ते गोव्रजेऽपि वा।
आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः ॥७८॥

Or, subsisting on sacrifical food, he may walk against the stream along (the whole course of the river) Sarasvatī; or, restricting his food (very much), he may mutter thrice the Saṁhitā of a Veda.

लूनकेशनखश्मश्रुर्गोब्राह्मणहिते रतो गोब्राह्मणोपकारान्कुर्वन्ग्रामसमीपे गोष्ठपुण्यदेशवृक्षमूलान्यतमे निवसेत्। वने कुटीं कृत्वेत्यस्य विकल्पार्थमिदम् ॥७८॥

ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान्परित्यजेत्।
मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च ॥७९॥

Having shaved off (all his hair), he may dwell at the extremity of the village, or in a cow-pen, or in a hermitage, or at the root of a tree, taking pleasure in doing good to cows and Brāhmaṇas.

प्रक्रान्ते द्वादशवार्षिकेऽन्तराग्न्युदकहिंसकाद्याक्रान्तब्राह्मणस्य गोर्वा परित्राणार्थं प्राणान्परित्यजन्ब्रह्महत्याया मुच्यते। गोब्राह्मणं वा ततः परित्रायामृतोऽप्यसमाप्तद्वादशवर्षोऽपि मुच्यते ॥७९॥

त्रिवारं प्रतिरोद्धा वा सर्वस्वमवजित्य वा।
विप्रस्य तन्निमित्ते वा प्राणालाभे विमुच्यते ॥८०॥

He who unhesitatingly abandons life for the sake of Brāhmaṇas or of cows, is freed from (the guilt of) the murder of a Brāhmaṇa, and (so is he) who saves (the life of) a cow, or a Brāhmaṇa.

स्तेनादिभिर्ब्राह्मणसर्वस्वेऽपह्रियमाणे तदानयनार्थं निर्व्याजं यथाशक्ति प्रयत्नं कुर्वस्तत्र त्रिवारान् युद्धे प्रवर्तमानो नानीतेऽपि सर्वस्वे ब्रह्महत्यापापात्प्रमुच्यते।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथवा प्रथमवार एव विप्रसर्वस्वमपहृतं जित्वार्पयति तथापि मुच्यते। यद्वा धनापहारकत्वेन स्वेनैव ब्राह्मणो युद्धेन मरणे प्रवर्तते तदा यद्यप्यपहृतसमधनदानेन तं जीवयति तदापि तन्निमित्ते तस्य प्राणलाभे ब्रह्महत्यापापान्मुच्यते। एतदितरप्रकारेण तु रक्षणे गोप्ता गोब्राह्मणस्य चेत्यपुनरुक्तिः॥८०॥

एवं दृढव्रतो नित्यं ब्रह्मचारी समाहितः।
समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति॥८१॥

If either he fights at least three times (against robbers in defence of) a Brāhmaṇa's (property), or reconquers the whole property of a Brāhmaṇa, or if he loses his life for such a cause, he is freed (from his guilt).

एवमुक्तप्रकारेण सर्वदा नियमोपहितः स्त्रीसंयोगादिशून्यः संयतमनाः समाप्ते द्वादशे वर्षे ब्रह्महत्यापापं नाशयति। एवम् ''ब्राह्मणार्थे'' (अ. ११ श्लो. ७९) इत्यादि सर्वं प्रक्रान्तद्वादशवार्षिकस्य बोद्धव्यम्॥८१॥

शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे।
स्वमेनोऽवभृथस्नातो हयमेधे विमुच्यते॥८२॥

He who thus (remains) always firm in his vow, chaste, and of concentrated mind, removes after the lapse of twelve yers (the guilt of) slaying a Brāhmaṇa.

अश्वमेधे ब्राह्मणानामृत्विजां क्षत्रियस्य यजमानस्य समागमेषु ब्रह्महत्यापापं शिष्ट्वा निवेद्यावभृथस्नातो ब्रह्महत्यापापान्मुच्यते, द्वादशवार्षिकस्योपसंहृतत्वात्। स्वतन्त्रमेवेदं प्रायश्चित्तम्। तथाच भविष्यपुराणे- 'यदा तु गुणवान्विप्रो हत्वा विप्रं तु निर्गुणम्। अकामतस्तदा गच्छेत्स्नानं चैवाश्वमेधिकम्॥'' गोविन्दराजस्तुअश्वमेधविवर्जितसकलप्रायश्चित्तशेषतोऽस्य प्रकान्तद्वादशवार्षिकप्रायश्चित्तस्यान्तरावभृथस्नाने तेनैव शुद्धिरित्याह तदयुक्तम्, भविष्यपुराणवचनविरोधात्॥८२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते।
तस्मात्समागमे तेषामेनो विख्याप्य शुद्ध्यति॥८३॥

Or he who, after confessing his crime in an assembly of the good of the earth (Brāhmaṇas), and the gods of men (Kṣatriyas), bathes (with the priests) at the close of a horse-sacrifice, is (also) freed (from guilt).

यस्माद्ब्राह्मणो धर्मस्य कारणं ब्राह्मणेन धर्मोपदेशे कृते धर्मानुष्ठानाद्राजा तस्याग्रं प्रान्तं मन्वादिभिरुच्यते, ताभ्यां ब्राह्मणक्षत्रियाभ्यां समूलाग्रधर्मतरुनिष्पत्तेः। तस्मात्तेषां समागमेऽश्वमेधे पापं निवेद्यावभृथस्नातः शुध्यतीत्यस्यैव विशेषः॥८३॥

ब्राह्मणः संभवेनैव देवानामपि दैवतम्।
प्रमाणं चैव लोकस्य ब्रह्मात्रैव हि कारणम्॥८४॥

The Brāhmaṇa is declared (to be) the root of the sacred law and the Kṣatriya its top; hence he who has confessed his sin before an assembly of such men, becomes pure.

ब्राह्मण उत्पत्तिमात्रेणैव किं पुनः श्रुतादिभिर्देवानामपि पूज्यः सुतरां मनुष्याणां लोकस्य च प्रत्यक्षवत्प्रमाणम्, तदुपदेशस्य प्रामाण्यात्। यस्मात्तत्र वेद एव कारणं वेदमूलकत्वादुपदेशस्य॥८४॥

यत एवमतः-

तेषां वेदविदो ब्रूयुस्त्रयोऽप्येनः सुनिष्कृतिम्।
सा तेषां पावनाय स्यात्पवित्रा विदुषां हि वाक्॥८५॥

By his origin alone a Brāhmaṇa is a deity even for the gods, and (his teaching is) authoritative for men, because the Veda is the foundation for that.

तेषां विदुषां ब्राह्मणानां मध्ये वेदज्ञास्त्रयोऽपि किमुताधिकाः यत्पापनिर्हरणाय प्रायश्चित्तं ब्रूयुस्तत्पापिनां विशुद्धये भवति। यस्माद्विदुषां वाक्पावयित्री ततश्च प्रकाशप्रायश्चित्तार्थं विदुषामपि परिषदवश्यं कार्या। रहस्यप्रायश्चित्ते पुनरेतन्नास्ति, रहस्यत्वविरोधात्॥८५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अतोऽन्यतममास्थाय विधिं विप्रः समाहितः।
ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया॥८६॥

(If) only three of them who are learned in the Veda proclaim the expiation for offences, that shall purify the (sinners); for the words of learned men are a means of purification.

अस्मात्प्रायश्चित्तगणादन्यतमं प्रायश्चित्तं ब्राह्मणादिः संयतमना आश्रित्य प्रशस्तार्थतया ब्रह्महत्याकृतं पापमपनुदति। एतच्च ब्रह्मवधादिप्रायश्चित्तविधानं सकृत्पापकरणविषयं, पापावृत्तौ त्वावर्तनीयम्। "एनसि गुरुणि गुरूणि लघुनि लघूनि" इति गोतमस्मरणात्। "पूर्णे चानस्यनस्थ्नान्तु शूद्रहत्याव्रतं चरेत्" (अ. ११ श्लो. १४०) इति, बहुमारणे प्रायश्चित्तबहुत्वस्य वक्ष्यमाणत्वाच्च। "विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं स्मृतम्। तृतीये त्रिगणं प्रोक्तम्" इति गोतमस्मरणात्। गृहदाहादिना युगपदनेकब्राह्मणहननेन तु भविष्यपुराणीयो विशेषः-"ब्राह्मणो ब्राह्मणं वीर ब्राह्मणौ वा बहून्गुह। निहत्य युगपद्वीर एकं प्राणान्तिकं चरेत्। कामतस्तु यथा हन्याद्ब्राह्मणान् सुरसत्तम। तदात्मानं दहेदग्नौ विधिना येन तच्छृणु।" एतच्चाज्ञानविषयं सर्वमेवैतत्। तथा "अकामतो यदा हन्याद्ब्राह्मणान्ब्राह्मणो गुह। चरेद्व्रते तथा घोरे यावत्प्राणपरिक्षयम्।" एतच्चाज्ञानवधे प्रकृतत्वाद्युगपन्मारणविषयम्। क्रममारणे तु "विधेः प्राथमिकादस्मात्" इत्यावृत्तिविधायकं वेदवचनम्॥८६॥

हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत्।
राजन्यवैश्यौ चेजानावात्रेयीमेव च स्त्रियम्॥८७॥
[जन्मप्रभृतिसंस्कारैः संस्कृता मन्त्रवाचया।
गर्भिणी त्वथवा स्यात्तामात्रेयीं च विदुर्बुधाः॥७॥]

A Brāhmaṇa who, with a concentrated mind, follows any of the (above-mentioned) rules, removes the sin committed by slaying a Brāhmaṇa through his self-control.

प्रकृतत्वाद्ब्राह्मणगर्भविषयं स्त्रीपुंनपुंसकत्वेनाविज्ञातं क्षत्रियं वैश्यं च यागप्रवृत्तं हत्वा आत्रेयीं च स्त्रियं ब्राह्मणीम् "तथात्रेयीं च ब्राह्मणीम्" इति यमस्मरणात्। हत्वा ब्रह्महत्याप्रायश्चित्तं कुर्यात्। आत्रेयी च रजस्वला

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ऋतुस्नातोच्यते। ''रजस्वलामृतुस्नातामात्रेणीम्'' इति वसिष्ठस्मरणात्। एवं चानात्रेयीब्राह्मणीवधे त्रैवार्षिकमुपपातकम्। यथोक्तम्-''स्त्रीशूद्रविट्क्षत्रवधः'' इति। यत्तूत्तरश्लोके ''कृत्वा च स्त्रीसुहृद्वधम्'' (अ. ११ श्लो. ८८) इति तदाहिताग्निब्राह्मणस्य ब्राह्मणीभार्याविषयम्। तथा चान्गिराः- ''आहिताग्ने-र्ब्राह्मणस्य हत्वा पत्नीमनिन्दिताम्। ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव च''॥८७॥

उक्त्वा चैवानृतं साक्ष्ये प्रतिरुध्य गुरुं तथा।
अपहृत्य च निः क्षेपं कृत्वा च स्त्रीसुहृद्वधम्॥८८॥

For destroying the embryo (of a Brāhmaṇa, the sex of which was) unknown, for slaying a Kṣatriya or a Vaiśya who are (engaged in or) have offered a (Vedic) sacrifice, or a (Brāhmaṇa) woman who has bathed ater temporary un-cleanness (Āttreyī), he must perform the same penance.

हिरण्यभूम्यादियुक्तसाक्ष्येऽनृतमुक्त्वा, गुरोश्च मिथ्याभिशापमुत्पाद्य, निक्षेपं च ब्राह्मणसुवर्णादन्यद्रजतादि द्रव्यं क्षत्रियादेः सुवर्णमपि चापहृत्य, स्त्रीवधं च यथाव्याख्यातं कृत्वा मित्रं चाब्राह्मणं हत्वा ब्रह्महत्याप्रायश्चित्तं कुर्यात्॥८८॥

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते॥८९॥

Likewise for giving false evidence (in an important cause), for passionately abusing the teacher, for stealing a deposit, and for killing (his) wife or his friend.

एतत्तु प्रायश्चित्तं विशेषोपदेशमन्तरेणाकामतो ब्राह्मणवधेऽभिहितम्। कामतस्तु ब्राह्मणवधे नेयं निष्कृतिर्नैतत्प्रायश्चित्तं किंत्वतो द्विगुणादिकरणात्मक-मिति प्रायश्चित्तगौरवार्थं नतु प्रायश्चित्ताभावार्थम्। ''कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः'' (अ. ११ श्लो. ४६) इति पूर्वोक्तविरोधात्॥८९॥

सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः॥९०॥

This expiation has been prescribed for unintentionally

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

killing a Brāhmaṇa; but for intentionally slaying a Brāhmaṇa no atonement is ordained.

सुराशब्दः पैष्टीमात्रे मुख्यो नतु गौडीमाध्वीपैष्टीषु त्रितयानुगतैकरूपाभावात्प्रत्येकं च शक्तिकल्पने शक्तित्रयकल्पनागौरवप्रसन्नात्। गौडयादिमदिरासु गुणवृत्त्यापि सुराशब्दप्रयोगोपपत्तेः। अत एव भविष्यपुराणे-''सुरा च पैष्टी मुख्योक्ता न तस्यास्त्वितरे समे। पैष्ट्या पापेन चैतासां प्रायश्चितं निबोधत। यमेनोक्तं महाबाहो समासव्यासयोगतः। एतासामिति निर्धारणे षष्ठी। एतासां गौडीमाध्वीपैष्टीनां प्रकृतानां मध्ये पैष्टीपाने मनूक्तं प्रायश्चित्तं सुरां पीत्वा द्विजो मोहादिति निबोधतेत्यर्थः। मुख्यां सुरां पैष्टीं रागादिव्यामूढतया द्विजो ब्राह्मणादिश्च पीत्वाग्निवर्णा सुरां पिबेत्तया सुरया शरीरे निर्दग्धे सति द्विजस्तस्मात्पापान्मुच्यते। एतच्च गुरुत्वात्कामकारकृतसुरापानविषयम्। तथाच बृहस्पतिः-''सुरापाने कामकृते ज्वलन्तीं तां विनिःक्षिपेत्। मुखे तया स निर्दग्धो मृतः शुद्धिमवाप्नुयात्''॥९०॥

गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।
पयो घृतं वाऽऽमरणाद्गोशकृद्रसमेव वा॥९१॥

A twice-born man who has (intentionally) drunk, through delusion of mind, (the spirituous liquor called) Surā shall drink that liquor boiling-hot; when his body has been completely scalded by that, he is freed from his guilt.

गोमूत्रजलगोक्षीरगव्यघृतगोमयरसानामन्यतममग्निस्पर्शं कृत्वा यावन्मरणं पिबेत्॥९१॥

कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि।
सुरापानापनुत्यर्थं वालवासा जटी ध्वजी॥९२॥

Or he may drink cow's urine, water, milk, clarified butter or (liquid) cowdung boiling-hot, until he dies.

अथवा गोरोमादिकृतवासा जटावान् सुराभाजनचिह्नः सूक्ष्मतण्डुलावयवानाकृष्टतैलं तिलं वा रात्रावेकवारं संवत्सरपर्यन्तं सुरापानपापनाशनार्थं भक्षयेत्। इदमबुद्धिपूर्वकममुख्यसुरापाने द्रष्टव्यं नतु गुणान्तरवैकल्पिकं लघुत्वात्॥९२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥९३॥

Or, in order to remove (the guilt of) drinking Surā, he may eat during a year once (a day) at night grains (of rice) or oilcake, wearing clothes made of cowhair and his own hair in braids and carrying (a wine cup as) a flag.

यस्मात्तण्डुलपिष्टसाध्यत्वात्सुराऽन्नमलं मलशब्देन च पापमुच्यते। तस्माद्ब्राह्मणक्षत्रियवैश्याः पैष्टीं सुरां न पिबेयुरित्यनेन प्रतिषेधे सत्येतदतिक्रमे "सुरां पीत्वा" (अ. ११ श्लो. ९०) इति प्रायश्चित्तम्। अन्नमलानुवादाच्च पैष्टीनिषेध एव स्फुष्टस्त्रैवर्णिकस्य मनुनैवोक्तः॥९३॥

गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।
यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः॥९४॥

Surā, indeed, is the dirty refuse (*mala*) of grains, sin also is called dirt (*mala*); hence a Brāhmaṇa, a Kṣatriya, and a Vaiśya shall not drink Surā.

या गुडेन कृता सा गौडी, एवं पिष्टेन कृता पैष्टी, मधुकवृक्षो मधुस्तत्पुष्पैः कृता सा माध्वी, एवं त्रिप्रकारा सुरा जायते। मुख्यसुरासाम्यनिबोधनमितरसुरापेक्षया ब्राह्मणस्य गौडीमाध्वीपाने प्रायश्चित्तगौरवार्थम्। यथा वैका पैष्टी मुख्या सुरा पूर्ववाक्यानिषिद्धत्वान्त्रैवर्णिकस्यापेक्षया तथा पूर्वा गौडी माध्वी च द्विजोत्तमैर्न पातव्या॥९४॥

यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम्।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः॥९५॥

Surā one must know to be of three kinds, that distilled from molasses (*gauḍī*), that distilled from ground rice, and that distilled from Madhūkaflowers (*mādhvī*); as the one (named above) even so are all (three sorts) forbidden to the chief of the twice-born.

मद्यमत्र निषिद्धपैष्टीगौडीमाध्वीव्यतिरिक्तं नवविधं बोद्धव्यम्। तान्याह

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुलस्त्यः-''पानसद्राक्षमाध्वीकं खार्जूरं तालमैक्षवम्। माध्वीकं टाङ्कमार्द्वीकमैरेयं नालिकेरजम्। सामान्यानि द्विजातीनां मद्यान्येकादशैव च। द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम्।'' मांस च प्रतिषिद्धम्। सुरा च त्रिप्रकारा प्रोक्ता। असूयत इत्यासवो मद्यानामवस्थाविशेषः। सद्यःकृतसंसाधनोऽसंजातमद्यस्वभावः यमधिकृत्येदं पुलस्त्योक्तप्रायश्चित्तम्। ''द्राक्षेक्षुटङ्कखर्जूरपनसादेश्च यो रसः। सद्योजातं च पीत्वा तु त्रयहाच्छुध्येद्द्विजोत्तमः।'' एवं मद्यादि चतुष्टयं यक्षरक्षःपिशाचसंबन्ध्यन्नं ततस्तद्ब्राह्मणेन देवानां हविर्भक्षयता नाशितव्यम्। निषिद्धायाः सुरायाः इहोपादानं यक्षरक्षःपिशाचान्नतया निन्दार्थम्। अत्र केचित् ''देवानामश्नता हविः'' इति पुंलिन्ननिर्देशाद्ब्राह्मणस्य पुंस एव मद्यप्रतिषेधो न स्त्रिया इत्याहुस्तदसत्। ''पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत्। इहैव सा शुनी गृध्री सूकरी चोपजायते।'' (अ. ३ श्लो. २५६) इति याज्ञवल्क्यादिस्मृतिविरोधात्॥९५॥

अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेत्।
अकार्यमन्यत्कुर्याद्वा ब्राह्मणो मदमोहितः॥९६॥

Surā, (all other) intoxicating drinks and decoctions and flesh are the food of the Yakṣas; Rākṣasas, and Piśācas; a Brāhmaṇa who eats (the remnants of) the offerings consecreated to the gods, must not partake of such (substances).

ब्राह्मणो मद्यपानमदमूढबुद्धिः सन्नशुचौ वा पतेत्, वेदवाक्यं वोच्चारयेत्, ब्रह्महत्याद्यकार्यं वा कुर्यादतस्तेन मद्यपानं न कार्यमिति पूर्वस्यैवानुवादः॥९६॥

यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत्।
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति॥९७॥

A Brāhmaṇa, stupefied by drunkenness, might fall on something impure, or (improperly) pronounce Vedic (texts), or commit some other act which ought not to be committed.

यस्य ब्राह्मणस्य कायगतं ब्रह्म वेदः संस्काररूपेणावस्थितः एकदेहत्वात्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जीवात्मा एकवारमपि मद्येनाप्लाव्यते तथा चैकवारमपि यो ब्राह्मणो मद्यं पिबति तस्य ब्राह्मण्यं व्यपैति शूद्रतां समाप्नोति। तस्मान्मद्यं सर्वथैव न पातव्यम्॥९७॥

एषा विचित्राभिहिता सुरापानस्य निष्कृतिः।
अत ऊर्ध्वं प्रवक्ष्यामि सुवर्णस्तेयनिष्कृतिम्॥९८॥

When the Brāhmaṇ (the Veda) which dwells in his body is (even) once (only) deluged with spirituous liquor, his Brāhmaṇhood forsakes him and he becomes a Śūdra.

इदं सुरापानजनितपापस्य नानाप्रकारं प्रायश्चित्तमभिहितम्। अतः परं ब्राह्मणसुवर्णहरणपापस्य निष्कृतिं वक्ष्यामि॥९८॥

सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु।
स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति॥९९॥

The various expiations for drinking (the spirituous liquors called) Surā have thus been explained; I will next proclaim the atonement for stealing the gold (of a Brāhmaṇa).

"अपहृत्य सुवर्णं तु ब्राह्मणस्य यतः स्वयम्" इति शातातपस्मरणाद्ब्राह्मणसुवर्णचौरो ब्राह्मणो राजानं गत्वा ब्राह्मणसुवर्णापहारं स्वीयं कर्म कथयन्मम निग्रहं करोत्विति ब्रूयात्। ब्राह्मणग्रहणं मनुष्यमात्रप्रदर्शनार्थम्। "प्रायश्चित्तीयते नरः" (अ. ११ श्लो. ४४) इति प्रकृतत्वात्क्षत्रियादीनां च प्रायश्चित्तान्तरानभिधानात्॥९९॥

गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम्।
वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव तु॥१००॥

A Brāhmaṇa who has stolen the gold (of a Brāhmaṇa) shall go to the king and, confessing his deed, say, 'Lord, punish me!'

"स्कन्धेनादाय मुसलम्" इत्यादेरुक्तत्वात्तेनार्पितं मुसलादिकं गृहीत्वा स्तेयकारिणं मनुष्यमेकवारं राजा स्वयं हन्यात्। स च स्तेनो वधेन मुसलाभिघातेन "हतोमुक्तोऽपि वा शुचिः" (अ. ३ श्लो. २५७) इति याज्ञवल्क्यस्मरणान्मृतो वा मृतकल्पो वा जीवंस्तस्मात्पापान्मुच्यते। ब्राह्मणः पुनस्तपसैव

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वेत्येवकारदर्शनात्। तथाच-''न जातु ब्राह्मणं हन्यात्सर्वपापेष्ववस्थितम्'' इति तपसैव शुध्यति। अत एव मन्वर्थव्याख्यानपरे भविष्यपुराणे-''यदेतद्वचनं वीर ब्राह्मणस्तपसैव वा। तत्रैव कारणाद्विद्वन् ब्राह्मणस्य सुराधिप। तपसैवेत्यनेनेह प्रतिषेधो वधस्य तु। वाशब्दश्च क्षत्रियादीनामपि तपोविकल्पार्थः। ब्राह्मणस्य तु तप एवेति नियमो नतु ब्राह्मणस्यैव तपः। अत एव भविष्यपुराणे-''इतरेषामपि विभो तपो न प्रतिषिध्यते'' इति॥१००॥

तदेव तप आह-

तपसऽपनुनुत्सुस्तु सुवर्णस्तेयजं मलम्।
चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम्॥१०१॥

Taking (from him) the club (which he must carry), the king himself shall strike him once, by his death the thief becomes pure; or a Brāhmaṇa (may purify himself) by austerities.

तपसा स्वर्णस्तेयोत्पन्नं पापं द्विजो निर्हर्तुमिच्छन्नरण्यग्रहणात्प्राथम्याच्च ब्रह्महणियद्व्रतमुक्तं तत्कुर्यात्। एतच्च द्वादशवार्षिकं क्लेशगौरवात्क्षत्रियादीनां मरणेन विकल्पितत्वाच्च ब्राह्मणसंबन्धिनः सुवर्णापहरणे''पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश'' (अ. ८ श्लो. १३४) इति सुवर्णपरिमाणं द्रष्टव्यं न ततो न्यूनस्य। परिमाणपेक्षायां मनूक्तपरिमाणस्य ग्रहीतुं न्याय्यत्वात्। यत्त्वधिकपरिमाणं भविष्यपुराणे श्रूयते तत्तथानुबन्धविशिष्टापहारे तथाविधप्रायश्चित्तविषयमेव। तथा भविष्यपुराणे-''क्षत्रियाद्यास्त्रयो वर्णा निर्गुणा ह्यघतत्पराः। गुणाढ्येस्य तु विप्रस्य पञ्च निष्कान्हरन्ति चेत्। निष्कानेकादश तथा दग्ध्वात्मानं तु पावके। शुद्ध्येयुर्मरणाद्वीर चरेद्ब्राह्मात्मशुद्धये''॥१०१॥

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः।
गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत्॥१०२॥

He who desires to remove by austerities the guilt of stealing the gold (of a Brāhmaṇa), shall perform the penance (prescribed) for the slayer of a Brāhmaṇa, (living) in a forest and dressed in (garments made of) bark.

ब्राह्मणसुवर्णस्तेयजनितपापमेभिर्व्रतैर्द्विजो निहरेत्। व्रततपसोर्द्वयोरुक्त-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्वादेतैरिति बहुवचनं संबन्धापेक्षया मनूक्तमपि प्रायश्चित्तं कल्पनीयमिति ज्ञापनार्थम्। गुरुस्त्रीगमननिमित्तं पुनः पापमेभिर्वक्ष्यमाणैः प्रायश्चित्तैर्निर्हरेत् ॥१०२॥

गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये।
सूर्मीं ज्वलन्तीं स्वाश्लिष्येन्मृत्युना स विशुद्ध्यति ॥१०३॥

By these penances a twice-born man may remove the guilt incurred by a theft (of gold); but he may atone for connexion with a Guru's wife by the following penances.

"निषेकादीनि कर्माणि" (अ. २ श्लो. १४२) इत्युक्तत्वाद्गुरुः पिता, तल्पं भार्या, गुरुतल्पं गुरुभार्या तद्ग्रामी गुरुभार्यागमनपापं विख्याप्य लोहमते तप्तशयने स्वप्यात्। लोहमयीं स्त्रीप्रतिकृतिं कृत्वा ज्वलन्तीमालिङ्ग्य मृत्युना स विशुद्धो भवति ॥१०३॥

स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ।
नैर्ऋतीं दिशमातिष्ठेदानिपादजिह्मगः ॥१०४॥

He who has violated his Guru's bed, shall, after confessing his crime, extend himself on a heated iron bed, or embrace the red-hot image (of a woman); by dying be becomes pure.

आत्मनैव वा लिन्नवृषणौ छित्त्वाऽञ्जलौ कृत्वा यावच्छरीरपातमवक्रगतिः सन्दक्षिणपश्चिमां दिशं गच्छेत्। एवं चोक्तप्रायश्चित्तद्वयं गुरुत्वात्सवर्णगुरुभार्याविषयं ज्ञानतो रेतोविसर्गपर्यन्तमैथुनविषयम् ॥१०४॥

खट्वाङ्गी चीरवासा वा श्मश्रुलो विजने वने।
प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः ॥१०५॥

Or, having himself cut off his organ and his testicles and having taken them in his joined hands, he may walk straight towards the region of Nirṛti (the south-west), until he falls down (dead).

खट्वाङ्गभृद्वस्त्रखण्डाच्छन्नोऽच्छिन्नकेशनखलोमश्मश्रुधारी संयतमना निर्जने वने वर्षमेकं प्राजापत्यव्रतं चरेत्। एवं च वक्ष्यमाणप्रायश्चित्तलघुत्वात्स्वभार्यादिभ्रमेणाज्ञानविषयं बोद्धव्यम् ॥१०५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चान्द्रायणं वा त्रीन्मासानभ्यस्येन्नियतेन्द्रियः।
हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये॥१०६॥

Or, carrying the foot of a bedstead, dressed in (garments of) bark and allowing his beard to grow, he may, with a concentrated mind, perform during a whole year the Kṛcchra (or hard, penance), revealed by Prajāpati, in a lonely forest.

यद्वा गुरुभार्यागमनपापनिर्हरणाय संयतेन्द्रियः फलमूलादिना हविष्येण नीवारादिकृतयवाग्वा वा त्रीन्मासांश्चान्द्रायणान्याचरेत्। एतच्च पूर्वोक्तादपि लघुत्वादसाध्वीमसावर्णां वा गुरुभार्यां गच्छतो द्रष्टव्यम्॥१०६॥

एतैर्व्रतैरपोहेयुर्महापातकिनो मलम्।
उपपातकिनस्त्वेवमेभिर्नानाविधैर्व्रतैः॥१०७॥

Or, controlling his organs, he may during three months continuously perform the lunar penane, (subsisting) on sacrificial food or barley-gruel, in order to remove (the guilt of) violating a Guru's bed.

एभिरुक्तव्रतैर्ब्रह्महत्यादिमहापातककारिणः पापं निहरेयुः। गोवधाद्युपपातककारिणः युनर्वक्ष्यमाणप्रकारेणानेकरूपव्रतैः पापानि निहरेयुः॥१०७॥

उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत्।
कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः॥१०८॥
चतुर्थकालमश्नीयादक्षारलवणं मितम्।
गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः॥१०९॥
दिवानुगच्छेद्गास्तास्तु तिष्ठन्नूर्ध्वं रजः पिबेत्।
शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनं वसेत्॥११०॥
तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्।
आसीनासु तथासीनो नियतो वीतमत्सरः॥१११॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः।
पतितां पङ्कलग्नां वा सर्वोपायैर्विमोचयेत्॥११२॥
उष्णे वर्षति शीते वा मारुते वाति वा भृशम्।
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः॥११३॥
आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले।
भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकम्॥११४॥
अनेन विधिना यस्तु गोघ्नो गामनुगच्छति।
स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति।॥११५॥

By means of these peances men who have committed mortal sins (*Mahāpātaka*) may removes their guilt, but those who committed minor offences, causing loss of caste, (*Upapātaka*, can do it) by the various following penances.

He who has committed a minor offence by slaying a cow (or bull) shall drink during (the first) month (a decoction of) barley-grains; having shaved all his hair, and covering himself with the hide (of the slain cow), he must live in a cow-house.

During the two (following) months he shall eat a small (quantity of food) without any factitious salt at every fourth meal-time, and shall bathe in the urine of cows, keeping his organs under control.

During the day he shall follow the cows and, standing upright, inhale the dust (raised by their hoofs); at night after serving and worshipping them, he shall remain in the (posture, called) *vīrāsana*.

Controlling himself and free from anger, he must stand when they stand, follow them when they walk, and seat himself when they lie down.

(When a cow is) sick, or is threatened by danger from thieves, tigers, and the like, or falls, or sticks in a morass,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

he must relieve her by all posible means.

In heat, in rain, or in cold, or when the wind blows violently, he must not seek to shelter himself, without (first) sheltering the cows according to his ability.

Let him not say (a word), if a cow eats (anything) in his own or another's house or field or on the threshing-floor, or if a calf drinks (milk).

"अनेन विधिना यस्तु" इति यावत्कुलकम्। उपपातकयुक्तो गोघाती शिथिलयवागूरूपेण प्रथममासं यवान्पिबेत्। सशिखं मुण्डितशिरा लूनश्मश्रुस्तेन हतगोचर्मणाच्छादितदेहो मासत्रयमेव गोष्ठे वसेत्। गोमूत्रेणाचरेत्स्नानं संयतेन्द्रियः कृत्रिमलवणवर्जितं हविष्यमन्नमेकाहं भुक्त्वा द्वितीयेऽह्नि सायं द्वितीयतृतीयमासावश्नीयात्। मासत्रयमेव दिवा प्रातस्ता गा अनुगच्छेत्। तासां च गवां खुरप्रहारादूर्ध्वमुत्थितं रजस्तिष्ठन्नास्वादयेत्। कण्डूयनादिना ताः परिचर्य प्रणम्य च रात्रौ भित्त्यादिकमननुवेष्टयोपविष्ट आसीत। तथा शुचिर्विगतक्रोध उत्थितासु गोषु पश्चादुत्तिष्ठेत्। वने च परिभ्रमन्तीषु पश्चात्ततः परिभ्रमेत्। उपविष्टासु गोषूपविशेत्। व्याधितां चौरव्याघ्रादिभयहेतुभिराक्रान्तां पतितां कर्दमलग्नः वा यथाशक्ति मोचयेत्। तथा उष्ण आदित्ये तपति मेघे च वर्षति शीते चोपस्थिते मारुते चात्यर्थं वाति गोर्यथाशक्ति रक्षामकृत्वाऽऽत्मनस्त्राणं न कुर्यात्। तथात्मनोऽन्येषां वा गेहे क्षेत्रे खलेषु सस्यादिभक्षणं कुर्वन्तीं वत्सं च क्षीरां पिबन्तं न कथयेत्। अनेनोक्तविधानेन यो गोघ्नो गाः परिचरित स गोवधजनितपापं त्रिभिर्मासैरपनुदति॥१०९-११५॥

वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः।
अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत्॥११६॥

The slayer of a cow who serves cows in this manner, removes after three months the guilt which he incurred by killing a cow.

वृषभ एकादशो यासां ताः सम्यगनुष्ठितप्रायश्चित्तो दद्यात्। अविद्यमाने तावति धने सर्वस्वं वेदज्ञेभ्यो ब्राह्मणेभ्यो दद्यात्॥११६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः।
अवकीर्णिवर्ज्यं शुद्ध्यर्थं चान्द्रायणमथापि वा॥११७॥

But after he has fully performed the penance, he must give to (Brāhmaṇas) learned in the Veda ten cows and a bull, (or) if he does not possess (so much property) he must offer to them all he has.

अपरे तूपपातकिनो वक्ष्यमाणावकीर्णिवर्जिताः पापनिर्हरणार्थमेतदेव गोवधप्रायश्चित्तं चान्द्रायणं वा लघुत्वात्कुर्युः। चान्द्रायणं तु लघुन्युपपातके जातिशक्तिगुणाद्यपेक्ष्यं वा योजनीयम्॥११७॥

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे।
पाकयज्ञविधानेन यजेत निर्ऋतिं निशि॥११८॥

Twice-born men who have committed (other) minor offences (*Upapātaka*), except a student who has broken his vow (*Avakīrṇin*), may perform, in order to purify themselves, the same penance or also a lunar penance.

अवकीर्णी वक्ष्यमाणः काणेन गर्दभेन रात्रौ चतुष्पथे पाकयज्ञेन तन्त्रेण निर्ऋत्याख्यां देवतां यजेत्॥११८॥

हुत्वाग्नौ विधिवद्धोमानन्ततश्च समेत्यृचा।
वातेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाऽऽहुतीः॥११९॥

But a student who has broken his vow shall offer at night on a crossway to Nirṛti a one-eyed ass, according to the rule of the Pākayajñas.

ततो निर्ऋत्यै गर्दभवपादिहोमान्यथावच्चतुष्पथे कृत्वा तदन्ते "संमासिञ्चन्तु मरुतः" इत्येतता ऋचा मारुतेन्द्रबृहस्पत्यग्नीनां घृतेनाऽऽहुतीर्जुहुयात्॥११९॥

अप्रसिद्धत्वादवकीर्णवतो लक्षणमाह-

कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः।
अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः॥१२०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Having offered according to the rule oblations in the fire, he shall finally offer (four) oblations of clarified butter to Vāta, to Indra, to the teacher (of the gods, Bṛhaspati) and to Agni, reciting the Rik verse 'May the Maruts grant me,' etc.

इच्छातो द्विजः "अवकीर्णी भवेद्गत्वा ब्रह्मचारी च योषितम्" इति वचनात्स्त्रीयोनौ शुक्रोत्सर्गं ब्रह्मचर्यस्यातिक्रममवकीर्णरूपं सर्वज्ञा वेदविदः प्राहुः॥१२०॥

मारुतं पुरुहूतं च गुरुं पावकमेव च।
चतुरो व्रतिनोऽभ्येति ब्राह्मं तेजोऽवकीर्णिनः॥१२१॥

Those who know the Veda declare that a voluntary effusion of semen by a twice-born (youth) who fulfils the vow (of studentship constitutes) a breach of the vow.

व्रतचारिणो वेदाध्ययननियमानुष्ठानजं तेजः तदवकीर्णिनः सतो मरुदिन्द्रबृहस्पतिपावकांश्चतुरः संक्रामत्यतस्तेभ्य आज्याहुतब्रीर्जुहुयादित्याज्याहुतेरयम् अनुवादः॥१२१॥

एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनम्।
सप्तागारांश्चरेद्भैक्षं स्वकर्म परिकीर्तयन्॥१२२॥

The divine light which the Veda imparts to the students, enters, if he breaks his vow, the Maruts, Puruhūta (Indra), the teacher (of the gods, Brihaspati) and Pāvaka (Fire).

एतस्मिन्नवकीर्णाख्ये पाप उत्पन्ने पूर्वोक्तं गर्दभयागादि कृत्वा "गर्दभचर्म परिधायं" इति हारीतस्मरणात्स गर्दभसंबन्धिचर्मप्रावृतोऽवकीर्ण्यहमिति स्वकर्मख्यापनं कुर्वन्सप्त गृहाणि भैक्षं चरेत्॥१२२॥

तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकम्।
उपस्पृशंस्त्रिषवणं त्वब्देन स विशुद्ध्यति॥१२३॥

When this sin has been committed, he shall go begging to seven houses, dressed in the hide of the (sacrificed)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ass, proclaiming his deed.

तेभ्यः सप्तगृहेभ्यो लब्धेन भैक्षेणैककालमाहारं कुर्वन्सायंप्रातर्मध्यन्दिनेषु च स्नानमाचरन्सोऽवकीर्णी संवत्सरेणैव विशुध्यति ॥१२३॥

जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया।
चरेत्सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया॥१२४॥

Subsisting on a single (daily meal that consists) of the alms obtained there and bathing at (the time of) the three *savanas* (morning, noon, and evening), he becomes pure after (the lapse of) one year.

"ब्राह्मणस्य रुजः कृत्वा" (अ. ११ श्लो. ६७) इत्यादि जातिभ्रंशकर्मोक्तं तन्मध्यादन्यतमं कर्मविशेषमिच्छातः कृत्वा वक्ष्यमाणं सांतपनं सप्ताहसाध्यं कुर्यात्। अनिच्छातः पुनः कृत्वा प्राजापत्यं वक्ष्यमाणं चरेत्॥१२४॥

संकरापात्रकृत्यासु मासं शोधनमैन्दवम्।
मलिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहम्॥१२५॥

For committing with intent any of the deeds which cause loss of caste (*Jātibhraṁśakara*), (the offender) shall perform a Sāṁtapana Kṛcchra; (for doing it) unintentionally, (the *Kṛcchra*) revealed by Prajāpati.

"खराश्वोष्ट्र" (अ. ११ श्लो. ६८) इत्यादिना संकरीकरणान्युक्तानि। "निन्दितेभ्यो धनादानम्" (अ. ११ श्लो. ६९) इत्यादिना चापत्रीकरणान्युक्तानि। तेषां मध्यादन्यतममिच्छतः कृत्वा चान्द्रायणं मासं शुद्धये कुर्यात्। "कृमिकीटवयोहत्या" (अ. ११ श्लो. ७०) इत्यादिना मलिनीकरणान्युक्तानि। तन्मध्यादेकमिच्छातः कृत्वा त्रिरात्रं यवागूं क्वथितामश्नीयात्॥१२५॥

तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः।
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः॥१२६॥

As atonement for deeds which degrade to a mixed caste

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(*Saṁkara*), and for those which make a man unworthy to receive gifts (*Apātra*), (he shall perform) the lunar (penance) during a month; for (acts) which render impure (Malinīkaraṇīya) he shall scald himself during three days with (hot) barley gruel.

ब्रह्महत्यातुरीयो भागः त्रैवार्षिकरूपः द्वादशवार्षिकस्य चतुर्थो भागः। एवच्च प्रायश्चित्तं "स्त्रीशूद्रविट्क्षत्रवधः" (अ. ११ श्लो. ६६) इत्युपपातकत्वेनोपदिष्टं त्रैवार्षिकत्वापेक्षया गुरुत्वाद्वृस्थयक्षत्रियस्य कामतो वधे द्रष्टव्यम्। वैश्ये साध्वाचारे कामतो हतेऽष्टमो भागः सार्धवार्षिकं व्रतम्। शूद्रे वृत्तस्थे कामतो हते नवमासिकं द्रष्टव्यम्॥१२६॥

अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः।
वृषभैकसहस्रा गा दद्यात्सुचरितव्रतः॥१२७॥

One-fourth (of the penance) for the murder of a Brāhmaṇa is prescribed (as expiation) for (intentionally) killing a Kṣatriya, one-eighth for killing a Vaiśya; know that it is one-sixteenth for killing a virtuous Śūdra.

अबुद्धिपूर्वकं पुनः क्षत्रियं निहत्य वृषभेणैकेनाधिकं सहस्रं यासां गवां ता आत्मशुद्ध्यर्थं ब्राह्मणेभ्यो दद्यात्॥१२७॥

त्रयब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम्।
वसन्दूरतरे ग्रामाद्वृक्षमूलनिकेतनः॥१२८॥

But if a Brāhmaṇa unintenionally kills a Kṣatriya, he shall give, in order to purify himself, one thousand cows and a bull.

यद्वा संयतो जटावान्ग्रामाद्विप्रकृष्टवृक्षमूले कृतनिवासो ब्रह्महणि यदुक्तम् "ब्रह्महाद्वादश समाः" (अ. ११ श्लो. ७२) इत्यादि तद्वर्षत्रयं कुर्यात्। ननु "तुरीयो ब्रह्महत्यायाः" (अ. ११ श्लो. १२६) इत्यनेन पुनरुक्तिर्वाच्या। "जटी दूरतरे ग्रामाद्वृक्षमूलनिकेतनः" इति वचनाद्वष्टतिरिक्तशवशिरोध्वजधारणादि सकलधर्मनिवृत्त्यर्थत्वादस्य ग्रन्थस्य। अकामाधिकाराच्चेदमकामतः। अत एवान्नलाघवाद्युचितम्॥१२८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः।
प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकशतं गवाम्॥१२९॥

Or he may perform the penance prescribed for the murderer of a Brāhmaṇa during three years, controlling himself, wearing his hair in braids, staying far away from the village, and dwelling at the root of a tree.

एतदेव द्वादशवार्षिकव्रतमकामतः साध्वाचारं वैश्यं निहत्य वर्षमेकं ब्राह्मणादिः कुर्यादेकाधिकं वा गोशतं दद्यात्॥१२९॥

एतदेव व्रतं कृत्स्नं षण्मासा ञ्छूद्रहा चरेत्।
वृषभैकादश वापि दद्याद्विप्राय गाः सिताः॥१३०॥

A Brāhmaṇa who has slain a virtuous Vaiśya, shall perform the same penance during one year, or he may give one hundred cows and one (bull).

एतदप्यकामत इदमेव व्रतं शूद्रहा षण्मासं चरेत्। वृषभ एकादशो यासां गवां ताः शुक्लवर्णा ब्राह्मणाय दद्यात्॥१३०॥

मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च।
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत्॥१३१॥

He who has slain a Śūdra, shall perform that whol penance during six months, or he may also give ten white cows and one bull to a Brāhmaṇa.

बिडालनकुलचाषभेककुक्कुरगोधापेचककानामेकैकं हत्वा शूद्रहत्याव्रतं स्त्रीशूद्रवध इत्युपपातकप्रायश्चित्तं गोवधव्रतं चान्द्रायणं चरेत्, नतु "शूद्रे ज्ञेयस्तु षोडशः" (अ. ११ श्लो. १२६) इत्यादि प्रायश्चित्तं पापस्य लघुत्वात् चान्द्रायणमप्येतत्कामतोऽभ्यासादिविषये द्रष्टव्यम्॥१३१॥

पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत्।
उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेत्॥१३२॥

Having killed a cat, an ichneumon, a blue jay, a frog, a dog, an iguana, an owl, or a crow, he shall perform the

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

penance for the murder of a Sudra.

अबुद्धिपूर्वकं मार्जारादीनां वधे त्रिरात्रं क्षीरं पिबेत्। अथ मन्दानलत्वादिना न समर्थस्त्रिरात्रं प्रति योजनमध्वनो व्रजेत्। अत्राशक्तस्त्रिरात्रं नद्यां स्नायात्। तत्राप्यक्षम स्त्रिरात्रम् "आपो हि ष्ठा" इत्यादिसूक्तं जपेत्। यथोत्तरं लघुत्वात्पूर्वपूर्वासंभवे उत्तरोत्तरपरिग्रहो नतु वैकल्पिकः॥१३२॥

अभ्रिं काष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः।
पलालभारकं षण्ढे सैसकं चैकमाषकम्॥१३३॥

Or he may drink milk during three days, or walk one hundred yojanas, or bathe in a river, or mutter the hymn addressed to the Waters.

सर्पं हत्वा ब्राह्मणाय तीक्ष्णाग्रं लोहदण्डं दद्यात्। नपुंसकं हत्वा पलालभारं सीसकं च माषकं ब्राह्मणाय दद्यात्॥१३३॥

घृतकुम्भं वराहे तु तिलद्रोणं तु तित्तिरौ।
शुके द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम्॥१३४॥

For killing a snake, a Brāhmaṇa shall give a spade of black iron, for a eunuch a load of straw and a māṣa of lead.

सूकरे हते घृतपूर्णं घटं ब्राह्मणाय दद्यात्। तित्तिरिसंज्ञिनि पक्षिणि हते चतुराढकपरिमाणं तिलं दद्यात्। शुके हते द्विवर्षं वत्सम्। क्रौञ्चाख्यं पक्षिणं हत्वा त्रिवर्षं वत्सं ब्राह्मणाय दद्यात्॥१३४॥

हत्वा हंसं बलाकां च बकं बर्हिणमेव च।
वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गाम्॥१३५॥

For a boar a pot of clarified butter, for a partridge a drona of sesamum-grains for a parrot a calf two years old, for a crane (a calf) three years old.

हंसबलाकामयूरवानरश्येनभासाख्यपक्षिणामन्यतमं हत्वा ब्राह्मणाय गां दद्यात्॥१३५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वासो दद्याद्धयं हत्वा पञ्च नीलान्वृषान्गजम्।
अजमेषावनड्वाहं खरं हत्वैकहायनम्॥१३६॥

If he has killed a Haṁsa, a Balāka, a heron, a peacock, a monkey, or a Bhāsa, he shall give a cow to a Brāhmaṇa.

अश्वं हत्वा वस्त्रं दद्यात्। हस्तिनं हत्वा पञ्च नीलान्वृषभान्दद्यात् प्रत्येकं छागमेषौ हत्वा वृषभं दद्यात्। गर्दभं हत्वैकवर्षं वत्सं दद्यात्॥१३६॥

क्रव्यादांस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीम्।
अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलम्॥१३७॥

For killing a horse, he shall give a garment, for (killing) an elephant, five black bulls, for (killing) a goat, or a sheep, a draught-ox, for killing a donkey, (a calf) one year old.

आममांसभक्षिणो मृगान्व्याघ्रादीन्हत्वा बहुक्षीरां धेनुं दद्यात्। आममांसाभक्षकान्हरिणादीन्हत्वा प्रौढवत्सिकां दद्यात्। उष्ट्रं हत्वा सुवर्णकृष्णलं रक्तिकां दद्यात्॥१३७॥

जीनकार्मुकबस्तावीन्पृथग्दद्याद्विशुद्धये।
चतुर्णामपि वर्णानां नारीर्हत्वाऽनवस्थिताः॥१३८॥
[वर्णानामानुपूर्व्येण त्रयाणामविशेषतः।
अमत्या च प्रमाप्य स्त्रीं शूद्रहत्याव्रतं चरेत्॥८॥]

But for killing carnivorous wild beasts, he shall give a milch-cow, for (killing) wild beasts that are not carnivorous, a heifer, for killing a camel, one kṛṣṇala.

ब्राह्मणादिवर्णस्त्रियो लोभादुत्कृष्टापकृष्टपुरुषव्यभिचारिणीर्हत्वा ब्राह्मणादिक्रमेण चर्मपुटधनुश्छागमेषाञ्शुद्ध्यर्थं दद्यात्॥१३८॥

दानेन वधनिर्णेकं सर्पादीनामशक्नुवन्।
एकैकशश्चरेत्कृच्छ्रं द्विजः पापापनुत्तये॥१३९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

For killing adulterous adulterous women of the four castes, he must give, in order to purify himself, respectively a leathern bag, a bow, a goat, or a sheep.

अभ्रिप्रभृतीनामभावाद्दानेन सर्वपापनिर्हरणं कर्तुमसमर्थो ब्राह्मणादिः प्रत्येकं वधे कृच्छ्रं प्राथम्यात्प्राजापत्यं द्विजः पापनिर्हरणार्थं चरेत्। सर्पादयश्च "अभ्रिं कार्ष्णायसीं दद्यात् (अ. ११ श्लो. १३३) इत्येवमारभ्यैतत्पर्यन्ता गृह्यन्ते ॥१३९॥

अस्थिमतां तु सत्वानां सहस्रस्य प्रमापणे।
पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत्॥१४०॥

A twice-born man, who is unable to atone by gifts for he slaughter of a serpent and the other (creatures mentioned), shall perform for each of them, a Kṛcchra (penance) in order to remove his guilt.

अनस्थिसाहचर्यादस्थिमतां प्राणिनां कृकलासादीनां सहस्रस्य वधे शूद्रवधप्रायश्चित्तमौपदेशिकं कुर्यात्, अस्थिरहितानां च मत्कुणादीनां शकटपरिमितानां वधे तदेव प्रायश्चित्तं कुर्यात्॥१४०॥

किञ्चिदेव तु विप्राय दद्यादस्थिमतां वधे।
अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति॥१४१॥

But for destroying one thousand (small) animals that have bones, or a whole cart-load of boneless (animals), he shall perform the penance (prescribed) for the murder of a Śūdra.

अस्थिमतां क्षुद्रजन्तूनां कृकलासादीनां प्रत्येकं वधे किंचिदेव दद्यात्। अस्थिमतां वधे "पणो देयः सुवर्णस्य" इति सुमन्तुस्मरणात्किंचिदेवेति पणो बोद्धव्यः। अनस्थिमतां तु यूकामत्कुणादीनां प्रत्येकं वधे प्राणायामेन शुद्धो भवति। प्राणायामश्च "सव्याहृतिकां सप्रणवां सावित्रीं शिरसा सह। त्रिः पठेदायतप्राणः प्राणायामः स उच्यते॥" इति वसिष्ठप्रोक्तलक्षणो ग्राह्यः॥१४१॥

फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम्॥१४२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But for killing (small) animals which have bones, he should give some trifle to a Brāhmaṇa; if he injures bonelss (animals), he becomes pure by suppressing his breath (*prāṇāyāma*).

फलदानामाम्रादीनां वृक्षाणां, गुल्मानां कुब्जकादीनां, वल्लीनां गुडूच्यादीनां, लतानां वृक्षशाखासक्तानां, पुष्पितानां च वीरुधां कूष्माण्डादीनां प्रत्येकं छेदने पापप्रमोचनार्थं सावित्र्यादि ऋक्शतं जपनीयम्। "इन्धनार्थमशुष्काणां द्रुमाणामवपातनम्" (अ. ११ श्लो. ६४) इत्यादेरुपपातकमध्ये पठितस्य गुरुप्रायश्चित्ताभिधानात्। इदं फलवद्वृक्षादिच्छेदने लघुप्रायश्चित्तं सकृदबुद्धि-पूर्वकविषयं वेदितव्यम्॥१४२॥

अन्नाद्यजानां सत्वानां रसजानां च सर्वशः।
फलपुष्पोद्भवानां च घृतप्राशो विशोधनम्॥१४३॥

For cutting fruit-trees, shrubs, creepers, lianas, or flowering plants, one hundred Ṛcas must be mutered.

अन्नादिषु जातानां, गुडादिरसजातानां चोदुम्बरादिफलसंभवानां, मधूकादिपुष्पोद्भवानां च सर्वप्राणिनां वधे घृतप्राशनं पापशोधनम्॥१४३॥

कृष्टजानामोषधीनां जातानां च स्वयं वने।
वृथालम्भेऽनुगच्छेद्गां दिनमेकं पयोव्रतः॥१४४॥

(For destroying) any kind of creature, bred in food, in condiments, in fruit, or in flowers, the expiation is to eat clarified butter.

कर्षणपूर्वकजातानामोषधीनां षष्टिकादीनां, वने च स्वयमुत्पन्नानां नीवारादीनां निःप्रयोजनच्छेदने क्षीराहारः। एष्वेकमहो गोरनुगमनं कुर्यात्॥१४४॥

एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम्।
ज्ञानाज्ञानकृतं कृत्स्नं शृणुतानाद्यभक्षणे॥१४५॥

If a man destroys for no good purpose plants produced by cultivation, or such as spontaneously spring up in the forest, he shall attend a cow during one day, subsisting on

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

milk alone.

एभिरुक्तप्रायश्चित्तैर्हिंसाजनितपापं ज्ञानाज्ञानकृतं निर्हरणीयम्। इदानीमभक्ष्यभक्षणप्रायश्चित्तं वक्ष्यमाणं शृणुत॥१४५॥

अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुद्ध्यति।
मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः॥१४६॥

The guilt incurred intentionally or unintentionally by injuring (created beings) can be removed by means of these penances; hear (now, how) all (sins)committed by partaking of forbidden food (or drink; can be expiated).

महापातकप्रकरणव्यवधानेनास्यानानान्देदं मुख्यपैष्टीसुराविषयं वचनं किंतु तदितरविषयम्। तत्र यथा चैका तथा सर्वा। गौडीमाध्व्योर्मुख्य-सुरासाम्यबोधनमितरमद्यापेक्षया ब्राह्मणस्य प्रायश्चित्तगौरवार्थमित्युक्तम्। तेनाबुद्धिपूर्वकं गौडीं माध्वी च पीत्वा गोतमोक्तं तप्तकृच्छ्रं कृत्वा पुनःसंस्कारेणैव शुध्यति। तथाच गोतमः- "अमत्या मद्यपाने पयोघृतमुदकं वायुं प्रत्यहं तप्तकृच्छ्रस्ततोऽस्य संस्कारः।" इत्थमेव व्याख्यातं भविष्यपुराणे- "अकामतः कृते पाने गौडीमाध्व्योर्नराधिप। तप्तकृच्छ्रविधानं स्याद्गोतमेन यथोदितम्"। बुद्धिपूर्वकं तु पैष्टीतरमद्यपाने "प्राणान्तिकमनिर्देश्यम्" इति शास्त्रमर्यादा। तथा गौडीमाध्व्योर्ज्ञानात्पाने मरणनिषेधादितरमद्यापेक्षया गुरुत्वाच्च मानवमेव "कणान्वा भक्षयेदब्दम्" (अ. ११ श्लो. ९२) इति प्रायश्चित्तमुक्तम्। अत एव गौडीमाध्व्योः कामतः पानानुवृत्तौ भविष्यपुराणे-"यद्वास्मिन्नेव विषये मानवीयं प्रकल्पयेत्। कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि। सुरापापापनुत्त्यर्थं बालवासा जटी ध्वजी" इति। पैष्टीगौडीमाध्वीव्यतिरिक्तपुलस्त्योक्तपानसादिन-वविधमद्यस्य प्रत्येकं पाने लघुत्वात्संस्कारमात्रमेव केवलमन्यद्वा लघुत्वात्प्रायश्चित्तं ब्राह्मणस्य युक्तम्। बुद्धिपूर्वं पानसादिमद्यपाने तु "मतिपूर्वं सुरापाने कृते वै ज्ञानतो गुह। कृच्छ्रातिकृच्छ्रौ भवतः पुनःसंस्कार एव हि॥" इति भविष्यपुराणीयमन्यद्द्विविधं मुन्यन्तरोक्तम्॥१४६॥

अपः सुराभाजनस्था मद्यभाण्डस्थितास्तथा।
पञ्चरात्रं पिबेत्पीत्वा शङ्खपुष्पीश्रितं पयः॥१४७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

He who drinks unintentionally (the spirituous liquor, called Vāruṇī, becomes pure by being initiated (again); (even for drinking it) intentionally (a penance) destructive to life must not be imposed; that is a settled rule.

पैष्टीसुराभाण्डे तदितरमद्यभाण्डेऽवस्थिता अपः सुरारसगन्धवर्जिताः पीत्वा शङ्खपुष्पाख्यौषधिप्रक्षेपेण पक्वं क्षीरं न तूदकम् "शङ्खपुष्पीविपक्वेन त्र्यहं क्षीरेण वर्तयेत्" इति बौधायनस्मरणात्पञ्चरात्रं पिबेत्। सुरामद्ययोः सर्वत्रैव गुरुलघुप्रायश्चित्ताभिधानादिहापि ज्ञानाज्ञानादिप्रकारभेदेन विषयसमीकरणं समाधेयम्। वाचनिकमेव प्रायश्चित्तं साध्यमिति मेधातिथिराह॥१४७॥

सृष्टवा दत्त्वा च मदिरां विधिवत्प्रतिगृह्य च।
शूद्रोच्छिष्टाश्च पीत्वापः कुशवारि पिबेत्र्यहम्॥१४८॥

He who has drunk water which has stood in a vessel used for keeping (the spirituous liquor, called) Surā, or other intoxicating drinks, shall drink during five (days and) nights (nothing but) milk in which the Śaṅkhapuṣpī (plant) has been boiled.

सुरां स्पृष्ट्वा दत्त्वा च स्वस्तिवाचनपूर्वकं च प्रतिगृह्य शूद्रोच्छिष्टाश्च अपः पीत्वा प्रतिगृह्याभ्युपादानाद्ब्राह्मणो दर्भक्वथितमुदकं त्र्यहं पिबेत्॥१४८॥

ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमपः।
प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुद्ध्यति॥१४९॥

He who has touched spirituous liquor, has given it away, or received it in accordance with the rule, or has drunk water left by a Śūdra, shall drink, during three days water in which Kuśa-grass has been boiled.

ब्राह्मणः पुनः कृतसोमयागः सुरापस्य मुखसंबन्धिनं गन्धं घ्रात्वा जलमध्ये प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुद्धो भवति॥१४९॥

अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः॥१५०॥

But when a Brāhmaṇa who has partaken of Soma-juice,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

has smelt the odour exhaled by a drinker of Surā, he becomes pure by thrice suppressing his breath in water, and eating clarified butter.

विड्वराहादीनां वक्ष्यमाणत्वादबुद्धिपूर्वकं मनुष्यसंबन्धि मूत्रं पुरीषं वा प्राश्य मद्यसुरासंस्पृष्टं च भक्तादिरसं वा प्राश्य द्विजातयस्त्रयो वर्णाः पुनरुपनयनमर्हन्ति ॥१५०॥

वपनं मेखला दण्डौ भैक्षचर्या व्रतानि च।
निवर्त्तन्ते द्विजातीनां पुनः संस्कारकर्मणि ॥१५१॥

(Men of) the three twice-born castes who have unintenionally swallowed ordure or urine, or anything that has touched Surā, must be initiated again.

शिरोमुण्डनं मेखलाधारणं दण्डधारणं भैक्षाणि व्रतानि च मधुमांसस्त्रीवर्जनयुतानि प्रायश्चित्तानि पुनरुपनयने द्विजातीनां न भवन्ति ॥१५१॥

अभोज्यानां तु भुक्त्वाऽऽत्रं स्त्रीशूद्रोच्छिष्टमेव च।
जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान्पिबेत् ॥१५२॥

The tonsure, (wearing) the sacred girdle, (carrying) a staff, going to beg, and the vows (incumbent on a student), are omitted on the second initiation of twice-born men.

अभोज्यान्नानाम् "नाश्रोत्रियकृते यज्ञे" (अ. ४ श्लो. २०५) इत्याद्युक्तानामन्नं भुक्त्वा जलमिश्रितसक्तुरूपेण यवागूरूपेण वा यवान्पानयोग्यान्कृत्वा सप्तरात्रं पिबेत्। अमुष्मिन्नैव विषये "मत्या भुक्त्वा चरेत्कृच्छ्रम्" इति चतुर्थाध्याये (श्लो. २२२) प्रायश्चित्तमुक्तं तेन सह वैकल्पिकम्। विकल्पश्च कर्तृशक्त्यपेक्षः। तथा द्विजातिस्त्रीणामुच्छिष्टं शूद्रोच्छिष्टं वा भुक्त्वैतदेव कुर्यात्। तथा "क्रव्यादसूकरोष्ट्राणाम्" (अ. ११ श्लो. १५६) इत्यादिना यद्विशेषप्रायश्चित्तं तन्निषिद्धमांसं भुक्त्वेदमेव कुर्यात् ॥१५२॥

शुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः।
तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः ॥१५३॥

But he who has eaten the food of men, whose food

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

must not be eaten, or the leavings of women and Śūdras, or forbidden flesh, shall drink barley(-gruel) during seven (days and) nights.

यानि स्वभावतो मधुरादिरसानि कालयोगेनोदकपरिमाणादिनाम्लभावं व्रजन्ति तानि शुक्तानि, कषायान्विभीतकादीन्, क्वथितान्यप्रतिषिद्धान्यपि पीत्वा यावन्न जीर्णानि भवन्ति तावदशुचिः पुरुषो भवति ॥१५३॥

विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः।
प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत्॥१५४॥

A twice-born man who has drunk (fluids that have turned) sour, or astringent decoctions, becomes, though (these substances may) not (be specially) forbidden, impure until they have been digested.

ग्राम्यसूकरखरोष्ट्र शृगालवानरकाकानां मूत्रं पुरीषं वा द्विजातिर्भुक्त्वा चान्द्रायणं कुर्याच्छोधनम्। यत्तु "छत्राकं विड्वराहं च" (अ. ५ श्लो. १९) इत्यनेन विड्वराहग्रामकुक्कुटयोर्बुद्धिपूर्वकभक्षणे पञ्चमाध्याये प्रायश्चित्तमुक्तं तदभ्यासविषये व्याख्यातम्। इदं त्वनभ्यासविषये तप्तकृच्छ्रमित्यविरोधः॥१५४॥

शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च।
अज्ञातं चैव सूनास्थमेतदेव व्रतं चरेत्॥१५५॥

A twice-born man who has swallowed the urine or ordure of a village pig, of a donkey, of a camel, of a jackal, of a monkey, or of a crow, shall perform a lunar penance.

वाय्वादिना शोषितानि मांसानि भुक्त्वा भूम्यादिप्रभवाणि छत्राकाणि भुक्त्वा "भूमिजं वा वृक्षजं वा छत्राकं भक्षयन्ति ये। ब्रह्मघ्नांस्तान्विजानीयात्" इति यमेन वृक्षजस्यापि निषेधात्। हरिणमांसं वा रासभमांसमिति भक्ष्याभक्ष्यतया यन्न ज्ञातं तथा हिंसास्थानं सूना ततो यदानीतं तद्भुक्त्वा चान्द्रायणमेव कुर्यात्॥१५५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्षणे।
नरकाकखराणां च तप्तकृच्छ्रं विशोधनम्॥१५६॥

He who has eaten dried meat, mushrooms growing on the ground, or (meat, the nature of) which is unknown, (or) such as had been kept in a slaughter-house, shall perform the same penance.

आममांसभक्षिणां ग्राम्यसूकरोष्ट्रग्राम्यकुक्कुटानां तथा मानुषकाकगर्दभानां प्रत्येकं बुद्धिपूर्वकं मांसभक्षणे वक्ष्यमाणं तप्तकृच्छ्रं प्रायश्चित्तम्। ग्राम्यसूकर-कुक्कुटयोर्बुद्धिपूर्वकभक्षणे पञ्चमाध्याये पातित्यमुक्तं तदभ्यासविषये व्याख्यातं इदं तु नाभ्यासविषये तप्तकृच्छ्रमित्यविरोधः॥१५६॥

मासिकान्नं तु योऽश्नीयादसमावर्तको द्विजः।
स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत्॥१५७॥

The atonement for partaking of (the meat of) carnivorous animals, of pigs, of camels, of cocks, of cros, of donkeys, and of human flesh, is a Tapta Kṛcchra (penance).

यो ब्रह्मचारी ब्राह्मणो मासिकश्राद्धसंबन्ध्यन्नमश्नाति। एतच्च सपिण्डीकरणात्पूर्वमेकोद्दिष्टश्राद्धार्थोपलक्षणम्। स त्रिरात्रमुपवसेत्। त्रिरात्रमध्ये एकस्मिन्नहनि जलमावसेत्॥१५७॥

ब्रह्मचारी तु योऽश्नीयान्मधु मांस कथंचन।
स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत्॥१५८॥

If a twice-born man, who has not returned (home from his teacher's house), eats food, given at a monthly (*Śrāddha*), he shall fast during three days and pass one day (standing) in water.

यो ब्रह्मचारी माक्षिकं मांसं वा अनिच्छातः आपदि वाद्यात्स प्राजापत्यं कृत्वा प्रारब्धब्रह्मचर्यव्रतशेषं समापयेत्॥१५८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च।
केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलाम्॥१५९॥

But a student who on any occasion eats honey or meat, shall perform an ordinary Kṛcchra (penance), and afterwards complete his vow (of studentship).

बिडालकाकमूषककुक्कुरनकुलानामुच्छिष्टं केशकीटरूपसंसर्गदुष्टं वा कृतमृत्क्षेपविशुद्धिकं ज्ञात्वा भुक्त्वा ब्रह्मसुवर्चलां क्वथितमुदकं पिबेत्॥१५९॥

अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता।
अज्ञानभुक्तं तूत्तार्यं शोध्यं वाप्याशु शोधनैः॥१६०॥

He who eats what is left by a cat, by a crow, by a mouse (or rat), by a dog, or by an ichneumon, or (food) into which a hair or an insect has fallen, shall drink (a decoction of) the Brahmasuvarcalā (plant).

आत्मनः शुद्धिकामेन प्रतिषिद्धमन्नं नादनीयम्। प्रमादात्तु भुक्तं वमितव्यम्। तदसंभवे प्रायश्चित्तेः क्षिप्रं शोधनीयम्। वमनपक्षे तु लघुप्रायश्चित्तं भवत्येव। ज्ञानतः पुनः पूर्वोक्तं प्रायश्चित्तम्॥१६०॥

एषोऽनाद्यादनस्योक्तो व्रतानां विविधो विधिः।
स्तेयदोषापहर्तृणां व्रतानां श्रूयतां विधिः॥१६१॥

He who desires to be pure, must not eat for bidden food, and mustr vomit up such as he has eaten unintenionally, or quickly atone for it by (various) means of purification.

अभक्ष्यभक्षणे यानि प्रायश्चित्तानि तेषामेतन्नानाप्रकारविधानमुक्तम्। स्तेयपापहारिणां विधानमधुना श्रूयताम्॥१६१॥

धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः।
स्वजातीयगृहादेव कृच्छ्राब्देन विशुद्धयति॥१६२॥

The various rules respecting penances for eating for-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

bidden food have been thus declared; hear now the law of those penances which remove the guilt of theft.

ब्राह्मणो ब्राह्मणगृहाद्धान्यभक्ताद्यन्नरूपाणि धनचौर्याणीच्छातः कृत्वा न त्वार्तायभ्रान्त्या नीत्वा संवत्सरं प्राजापत्यव्रताचरणेन शुध्यति। एतच्च देशकालद्रव्यपरिमाणस्वामिगुणाद्यपेक्षया महत्त्वादि बोद्धव्यम्। एवमुत्तरत्रापि ॥१६२॥

मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च।
कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतम्॥१६३॥

The chief of the twice-born, having voluntarily stolen (valuable) property, grain, or cooked food, from the house of a caste-fellow, is purified by performing Krcchra (penances) during a whole year.

पुरुषस्त्रीक्षेत्रगृहाणामन्यतमहरणे कूपजलस्य वापीजलस्य वा समस्तस्य वा हरणे चान्द्रायणं प्रायश्चित्तं मन्वादिभिः स्मृतम्॥१६३॥

द्रव्याणामल्पसाराणां स्तेयं कृत्वाऽन्यवेश्मतः।
चरेत्सान्तपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये॥१६४॥

The lunar penance has beend eclared to be the expiation for stealing men and women, and (for wrongfully appropriating) a field, a house, or the water of wells and cisterns.

द्रव्याणामल्पार्घाणामल्पप्रयोजनानां चानुक्तप्रायश्चित्तविशषाणां त्रपुसीसकादीनां परगृहाच्चौर्यं कृत्वा तदपहृतं द्रव्यं स्वामिने दत्त्वा सांतपनं कृच्छ्रं प्रायश्चित्तं वक्ष्यमाणं चात्मशुद्धये कुर्यात्। स्वामिनेऽपहृतं द्रव्यं निर्यात्येति सर्वस्तेयप्रायश्चित्तशेषः॥१६४॥

भक्ष्यभोज्यापहरणे यानशय्यासनस्य च।
पुष्पमूलफलानां च पञ्चगव्यं विशोधनम्॥१६५॥

He who has stolen objects of small value from the house of another man, shall, after restoring the (stolen article),

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

perform a Sāṁtapana Kṛcchra for his pruification.

भक्ष्यस्य मोदकादेः, भोज्यस्य पायसादेः, यानस्य शकटादेः, शय्यायाः, आसनस्य च, पुष्पमूलफलानां च प्रत्येकमपहरणे पञ्चगव्यपानं विशोधनम् ॥१६५॥

तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च।
चैलचर्मामिषाणां च त्रिरात्रं स्याद्भोजनम् ॥१६६॥

(To swallow) the five products of the cow (pañcagavya) is the atonement for stealing eatables of various kinds, a vehicle, a bed, a seat, flowers, roots, or fruit.

तृणकाष्ठवृक्षाणां शुष्कान्नस्य च तण्डुलादेर्वस्त्रचर्ममांसानां मध्ये एकस्याप्यपहरणे त्रिरात्रमुपवासं चरेत् ॥१६६॥

मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च।
अयः कांस्योपलानां च द्वादशाहं कणान्नता ॥१६७॥

Fasting during three (days and) nights shall be (the penance for stealing) grass, wood, trees, dry food, molasses, clothes, leather, and meat.

मणिमुक्ताविद्रुमताम्ररूप्यलोहकांस्योपलानां च प्रत्येकमपहरणे द्वादशाहं तण्डुलकणभक्षणं कुर्यात्। सर्वत्र चात्र सकृदभ्यासदेशकालद्रव्यस्वामिगुणादौ, शक्त्यपेक्षयोत्कृष्टापकृष्टद्रव्यापहारिविषयसमीकरणं समाधेयम् ॥१६७॥

कार्पासकीटजोर्णानां द्विशफैशफस्य च।
पक्षिगन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः ॥१६८॥

To subsist during twelve days on (uncooked) grains (is the penance for stealing) gems, pearls, coral, copper, silver, iron, brass, or stone.

कार्पासकृमिकोशजीर्णानां वस्त्राणां द्विशफैकशफस्य गोरश्वादेः पक्षिणां शुकादीनां गन्धानां च चन्दनप्रभृतीनां रज्ज्वाश्च प्रत्येकं हरणे त्र्यहं क्षीराहारः स्यात्। अत्रापि पूर्ववद्विषयसमीकरणपरिहारः स्वामिनश्चोत्कृष्टापकृष्टद्रव्यसमर्पणादपि वचनादेकरूपप्रायश्चित्ताविरोधः ॥१६८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः।
अगम्यागमनीयं तु व्रतैरेभिरपानुदेत्॥१६९॥

(For stealing) cotton, silk, wool, an animal with cloven hoofs, or one with uncloven hoofs, a bird, perfumes, medicinal herbs, or a rope (the penance is to subsist) during three days (on) milk.

एतैरुक्तैः प्रायश्चित्तैः स्तेयजनितपापं द्विजातिरपानुदेत्। अगम्यागमननिमित्तं पुनरेभिर्वक्ष्यमाणैर्व्रतैर्निर्हरेत्॥१६९॥

गुरुतल्पव्रतं कुर्याद्रेतः सिक्त्वा स्वयोनिषु।
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च॥१७०॥

By means of these penances, a twice-born man may remove the guilt of theft; but the guilt of approaching women who ought not to be approached (agamyā), he may expiated by (the following) peances.

स्वयोनिषु सोदर्यभगिनीषु तथा मित्रभार्यासु, पुत्रपत्नीषु, कुमारीषु, चाण्डालीषु, प्रत्येकं रेतः सिक्त्वा गुरुदारगमनप्रायश्चित्तं कुर्यात्। अत्रापि ज्ञानाभ्यासाद्यनुबन्धापेक्षया मरणान्तिकम्। अत एव "रेतः सिक्त्वा कुमारीषु चाण्डालीष्वन्त्यजासु च। सपिण्डापत्यदारेषु प्राणत्यागो विधीयते" इति यमेन मरणान्तिकमूपदिष्टमज्ञानात्तद्व्रतम्॥१७०॥

पैतृष्वसेयीं भगिनीं स्वस्त्रीयां मातुरेव च।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत्॥१७१॥

He who has had sexual intercourse with sisters by the same mother, with the wives of a friend, or of a son, with unmarried maides, and with females of the lowest castes, shall perform the penance, prescribed for the violation of a Guru's bed.

पितृष्वसुर्मातृष्वसुश्च दुहितरं भगिनीं मातुश्च सोदर्यभ्रातुर्दुहितरं सोदर्यभगिनीमिव निषिद्धगमनां गत्वा चान्द्रायणं कुर्यात् सकृदज्ञानव्यभिचारिताविषयमल्पत्वात्॥१७१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान्।
ज्ञातित्वेनानुपेयास्ताः पतति ह्युपयन्नधः॥१७२॥

He who has approached the daughter of his father's sister, (who is almost equal to) a sister, (the daughter) of his mother's sister, or of his mother's full brother, shall perform a lunar penance.

तिस्र एताः पैतृष्वसेय्याद्या भार्यार्थे प्राज्ञो नोद्वहेत्। ज्ञातित्वेन बान्धवत्वेन ता नोपेतव्याः। यस्तादेता उपयन्नुपागच्छन्नरकं याति। "असपिण्डा च या मातुः" (अ. ३ श्लो. ५) इत्यनेन निषेधसिद्धौ दाक्षिणात्याचारदर्शननिषेधदाढ्यार्थं पुनर्वचनम्॥१७२॥

अमानुषीषु पुरुष उदक्यायामयोनिषु।
रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत्॥१७३॥

A wise man should not take as his wife any of these three; they must not be wedded because they are (Sapiṇḍa) relatives, he who marries (one of them), sinks low.

अमानुषीषु वडवाद्यासु न गवि। "गोष्ववकीर्णो संवत्सरं प्राजापत्यं चरेत्" इति शङ्खलिखितादिभिर्गुरुप्रायश्चित्तामिधानात्। तथा रजस्वलायां योनितश्चान्यत्र स्त्रियां, जले रेतःसेकं कृत्वा पुरुषः सांतपनं कृच्छ्रं कुर्यात्॥१७३॥

मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः।
गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत्॥१७४॥

A man who has committed a bestial crime, or an unnatural crime with a female, or has had intercourse in water, or with a menstruating woman, shall perform a Sāṁtapana Kṛcchra.

यत्र देशे क्वापि पुरुषे मैथुनं सेवित्वा स्त्रियां, गोयाने, शकटादौ, जले, दिवाकाले मैथुनं च सेवित्वा सवस्त्रश्च स्नायात्॥१७४॥

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति॥१७५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

A twice-born man who commits an unnatural offence with a male, or has intercourse with a female in a cart drawn by oxen, in water, or in the day-time, shall bathe, dressed in his clothes.

चण्डालस्यान्त्यजानां च म्लेच्छशरीरादीनामज्ञानतो ब्राह्मणः स्त्रियो गत्वा तेषां चान्नं भुक्त्वा तेभ्यः प्रतिगृह्य पतति। पतितस्य प्रायश्चित्तं कुर्यात्। एतच्च गुरुत्वाच्चाभ्यासतो भोजनप्रतिग्रहविषयम्। ज्ञानात्तु तेषां गमनं कृत्वा समानतां गच्छति। एतच्च प्रायश्चित्तगौरवार्थम्॥१७५॥

विप्रदुष्टां स्त्रियं भर्ता निरुन्ध्यादेकवेश्मनि।
यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम्॥१७६॥

A Brāhmaṇa who unintenionally approaches a woman of the Caṇḍāla or of (any other) very low caste, who eats (the food of such persons) and accepts (present from them) becomes an outcast; but (if he does it) intentionally, he becomes their equal.

विशेषेण प्रदुष्टाम् इच्छया व्यभिचारिणीमित्यर्थः। भर्ता निरुन्ध्यात्पत्नीं कार्येभ्यो निवर्त्य निगडबद्धामिवैकगृहे धारयेत्। यच्च पुरुषस्य सजातीयपरदारगमने प्रायश्चित्तं तदेवैनां कारयेत्। ततश्च 'स्त्रीणामर्धं प्रदातव्यम्'' इति यद्वसिष्ठादिभिरुक्तं तदनिच्छया व्यभिचारे च कर्तव्यम्॥१७६॥

सा चेत्पुनः प्रदुष्येत्तु सद्वेशेनोपयन्त्रिता।
कृच्छ्रं चान्द्रायणं चैव तदस्याः पावनं स्मृतम्॥१७७॥
[ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेऽपसंगताः।
अप्रजाता विशुध्येयुः प्रायश्चित्तेन नेतराः॥९॥]

An exceedingly corrupt wife let her husband confine to one apartment, and comnpel her to perform the penance which is prescribed for males in cases of adultery.

सा स्त्री सजातीयगमने सकृद्दुष्टा कृतप्रायश्चित्ता यदि पुनः सजातीयेनाभ्यर्थिता सती तद्गमनं कुर्यात्तदास्याः प्रायश्चित्तं प्राजापत्यं कृच्छ्रचान्द्रायणं च मन्वादिभिः स्मृतम्॥१७७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः।
तद्भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति॥१७८॥

If, being solicited by a man (of) equal (caste), she (afterwards) is again unfaithful, then a Kṛcchra and a lunar penance are prescribed as the means of purifying her.

वृषल्यत्र चण्डाली प्रायश्चित्तगौरवात्। चण्डालीगमने यदेकरात्रेण ब्राह्मणः पापमर्जयति तद्भैक्षाशी नित्यं सावित्र्यादिकं जपस्त्रिभिर्वर्षैरपनुदति। तथा चापस्तम्बः- "यदेकरात्रेण करोति पापं कृष्णं वर्ण ब्राह्मणः सेवमानः। चतुर्थकाल उदक आत्मजापी भैक्षचारी त्रिभिर्वर्षैस्तद्व्यपोहति पापम्।" मेधातिथिस्तु इत्थमेव व्याख्यातवान्। गोविन्दराजस्त्वक्रमपरिणीतशूद्रागमन-प्रायश्चित्तमिदमाह॥१७८॥

एषा पापकृतामुक्ता चतुर्णामपि निष्कृतिः।
पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः॥१७९॥

The sin which a twice-born man commits by dallying one night with a Vṛṣalī, he removes in three years, by subsisting on alms and daily muttering (sacred texts).

इयं हिंसाभक्ष्यभक्षणस्तेयागम्यागमनकारिणां चतुर्णामपि पापकृतां विशुद्धिरुक्ता। इदानीं साक्षात्पापकृद्भिः सह संसर्गिणामिमा वक्ष्यमाणाः संशुद्धीः शृणुत॥१७९॥

संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात्॥१८०॥

The atonement (to be performed) by sinners (of) four (kinds) even, has ben thus declared; hear now the penances for those who have intercourse with outcasts.

पतितेन सह संसर्गमाचरन् एकयानगमनैकासनोपवेशनैपङ्क्तिभोजनरूपा-न्संसर्गानाचरन्संवत्सरेण पतति। नतु याजनाध्यापनाद्यौनात्संवत्सरेण पतति किंतु सद्य एवेत्यर्थः। अध्यापनमत्रोपनयनपूर्वकं सावित्रीश्रावणम्। याजनादीनां च सद्यः पातित्यमाह देवलः-"याजनं योनिसंबन्धं स्वाध्यायं सह भोजनम्। कृत्वा सद्यः पतन्त्येते पतितेन न संशयः॥" विष्णुः-"आ संवत्सरात्पतति पतितेन

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सहाचरन्। सहयानासनाभ्यासाद्यौनात्तु सद्य एव हि॥'' बौधायनः- ''संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनात्सद्यो न शयनासनात्'' इति। गोविन्दराजस्तु याजनादीनां त्रयाणां संवत्सरेण पातित्यहेतुत्वं सहासनादीनां लघुत्वान्न संवसरेण किंतु तस्मादूर्ध्वमपीति व्याचष्टे। अस्मदयिमनुव्याख्यामुनि-व्याख्यानुसारिणी। नैनां गोविन्दराजस्य कल्पनामनुरुन्ध्महे॥१८०॥

यो येन पतितेनैषां संसर्गं याति मानवः।
स तस्यैव व्रतं कुर्यात्तत्ससंर्गविशुद्धये॥१८१॥

He who associates with an outcast, himself becomes an outcast after a year, not by sacrificing for him, teahcing him, or forming a matrimonial alliance with him, but by using the same carriage or seat, or by eating with him.

पतितशब्दोऽयं पापकारिवचनः सकलपापिनामविशेषपाठात्। एषां पतितान मध्ये यो येन पापकारिणा सह पूर्वोक्तं संसर्ग करोति स तस्यैव व्रतरूपं प्रायश्चित्तं कुर्यान्नतु मरणान्तिकमित्यभिहितं तदपि व्रतं संसर्गिणा क्रियमाणम् ''ब्रह्महा द्वादशसमाः'' (अ. ११ श्लो. ७२) इत्यादिकं पादहीनं कर्तव्यम्। तथाच व्यासः-''यो येन संसृजेद्वर्षं सोऽपि तत्समतामियात्। पादन्यूनं चरेत्सोऽपि तस्य तस्य व्रतं द्विजः''॥१८१॥

पतितस्योदकं कार्यं सपिण्डैर्बान्धवैर्बहिः।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ॥१८२॥

He who associates with any one of those outcasts, must perform, in order to atone for (such) intercourse, the penance prescribed for that (sinner).

महापातकिनो जीवत एव प्रेतस्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानोदकैश्च ग्रामाद्बहिर्गत्वा ज्ञात्यृत्विग्गुरुसंनिधाने रिक्तायां नवम्यां तिथौ दिनान्ते कर्तव्या॥१८२॥

दासी घटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह॥१८३॥

The Sapiṇḍas and Samānodakas of an outcast must of-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

fer (a libation of) water (to him, as if he were dead), outside (the village), on an inauspicious day, in the evening and in the presence of the relatives, officiating priests, and teachers.

सपिण्डसमानोदकप्रयुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् यथा स निरुदको भवति। तदनु ते सपिण्डाः समानोदकैः सहाहोरात्रमशौचमाचरेषुः ॥१८३॥

निवर्त्तेरंश्च तस्मात्तु सम्भाषणसहासने।
दायाद्यस्य प्रदानं च यात्रा चैव हि लौकिकी ॥१८४॥

A female slave shall upset with her foot a pot filled with water, as if it were for a dead person; (his *Sapiṇḍas*) as well as the *Samānodakas* shall be impure for a day and a night.

तस्मात्पतितात्सपिण्डादीनां संभाषणमेकासनोपवेशनं च तस्मै ऋक्थप्रदानं सांवत्सरिकादौ निमन्त्रणादिरूपो लोकव्यवहार एतानि निवर्तेरन् ॥१८४॥

ज्येष्ठता च निवर्त्तेत ज्येष्ठावाप्यं च यद्धनम्।
ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान्गुणतोऽधिकः ॥१८५॥

But thenceforward it shall be forbidden to converse with him, to sit with him, to give him a share of the inheritance, and to hold with him such intercourse as is usual among men.

ज्येष्ठस्य यत्प्रत्युत्थानादिकं कार्यं तत्तस्य न कार्यम्। ज्येष्ठस्य च तस्य विंशत्युद्धारादिकं धनं न देयम्। यद्यपि ऋक्थप्रदानप्रतिषेधादेवाप्युद्धारप्रतिषेधः सिद्धस्तथापि यवीयसस्तत्प्राप्त्यर्थमनूद्यते। तस्यैव ज्येष्ठस्य संबन्धि धनं सोद्धारांशं तदनुजो गुणाधिको लभते ॥१८५॥

प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवम्।
तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये ॥१८६॥

And (if he be the eldest) his right of primo-geniture

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

shall be withheld and the additional share due to the eldest son; and in his stead a younger brother, excelling in virtue, shall obtain the share of the eldest.

कृते पुनः पतितेन प्रायश्चित्ते सपिण्डसमानोदकास्तेनैव कृतप्रायश्चित्तेन सह पवित्रे जलाधारे स्नात्वा जलपूर्णं नवं घटं प्रक्षिपेयुः। इह नवघटग्रहणाद्दासीघटमित्यत्र कृतोपयोगिघटः प्रतीयते॥१८६॥

स त्वप्सु तं घटं प्रास्य प्रविश्य भवनं स्वकम्।
सर्वाणि ज्ञातिकार्याणि यथापूर्वं समाचरेत्॥१८७॥

But when he has performed his penance, they shall bathe with him in a holy pool and throw down a new pot, filled with water.

स कृतप्रायश्चित्तः तं पूर्वोक्तघटं जलमध्ये क्षिप्त्वा ततः स्वकीयभवनं प्रविश्य यथापूर्वं सर्वाणि ज्ञातिकर्माणि कुर्यात्॥१८७॥

एतदेव विधिं कुर्याद्योषित्सु पतितास्वपि।
वस्त्रान्नपानं देयं तु वसेयुश्च गृहान्तिके॥१८८॥

But he shall throw that pot into water, enter his house and perorm, as before, all the duties incumbent on a relative.

स्त्रीष्वपि पतितास्वेवमेव पतितस्योदकं कार्यमित्यादिविधिं भर्त्रादिसपिण्डसमानोदकवर्गः कुर्यात्। ग्रासाच्छादनानि पुनराभ्यो देयानि। गृहसमीपे चासां वासार्थं कुटीर्दद्युः॥१८८॥

एनस्विभिरनिर्णिक्तैर्नार्थं किञ्चिचत्सहाचरेत्।
कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्॥१८९॥

Let him follow the same rule in the case of female outcasts; but clothes, food, and drink shall be given to them, and they shall live close to the (family-) house.

पापकारिभिरकृतप्रायश्चित्तैः सह दानप्रतिग्रहादिकमर्थं किंचिन्नानुतिष्ठेत्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कृतप्रायश्चित्तान्नैव कदाचिदपि पूर्वकृतपापत्वेन निन्देत्किंतु पूर्ववद्व्यवहरेत् ॥१८९॥

अस्यापवादमाह–

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् ॥१९०॥

Let him not transact any business with unpurified sinners; but let him in no way reproach those who have made atonement.

बालं यो हतवान्, कृतोपकारमपकाराचरणेन यो विनाशितवान्, प्राणरक्षार्थमागतं यो हतवान्, स्त्रियं च यो व्यापादितवानेतान्यथावत्कृतप्रायश्चित्तानपि संसर्गितया न परिवसेत् ॥१९०॥

येषां द्विजानां सावित्री नानूच्येत यथाविधि।
तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ॥१९१॥

Let him not dwell together with the murderers of children, with those who have returned evil for good, and with the slayer of suppliants for protection or of women, though they may have been purified according to the sacred law.

येषां ब्राह्मणक्षत्रियविशाम् आनुकल्पिककाल उपनयनं यथाशास्त्रं न कृतवान् तान्प्राजापत्यत्रयं कारयित्वा यथाशास्त्रमुपनयेत्। यत्तु याज्ञवल्क्यादिभिर्व्रात्यस्तोमादिप्रायश्चित्तमुक्तं तेन सहास्य गुरुलाघवमनुसंधाय जातिशक्त्याद्यपेक्षो विकल्पो मन्तव्यः ॥१९१॥

प्रायश्चित्तं चिकीर्षन्ति विकर्मस्थास्तु ये द्विजाः।
ब्रह्मणा च परित्यक्तास्तेषामप्येतदादिशेत् ॥१९२॥

Those twice-born men who may not have been taught the Sāvitrī (at the time) prescribed by the rule, he shall cuase to perform three *Kṛcchra* (peances) and afterwards initiate them in accordance with the law.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ये प्रतिषिद्धशूद्रसेविनो द्विजास्ते चोपनीता अप्यनधीतवेदाः प्रायश्चित्तं कर्तुमिच्छन्ति तेषामप्येतत्प्राजापत्यादित्रयमुपदिशेत् ॥१९२॥

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्।
तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसैव च ॥१९३॥

Let him prescribe the same (expiation) when twice-born men, who follow forbidden occupations or have neglected (to learn) the Veda, desire to perform a penance.

गर्हितेन कर्मणा निषिद्धदुःप्रतिग्रहादिना ब्राह्मणा यद्धनमर्जयन्ति तस्य धनस्य त्यागेन जपतपोभ्यां वक्ष्यमाणाभ्यां शुध्यन्ति। धनत्यागेन च प्रायश्चित्तविधानाद्बहुमूल्ये च करितुरगादावल्पमूल्ये च लोहादौ परिगृहीते तुल्यप्रायश्चित्ताभिधानमुपपन्नम्। एवमविक्रय्यविक्रयादावपि ॥१९३॥

जपित्वा त्रीणि सावित्रयाः सहस्राणि समाहितः।
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥१९४॥

If Brāhmaṇas acquire property by a reprehensible action, they become pure by relinquishing it, muttering prayers, and (performing) austerities.

त्रीणि सावित्रीसहस्राणि जपित्वा गोष्ठे वा मासं क्षीराहारोऽसत्प्रतिग्रहजनितात्पापान्मुक्तो भवति। शूद्रप्रतिग्रहादावप्येतदेव प्रायश्चित्तम्। द्रव्यदोषेण च दातृदोषेणापि प्रतिग्रहस्य गर्हितत्वाविशेषादिति ॥१९४॥

उपवासकृशं तं तु गोव्रजात्पुनरागतम्।
प्रणतं प्रतिपृच्छेयुः साम्यं सौम्येच्छसीति किम् ॥१९५॥

By muttering with a concentrated mind the Sāvitrī three thousand times, (dwelling) for a month in a cow-house, (and) subsisting on milk, (a man) is freed from (the guilt of) accepting presents from a wicked man.

केवलक्षीराहारेण इतरभोजनव्यावृत्त्या कृशदेहं गोष्ठात्प्रत्यागतं प्रणतं नम्रीभूतं किमस्माभिः सह साम्यमिच्छसि पुनरसत्प्रतिग्रहं न करिष्यसीत्येवं धर्मं ब्राह्मणाः परिपृच्छेयुः ॥१९५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सत्यमुक्त्वा तु विप्रेषु विकिरेद्यवसं गवाम्।
गोभिः प्रवर्त्तिते तीर्थे कुर्युस्तस्य परिग्रहम्॥१९६॥

But when he returns from the cow-house, emaciated with his fast, and reverently salutes, (the Brāhmaṇas) shall ask him, 'Friend, dost thou desire to become our equal?'

सत्यमेतत्पुनरसत्प्रतिग्रहं न करिष्यामीत्येवं ब्राह्मणेषूक्त्वा घासं गवां दद्यात्। तस्मिन्यवसं भक्ष्यमाणे देशे गोभिः पवित्रीकृतत्वात्तीर्थीभूते ब्राह्मणास्तस्य संव्यवहारे स्वीकारं कुर्युः॥१९६॥

व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च।
अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति॥१९७॥

If he answer to the Brāhmaṇas, 'Forsooth, (I will not offened again),' he shall scatter (some) grass for the cows; if the cows hallow that place (by eating the grass) the (Brāhmaṇa) shall re-admit him (into their community).

व्रात्यानाम् "अत ऊर्ध्वं त्रयोऽप्येते" (अ. २ श्लो. ३९) इत्युक्तानां व्रात्यस्तोमादियाजनं कृत्वा पितृगुर्वादिव्यतिरिक्तानां च निषिद्धौर्ध्वदेहिक-दाहश्राद्धादि कृत्वाऽभिचारं च श्येनादिकम्। अभिचारोऽनभिचारणीयस्य। अहीनं यागविशेषः। "अहीनयजनशुचिकरम्" इति श्रुतेः। त्रिरात्रादि तस्य यजनं कृत्वा त्रिभिः कृच्छ्रैर्विशुध्यति॥१९७॥

शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः।
संवत्सरं यवाहारस्तत्पापमपसेधति॥१९८॥

He who has sacrificed for Vrātyas, or has performed the obsequies of strangers, or a magic sacrifice (intended to destroy life) or an Ahīna sacrifice, removes (his guilt) by three *Kṛcchra* (peances).

शरणागतं परित्राणार्थमुपगतं शक्तः सन्नुपेक्षते द्विजातिरनध्याप्यं च वेदमध्याप्य तज्जनितं पापं संवत्सरं यवाहारोऽपनुदति॥१९८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च।
नराश्वोष्ट्रवराहैश्च प्राणायामेन शुद्धयति॥१९९॥
[शुनाऽऽघ्रातावलीढस्य दन्तैर्विदलितस्य च।
अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपचूलनम्॥१०॥]

A twice-born man who has cast off a suppliant for protection, or has (improperly) divulged the Veda, atons for his offence, if he subsists during a year on barley.

कुक्कुरसृगालगर्दभनराश्वराहाद्यैर्ग्राम्यैश्चाममांसादैर्मार्जारादिभिर्दष्टः प्राणायामेन शुध्यति॥१९९॥

षष्ठान्नकालता मासं संहिताजप एव वा।
होमाश्च सकला नित्यमपाङ्क्त्यानां विशोधनम्॥२००॥

अपाङ्क्त्याः "ये स्तेन पतिताः क्लीबाः" (अ. ३ श्लो. १५०) इत्यादिनोक्तास्तेषां विशेषतोऽनुपदिष्टप्रायश्चित्तानां मासं त्रयहमभुक्त्वा तृतीयेऽह्नि सायं भोजनं वेदसंहिताजपो "देवकृतस्यैनसोऽवयजनमसि" इत्यादिभिरष्टभिर्मन्त्रैर्होमः प्रत्येकं कार्यः। एतत्समुद्दिष्टं पापशोधनम्॥२००॥

He who has been bitten by a dog, a jackal, or a donkey, by a tame carnivorous animal, by a man, a horse, a camel, or a (village-) pig, becomes pure by suppressing his breath (Prāṇāyāma).

उष्ट्रयानं समारुह्य खरयानं तु कामतः।
स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुद्धयति॥२०१॥

To eat during a month at each sixth mealtime (only), to recite the Saṁhitā (of a Veda), and (to perform) daily the Śākala oblations, are the means of purifying those excluded from society at repasts (*Apāṅktya*).

उष्ट्रैर्युक्तं यानं शकटादि एवं खरयानमपि तत्कामत आरुह्य अव्यवधान उष्ट्रखराभ्यां याने प्राणायामबहुत्वं नग्नश्च कामतः स्नानं कृत्वा प्राणायामेन शुद्धो भवति॥२०१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विनाद्भिरप्सु वाप्यार्तः शारीरं सन्निवेश्य च।
सचैलो बहिराप्लुत्य गामालभ्य विशुद्ध्यति॥२०२॥

A Brāhmaṇa who voluntarily rode in a carriage drawn by camels or by asses, and he who bathed naked, become pure by suppressing his breath (*Prāṇāyāma*).

असंनिहितजलो जलमध्ये वा वेगार्तो मूत्रं पुरीषं वा कृत्वा सवासाः बहिर्ग्रामान्नद्यादौ स्नात्वा गां च स्पृष्ट्वा विशुद्धो भवति॥२०२॥

वेदोदितानां नित्यानां कर्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्॥२०३॥

He who has relieved the ncessities of nature, being greatly pressed, either without (using) water or in water, becomes pure by bathing outside (the village) in his clothes and by touching a cow.

वेदविहितानां कर्मणामग्निहोत्रादीनामनुपदिष्टप्रायश्चित्तविशेषाणां च परिलोपे स्नातकव्रतानां चतुर्थाध्यायोक्तानामतिक्रमे सत्येकाहोपवासं प्रायश्चित्तं कुर्यात्॥२०३॥

हुङ्कारं ब्राह्मणस्योक्त्वा त्वङ्कारं च गरीयसः।
स्नात्वाऽनश्नन्नहः शेषमभिवाद्य प्रसादयेत्॥२०४॥

Fasting is the penance for omitting the daily rites prescribed by the Veda and for neglecting the special duties of a Snātaka.

हुं तूष्णीं स्थीयतामित्याक्षेपं ब्राह्मणस्य कृत्वा त्वंकारं च विद्याद्यधिकस्योक्त्वाऽभिवादनकालादारभ्याहःशेषं यावत्स्नात्वा भोजननिवृत्तः पादोपग्रहणेनापगतकोपं कुर्यात्॥२०४॥

ताडयित्वा तृणेनापि कण्ठे वाऽऽबध्य वाससा।
विवादे वा विनिर्जित्य प्रणिपत्य प्रसादयेत्॥२०५॥

He who has said 'Hum' to a Brāhmaṇa, or has addressed one of his betters with 'Thou', shall bathe, fast during the remaining part of the day, and appease (the person of-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

fended) by a reverential salutation.

प्राकृतं ब्राह्मणं तृणेनापि ताडयित्वा कण्ठे वाऽऽबध्य वाससा वा वाक्कलहेन जित्वा प्रणिपातेन प्रसादयेत् ॥२०५॥

अवगूर्य त्वब्दशतं सहस्त्रमभिहत्य च।
जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥२०६॥

He who has struck (a Brāhmaṇa) evenwith a blade of grass, tied him by the neck with a cloth, or conquered him in an alteracation, shall appease him by a prostration.

ब्राह्मणस्य हननेच्छया दण्डमुद्यम्य वर्षशतं नरकं प्राप्नोति। दण्डादिना पुनः प्रहृत्य वर्षसहस्रं नरकं प्राप्नोति ॥२०६॥

शोणितं यावतः पांसून्संगृह्णाति महीतले।
तावन्त्यब्दसहस्त्राणि तत्कर्ता नरके वसेत् ॥२०७॥

But he who, intending to hurt a Brāhmaṇa, has threatened (him with a stick and the like) shall remain in hell during a hundred years; he who (actually) struck him, during one thousand years.

प्रहतस्य ब्राह्मणस्य रुधिरं यावत्संख्याकान् रजःकणान्भूमौ पिण्डीकरोति तावत्संख्याकानि वर्षसहस्राणि तच्छोणितोत्पादको नरके वसेत् ॥२०७॥

अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने।
कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितम् ॥२०८॥

As many particles of dust as the blood of a Brāhmaṇa causes to coagulate, for so many thousand years shall the shedder of that (blood) remain in hell.

ब्राह्मणस्य हननेच्छया दण्डाद्युद्यमने कृच्छ्रं कुर्यात्। दण्डादिप्रहारे दत्तेऽतिकृच्छ्रं वक्ष्यमाणं चरेत्। रुधिरमुत्पाद्य कृच्छ्रातिकृच्छ्रौ कुर्वीत ॥२०८॥

अनुक्तनिष्कृतीनां तु पापानामपनुत्तये।
शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् ॥२०९॥

For threatening a Brāhmaṇa, (the offender) shall per-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

form a *Kṛcchra*, for striking him an *Atikṛcchra*, for shedding his blood a *Kṛcchra* and an *Atikṛcchra*.

अनुक्तप्रायश्चित्तानां यथा प्रतिलोमवधादिकृतानां निर्हरणार्थं कर्तुः शरीरधनानि सामर्थ्यमवेक्ष्य पापं च ज्ञात्वा ज्ञानाज्ञानसकृदावृत्त्यनुबन्धादिरूपेण प्रायश्चित्तं प्रकल्पयेत् ॥२०९॥

यैरभ्युपायैरेनांसि मानवो व्यपकर्षति।
तान्वोऽभ्युपायान्वक्ष्यामि देवर्षिपितृसेवितान् ॥२१०॥

For the expiation of offences for which no atonement has been prescribed, let him fix a penance after considereing (the offender's) strength and the (nature of the) offence.

यैर्हेतुभिर्मनुष्यः पापान्यपनुदति तान्पापनाशहेतून्देवर्षिपितृभिरनुष्ठितान् युष्माकं वक्ष्यामि ॥२१०॥

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः ॥२११॥

I will (now) describe to you those means, adopted by the gods, the sages, and the manes, through which a man may remove his sins.

प्रजापत्याख्यं कृच्छ्रमाचरन् द्विजातिराद्यं दिनत्रयं प्रातर्भुञ्जीत। प्रातःशब्दोऽयं भोजनानामौचित्यप्राप्तदिवाकालपरः। अत एव वसिष्ठः -"त्र्यहं दिवा भुङ्क्ते नक्तमति च त्र्यहं त्र्यहं अयाचितव्रतं त्र्यहं न भुङ्क्ते" इति च कृच्छ्रः। आपस्तम्बोऽप्याह- "त्र्यहं नक्तशी दिवाशी च ततस्त्र्यहम्। त्र्यहमयाचितव्रतस्त्रयहं नाश्नाति किंचन।" इति कृच्छ्रद्वादशरात्रस्य विधिः। अपरं च दिनत्रयं सायंसंध्यायामतीतायां भुञ्जीत। अन्यद्दिनत्रयमयाचितं तावदन्नं भुञ्जीत। शेषं च दिनत्रयं न किंचिदश्नीयात् अत्र ग्राससंख्यापरिमाणापेक्षायां पराशरः-"सायं द्वात्रिंशतिर्ग्रासाः प्रातः षड्विंशतिस्तथा। आयाचिते चतुर्विंशत्परं चानशनं स्मृतम्। कुक्कुटाण्डप्रमाणं च यावांश्च प्रविशेन्मुखम्। एवं ग्रासं विजानीयाच्छुद्ध्यर्थं ग्रासशोधनम्। हविष्यं चान्नमश्नीयाद्यथा रात्रौ तथा दिवा। त्रींस्त्रीण्यहानि शास्त्रीयान्ग्रासान्संख्याकृतान्यथा। अयाचितं तथैवाद्यादुपवासस्त्र्यहं भवेत्" ॥२११॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥ २१२॥

A twice-born man who performs (the *Kṛcchra* penance), revealed by Prajāpati, shall eat during three days in the morning (only), during (the next) three days in the evening (only), during the (following) three days (food given) unasked, and shall fast during another period of three days.

गोमूत्राद्येकीकृत्य एकैकस्मिन्नहनि भक्षयेन्नान्यत्किंचिदद्यात्। अपरदिने चोपवास इत्येतत्सांतपनं कृच्छ्रं स्मृतम्। यदा तु गोमूत्रादिषट् प्रत्येकं षट् दिनान्युपभुज्य सप्तमे दिने चोपवासस्तदा महासांतपनं भवति। तथा च याज्ञवल्क्यः-"कुशोदकं च गोक्षीरं दधि मूत्रं शकृदघृतम्। जग्ध्वापरेऽह्न्युपवसेत्कृच्छ्रं सांतपनं चरन्। पृथक् सांतपनद्रव्यैः षडहः सोपवासिकः। सप्ताहेन तु कृच्छ्रोऽयं महासांतपनं स्मृतम्॥" इति॥२१२॥

एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः॥ २१३॥

(Subsisting on) the urine of cows, cowdung, milk, sour milk, clarified butter, and a decoction of Kuśa-grass, ans fasting during one (day and) night, (that is) called a Sāṁtapana Kṛcchra.

अतिकृच्छ्रं द्विजातिरनुतिष्ठन्प्रातःसायमयाचितादिरूपेणैकैकं ग्रासं त्र्यहाणि त्रीणि त्रीणि पूर्ववत् अन्त्यच्च त्र्यहं न किंचिद्भुञ्जीत॥२१३॥

तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्।
प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः॥ २१४॥
[अपां पिबेच्च त्रिपलं पलमेकं च सर्पिषः।
पयः पिबेत्तु त्रिपलं त्रिमात्रं चोक्तमानतः॥ ११]

A twice-born man who performs an *Atikṛcchra* (penance), must take his food during three periods of three days in the manner described above, (but) one mouthful only at each meal, and fast during the last three days.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तप्तकृच्छ्रं चरन्द्विजातिः त्र्यहमुष्णोदकं त्र्यहमुष्णक्षीरं त्र्यहमुष्णघृतं त्र्यहमुष्णवायुमेकवारं स्नानं कुर्वन्संयमवान्पिबेत्। अत्र पराशरोक्तो विशेषः-"षट्पलं तु पिबेदम्भस्त्रिपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिः-स्तप्तकृच्छ्रं विधीयते"॥२१४॥

यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्।
पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः॥२१५॥

A Brāhmaṇa who performs a Taptakṛcchra (peanace) must drink hot water, hot milk, hot clarified butter and (inhale) hot air, each during three days, and bathe once with a concentrated mind.

विगतानवधानस्य संयतेन्द्रियस्य द्वादशाहमभोजनमेव पराकाख्यः कृच्छ्रः सकृदावृत्तितारतम्येन गुरुलघुसमफलपापापनोदनः॥२१५॥

एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्धयेत्।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम्॥२१६॥

A fast for twelve days by a man who controls himself and commits no mistakes, is called a Parāka Kṛcchra, which removes all guilt.

सायंप्रातर्मध्याह्नेषु स्नानं कुर्वाणः पौर्णमास्यां पञ्चदश ग्रासानशित्वा ततः कृष्णप्रतिपत्क्रमेणैकैकं ग्रासं ह्रासयेत्तथा चतुर्दश्यामेको ग्रासः संपद्यते। ततोऽमावास्यायामुपोष्य शुक्लप्रतिपत्प्रभृतिभिरेकैकं ग्रासं वृद्धिं नयेत्। एवं पौर्णमास्यां पञ्चदश ग्रासाः संपद्यन्ते। एतत्पिपीलिकामध्याख्यं चान्द्रायणं स्मृतम्॥२१६॥

एतमेव विधिं कृत्स्नमाचरेद्यवमध्यमे।
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम्॥२१७॥

If one diminshes (one's food daily by) one mouthful during the dark (half of the month) and increases (it in the same manner) during the bright half, and bathes (daily) at

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

the time of three libations (morning, noon, and evening), that is called a lunar penance (Cāndrāyaṇa).

एतमेव पिण्डह्रासवृद्धित्रिषवणस्नानात्मकं विधानं यवमध्याख्ये चान्द्रायणे शुक्लपक्षमादितः कृत्वा संयतेन्द्रियश्चान्द्रायणमनुतिष्ठन्नाचरेत्। ततश्च शुक्लप्रतिपदमारभ्य एकैकं पिण्डं वर्धयेत्। यथा पौर्णमस्यां पञ्चदश ग्रासाः संपद्यन्ते। ततः कृष्णप्रतिपदमारभ्य एकैकं पिण्डं "ह्रासयेत्। यथाऽमावास्यायामुपवासो भवति ॥२१७॥

अष्टावष्टौ समश्नीयात्पिण्डान्मध्यन्दिने स्थिते।
नियतात्मा हविष्याशी यतिश्चान्द्रायणं चरन्॥२१८॥

Let him follow throughout the same rule at the (Cāndrāyaṇa, called) *yavamadhyama* (shaped like a barley-corn), (but) let him (in that case) begin the lunar peannce, (with a) controlled (mind), on the first day of the bright half (of the month).

यतिचान्द्रायणमनुतिष्ठन् शुक्लपक्षात्कृष्णपक्षाद्वारभ्य मासमेकं संयतेन्द्रियः प्रत्यहमष्टावष्टौ ग्रासान्मध्यंदिने भुञ्जीत। मध्यंदिन इति गृहस्थब्रह्मचारिणोः सायंभोजननिवृत्त्यर्थम् ॥२१८॥

चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम्॥२१९॥

He who performs the lunar penance of ascetics, shall eat (during a month) daily at midday eight mouthfuls, controlling himself and consuming sacrificial food (only).

प्रातश्चतुरो ग्रासानश्नीयात्। अस्तमिते च सूर्ये चतुरो ग्रासान्भुञ्जीत। एतच्छिशुचान्द्रायणं मुनिभिः स्मृतम् ॥२१९॥

यथा कथञ्चित्पिण्डानां तिस्रोऽशीतीः समाहितः।
मासेनाश्नन्हविष्यस्य चन्द्रस्यैति सलोकताम्॥२२०॥

If a Brāhmaṇa, with concentrated mind, eats (during a month daily) four mouthfuls in a morning and four after

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

sunset, (that is) called the lunar penance of children.

नीवारादिहविष्यसंबन्धिनां ग्रासानां द्वे शते चत्वारिंशदधिके कदाचिद्दश कदाचित्पञ्च कदाचित्षोडश कदाचिदुपवास इत्येवमाद्यनियमेन यथाकथंचित्पिण्डान्मासेन संयतवान्भुञ्जानश्चन्द्रसलोकतां याति। एवं पापक्षयार्थमभ्युदयार्थं चेदमुक्तम्। अत एव याज्ञवल्क्यः-"धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम्। कृच्छ्रकृच्छ्रमकामस्तु महतीं श्रियमाप्नुयात्।" (अ. ३ श्लो. ३२६-२७) अतः प्राजापत्यादिकृच्छ्रमप्यभ्युदयफलमिति याज्ञवल्क्येनोक्तम्॥२२०॥

एतद्रुद्रास्तथादित्या वसवश्चाचरन्व्रतम्।
सर्वाकुशलमोक्षाय मरुतश्च महर्षिभिः॥२२१॥

He who, concentrating his mind, eats during a month in any way thrice eighty mouthfuls of sacrificial food, dwells (after death) in the world of the moon.

एतच्चान्द्रायणाख्यं व्रतं रुद्रादित्यवसुमरुतश्च महर्षिभिः सह सर्वपापनाशाय गुरुलघुपापापेक्षया सकृदावृत्तिप्रकारेण कृतवन्तः॥२२१॥

महाव्याहृतिभिर्होमः कर्तव्यः स्वयमन्वहम्।
अहिंसासत्यमक्रोधमार्जवं च समाचरेत्॥२२२॥

The Rudras, likewise the Ādityas, the Vasus and the Maruts, together with the great sages, practised this (rite) in order to remove all evil.

महाव्याहृतिभिर्भूर्भुवःस्वरेताभिः "आज्यं हविरनादेशे जुहोतिषु विधीयते" इति परिशिष्टवचनादाज्येन प्रत्यहं होमं कुर्यात्। अहिंसासत्याक्रोधाकौटिल्यानि चानुतिष्ठेत्। यद्यप्येतानि पुरुषार्थतया विहितानि तथापि व्रतान्नतयायमुपदेशः॥२२२॥

त्रिरहस्त्रिर्निशायां च सवासा जलमाविशेत्।
स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित्॥२२३॥

Burnt oblations, accompanied by (the recitation of) the Mahāvyāhṛtis, must daily be made (by the penitent) him-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

self, and he must abstain from injuring (sentient creaturs), speak the truth, and the keep himself free from anger and from dishonesty.

अहनि रात्रावादिमध्यावसानेषु स्नानार्थं सचैलो नद्यादिजलं प्रविशेत्। एतच्च पिपीलिकामध्ययवमध्यचान्द्रायणेतरचान्द्रायणविषयम्। तयोः "उपस्पृशंस्त्रिषवणम्" (अ. ६ श्लो. २४) इत्युक्तत्वात्। स्त्रीशूद्रपतितैश्च सह यावद्व्रतं कदाचित्सभाषणं न कुर्यात्॥२२३॥

स्थानासनाभ्यां विहरदेशक्तोऽधः शयीत वा।
ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः॥२२४॥

Let him bathe three times each day and thrice each night, dressed in his clothes; let him on no account talk to women, Śūdras, and outcasts.

अहनि रात्रौ च उत्थित आसीनः स्यान्न तु शयीत। असामर्थ्ये तु स्थण्डिले शयीत न खट्वादौ। ब्रह्मचारी स्त्रीसंयोगरहितव्रतः। व्रती मौष्टीदण्डादियुक्तः "पालाशं धारयेद्दण्डं शुचिमौष्टीं च मेखलाम्" इति यमस्मरणात्। गुरुदेवब्राह्मणानां च पूजको भवेत्॥२२४॥

सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः।
सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृतः॥२२५॥

Let him pass the time standing (during the day) and sitting (during the night), or if he is unable (to do that) let him lie on the (bare) ground; let him be chaste and observe the vows (of a student) and worship his Gurus, the gods, and Brāhmaṇas.

सावित्रीं च सदा जपेत्। पवित्राणि चाघमर्षणादीनि यथाशक्ति जपेत्। एतच्च यथा चान्द्रायणे तथा प्राजापत्यादिकृच्छ्रेष्वपि यत्नवान्प्रायश्चित्तार्थमनुतिष्ठेत्॥२२५॥

एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः।
अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत्॥२२६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Let him constantly mutter the Sāvitrī and (other) purificatory texts according to his ability; (let him) carefully (act thus) on (the occasion of) all (other) vows (performed) by way of penance.

लोकविदितपापा द्विजातय एभिरुक्तप्रायश्चित्तैर्वक्ष्यमाणपरिषदा शोधनीयाः। अप्रकाशितपापांस्तु मानवान्मन्त्रैर्होमैश्च परिषदेव शोधयेत्। यद्यपि परिषदि निवेदने रहस्यत्वस्य नाशस्तथाप्यमुकपापे कृते केनापि लोकाविदिते किं प्रायश्चितं स्यादिति सामान्यप्रश्ने न विरोधः॥२२६॥

ख्यापनेनानुतापेन तपसाऽध्ययनेन च।
पापकृन्मुच्यते पापात्तथा दानेन चापदि॥२२७॥

By these expiations twice-born men must be purified whose sins are known, but let him purify those whose sins are not known by (the recitation of) sacred texts and by (the performance of) burnt oblations.

पापकारी नरो लोकेषु निजपापकथनेन धिङ्मामतिपापकारिणमिति पश्चात्तापेन शुध्यति। तपसा चोग्ररूपेण सावित्रीजपादिना च पापान्मुच्यते। तपस्यशक्तौ दानेन च पापान्मुक्तो भवति। ख्यापनं चेदं प्रकाशप्रायश्चित्तान्नभूतं न रहस्यप्रायश्चित्तान्नं रहस्यत्वहानिप्रसन्नात्। अनुतापश्च प्रकाशरहस्यान्नमेव। दानेनेति प्राजापत्यव्रत एकधेनुविधानात्। धेनुश्च पञ्चपुराणीया त्रिपुराणीया वेति। एतेन ब्रह्महत्यानिमित्तके द्वादशवार्षिकव्रते मासि सार्धद्वयप्राजापत्यात् वत्सरे त्रिंशद्धेनवो भवन्ति। द्वादशभिर्वर्षैः षष्ठ्यधिकशतवयं धेनवो भवन्तीति॥२२७॥

यथा यथा नरोऽधर्मं स्वयं कृत्वानुभाषते।
तथा तथा त्वचेवाहिस्तेनाधर्मेण मुच्यते॥२२८॥

By confession, by repentance, by austerity, and by reciting (the Veda) a sinner is freed from guilt, and in caste no other course is possible, by liberality.

यथा यथा स्वयं पापं कृत्वा नरो भाषते लोके ख्यापयति तथा तथा तेन पापेन सर्प इव जीर्णत्वचा मुच्यत इति ख्यापनविधेरनुवादः॥२२८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति।
तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते॥२२९॥

In proportion as a man who has done wrong, himself confesses it, even so far he is freed from guilt, as a snake from its slough.

तस्य पापकारिणो मनो यथा यथा दुष्कृतं कर्म निन्दति तथा तथा शरीरं जीवात्मा तेनाधर्मेण मुक्तो भवति अयमनुतापानुवाद इति॥२२९॥

कृत्वा पापं हि संतप्य तस्मात्पापात्प्रमुच्यते।
नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः॥२३०॥

In proportion as his heart loathes his evil deed, even so far is his body freed from that guilt.

पापं कृत्वा पश्चात्संतप्य तस्मात्पापान्मुच्यत इत्युक्तमपि नैवं कुर्या पुनरित्येवमनदितम्। यदा तु पश्चात्तापो नैवं पुनः करिष्यामीत्येवं निवृत्तिरूपसंकल्पफलकः स्यात्तदा सुतरां तस्मात्पापात्पूतो भवतीति। एतच्च निवृत्तिसंकल्पस्य प्रकाशाप्रकाशप्रायश्चित्तान्नविधानार्थम्॥२३०॥

एवं संचिन्त्य मनसा प्रेत्य कर्मफलोदयम्।
मनोवाङ्मूर्त्तिभिर्नित्यं शुभं कर्म समाचरेत्॥२३१॥

He who has committed a sin and has repented, is freed from that sin, but he is purified only by (the resolution of) ceasing (to sin and thinking) 'I will do so no more.'

एवं शुभाशुभानां कर्मणां परलोक इष्टानिष्टफलं मनसा विचार्य मनोवाक्कायैः शुभमेव सर्वं कर्म कुर्यात् इष्टफलत्वात्। नाशुभं नरकादिदुःखहेतुत्वात्॥२३१॥

अज्ञानाद्यदि वा ज्ञानात्कृत्वा कर्म विगर्हितम्।
तस्माद्विमुक्तिमन्विच्छन्द्वितीयं न समाचरेत्॥२३२॥

Having thus considered in his mind what results will arise from his deeds after death, let him always be good in thoughts, speech, and actions.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रमादादिच्छतो वा निषिद्धं कर्म कृत्वा तस्मात्पापान्मुक्तिमिच्छन्पुनस्तन्न कुर्यात्। एतच्च पुनः करणे प्रायश्चित्तगौरवार्थम्। अत एव देवलः-"विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेत्" इति॥२३२॥

यस्मिन्कर्मण्यस्य कृते मनसः स्यादलाघवम्।
तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिकरं भवेत्॥२३३॥

He who, having either unintentionally or intentionally committed a reprehensible deed, desires to be freed from (the guilt of) it, must not commit it a second time.

अस्य पापकारिणो यस्मिन्प्रायश्चित्ताख्ये कर्मण्यनुष्ठिते न चित्तस्य संतोषः स्यात्तस्मिंस्तदेव प्रायश्चित्तं तावदावर्तयेद्यावन्मनसः संतोषः प्रसादः स्यात्॥२३३॥

तपोमूलमिदं सर्वं देवमानुषकं सुखम्।
तपोमध्यं बुधैः प्रोक्तं तपोऽन्तं वेददर्शिभिः॥२३४॥

If his mind be uneasy with respect to any act, let him repeat the austerities (prescribed as a penance) for it until they fully satisfy (his conscience).

यदेतत्सर्वं देवानां मनुष्याणां च सुखं तस्य तपः कारणम्। तपसैव च तस्य स्थितिः। तपोऽन्तः प्रतिनियतविधिरेव देवादिसुखस्य तपसा जननादादिष्टं वेदार्थैरुक्तम्। उक्तप्राजापत्यादिप्रायश्चित्तात्मकं तपः। प्रसन्नेन चेदं वक्ष्यमाणं च सर्वतपोमाहात्म्यकथनम्॥२३४॥

ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्।
वैश्यस्य तु तपो वार्त्ता तपः शूद्रस्य सेवनम्॥२३५॥

All the bliss of gods and men is declared by the sages to whom the Veda was revealed, to have austerity for its root, austerity for its middle, and austerity for its end.

ब्राह्मणस्य ब्रह्मचर्यात्मकवेदान्तावबोधनं तपः, राजन्यस्य रक्षणं तपः, वैश्यस्य कृषिवाणिज्यपाशुपाल्यादिकं तपः, शूद्रस्य ब्राह्मणपरिचर्या तप इति वर्णविशेषेणोत्कर्षबोधनार्थम्॥२३५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ऋषयः संयतात्मानः फलमूलानिलाशनाः।
तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम्॥२३६॥

(The pursuit of sacred) knowledge is the austerity of a Brāhmaṇa, protecting (the people) is the austerity of a Kṣatriya, (the pursuit of) his daily business is the austerity of a Vaiśya, and service the austerity of a Śūdra.

ऋषयो वाङ्मनःकायनियमोपेताः फलमूलवायुभक्षास्तपसैव जन्नमस्थावरसहितं पृथिव्यन्तरिक्षस्वर्गात्मकं लोकत्रयमेकदेशस्थाः सन्तो निष्पापान्तःकरणाः प्रकर्षेण पश्यन्ति॥२३६॥

औषधान्यगदो विद्या दैवी च विविधा स्थितिः।
तपसैव प्रसिद्ध्यन्ति तपस्तेषां हि साधनम्॥२३७॥

The sages who control themselves and subsist on fruit, roots, and air, survey the three worlds together with their moving and immovable (creatures) through their austerities alone.

औषधानि व्याध्युपशमनहेतुकानि। अगदो गदाभावः नैरुज्यमिति यावत्। विद्या ब्रह्मधर्मचर्यात्मकवेदार्थज्ञानं वेदसंबन्धिनी च नानारूपा स्वर्गादाववस्थितिरित्येतानि तपसैव प्राप्यन्ते यस्मात्तप एषां प्राप्तिनिमित्तम्॥२३७॥

यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम्।
सर्वं तपसा साध्यं तपो हि दुरतिक्रमम्॥२३८॥

Medicines, good health, learning, and the various divine stations are attained by austerities alone; for austerity is the means of gaining them.

यद्दुःखेन तीर्यते ग्रहदोषसूचितापदादि, यद्दुःखेन प्राप्यते क्षत्रियादिना यथा विश्वामित्रेण तेनैव शरीरेण ब्राह्मण्यादि, यद्दुःखेन गम्यते मेरुपृष्ठादि, यद्दुःखेन क्रियते गोःप्रचुरदानादि, तत्सर्वं तपसा साधितुं शक्यते। यस्मादतिदुष्करकार्यकरणं सर्वं तपसा साध्यते तपो दुर्लंघशक्ति॥२३८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

महापातकिनश्चैव शेषाश्चाकार्यकारिणः।
तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः॥२३९॥

Whatever is hard to be traversed, whatever is hard to be attained, whatever is hard to be reached, whatever is hard to be performed, all (this) may be accompiished by austerities; for austerity (possesses a power) which it is diffciult to surpass.

ब्रह्महत्यादिमहापातककारिणोऽन्ये उपपातकाद्यकार्यकारिण स्तपसैव उक्तरूपेणानुष्ठितेन तस्मात्पापान्मुच्यन्ते। उक्तस्यपि पुनर्वचनं प्रायश्चित्त स्तुत्यर्थम्॥२३९॥

कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च।
स्थावराणि च भूतानि दिवं यान्ति तपोबलात॥२४०॥

Both those who have committed mortal sin (*Mahāpātaka*) and all other offenders are severally freed from their guilt by means of well-performed austerities.

कीटसर्पशलभपशुपक्षिणः स्थावराणि च वृक्षगुल्मादीनि भूतानि तपोमाहात्म्येन स्वर्गं यान्ति। इतिहासादौ कपोतोपाख्यानादिषु पक्षिणोऽप्यग्निप्रवेशादिकंतपस्तपन्तीति श्रूयते। कीटानां यज्जातिसहजं दुःखं तत्समं तपस्तेन च क्षीणकल्मषा अविकारिणो जन्मान्तरकृतेन सुकृतेन दिवं यान्ति॥२४०॥

यत्किञ्चिदेनः कुर्वन्ति मनोवाङ्मूर्त्तिभिर्जनाः।
तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः॥२४१॥

Insects, snakes, moths, bees, birds and beings, bereft of motion, reach heaven by the power of austerities.

यत्किंचित्पापं मनोवाग्देहैर्मानवाः कुर्वन्ति तत्सर्वं पापं निर्दहन्ति तपसैव तपोधना इति। तप एव धनमिव रक्षणीयं येषां ते तपोधनाः॥२४१॥

तपसैव विशुद्धस्य ब्राह्मणस्य दिवौकसः।
इज्याश्च प्रतिगृह्णन्ति कामान्संवर्धयन्ति च॥२४२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Whatever sin men commit by thoughts, words, or deeds, that they speedily burn away by peance, if they keep penance as their only riches.

प्रायश्चित्ततपसा क्षीणपापस्य ब्राह्मणस्य योगे हवींषि देवाः प्रतिगृह्णन्ति। अभिलषितार्थांश्च प्रयच्छन्ति ॥२४२॥

प्रजापतिरिदं शास्त्रं तपसैवासृजत्प्रभुः।
तथैव वेदानृषयस्तपसा प्रतिपेदिरे ॥२४३॥

The gods accept the offerings of that Brāhmaṇa alone who has purified himself by austerities, and grant to him all hedesires.

हिरण्यगर्भः सकललोकोत्पत्तिस्थितिप्रलयप्रभुः तपःकरणपूर्वकमेवेमं ग्रन्थमकरोत्। तथैव ऋषयो वसिष्ठादयस्तपसैव मन्त्रब्राह्मणात्मकान्वेदान्प्राप्तवन्तः ॥२४३॥

इत्येतत्तपसो देवा महाभाग्यं प्रचक्षते।
सर्वस्यास्य प्रपश्यन्तस्तपसः पुण्यमुत्तमम् ॥२४४॥
[ब्रह्मचर्यं जपो होमः काले शुद्धाल्पभोजनम्।
अरागद्वेषलोभाश्च तप उक्तं स्वयंभुवा ॥१२॥]

The lord, Prajāpati, created these Institutes (of the sacred law) by his austerities alone; the sages likewise obtained (the revelation of) the Vedas through their austerities.

सर्वस्यास्य जन्तोर्यदुर्लभं जन्म तपसः प्रकाशादित्येवं देवाः प्रपश्यन्तः "तपोमूलमिदं सर्वम्" (अ. ११ श्लो. २३४) इत्यादि तपोमाहात्म्यं प्रवदन्ति ॥२४४॥

वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥२४५॥

The gods, discerning theat the holy origin of this whole (world) is from austerity, have thus proclaimed the incomparable power of austerity.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथाशक्ति प्रत्यहं वेदाध्ययनं पञ्चमहायज्ञानुष्ठानमपराध- सहिष्णुत्व- मित्येतानि महापातकजनितान्यपि पापानि शीघ्रं नाशयन्ति किमुतान्यानि ॥२४५॥

यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात्।
तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित्॥२४६॥

The daily study of the Veda, the performance of the greaty sacrifices according to one's ability, (and) patience (in suffering) quickly destory all guilt, even that caused by mortal sins.

यथाग्निः काष्ठान्यासन्नानि क्षणेनैव तेजसा निःशेषं करोति तथा ज्ञानाग्निना पापसर्वं वेदार्थज्ञो ब्राह्मणो नाशयति। इत्येतत्परमार्थज्ञानस्यै- तत्पापक्षयोत्कर्ष- ज्ञापनार्थमेतत्॥२४६॥

इत्येतदेनसामुक्तं प्रायश्चित्तं यथाविधि।
अत ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत॥२४७॥

As a fire in one moment consumes with its bright flame the fuel that has been placed on it, even so he who knows the Veda destroys all guilt by the fire of knowledge.

इत्येतद्ब्रह्महत्यादीनां पापानां प्रकाशानां प्रायश्चित्तं यथाविध्यभिहितम्। अत ऊर्ध्वमप्रकाशानां पापानां प्रायश्चित्तं शृणुत। अयं श्लोको गोविन्दराजेना- लिखितः। मेधातिथिना तु लिखित एव॥२४७॥

सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश।
अपि भ्रूणहणं मासात्पुनन्त्यहरहः कृताः॥२४८॥

The penances for sins (made public) have been thus declared according to the law; learn net the penanes for secret (sins).

सव्याहृतिसप्रणवाः सावित्रीशिरोयुक्ताः पूरककुम्भकरेचकादिविधिना प्रत्यहं षोडश प्राणायामाः कृता मासाद्ब्रह्मघ्नमपि निष्पापं कुर्वन्ति। अपिशब्दादाति- देशिकब्रह्महत्याप्रायश्चित्ताधिकृतमपि। एतच्च प्रायश्चित्तं द्विजातीनामेव न स्त्रीशूद्रादेर्मन्त्रानधिकारात्॥२४८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च प्रतीत्यृचम्।
माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुद्ध्यति॥२४९॥

Sixteen suppressions of the breath (*Prāṇāyāma*) accompanied by (the recitation of) the Vyāhṛtis and of the syllable Om, purify, if they are repeated daily, after a month even the murderer of a learned Brāhmaṇa.

कौत्सेन ऋषिणा दृष्टम् "अपनः शोशुचदघम्" इत्येतत्सूक्तं, वसिष्ठेन ऋषिणा दृष्टं च "प्रतिस्तोमेभिरुपसं वसिष्ठाः" इत्येवं ऋचं, माहित्रम् "महित्रीणामवोस्तु" इत्येतत्सूक्तं, शुद्धवत्यः "एतोन्विन्द्रं स्तवाम शुद्धम्" इत्येतास्तिस्र ऋचः, प्रकृतं मासमहरहः षोडशकृत्वोऽपि जपित्वा सुरापोऽपि विशुध्यति। अपिशब्दादातिदेशिकसुरापानप्रायश्चित्ताधिकृतोऽपि॥२४९॥

सकृज्जप्त्वास्य वामीयं शिवसंकल्पमेव च।
अपहृत्य सुवर्णं तु क्षणाद्भवति निर्मलः॥२५०॥

Even a drinker of (the spirituous liquor called) Surā becomes pure, if he mutters the hymn (seen)by Kutsa, 'Removing by thy splednour our guilt, O Agni,' etc., (that seen) by Vasiṣṭha, 'With their hymns the Vasiṣṭhas woke the Dawn,' etc., the Māhitra (hymn) and (the verses called) Suddhavatīs.

ब्राह्मणः सुवर्णमपहृत्य "अस्य वामस्य पलितस्य" इत्येतत्सूक्तं प्रकृतत्वान्मासमेकं प्रत्यहमेकवारं जपित्वा, शिवसंकल्पं च "यज्जाग्रतो दूरम्" इत्यतद्वाजसनेयके यत्पठितं तज्जापित्वा सुवर्णमपहृत्य क्षिप्रमेव निष्पापो भवति॥२५०॥

हविष्पान्तीयमभ्यस्य नतमंह इतीति च।
पतित्वा पौरुषं सूक्तं मुच्यते गुरुतल्पगः॥२५१॥

Even he who has stolen gold, intantly becomes free from guilt, if he once mutters (the hymn beginning with the worlds) 'The middlemost brother of this beautiful, ancient Hotṛ-preiest' and the Śivasaṁkalpa.

"हविष्पान्तमजरं स्वर्विदि" इत्येकोनविंशतिऋचः "नतमंहो न दुरितम्" इत्यष्टौ, "इति वा इति मे मनः," "शिवसंकल्प" इति च सूक्तं, "सहस्रशीर्षा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुरुषः'' इत्येतच्च षोडशर्चसूक्तं मासमेकं प्रत्यहमभ्यस्येति श्रावणात्प्रकृतत्वात् षोडशाभ्यासाज्जपित्वा गुरुदारगस्तस्मात्पापान्मुच्यते ॥२५१ ॥

एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम्।
अवेत्यृचं जपेदब्दं यत्किञ्चेदमितीति वा ॥ २५२ ॥

The violator of a Guru's bed is fred (from sin), if he repeatedly recites the Haviṣpāntīya (hymn), (that beginning) 'Neither anxiety nor misfortune,' (and that beginning). 'Thus, verily, thus,' and mutters the hymn addressed to Puruṣa.

स्थूलानां पापानां महापातकानां सूक्ष्माणां चोपपातकादीनां निर्हरणं कर्तुमिच्छन् ''अव ते हेळो वरुण नमोभिः'' इत्येतामृचं, '' यत्किचेदं वरुण दैव्ये जने'' इत्येतां च ऋचं, ''इति वा इति मे मनः'' इत्येतत्सूक्तं संवत्सरमेकवारं प्रत्यहं जपेत् ॥२५२ ॥

प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम्।
जपंस्तरत्समन्दीयं पूयते मानवस्त्र्यहात् ॥ २५३ ॥

He who desires to expiate sins great or small, must mutter during a year the Ṛc-verse 'May we remove thy anger, O Varuṇa,' etc., or 'Whatever offence here, O Varuṇa,' etc.

स्वरूपतो महापातकिधनत्वादिना वाऽप्रतिग्राह्यं प्रतिगृह्य चान्नं स्वभावकालप्रतिग्रहसंसर्गदुष्टं भुक्त्वा ''तरत्समन्दी धावति'' इत्येता ऋचश्चतस्रो जपित्वा त्र्यहं तस्मात्पापान्मनुष्यः पूतो भवति ॥२५३ ॥

सोमारौद्रं तु बह्वेना मासमभ्यस्य शुद्ध्यति।
स्त्रवन्त्यामाचरन्स्नानमर्यम्णामिति च तृचम् ॥ २५४ ॥

That man who, having accepted presents which ought not to be accepted, or having eaten forbidden food, mutters the Taratsamandīya (Ṛcas), becomes pure after three days.

''सोमारुद्रा धारयेथामतुर्यम्'' इति चतस्रः। ''अर्यमणं वरुणं मित्रं च'' इति ऋक्त्रयं नद्यां च स्नानं कृत्वा मासमेकं प्रत्येकमभ्यस्य बहुपापो विशुध्यति। बहुष्वपि पापेषु तन्त्रेणैकं प्रायश्चित्तं कार्यमिति ज्ञापकमिदम् ॥२५४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अब्दार्धमिन्द्रमित्येतदेनस्वी सप्तकं जपेत्।
अप्रशस्तं तु कृत्वाप्सु मासमासीत भैक्षभुक्॥ २५५॥

But he who has committed many sins, becomes pure, if he recites during a month the (four verses) addressed to Soma and Rudra, and the three verses (beginning) 'Aryaman, Varuṇa, and Mitra,' while he bathes in a river.

एनस्वीत्यविशेषात्सर्वेष्वेव पापेषु "इन्द्रं मित्रं वरुणमग्निम्" इत्येताः सप्त ऋचः षण्मासं जपेत्। अप्रशस्तं मूत्रपुरीषोत्सर्गादिकं जले कृत्वा मासं भैक्षभोजी भवेत्॥२५५॥

मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः।
सुगुर्वप्यपहन्त्येनो जप्त्वा वा नम इत्यृचम्॥ २५६॥

A grievous offender shall mutter the seven verses (beginning with) 'Indra,' for half a year; but he who has committed any blamable act in water, shall subsist during a month on food obtained by begging.

"देवकृतस्य" इत्यादिभिः शाकलहोममन्त्रैः संवत्सरं घृतहोमं कृत्वा "नम इन्द्रश्च" इत्येतां वा ऋचं संवत्सरं जपित्वा महापातकमपि पापं द्विजातिरपहन्ति॥२५६॥

महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः।
अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुद्ध्यति॥ २५७॥

A twice-born man removes even very great guilt by offering clarified butter with the sacred texts belonging to the Śākala-homas, or by muttering the Ṛc, (beginning) 'Adoration.'

ब्रह्महत्यादिमहापातकयुक्तो भिक्षालब्धाहारो वर्षमेकं संयतेन्द्रियो गवामनुगमनं कुर्वन् "यः पावमानीरध्येति" इत्यादि ऋचोऽन्वहमभ्यासेन जपित्वा तस्मात्पापाद्विशुद्धो भवति॥२५७॥

अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम्।
मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिः॥ २५८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

He who is stained by mortal sin, becomes pure, if, with a concentrated mind, he attends cows for a year, reciting the Pāvamānī (hymns) and subsisting on alms.

त्रिभिः पराकैः पूतो मन्त्रब्राह्मणात्मिकां वेदसंहितामरण्ये वारत्रयमभ्यस्य वा प्रयती बाह्याभ्यन्तरशौचयुक्तः सर्वैर्महापातकैर्मुच्यते ॥२५८॥

त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः।
मुच्यते पातकैः सर्वैस्त्रिर्जपित्वाऽघमर्षणम्॥२५९॥

Or if, pure (in mind and in body), he thrice repeatrs the Saṁhitā of the Veda in a forest, sanctified by three Parāka (penances), he is freed from all crimes causing loss of caste (*pātaka*).

त्रिरात्रमुपवसन्संयतः प्रत्यहं प्रातर्मध्याह्नसायंकालेषु स्नानं कुर्वन् त्रिषवणस्नानकाल एव जले निमज्ज्य "ऋतं च सत्यं च" इति सूक्तमघमर्षणं त्रिरावृत्तं जपित्वा सर्वैः पापैर्मुच्यते। तत्र गुरुलघुपापापेक्षया पुरुषशक्त्याद्यपेक्षया चावर्तनीयम्॥२५९॥

यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः।
तथाऽघमर्षणं सूक्तं सर्वपापापनोदनम्॥२६०॥

But if (a man) fasts during three days, bathing thrice a day, and muttering (in the water the hymn seen by) Aghamarṣaṇa, he is (likewise) freed from all sins causing loss of caste.

यथाऽश्वमेधयागः सर्वयागश्रेष्ठः सर्वपापक्षयहेतुस्तथाघमर्षणसूक्तमपि सर्वपापक्षयहेतुरित्यघमर्षणसूक्तोत्कर्षः॥२६०॥

हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः।
ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किञ्चन॥२६१॥

As the horse-sacrifice, the king of sacrifices, removes all sin, even so the Aghamarṣaṇa hymn effaces all guilt.

भूरादिलोकत्रयमपि हत्वा महापातक्यादीनामप्यन्नमश्नन् ऋग्वेदं धारयन्विप्रादिर्न किंचित्पापं प्राप्नोति॥२६१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ऋग्वेदं रहस्यप्रायश्चित्तार्थमुक्तं ततश्च रहस्यपापे कृते ऋक्संहिता मन्त्रब्राह्मणात्मिकामभ्यसेत्तदाह-

ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः।
साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते॥२६२॥

A Brāhmaṇa who retains in his memory the Ṛg-veda is not stained by guilt, though he may have destroyed these three worlds, though he may eat the food of anybody.

ऋक्संहिता मन्त्रब्राह्मणात्मिकां नतु मन्त्रमात्रात्मिकां अनन्तरम् "वेदे त्रिवृति" इति प्रत्यवमर्शात्। यजुषां वा मन्त्रब्राह्मणानां संहितां साम्नां वा ब्राह्मणोपनिषत्संहितां वारत्रयमभ्यस्य सर्वपापैः प्रमुक्तो भवति॥२६२॥

तथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति।
तथा दुश्चरितं सर्वं वेदे त्रिवृति मज्जति॥२६३॥

He who, with a concentrated mind, thrice recites the Ṛksaṁhitā, or (that of the) Yajur-veda, or (that of the) Sāma-veda together with the secret (texts, the Upaniṣads), is completely freed from all sins.

ऋगाद्यात्मना त्रिरावर्तत इति त्रिवृत्। यथा महाह्रदं प्रविश्य लोष्टं विशीर्यते तथा सर्वं दुश्चरितं त्रिवृति वेद विनश्यति॥२६३॥

त्रिवृत्मवेवाह-

ऋचो यजूंषि चान्यानि सामानि विविधानि च।
एष ज्ञेयस्त्रिवृद्वेदो यो वेदैनं स वेदवित्॥२६४॥

As a clod of earth, falling into a great lake, is quickly dissolved, even so every sinful act is engulfed in the three-fold Veda.

ऋच ऋङ्मन्त्राः, यजूंषि यजुर्मन्त्राः, समानि बृहद्रथन्तरादीनि नाना प्रकाराण्यन्यानि एषां त्रयाणां पृथक् पृथक् मन्त्रब्राह्मणानि एष त्रिवृद्वेदो ज्ञातव्यः। य एनं वेद स वेदविद्भवति॥२६४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आद्यं यत्त्रयक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता।
स गुह्योऽनयस्त्रिवृद्वेदो यस्तं वेद स वेदवित्॥२६५॥
[एष वोऽभिहितः कृत्स्नः प्रायश्चित्तस्य निर्णयः।
निश्रेयसं धर्मविधिं विप्रस्येमं निबोधत॥१३॥
पृथक् ब्राह्मणकल्पाभ्यां स हि वेदस्त्रिवृत्स्मृतः॥१४॥]
इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहिताया दशोऽध्यायः॥

The Ṛcas, the Yajus(-formulas) which differ (from the former), the manifold Sāman (-songs), must be known (to form) the triple Veda; he who knows them, (is called) learned in the Veda.

The initial tirliteral Brāhmaṇ on which the threefold (sacred science) is absed, is another triple Veda which must be kept secret; he who knows that, (is called) learned in the Veda.

सर्ववेदानामाद्यं यत् ब्रह्म वेदसारम् अकारोकारमकारात्मकत्वेन त्र्यक्षरं यत्र त्रयो वेदाः स्थिताः सोऽन्यस्त्रिवृद्वेदः प्रणवाख्यो गुह्यो गोपनीयः वेदमन्त्रश्रेष्ठत्वात्, परमार्थाभिद्यायकत्वात्परमार्थकत्वेन धारणजपाभ्यां मोक्षहेतुत्वाच्च। यस्तं स्वरूपतोऽर्थतश्च जानाति स वेदवित्॥२६५॥ क्षे. श्लो. ॥१४॥

प्रायश्चित्ते बहुमुनिमतालोचनाद्यन्मयोक्तं
सद्व्याख्यानं खलु मुनिगिरां तद्भजध्वं गुणज्ञाः।
नैतन्मेधातिथिरभिदधे नापि गोविन्दराजो
व्याख्यातारो न जगुरपरेऽप्यन्यतो दुर्लभं वः॥१॥

इति श्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यां
मनुवृत्तावेकादशोऽध्यायः॥११॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वादशोऽध्यायः

चातुर्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयाऽनघ।
कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वतः पराम्॥१॥

'O sinless One, the whole sacred law, (applicable) to the four castes, has been declared by thee; communicate to us (now), according to the truth, the ultimate retribution for (their) deeds.'

हे पापरहित, ब्राह्मणदिवर्णचतुष्टयस्य सान्तरप्रभवस्यायं धर्मस्त्वयोक्तः। इदानीं कर्मणां शुभाशुभफलप्राप्तिं परां जन्मान्तरप्रभवां परमार्थरूपामस्माकं ब्रूहीति महर्षयो भृगुमवोचन्॥१॥

स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः।
अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम्॥२॥

To the great sages (who addressed him thus) righteous Bhṛgu, sprung from Manu, answered,'Hear the decision concerning this whole connexion with actions.'

स धर्मप्रधानो मनोरपत्यात्मा भृगुरस्य सर्वस्य कर्मसंबन्धस्य फलनिश्चयं शृणुतेति तान्महर्षीनब्रवीत्॥२॥

शुभाशुभफलं कर्म मनोवाग्देहसंभवम्।
कर्मजा गतयो नृणामुत्तमाधममध्यमाः॥३॥

Action, which springs from the mind, from speech, and from the body, produces either good or evil results; by action are caused the (various) conditions of men, the highest, the middling and the lowest.

मनोवाग्देहहेतुकं कर्म विहितनिषिद्धरूपं सुखदुःखफलकं तज्जन्या एव

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मनुष्यतिर्यगादिभावेनोत्कृष्टमध्यमाधमापेक्षया मनुष्याणां गतयो जन्मान्तरप्राप्तयो भवन्ति। कर्मशब्दश्चात्र न कायचेष्टायामेव किंतु ममेदं स्वमिति संकल्परूपयोगादिध्यानाचरणादावपि क्रियामात्रे वर्तते ॥३॥

तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः।
दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकम् ॥४॥

Know that the mind is the instigator here below, even to that (action) which is connected with the body, (and) which is of three kinds, has three locations, and falls under ten heads.

तस्य देहिसंबन्धिनः कर्मण उत्कृष्टमध्यमाधमतया त्रिप्रकारस्यापि मनोवाक्कायाश्रितस्य वक्ष्यमाणदशलक्षणोपेतस्य मन एव प्रवर्तकं जानीयात्। मनसा हि संकल्पितमुच्यते क्रियते च। तथा तैत्तिरीयोपनिषदि "तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा तत्कर्मणा करोति" इति ॥४॥

तानि दशलक्षणानि कर्माणि दर्शयितुमाह-

परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥५॥

Coveting the property of others, thinking in one's heart of what is undesirable, and adherence to false (doctrines), are the three kinds of (sinful) mental action.

कथं परधनमन्यायेन गृह्णामीत्येवं चिन्तनम्, मनसा ब्रह्मवधादि निषिद्धाकांक्षा, नास्ति परलोकः देह एवात्मेत्येतद्ग्रहश्चेत्येवं त्रिप्रकारमशुभफलं मानसं कर्म। एतत्त्रयविपरीतबुद्धिश्च त्रिविधं शुभफलं मानसं कर्म। "शुभाशुभफलं कर्म" इत्युभयस्यैव प्रक्रान्तत्वात् ॥५॥

पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः।
असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥६॥

Abusing (others, speaking) untruth, detracting from the merits of all men, and talking idly, shall be the four kinds

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

of (evil) verbal action.

अप्रियाभिधानम्, असत्यभाषणं, परोक्षे परदूषणकथनं, सत्यस्यापि राजदेशपौरवार्तादेर्निष्प्रयोजनं वर्णनम्, इत्येवं चतुःप्रकारमशुभफलं वाचिकं कर्म भवेत्। एतद्विपरीतं प्रियसत्यपरगुणभिधानं श्रुतिपुराणादौ च राजादिचरितकथनं शुभफलम् ॥६॥

अदत्तानामुपादानं हिंसा चैवाविधानतः।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥७॥

Taking what has not been given, injuring (creatures) without the sanction of the law, and holding criminal intercourse with another man's wife, are declared to be three kinds of (wicked) bodily action.

अन्यायेन परस्वग्रहणमशास्त्रीयहिंसा परदारगमनमित्येवं त्रिप्रकारमशुभफलं शारीरं कर्म। एतद्विपरीतं त्रयं शुभफलम् ॥७॥

मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम्।
वाचा वाचा कृतं कर्म कायेनैव च कायिकम् ॥८॥
[त्रिविधं च शरीरेण वाचा चैव चतुर्विधम्।
मनसा त्रिविधं कर्म दश धर्मपथांस्त्यजेत् ॥१॥]

(A man) obtains (the result of) a good or evil mental (act) in his mind, (that of) a verbal (act) in speech, (that of) a bodily (act) in his body.

मनसा यत्सुकृतं दुष्कृतं वा कर्म कृतं तत्फलं सुखदुःखमिह जन्मनि जन्मान्तरे वा मनसैवायमुपभुङ्क्ते। एवं वाचा कृतं शुभाशुभं वाग्द्वारेण मधुरगद्गदभाषित्वादिना, शरीरं शुभाशुभं शरीरद्वारेण स्रक्चन्दनादिप्रियोपभोगव्याधितत्वादिनानुभवति। तस्मात्प्रयत्नेन शारीरमानसवाचिकानि धर्मरहितानि च वर्जयेन्न कुर्याच्च ॥८॥

शरीरजैः कर्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[शुभैः प्रयोगैर्देवत्वं व्यामिश्रैर्मानुषो भवेत्।
अशुभैः केवलैश्चैव तिर्यग्योनिषु जायते॥२॥
वाग्दण्डो हन्ति विज्ञानं मनोदण्डः परां गतिम्।
कर्मदण्डस्तु लोकांस्त्रीन्हन्यादपरिरक्षितः॥३॥
वाग्दण्डोऽथ भवेन्मौनं मनोदण्डस्त्वनाशनम्।
शारीरस्य हि दण्डस्य प्राणायामो विधीयते॥४॥
त्रिदण्डं धारयेद्योगी शारीरं न तु वैणवम्।
वाचिकं कायिकं चैव मानसं च यथाविधि॥५॥]

In consequence of (many) sinful acts committed with his body, a man becomes (in the next birth) something inanimate, in consequence (of sins) committed by speech, a bird, or a beast, and in consequence of mental (sins he is re-born in) a low caste.

यद्यपि पापिष्ठानां शारीरवाचिकमानसिकान्येव त्रीणि पापानि संभवन्ति तथापि स यदि प्रायशोऽधर्ममेव सेवते, धर्ममल्पमिति बाहुल्याभिप्रायेणेति व्याख्यातम्। बाहुल्येन शरीरकर्मजपापैर्युक्तः स्थावरत्वं मानुषः प्राप्नोति। बाहुल्येन वाक्कृतैः पक्षित्वं मृगत्वं वा। बाहुल्येन मनसा कृतैश्चाण्डालादित्वं प्राप्नोति॥९॥

वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते॥१०॥

That man is called a (true) tridaṇḍin in whose mind these three, the control over his speech (*vāgdaṇḍa*), the control over his thoughts (*manodaṇḍa*), and the control over his body (*kāyadaṇḍa*), are firmly fixed.

दमनं दण्डः यस्य वाङ्मनःकायानां दण्डा निषिद्धाभिधानात्संकल्पप्रतिषिद्धव्यापारत्यागेन बुद्धावस्थिताः स त्रिदण्डीत्युच्यते। नतु दण्डत्रयधारणमात्रेणेत्याभ्यन्तरदण्डत्रयप्रशंसा॥१०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः।
कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति॥११॥

That man who keeps this threefold control (over himself) with respect to all created beings and wholly subdues desire and wrath, thereby assuredly gains complete success.

एवं निषिद्ध वागादीनां सर्वभूतगोचरतया दमनं कृत्वैतद्दमनार्थमेव कामक्रोधौ तु नियम्य ततो मोक्षावाप्तिलक्षणां सिद्धिं मनुष्यो लभते॥११॥

योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते।
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः॥१२॥

Him who impels this (corporel) Self to action, they call the Kṣetrajña (the knower of the field); but him who does the acts, the wise name the Bhūtātman (the Self consisting of the elements).

यः कर्मसु प्रवर्तयिता तं क्षेत्रज्ञं पण्डिता वदन्ति। यः पुनरेष व्यापारान्करोति शरीराख्यः सः पृथिव्यादिभूतारब्धत्वाद्भूतात्मैवेति पण्डितैरुच्यते॥१२॥

जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनाम्।
येन वेदयते सर्वं सुखं दुःखं च जन्मसु॥१३॥

Another internal Self that is generated with all embodied (Kṣetrajñas) is called Jīva, though which (the Kṣetrajña) becomes sensible of all pleasure and pain in (successive) births.

जीवशब्दोऽयं महत्परः, येनेति करणविभक्तिनिर्देशात्। उत्तरश्लोके च "तावुभौ भूतसंपृक्तौ महान्क्षेत्रज्ञ एव च" इति तच्छब्देन प्रत्यवमर्शाच्छरीर-क्षेत्रज्ञातिरिक्तोऽन्तःशरीरमात्माख्यत्वादात्मा जीवाख्यः सर्वक्षेत्रज्ञानां सहज आत्मा। तत्प्राप्तेस्तैस्तस्य विनियोगात्। येनाहंकारेन्द्रियरूपतया परिणतेन कारणभूतेन क्षेत्रज्ञः प्रतिजन्म सुखं दुःखं चानुभवति॥१३॥

तावुभौ भूतसंपृक्तौ महान्क्षेत्रज्ञ एव च।
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः॥१४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्ययमीश्वरः ॥६॥]

These two, the Great One and the Kṣetrajña, who are closely united with the elements, pervade him who resides in the multiform created beings.

तौ द्वौ महत्क्षेत्रज्ञौपृथिव्यादिपञ्चभूतसंपृक्तौ वक्ष्यमाणं सर्वलोकवेदस्मृति-पुराणदिप्रसिद्धष्टा तमिति निर्दिष्टं परमात्मानमुत्कृष्टापकृष्टसत्त्वेषु व्यवस्थित-माश्रित्य तिष्ठतः॥१४॥

असंख्या मूर्तयस्तस्य निष्पतन्ति शरीरतः।
उच्चावचानि भूतानि सततं चेष्टयन्ति याः॥१५॥

From his body innumerable forms go forth, which constantly impel the multiform creatures to action.

अस्य परमात्मनः शरीरादसंख्यमूर्तयो जीवाः क्षेत्रज्ञशब्देनानन्तरमुक्ता लिन्नशरीरावच्छिन्ना वेदान्त उक्तप्रकारेणाग्नेरिव स्फुलिङ्गा निःसरन्ति। या मूर्तय उत्कृष्टापकृष्टभूताग्निवेदरूपतया परिणतानि सर्वदा कर्मसु प्रेरयन्ति॥१५॥

पञ्चचभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणाम्।
शरीरं यातानार्थीयमन्यदुत्पद्यते ध्रुवम्॥१६॥

Another strong body, formed of particles (of the) five (elements and) destined to suffer the torments (in hell), is produced after death (in the case) of wicked men.

पञ्चभ्य एव पृथिव्यादिभूतेभ्यो दुष्कृतकारिणां मनुष्याणां पीडानुभवप्रयोजकं जरायुजादिदेहव्यतिरिक्तं दुःखसहिष्णु शरीरं परलोके जायते॥१६॥

तेनानुभूयता यामीः शरीरेणेह यातनाः।
तास्वेव भूतमात्रासु प्रलीयन्ते विभागशः॥१७॥

When (the evil-doers) by means of that body have suffered there the torments imposed by Yama, (its constituent parts) are united, each according to its class, with tho-e

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

very elements (from which they were taken).

तेन निर्गतेन शरीरेण ता यमकारिता यातना दुष्कृतिनो जीवाः सूक्ष्मानुभूतस्थूलशरीरनाशे तेष्वोवारम्भकभूतभागेषु यथास्वं प्रलीयन्ते। तत्संयोगिनो भूत्वा अवतिष्ठन्त इत्यर्थः॥१७॥

सोऽनुभूयासुखोदर्कान्दोषान्विषयसङ्गजान्।
व्यपेतकल्मषोऽभ्येति तावेवोभौ महौजसौ॥१८॥

He, having suffered for his faults, which are produced by attachment to sensual objects, and which result in misery, approaches, free from stains, those two mighty ones.

स शरीरी भूतसूक्ष्मादिलिन्नशरीरावच्छिन्नो निषिद्धशब्दस्पर्शरूपरसगन्धाख्यविषयोपभोगजनितयमलोकदुःखाद्यनुभूयानन्तरं भोगादपहतपाप्मा तावेव महत्परमात्मानौ महावीर्यौ द्वावाश्रयति॥१८॥

तौ धर्मं पश्यतस्तस्य पापं चातन्द्रितौ सह।
याभ्यां प्राप्नोति संपृक्तः प्रेत्येह च सुखासुखम्॥१९॥

Those two together examine without tiring the merit and the guilt of that (individual soul), united with which it obtains bliss or misery both in this world and the next.

तौ महत्परमात्मानौ अनलसौ तस्य जीवस्य धर्मं भुक्तशेषं च पाप सह विचारयतः। याभ्यां धर्माधर्माभ्यां युक्तो जीवः परलोकेहलोकयोः सुखदुःखे प्राप्नोति॥१९॥

यद्याचरति धर्मं स प्रायशोऽधर्ममल्पशः।
तैरेव चावृतौ भूतैः स्वर्गे सुखमुपाश्नुते॥२०॥

If (the soul) chiefly practises virtue and vice to a small degree, it obtains bliss in heaven, clothed with those very elements.

स यदि जीवो मानुषदशायां बाहुल्येन धर्ममनुतिष्ठति अल्पं चाधर्मं तदा तैरेव पृथिव्यादिभूतैः स्थूलशरीररूपतया परिणतैर्युक्तः स्वर्गसुखमनुभवति॥२०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यदि तु प्रायशोऽधर्मं सेवते धर्ममल्पशः।
तैर्भूतैः स परित्यक्तो यामीः प्राप्नोति यातनाः॥२१॥

But if it chiefly cleaves to vice and to virtue in a small degree, it suffers, deserted by the elements, the torments inflicted by Yama.

यदि पुनः स जीवो मानुषदशायां बाहुल्येन पापमनुतिष्ठति अल्पं च पुण्यं तदा तैरेव भूतैर्मानुषदेहरूपतया परिणतैस्त्यक्तो मृतः सन्ननन्तरं पञ्चभ्य एव मात्राभ्य इत्युक्तरीत्या यातनानुभवोचितसंपातकठिनदेहो यामीः पीडा अनुभवति॥२१॥

यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः।
तान्येव पञ्च भूतानि पुनरप्येति भागशः॥२२॥

The individual soul, having endured those torments of Yama, again enters, free from taint, those very five elements, each in due proportion.

स जीवो यमकारितास्ताः पीडास्तेन कठिनदेहेनानुभूय ततो भोगेनापहतपाप्मा तान्पञ्च जरायुजादिशरीरारम्भकान्पृथिव्यादिभूतभागानधितिष्ठति। मानुषादिशरीरं गृह्णातीत्यर्थः॥२२॥

एता दृष्ट्वाऽस्य जीवस्य गतीः स्वेनैव चेतसा।
धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः॥२३॥

Let (man), having recognised even by means of his intellect these transitions of the individual soul (which depend) on merit and demerit, always fix his heart on (the acquision of) merit.

अस्य जीवस्य एता धर्माधर्महेतुकाः स्वर्गनरकाद्युपभोगोचित-प्रियाप्रियदेहप्राप्तीरन्तःकरणे ज्ञात्वा धर्मानुष्ठाने मनः सदा संगतं कुर्यात्॥२३॥

सत्त्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान्।
यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः॥२४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Know Goodness (sattva), Activity (rajas), and Darkness (*tamas*) to be the three qualities of the Self, with which the Great One always completely pervades all existence.

सत्त्वरजस्तमांसि त्रीणि वक्ष्यमाणगुणलक्षणानि आत्मोपकारकत्वादात्मनो महतो गुणञ्जीनीयात्। यैर्व्याप्तो महानिमान्स्थावरजन्नमरूपान्पदार्थान्त्रि:शेषेण व्याप्य स्थित:॥२४॥

यो यदैषां गुणो देहे साकल्येनातिरिच्यते।
स तदा तद्गुणप्रायं तं करोति शरीरिणम्॥२५॥

When on of these qualities wholly predominates in a body, when it makes the embodied (soul) eminently distinguished for that quality.

यद्यपि सर्वमेवेदं त्रिगुणं तथापि यत्र देहे येषां गुणानां मध्ये यो गुणो यदा साकल्येनाधिको भवतितदा तद्गृणीलक्षणबहुलं तं देहिनं करोति॥२५॥

संप्रति सत्त्वादीनां लक्षणमाह-

सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रज: स्मृतम्।
एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपु:॥२६॥

Goodness is declared (to have the form of) knowledge, Darkness (of) ignorance, Activity (of) love and hatred; such is the nature of these (three) which is (all-) pervading and clings to everything created.

यथार्थावभासो ज्ञानं तत्सत्त्वस्य लक्षणम्। एतद्विपरीतमज्ञानं तत्तमोलक्षणम्। विषादाभिलाषं मानसकार्यं रजोलक्षणम्। स्वरूपं तु सत्त्वरजस्तमसां प्रीत्यप्रीतिविषादात्मकम्। तथाच पठन्ति "प्रीत्यप्रीतिविषादात्मका: प्रकाश-प्रवृत्तिनियमार्था:। अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा:॥" (सां. का. १२) एतच्चैषां स्वरूपमनन्तरश्लोकत्रयेण वक्ष्यति। एतेषां सत्त्वादिगुणाना-मेतज्ज्ञानादि सर्वप्राणिव्यापकं लक्षणम्॥२६॥

तत्र यत्प्रीतिसंयुक्तं किञ्चिदात्मनि लक्षयेत्।
प्रशान्तमिव शुद्धाभं सत्त्वं तदुपधारयेत्॥२७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

When (man) experiences in his soul a (feeling) full of bliss, a deep calm, as it were, and a ure light, then let him know (that it is) among those three (the quality called) Goodness.

तस्मिन्नात्मनि यत्संवेदनं प्रीतियुक्तं प्रत्यस्तमितक्लेशं प्रकाशरूपमनुभवेत्तत्सत्त्वं जानीयात् ॥२७॥

यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः।
तद्रजो ऽप्रतिपं विद्यात्सततं हारि देहिनाम् ॥२८॥

What is mixed with pain and does not give satisfaction to the soul one may know (to be the quality of) Activity, which is difficult to conquer, and which ever draws embodied (souls towards sensual objects).

यत्पुनः संवेदनं दुःखानुविद्धमत एव सत्त्वशुद्धात्मप्रीतेरजनकं सर्वदा च शरीरिणां विषयस्पृहोत्पादकं तत्त्वनिवारकत्वात्प्रतिपक्षं रजो जानीयात् ॥२८॥

यत्तु स्यान्मोहसंयुक्तमव्यक्तं विषयात्मकम्।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥२९॥

What is coupled with delusion, what has the character of an undiscernible mass, what cannot be fathomed by reasoning, what cannot be fully known, one must consider (as ther quality of) Darkness.

यत्पुनः सदसद्विवेकशून्यमस्फुटविषयाकारस्वभावमतर्कणीयस्वरूपमन्तःकरणबहिःकरणाभ्यां दुर्ज्ञातं तत्तमो जानीयात्। एषां च गुणानां स्वरूपकथनं सत्त्ववृत्त्यवस्थितौ यत्नवता भवितव्यमित्येतत्प्रयोजनकम् ॥२९॥

त्रयाणामपि चैतेषां गुणानां यः फलोदयः।
अग्रयो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ॥३०॥

I will, moreover, fully describe the results which arise from these three qualities, the excellent ones, the middling ones, and the lowest.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एतेषां सत्त्वादीनां त्रयाणामपि गुणानां यथाक्रममुत्तममध्यमाधमरूपो यः फलोत्पादकस्तं विशेषेण वक्ष्यामि ॥३०॥

वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः।
धर्मक्रियात्मचिन्ता च सात्त्विकं गुणलक्षणम् ॥३१॥

The study of the Vedas, austerity, (the pursuit of) knowledge, purity, control over the organs, the performance of meritorious acts and meditation on the Soul, (are) the marks of the quality of Goodness.

वेदाभ्यासः, प्राजापत्याद्यनुष्ठानं, शास्त्रार्थावबोधः, मृद्वार्यादिशौचं, इन्द्रियसंयमः, दानादिधर्मानुष्ठानं, आत्मध्यानपरता एतत्सत्त्वाख्यगुणस्य कार्यम् ॥३१॥

आरम्भरुचिताऽधैर्यमसत्कार्यपरिग्रहः।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥३२॥

Delighting in undertakings, want of firmness, commission of sinful acts, and continual indulgence in sensual pleasures, (are) the marks of the quality of Activity.

फलार्थं कर्मानुष्ठानशीलता, अल्पेऽप्यर्थे वैक्लव्यं, निषिद्धकर्माचरणं, अजस्रं शब्दादिविषयोपभोग इत्येतद्रजोभिधानगुणस्य कार्यम् ॥३२॥

लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥३३॥

Covetousness, sleepiness, pusillanimity, cruelty, atheism, leading an evil life, a habit of soliciting favours, and inattentiveness, are the marks of the quality of Darkness.

अधिकाधिकधनस्पृहा, निद्रात्मता, कार्पण्यं, पैशुन्यं, परलोकाभावबुद्धिः, आचारपरिलोपः, याचनशीलत्वं, संभवेऽपि धर्मादिष्वनवधानं, इत्येतत्तामसाभिधानस्य गुणस्य लक्षणम् ॥३३॥

त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम्।
इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ॥३४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Know, moreover, the following to be a brief description of the three qualities, each in its order, as they appear in the three (times, the present, past, and future).

एषां सत्त्वादीनां त्रयाणामपि गुणानां त्रिषु भूतभविष्यद्वर्तमानेषु विद्यमानानामिदं वक्ष्यमाणसाक्षेपिकं क्रमेण गुणलक्षणं ज्ञातव्यम् ॥३४॥

यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति।
तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ॥३५॥

When a (man), having done, doing, or being about to do any act, feels ashamed, the leanred may know that all (such acts bear) the mark of the quality of Darkness.

यत्कर्म कृत्वा, कुर्वन्, करिष्यंश्च लज्जावान्भवति। कालत्रये द्वयोरन्यत्र वेति विवक्षितं तत्सर्वं तमःकार्यत्वात्तमोऽभिधानं गुणलक्षणं शास्त्रविदा बोद्धव्यम् ॥३५॥

येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलाम्।
न च शोचत्यसंपत्तौ तद्विज्ञेयं तु राजसम् ॥३६॥

But, when (a man) desires (to gain) by an act much fame in this world and feels no sorrow on failing, know that it (bears the mark of the quality of) Activity.

इह लोके महतीं श्रियं प्राप्नोतित्येदर्थमेव यो यत्कर्म करोति न परलोकार्थं नच तत्कर्मफलासंपत्तौ दुःखी भवति तद्रजः कार्यत्वाद्रजोगुणलक्षणं विज्ञेयम् ॥३६॥

यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन्।
येन तुष्यति चात्माऽस्य तत्सत्त्वगुणलक्षणम् ॥३७॥

But that (bears) the mark of the quality of Goodness which with his whole (heart) he desires to know, which he is not ashamed to perform, and at which his soul rejoices.

यत्कर्म वेदार्थं सर्वात्मना ज्ञातुमिच्छति, यच्च कर्माचरन्कालत्रयेऽपि न लज्जति, येन येन कर्मणास्यात्मतुष्टिर्जायते, तत्सत्त्वाख्यस्य गुणस्य लक्षणं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ज्ञेयम् ॥३७॥

तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते।
सत्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरम् ॥३८॥

The craving after sensual pleasures is declared to be the mark of Darkness, (the pursuit of) wealth (the mark) of Activity, (the desire to gain) spiritual merit the mark of Goodness; each later (named quality is) better than the preceding one.

कामप्रधानता तमसो लक्षणम्। अर्थनिष्ठता रजसः। धर्मप्रधानता सत्त्वस्य। एषां च कामादीनामुत्तरोत्तस्य श्रेष्ठत्वम्। कामादर्थः श्रेयानर्थमूलत्वात्कामस्य। ताभ्यां च धर्मस्तन्मूलत्वात्तयोः ॥३८॥

येन यस्तु गुणेनैषां संसारान्प्रतिपद्यते।
तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् ॥३९॥

I will briefly declare in due order what transmigrations in this whole (world a man) obtains through each of these qualities.

एषां सत्त्वादीनां गुणानां मध्ये येन गुणेनस्वकार्येण या गतीर्जीवः प्राप्नोति ताः सर्वस्यास्य जगतः संक्षेपतः क्रमेण वक्ष्यामि ॥३९॥

देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः।
तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥४०॥

Those endowed with Goodness reach the state of gods, those endowed with Activity the state of men, and those endowed with Darkness ever sink to the condition of beasts; that is the threefold course of transmigrations.

ये सत्त्ववृत्तावस्थितास्ते देवत्वं यान्ति। ये तु रजोवृत्त्यवस्थितास्ते मनुष्यत्वम्। ये तमोवृत्तिस्थास्यते तिर्यक्त्वं चेत्येषा त्रिविधा जन्मप्राप्तिः ॥४०॥

त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः।
अधमा मध्यमाऽग्र्या च कर्मविद्या विशेषतः ॥४१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

But know this threefold course of transmigrations that depends on the (three) qualities (to be again) threefold, low, middling, and high, according to the particular nature of the acts and of the knowledge (of each man).

या सत्त्वादिगुणत्रयनिमित्ता त्रिविधा जन्मान्तरप्राप्तिरुक्ता सा देशकालादिभेदेन संसारहेतुभूतकर्मभेदाज्ज्ञानभेदाच्चाधममध्यमोत्तमभेदेन पुनस्त्रिविधा बोद्धव्या ॥४१॥

स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः।
पशवश्च मृगाश्चैव जघन्या तामसी गतिः ॥४२॥

Immovable (beings), insects, both small and great, fishes, snakes, and tortoises, cattle and wild animals, are the lowest conditions to which (the quality of) Darkness leads.

स्थावरा वृक्षादयः, कृमयः सूक्ष्माः प्राणिनः, तेभ्य ईषत्स्थूलाः कीटा, तथा मत्स्यसर्पकूर्मपशुमृगाश्चेत्येषा तमोनिमित्ता जघन्या गतिः ॥४२॥

हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः।
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः ॥४३॥

Elephants, horses, Śūdras, and despicable barbarians, lions, tigers, and boars (are) the middling states, caused by (the quality of) Darkness.

हस्त्यश्वशूद्रम्लेच्छसिंहव्याघ्रसूकरास्तमोगुणनिमित्ता मध्यमा गतिः। गर्हिता इति म्लेच्छानां स्वरूपानुवादः ॥४३॥

चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः।
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः ॥४४॥

Cāraṇas, Suparṇas and hypocrities, Rākṣasas and Piśācas (belong to) the highest (rank of) conditions among those produced by Darkness.

चारणा नटादयः, सुपर्णाः पक्षिणः, छअना कर्मकारिणः पुरुषाः, राक्षसाः, पिशाचाश्चेत्येषा तामसीषूत्तमा गतिः ॥४४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥४५॥

Jhallas, Mallas, Naṭas, men who subsist by despicable occupations and those addicted to gambling and drinking (form) the lowest (order of) conditions caused by Activity.

झल्ला मल्लाः क्षत्रियाद्व्रात्यात्सवर्णायामुत्पन्ना दशमाध्यायोक्ता ज्ञेयाः। तत्र झल्लायष्टिप्रहरणाः, मल्ला बाहुयोधिनः, रन्नावतारका नटाः शस्त्रजीविद्यूतपान-प्रसक्ताश्च पुरुषा अधमा राजसी गतिर्ज्ञेया ॥४५॥

राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः।
वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥४६॥

Kings and Kṣatriyas, the domestic priests of kings, and those who delight in the warfare of disputations (constitute) the middling (rank of the) states caused by Activity.

राजानोऽभिषिक्ता जनपदेश्वराः। तथा क्षत्रिया राजपुरोहिताश्च शास्त्रार्थकलह-प्रियाश्च एषा राजसी गतिर्मध्यमा बोद्धव्या ॥४६॥

गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये।
तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः ॥४७॥

The Gandharvas, the Guhyakas, and the servants of the gods, likewise the Apsarāses, (belong all to) the highest (rank of) conditions produced by Activity.

गन्धर्वाः, गुह्यकाः, यक्षा जातिविशेषाः, पुराणादिप्रसिद्धाः, ये च देवानुयायिनो विद्याधरादयः, अप्सरसश्च देवगणिकाः सर्वा इत्येषा राजसीमध्य उत्कृष्टा गतिः ॥४७॥

तापसा यतयो विप्रा ये च वैमानिका गणाः।
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ॥४८॥

Hermits, ascetics, Brāhmaṇas, the crowds of the Vaimānika deities, the lunar mansions, and the Daityas

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(form) the first (and lowest rank of the) existence caused by Goodness.

वानप्रस्थाः, भिक्षवः, ब्राह्मणश्च, अप्सरसो व्यतिरिक्ताः पुष्पकादिविमानचारिणः, नक्षत्राणि, दैत्याश्चेत्येषा सत्त्वनिमित्ताऽधमा गतिः ॥४८॥

यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः।
पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ॥४९॥

Sacrificers, the sages, the gods, the Vedas, the heavenly lights, the years, the manes, and the Sādhyas (constitute) the second order of existences, caused by Goodness.

यागशीलाः, तथर्षयः, देवाः, वेदाभिमानिन्यश्च देवता विग्रहवत्य इतिहासप्रसिद्धाः, ज्यार्तीषि ध्रुवादीनि, वत्सरा इतिहासदृष्ट्या विग्रहवन्तः, पितरः सोमपादयः, साध्याश्च देवयोनिविशेषा इत्येषा सत्त्वनिमित्ता मध्यमा गतिः ॥४९॥

ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च।
उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥५०॥

The sages declare Brahmā, the creators of the universe, the law, the Great One, and the Undiscernible One (to consitute) the highest order of beings produced by Goodness.

चतुर्वदनः, विश्वसृजश्च मरीच्यादयः, धर्मो विग्रहवान्, महान्, अव्यक्तं च सांख्यप्रसिद्धं च तत्वद्वयं, तदधिष्ठातृदेवताद्वयमिह विवक्षितम्। अचेतनगुणत्रयमात्रस्योतमसात्त्विकगतित्वानुपपत्तेः। एतां चतुर्वदनाद्यात्मिकां सत्वनिमित्तामुत्कृष्टां गतिं पण्डिता वदन्ति ॥५०॥

एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः।
त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ॥५१॥

Thus (the result) of the threefold action, the whole system of transmigrations which (consists) of three classes, (each) with three subdivisions, and which includes all created beings, has been fully pointed out.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एष मनोवाक्कायरूपत्रयभेदेन त्रिप्रकारस्य कर्मणः सत्त्वरजसतमोभेदेन त्रिविधः पुनः प्रथममध्यमोत्तमभेदेन त्रिविधः सर्वप्राणिगतः समग्रो गतिविशेषः कात्स्न्येनोक्तः। सार्वभौतिक इत्यभिधानादनुक्ता अप्यत्र गतयो द्रष्टव्याः। उक्ता गतयस्तु प्रदर्शनार्थाः ॥५१॥

इन्द्रियाणां प्रसङ्गेन धर्मस्यासेवनेन च।
पापान्संयान्ति संसारानविद्वांसो नराधमाः ॥५२॥

In consequence of attachment to (the objects of) the senses, and in consequence of the non-performance of their duties, fools, the lowest of men, reach the vilest births.

इन्द्रियाणां विषयेषु प्रसन्नेन निषिद्धाचरणेन च प्रायश्चित्तादिधर्माननुष्ठानेन मूढा मनुष्यापसदाः कुत्सिता गतीः प्राप्नुवन्ति ॥५२॥

यां यां योनिं तु जीवोऽयं येनेह कर्मणा।
क्रमशो याति लोकेऽस्मिंस्तत्तत्सर्वं निबोधत ॥५३॥

What wombs this indvidual soul enters in this world and in consequence of what actions, learn the particulars of that at large and in due order.

अयं जीवो येन येन पापेन कर्मणा इह लोके कृतेन यद्यज्जन्म प्राप्नोति तत्सर्वं क्रमेण शृणुत ॥५३॥

बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात्।
संसारान्प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥५४॥

Those who committed mortal sins (*mahāpātaka*), having passed during large numbers of years through dreadful hells, obtain, after the expiration of (that term of punishment), the following births.

ब्रह्महत्यादिमहापातककारिणो बहून्वर्षसमूहान् भयंकरान्नरकान्प्राप्य तदुपभोगक्षयाद्दुष्कृतशेषेण वक्ष्यमाणान् जन्मविशेषान्प्राप्नुवन्ति ॥५४॥

श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चण्डालपुक्कसानां च ब्रह्महा योनिमृच्छति ॥५५॥

The slayer of a Brāhmaṇa enters the womb of a dog, a pig, an ass, a camel, a cow, a goat, a sheep, a deer, a bird, a Caṇḍāla, and a Pukkasa.

कुक्कुरसूकरदगर्दभोष्ट्रगोच्छागमेषमृगपक्षिचण्डालानां पुक्कसानां च निषादेन शूद्रायां जातानां संबन्धिनीं जातिं ब्रह्महा प्राप्नोति तत्र पापशेषगौरवलघावापेक्षया क्रमेण सर्वयोनिप्राप्तिर्बोद्धव्या। एवमुत्तरत्रापि ॥५५॥

कृमिकीटपतङ्गानां विड्भुजां चैव पक्षिणाम्।
हिंस्राणां चैव सत्त्वानां सुरापो ब्राह्मणो व्रजेत् ॥५६॥

A Brāhmaṇa who drinks (the spirituous liquor called) Surā shall enter (the bodies) of small and large insects, of moths, of birds, feeding on ordure, and of destructive beasts.

कृमिकीटशलभानां पुरीषभक्षिणां पक्षिणां हिंसनशीलानां च व्याघ्रादीनां प्राणिनां जातिं सुरापो ब्राह्मणो गच्छति ॥५६॥

लूताहिसरटानां च तिरश्चां चाम्बुचारिणाम्।
हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ॥५७॥

A Brāhmaṇa who steals (the gold a Brāhmaṇa shall pass) a thousand times (through the bodies) of spiders, snakes and lizards, of aquatic animals and of destructive Piśācas.

ऊर्णनाभसर्पकृकलासानां, जलचराणां च, तिरश्चां कुम्भीरादीनां, हिंसनशीलानां च योनिं सुवर्णहारी ब्राह्मणः सहकृवारान्प्राप्नोति ॥५७॥

तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि।
क्रूरकर्मकृतां चैव शतशो गुरुतल्पगः ॥५८॥

The violator of a Guru's bed (enters) a hundred times (the forms) of grasses, shrubs, and creepers, likewise of carnivorous (animals) and of (beasts) with fangs and of those doing cruel deeds.

तृणानां दूर्वादीनां गुल्मानामप्रकाण्डादीनां, लतानां गुडूच्यादीनां,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आममांसभक्षिणां गृध्रादीनां, दंष्ट्रिणां सिंहादीनां, क्रूरकर्मशालिनां वधशीलानां च व्याघ्रादीनां जातिं शतवारान्प्राप्नोति गुरुदारगामी ॥५८॥

हिंस्रा भवन्ति क्रव्यादाः कृमयोऽभक्ष्यभक्षिणः।
परस्परादिनः स्तेनाः प्रेतान्त्यस्त्रीनिषेविणः॥५९॥

Men who delight in doing hurt (become) carnivorous (animals); those who eat forbidden food, worms; thieves, creatures consuming their own kind; those who have intercourse with women of the lowest castes, *Pretas*.

ये प्राणिवधशीलास्ते आममांसाशिनो मार्जारादयो भवन्ति। अभक्ष्यभक्षिणो ये ते कृमयो जायन्ते। महापातकव्यतिरिक्ताश्चौरास्ते परस्परं मांसस्यादिनो भवन्ति। ये चाण्डालादिस्त्रीगामिनस्ते प्रेताख्याः प्राणिविशेषा जायन्ते। प्रेतान्त्यस्त्रीनिषेविण इति छन्दःसमानत्वात्स्मृतीनां, सर्वे विधयश्छन्दसि विकल्प्यन्त इति विसर्गलोपे च। यद्वा यलोपे च सवर्णदीर्घः॥५९॥

संयोगं पतितैर्गत्वा परस्यैव च योषितम्।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः॥६०॥

He who has associated with outcasts, he who has approached the wives of other men, and he who has stolen the property of a Brāhmaṇa become Brahmarākṣasas.

यावत्कालीनपतितसंयोगेन पतितो भवति तावन्तं कालं ब्रह्महादिमिश्चतुर्भिः सह संसर्गं कृत्वा परेषां च स्त्रियं गत्वा ब्राह्मणसुवर्णादन्यदपहृत्य एकैकपापकारेण ब्रह्मराक्षसो भूतविशेषो भवति॥६०॥

मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः।
विविधानि च रत्नानि जायते हेमकर्तृषु॥६१॥

A man who out of greed has stolen gems, pearls or coral, or any of the many other kinds of precious things, is born among the goldsmiths.

मणीन्माणिक्यादीनि, मुक्ताविद्रुमौ च नानाविधानि च रत्नानि वैदूर्यहीरकादीनि लोभेन हृत्वात्मीयभ्रमाद्विना सुवर्णकारयोनौ जायते। केचित्तु हेमकारपक्षिणमाचक्षते॥६१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः।
मधु दंशः पयः काको रसं श्वा नकुलो घृतम्॥६२॥

For stealing grain (a man) becomes a rat, for stealing yellow metal a Haṁsa, for stealing water a Plava, for stealing honey a stinging insect, for stealing milk a crow, for stealing condiments a dog, for stealing clarified butter an icheumon.

धान्यमपहृत्य मूषिको भवति। कांस्यं हृत्वा हंसः, जलं हृत्वा प्लवाख्यः पक्षी, माक्षिकं हृत्वा दंशः, क्षीरं हृत्वा काकः, विशेषोपदिष्टगुडलवणादिव्यतिरिक्तमिक्ष्वादि रसं हृत्वा श्वा भवति। घृतं हृत्वा नकुलो भवति॥६२॥

मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः।
चीरीवाकस्तु लवणं बलाका शकुनिर्दधि॥६३॥

For stealing meat a vulture, for stealing fat a cormorant, for stealing oil a winged animal (of the kind called) Tailapaka, for stealing salt a criket, for stealing sour milk a bird (of the kind called) Balākā.

मांसं हृत्वा गृध्रो भवति। वपां हृत्वा मद्गु नामा जलचरो भवति। तैलं हृत्वा तैलपायिकाख्यः पक्षी, लवणं हृत्वा चीराख्य उच्चैःस्वरः कीटः, दधि हृत्वा बलाकाख्यः पक्षी जायते॥६३॥

कौशेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः॥
कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडम्॥६४॥

For stealing silk a partridge, for stealing linen a frog, for stealing cotton-cloth a crane, for stealing a cow an iguana, for stealing molasses a flying-fox.

कीटकोशनिर्मितं वस्त्रं हृत्वा तित्तिरिर्नामा पक्षी भवति। क्षौमकृतं वस्त्रं हृत्वा मण्डूकः, कार्पासमयं पटं हृत्वा क्रौञ्चाख्यः प्राणी, गां हृत्वा गोधा, गुडं हृत्वा वाग्गुदनामा शकुनिर्भवति॥६४॥

छुच्छुन्दरिः शुभान्गन्धान्पत्रशाकं तु बर्हिणः॥
श्वावित्कृतान्नं विविधमकृतान्नं तु शल्यकः॥६५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

For stealing fine perfumes a musk-rat, for stealing vegetables consisting of leaves a peacock, for stealing cooked food of various kinds a porcupine, for stealing uncooked food a hedgehog.

सुगन्धिद्रव्याणि कस्तूर्यादिनि हृत्वा छुच्छुन्दरिर्भवति। वास्तूकादिपत्रशाकं हृत्वा मयूरः, सिद्धान्नमोदनसक्त्वादि नानाप्रकारकं हृत्वा श्वाविधाख्यः प्राणी, अकृतान्नं तु व्रीहियवादिकं हृत्वा शल्यकसंज्ञो जायते॥६५॥

बको भवति हृत्वाग्निं गृहकारी ह्युपस्करम्।
रक्तानि हृत्वा वासांसि जायते जीवजीवकः॥६६॥

For stealing fire he becomes a heron, for stealing household-utensils a mason-wasp, for stealing dyed clothes a francolin-partridge.

अग्निं हृत्वा बकाख्यः पक्षी जायते। गृहोपयोगि शूर्पमुसलादि हृत्वा भित्त्यादिषु मृत्तिकादिगृहकारी सपक्षः कीटो भवति। कुसुम्भादिरक्तानि वासांसि हृत्वा चकोराख्यः पक्षी जायते॥६६॥

वृको मृगेभं व्याघ्रोऽश्वं फलमूलं तु मर्कटः।
स्त्रीमृक्षः स्तोकको वारि यानान्युष्ट्रः पशूनजः॥६७॥

For stealing a deer or an elephant a wolf, for stealing a horse a tiger, for stealing fruit and roots a monkey, for stealing a woman a bear, for stealing water a black-white cuckoo, for stealing vehicles a camel, for stealing cattle a he-goat.

मृगं हस्तिनं वा हृत्वा वृकाख्यो हिंस्रः पशुर्भवति। घोटकं हृत्वा व्याघ्रो भवति। फलमूलं हृत्वा मर्कटो भवति। स्त्रियं हृत्वा भल्लूको भवति। पानार्थमुदकं हृत्वा चातकाख्यः पक्षी। यानानि शकटादीनि हृत्वा उष्ट्रो भवति। पशूनुक्तेतरान् हृत्वा छागो भवति॥६७॥

यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः।
अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः॥६८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

That man who has forcibly taken away any kind of property belonging to another, or who has eaten sacrificial food (of) which (no portion) had been offered, inevitably becomes an animal.

यत्किंचिदसारमपि परद्रव्यमिच्छातो मानुषोऽपहृत्य पुरोडाशादिकं तु हविरहुतं भुक्त्वा निश्चितं तिर्यक्त्वं प्राप्नोति ॥६८॥

स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः।
एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः ॥६९॥

Women, also, who in like manner have committed a theft, shall incur guilt; they will become the females of those same creatures (which have been enmerated above).

स्त्रियोऽप्येतेन प्रकारेणेच्छातः परस्वमपहृत्यः पापं प्राप्नुवन्ति। तेन पापेनोक्तान जन्तूनां भार्यात्वं प्रतिपद्यन्ते ॥६९॥

स्वेभ्यः स्वेभ्यस्तु कर्मभ्यश्च्युता वर्णा ह्यनापदि।
पापान्संसृत्य संसारान्प्रेष्यताम् यान्ति शत्रुषु ॥७०॥

But (men of the four) castes who have relinquished without the pressure of necessity their proper occupations, will become the servants of Dasyus, after migrating into despicable bodies.

एवं निषिद्धाचरणफलान्यमिधायाधुना विहिताकरणफलविपाकमाह-

वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्युतः।
अमेध्यकुणपाशी च क्षत्रियः कटपूतनः ॥७१॥

A Brāhmaṇa who has fallen off from his duty (becomes) an Ulkāmukha Preta, who feeds on what has been vomited; and a Kṣatriya, a Kaṭapūtana (Preta), who eats impure substances and corpses.

ब्राह्मणादयश्चत्वारो वर्णा आपदं विना पञ्चयज्ञादिकर्मत्यागिनो वक्ष्यमाणाः कुत्सिता योनीः प्राप्य ततो जन्मान्तरे शत्रुदासत्वं प्राप्नुवन्ति ॥७०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक्।
चैलाशकश्च भवति शूद्रो धर्मात्स्वकाच्च्युतः ॥७२॥

A Vaiśya who has fallen off from his duty becomes a Maitrākṣajyotika Preta, who feeds on pus; and a Śūdra, a Cailāśaka (Preta, who feeds on moths).

वैश्यो भ्रष्टकर्मा मैत्राक्षज्योतिकनामा पूयभक्षः प्रेतो जन्मान्तरे भवति। मित्रदेवताकत्वान्मैत्रः पायुस्तदेवाक्षं कर्मेन्द्रियं तत्र ज्योतिर्यस्य स मैत्राक्षज्योतिकः। पृषोदरादित्वाज्ज्योतिषः षकारलोपः। शूद्रः पुनर्भ्रष्टकर्मा चैलाशकाख्यः प्रेतो भवति। चेलं वस्त्रं तत्संबन्धिनीं यूकामश्नातीति चैलाशकः। गोविन्दराजस्तु चेलाशकाख्यः कीटश्चैल इत्युच्यते तद्भक्षश्च स भवतीत्याह तदयुक्तं, प्रेताख्यप्राणि विशेषप्रकरणात्॥७२॥

यथा यथा निषेवन्ते विषयान्विषयात्मकाः।
तथा तथा कुशलता तेषां तेषूपजायते ॥७३॥

In proportion as sensual men indulge in snesual pleasures, in that same proportion their taste for them grows.

यथा यथा शब्दादिविषयान्विषयलोलुपा नितान्तं सेवन्ते तथा तथा विषयेष्येव तेषां प्रावीण्यं भवतीति॥७३॥

तेऽभ्यासात्कर्मणां तेषां पापानामल्पबुद्धयः।
सम्प्राप्नुवन्ति दुःखानि तासु तास्विह योनिषु ॥७४॥

By repeating their sinful acts those men of small understanding suffer pain here (below) in various births.

ततः-

तेऽल्पधियस्तेषां निबद्धविषयोपभोगानामभ्यासतारतम्यात्तासु तासु गर्हिगर्हिततरगर्हिततमासु तिर्यगादियोनिषु दुःखमनुभवन्ति॥७४॥

तामिस्रादिषु चोग्रेषु नरकेषु विवर्तनम्।
असिपत्रवनादीनि बन्धनच्छेदनानि च ॥७५॥

(The torture of) being tossed about in dreadful hells, Tāmisra and the rest, (that of) the Forest with sword-leaved

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

trees and the like, and (that of) being bound and mangled.

"संप्राप्नुवन्ति" (अ. १२ श्लो. ७४) इति पूर्वश्लोकस्थमिहोत्तरत्रानुवर्तते। तामिस्रादिषु चतुर्थाध्यायोक्तेषु घोरेषु नरकेषु दुःखानुभवं प्राप्नुवन्ति। तथाऽसिपत्रवनादीनि बन्धनच्छेदनात्मिकान्नरकान्प्राप्नुवन्ति ॥ ।७५ ॥

विविधाश्चैव संपीडाः काकोलूकैश्च भक्षणम्।
करम्भवालुकातापान्कुम्भीपाकांश्च दारुणान् ॥७६ ॥

And various torments, the (pain of) being devoured by ravens and owls, the heat of scroching sand, and the (torture of) being boiled in jars, which is hard to bear.

विविधपीडनं काकाद्यैर्भक्षणं तथा तप्तवालुकादीन् कुम्भीपाकादींश्च नरकान्दारूणान्प्राप्नुवन्ति ॥७६ ॥

सम्भवांश्च वियोनीषु दुःखप्रायासु नित्यशः।
शीतातपाभिघातांश्च विविधानि भयानि च ॥७७ ॥

And births in the wombs (of) despicable (beings) which casue constant misery, and afflictions from cold and heat and terrors of various kinds.

संभवान् तिर्यगादिजातिषु नित्यं दुःखबहुलामुत्पत्तिं प्राप्नुवन्ति। तत्र शीतातपादिपीडनादि नानाप्रकाराणि च प्राप्नुवन्ति ॥७७ ॥

असकृद्गर्भवासेषु वासं जन्म च दारुणम्।
बन्धनानि च काष्ठानि परप्रेष्यत्वमेव च ॥७८ ॥

The (pain of) repeatedly lying in various wombs and agonizing births, imprisonment in fetters hard to bear, and the misery of being enslaved by others.

पुनः पुनर्गर्भस्थानेषु वासः समुत्पत्तिं च योनियन्त्रादिभिर्दुःखावहामुत्पन्नाश्च शृङ्खलादिभिर्बन्धनादिपीडामनुभवन्ति। परदासत्वं च प्राप्नुवन्ति ॥७८ ॥

बन्धुप्रियवियोगांश्च संवासं चैव दुर्जनैः।
द्रव्यार्जनं च नाशं च मित्रामित्रस्य चार्जनम् ॥७९ ॥

And separations from their relatives and dear ones, and the (pain of) dwelling together with the wicked, (labour in)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

gaining wealth and its loss, (trouble in) making friends and (the appearance of) enemies.

बान्धवैः सुहृद्भिः सह वियोगान्, दुर्जनैश्च सहैकत्रावस्थानं, धनार्जनप्रयासं, धनविनाशं, कष्टेन मित्रार्जनं, शत्रुप्रादुर्भावं प्राप्नुवन्ति च ॥७९॥

जरां चैवाप्रतीकारां व्याधिभिश्चोपपीडनम्।
क्लेशांश्च विविधांस्तांस्तान्मृत्युमेव च दुर्जयम्॥८०॥

Old age against which there is no remedy, the pangs of diseases, afflictions of many various kinds, and (finally) unconquerable death.

जरां चाविद्यमानप्रतीकारां व्याधिभिश्चोपपीडनं क्षुत्पिपासादिना च नानाप्रकारान् क्लेशान्मृत्युं च दुर्वारं प्राप्नुवन्ति ॥८०॥

यादृशेन तु भावेन यद्यत्कर्म निषेवते।
तादृशेन शरीरेण तत्तत्फलमुपाश्नुते॥८१॥

But with whatever disposition of mind (a man) performs any act, he reaps its result in a (future) body endowed with the same quality.

यथाविधेन सात्त्विकेन राजसेन तामसेन वा चेतसा यद्यत्कर्म स्नानदानयोगाद्यनुतिष्ठति तादृशेनैव शरीरेण सात्त्विकेन रजोऽधिकेन तमोऽधिकेन वा तत्तत्स्नानादिफलमुपभुङ्क्ते ॥८१॥

एष सर्वः समुद्दिष्टः कर्मणां वः फलोदयः।
नै श्रेयसकरं कर्म विप्रस्येदं निबोधत॥८२॥

All the results, proceeding from actions, have been thus pointed out; learn (next) those acts which secure supreme bliss to a Brāhmaṇa.

एष युष्माकं विहितप्रतिषिद्धानां कर्मणां सर्वः फलोदय उक्तः इदानीं ब्राह्मणस्य निःश्रेयसाय मोक्षाय हितं कर्मानुष्ठानमिद शृणुत ॥८२॥

वेदाभ्यासस्तपोज्ञानमिन्द्रियाणां च संयमः।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम्॥८३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Studying the Veda, (practising) austerities, (the acquisition of true) knowledge, the subjugation of the organs, abstention from doing injury, and serving the Guru are the best means for attaining supreme bliss.

उपनिषदादेर्वेदस्य ग्रन्थतोऽर्थतश्चावर्तनं, तपःकृच्छ्रादि, ज्ञानं ब्रह्मविषयं, इन्द्रियजयः अविहितहिंसावर्जनं, गुरुशुश्रूषेत्येतत्प्रकृष्टं मोक्षसाधनम् ॥८३॥

सर्वेषामपि चैतेषां शुभानामिह कर्मणाम्।
किञ्चिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति ॥८४॥

(If you ask) whether among all these virtuous actions, (performed) here below, (there be) one which has been declared more efficacious (than the rest) for securing supreme happiness to man.

सर्वेषामप्येतेषां वेदाभ्यासादीनां शुभकर्मणां मध्ये किंचित्कर्मातिशयेन मोक्षसाधनं स्यादिति वितर्के ऋषीणां जिज्ञासाविशेषादुत्तरश्लोकेन निर्णयमाह ॥८४॥

सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥८५॥

(The answer is that) that knowledge of the Soul is stated to be the most excellent among all of them; for that is the first of all sciences, because immortality is gained through that.

एषां वेदाभ्यासादीनां सर्वेषामपि मध्य उपनिषदुक्तपरमार्थज्ञानं प्रकृष्टं स्मृतं यस्मात्सर्वविद्यानां प्रधानम्। अत्रैव हेतुमाह। यतो मोक्षस्तस्मात्प्राप्यतेः ॥८५॥

षण्णामेषां तु सर्वेषां कर्मणां प्रेत्य चेह च।
श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम् ॥८६॥

Among those six (kinds of) actions (enumerated above, the performance of) the acts taught in the Veda must ever be held to be most efficacious for ensuring happiness in this world and the next.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एषां पुनः षण्णां पूर्वोक्तानां वेदाभ्यासादीनां कर्मणां मध्ये वैदिकं कर्म परमात्मज्ञानमैहिकामुष्मिकश्रेयस्करतरं ज्ञातव्यम्। पूर्वश्लोके मोक्षहेतुत्वमात्मज्ञानस्योक्तम्, इह तु ऐहिकामुष्मिकश्रेयोऽन्तरहेतुत्वमुच्यत इत्यपौनरुक्त्यम्। तथाहि प्रतीकोपासनानां संशयोदयं "नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति।" गोविन्दराजस्तु एषां पूर्वश्लोकोक्तानां वेदाभ्यासादीनां षण्णां कर्मणां मध्यात्स्मार्तकर्मापेक्षया वैदिकं कर्म सर्वदेहपरलोके सातिशयं सातिशयेन कीर्तिस्वर्गनिःश्रेयःसाधनं ज्ञेयमिति व्याख्यातवान्। तदयुक्तम्। वेदाभ्यासादीनां षण्णामपि प्रत्येकं श्रुतिविहितत्वात्। तेषु मध्ये स्मार्तापेक्षया किंचिदेवं किंचच्च नेति न संभवति। ततश्च कथं निर्धारणे षष्ठी। तस्मद्यथोक्तैव व्याख्या ॥८६॥

इदानीमैहिकामुष्मिकश्रेयःसाधनत्वमेधात्मज्ञानस्य स्पृष्टयति-

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः।
अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ॥८७॥

For in the performance of the acts prescribed by the Veda all those (others) are fully comprised, (each) in its turn in the several rules for the rites.

वैदिके पुनः कर्मयोगेपरमात्मोपासनारूपे सर्वाण्येतानि पूर्वश्लोकोक्तान्यैहिकामुष्मिकश्रेयांसि तस्मिन्नुपासनाविधौ क्रमशः संभवन्ति। अथवा सर्वाण्येतानीति वेदाभ्यासादीन्येव परामृश्यन्ते। परात्मज्ञाने वेदाभ्यासादीनि "तमेतं वेदानुवचनेन विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति श्रुतिविहितान्तत्वेनान्तर्भवन्ति ॥८७॥

सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥८८॥

The acts prescribed by the Veda are of two kinds, such as procure an increase of happiness and cause a continuation (of mundane existence, pravritta), and such as ensure supreme bliss and cause a cessation (of mundance existence, nivritta).

वैदिकं कर्मात्र ज्योतिष्टोमादि प्रतीकोपासनादि च गृह्यते।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वर्गादिसुखप्राप्तिकरसंसारप्रवृत्तिहेतुत्वात्प्रवृत्ताख्यं वैदिकं कर्म, तथा निःश्रेयसं मोक्षस्तदर्थं कर्म नैःश्रेयसिकं संसारनिवृत्तिहेतुत्वान्निवृत्ताख्यमित्येवं वैदिकं कर्म द्विप्रकारकं वेदितव्यम् ॥८८॥

एतदेव स्पष्टयति-

इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥८९॥
[अकामोपहतं नित्यं निवृत्तं च विधीयते।
कामतस्तु कृतं कर्म प्रवृत्तमुपदिश्यते ॥७॥]

Acts which secure (the fulfilment of) wishes in this world or in the next are called *pravṛtta* (such as cuase a continuation of mundance existence); but acts performed without any desire (for a reward), preceded by (the acquisition) of (true) knowledge, are declared to be *nivṛtta* (such as cause the cessation of mundance existence).

इह काम्यसाधनं वृष्टिहेतुकारि यागादिरत्र स्वर्गादिफलसाधनं ज्योतिष्टोमादि यस्कामतया क्रियते तत्संसारप्रवृत्तिहेतुत्वात्वृत्तमित्युच्यते। दृष्टादृष्टफलकामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्वकं संसारनिवृत्तिहेतुत्वान्निवृत्तमित्युच्यते ॥८९॥

प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम्।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥९०॥

He who sedulously performs acts leading to future biths (*pravṛtta*) becomes equal to the gods; but he who is intent on the performance of those causing the cessation (of existence, *nivṛtta*) indeed, passes beyond (the reach of) the five elements.

प्रवृत्तकर्माभ्यासेन देवसमानगतित्वं तत्फलं कर्मणा प्राप्नोति। एतच्च प्रदर्शनार्थमन्यफलकेन कर्मणा प्रवृत्तेन फलान्तरमपि प्राप्नोति। निवृत्तकर्माभ्यासेन पुनः शरीरारम्भकानि पञ्च भूतान्यतिक्रामति। मोक्षं प्राप्नोतीत्यर्थः ॥९०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति॥९१॥

He who sacrifices to the Self (alone), equally recognising the Self in all created beings and all created beings in the Self, becomes (independent like) an autocrat and self-luminous.

सर्वभूतेषु स्थावरजन्नमात्मकेष्वहमेवात्मरूपेणास्मि सर्वाणि भूतानि परमात्मपरिणामसिद्धानि मय्येव परमात्मन्यासत इति सामान्येन जानन्नात्मयाजी ब्रह्मार्पणन्यायेन ज्योतिष्टोमादि कुर्वन् स्वेन राजते प्रकाशत इति स्वराट् ब्रह्म तस्य भावः स्वराज्यं ब्रह्मत्वं लभते। मोक्षप्राप्नोतीत्यर्थः। तथा च श्रुतिः-"सर्वं खल्विदं ब्रह्म तज्जलनिति शान्त उपासीत"। तथा यजुर्वेदमन्त्रः-"यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते"॥९१॥

यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्॥९२॥

After giving up even the above-mentioned sacrificial rites, a Brāhmaṇa should exert himself in (acquiring) the knowledge of the Soul, in extinguishing his passions, and in studying the Veda.

शास्त्रचोदितान्यप्यग्निहोत्रादीनि कर्माणि परित्यज्य ब्रह्मध्यानेन्द्रियजयप्रणवोपनिषदादिवेदाभ्यासेषु ब्राह्मणो यत्नं कुर्यात्। एतच्चैषां मोक्षोपायान्तरन्नोपायत्वप्रदर्शनार्थं न त्वग्निहोत्रादिपरित्यागपरत्वमुत्तम्॥९२॥

एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः।
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा॥९३॥

For that secures the attainment of the object of existence, especially in the case of a Brāhmaṇa, because by attaining that, not otherwise, a twiceborn man has gained all his ends.

एतदात्मज्ञानवेदाभ्यासादि द्विजातेर्जन्मसाफल्यापादकत्वाज्जन्मनः साफल्यं विशेषेण ब्राह्मणस्य। यस्मादेतत्प्राप्य द्विजातिः कृतकृत्यो भवति न

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रकारान्तरेण ॥९३॥

इदानीं वेदादेव ब्रह्म ज्ञातव्यमिति प्रदर्शयितुं वेदप्रशंसामाह-

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः॥९४॥

The Veda is the eternal eye of the manes, gods, and men; the Veda-ordinance (is) both beyond the sphere of (human) power, and beyond the sphere of (human) comprehension; that is a certain fact.

पितृदेवमनुष्याणां हव्यकव्यान्नदानेषु वेद एव चक्षुरिव चक्षुरनश्वरं तत्प्रमाणत्वादसंनिकृष्टफलकव्यदानादौ प्रमाणान्तरानवकाशात्। अशक्यं च वेदशास्त्रं कर्तुम्। अनेनापौरुषेयतोक्ता। अप्रमेयं च मीमांसादिन्यायनिरपेक्षतयानवगम्यमानप्रमेयमेवं व्यवस्था। ततश्च मीमांसया व्याकरणाद्यन्नैश्च सर्वब्रह्मात्मकं वेदार्थं जानीयादिति व्यवस्थितम्॥९४॥

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः॥९५॥

All those traditions (smṛti) and all those despicable systems of philosophy, which are not based on the Veda, produce no reward after death; for they are declared to be founded on Darkness.

या स्मृतयो वेदमूला न भवन्ति दृष्टार्थवाक्यानि चैत्यवन्दनात्स्वर्गो भवतीत्यादीनि। यानि चासत्तर्कमूलानि देवतापूर्वादिनिराकरणात्मकानि वेदविरुद्धानि चार्वाकदर्शनानि सर्वाणि परलोके निष्फलानि यस्मान्नरकफलानि तानि मन्वादिभिः स्मृतानि॥९५॥

एतदेव स्पष्टयति-

उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित्।
तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च॥९६॥

All those (doctrines), differing from the (Veda), which spring up and (soon) perish, are worthless and false, be-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

cause they are of modern date.

यान्यतो वेदादन्यमूलानि च कानिचिच्छास्त्राणि पौरुषेयत्वादुत्पद्यन्ते एवमाशु विनश्यन्ति। तानि च इदानींतनत्वान्निष्फलानि असत्यरूपाणि च। स्मृत्यादीनां तु वेदमूलत्वादेव प्रामाण्यम् ॥९६॥

चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति ॥९७॥

The four castes, the three worlds, the four orders, the past, the present, and the future are all severally known by means of the Veda.

"ब्राह्मणोऽस्य मुखमासीत्" इत्यादिवेदादेव चातुर्वर्ण्यं प्रसिध्यति। ब्राह्मणीभूतमातापितृजनितत्वमिति तदुपजीवितया स्वर्गादिदललोकोऽपि वेदादेव प्रसिद्धः। एवं ब्रह्मचर्याद्याश्रमा अपि चत्वारो वेदमूलकत्वाद्वेदादेव प्रसिध्यन्ति। किं बहुना। यत्किंचिदतीतं वर्तमानं भविष्यं च तत्सर्वं "अग्नौ प्रास्ताहुतिः सम्यग्" (अ. ३ लो. ७६) इत्यादिन्यायेन वेदादेव प्रसिध्यति ॥९७॥

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
वेदादेव प्रसूयन्ते प्रसूतिः गुणकर्मतः ॥९८॥

Sound, touch, colour, taste, and fifthly smell are known through the Veda alone, (their) production (is) through the (Vedic rites, which in this respect are) secondary acts.

य इह लोके परलोके च शब्दादयो विषयाः प्रसूयन्ते प्रयुज्यन्ते एतैरिति प्रसूतयः प्रसूतयश्च गुणाश्चेति सत्वरजस्तमोरूपाः तन्निबन्धनवैदिक-कर्महेतुत्वाद्वेदादेव प्रसिध्यन्ति ॥९८॥

विभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्।
तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम् ॥९९॥

The eternal lore of the Veda upholds all created beings; hence I hold that to be supreme, which is the means of (securing happiness to) these creatures.

वेदशास्त्रं नित्यं सर्वभूतानि धारयति। तथाच "हविष्मती हूयते

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सोऽग्निरादित्यमुपसर्पति तत्सूर्यो रश्मिभिर्वर्षति तेनान्नं भवति अथेह भूतानामुत्पत्तिस्थितिश्चेति हविर्जायते" इति ब्राह्मणम्। तस्माद्वेदशास्त्रमस्य जन्तोर्वैदिककर्माधिकारिपुरुषस्य प्रकृष्टं पुरुषार्थसाधनं जानन्ति ॥९९॥

सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति॥१००॥

Command of armies, royal authority, the office of a judge, and sovereignty over the whole world he(only) deserves who knows the Veda-science.

सेनापत्यं, राज्यं, दण्डप्रणेतृत्वं, सर्वभूम्याधिपत्यादीन्येतत्सर्वमुक्तप्रयोजनं वेदात्मकशास्त्रज्ञ एवार्हति॥१००॥

यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान्।
तदा दहति वेदज्ञः कर्मजं दोषमात्मनः॥१०१॥
[न वेदबलमाश्रित्य पापकर्मरुचिर्भवेत्।
अज्ञानाच्च प्रमादाच्च दहते कर्म नेतरत्॥८॥]

As a fire that has gained strength consumes even trees full of sap, even so he who knows the Veda burns out the taint of his soul which arises from (evil) acts.

यथा वृद्धोऽग्निरार्द्रानपि द्रुमान्दहत्येवं ग्रन्थतोऽर्थतश्च वेदज्ञः प्रतिषिद्धाद्याचरणादिकर्मजनितं पापमात्मनो नाशयति। एवंच न वेदः केवलं स्वर्गापवर्गादिहेतुः किं त्वहितनिवृत्तिहेतुरिति दर्शितः॥१०१॥

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते॥१०२॥

In whatever order (a man) who knows the true meaning of the Veda-science may dwell, he becomes even while abiding in this world, fit for the union with Brāhman.

यस्तत्त्वतो वेदं तदर्थं च कर्म ब्रह्मात्मकं जानाति स नित्यनैमित्तिककर्मानुगृहीतब्रह्मज्ञानेन ब्रह्मचर्याद्याश्रमावस्थितोऽस्मिन्नेव लोके

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तिष्ठन् ब्रह्मत्वाय कल्पते ॥१०२॥

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥१०३॥

(Even forgetful) students of the (sacred) books are more distinguished than the ignorant, those who remember them surpass the (forgetful) students, those who possess a knowledge (of the meaning) are more distinguished than those who (only) remember (the words), men who follow (the teaching of the texts) surpass those who (merely) know (their meaning).

उभयोः प्रशस्यत्वे सत्यन्यतरातिशयविवक्षायां श्रेष्ठ इतीष्ठनो विधानादीषदध्ययना अज्ञास्तेभ्यः समग्रग्रन्थाध्येतारः श्रेष्ठाः। तेभ्योऽधीतग्रन्थधारणसमर्थाः श्रेष्ठाः। तेन ग्रन्थितः पठितविस्मृतग्रन्था बोद्धव्याः। धारिभ्योऽधीतग्रन्थार्थज्ञाः प्रकृष्टास्तेभ्योऽनुष्ठातारः ॥१०३॥

तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते ॥१०४॥

Austerity and sacred learning are the best means by which a Brāhmaṇa secures supreme bliss; by austerities he destroys guilt, by sacred learning he obtains the cessation of (births and) deaths.

तपः स्वधर्मवृत्तित्वमिति भारतदर्शनात् आश्रमविहितं कर्म आत्मज्ञानं च ब्राह्मणस्य मोक्षसाधनम्। तत्र तपसोऽवान्तरव्यापारमाह। तपसा पापमपहन्ति। ब्रह्मज्ञानेन मोक्षमाप्नोति। तथाच श्रुतिः-"विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" विद्यातोऽन्यदविद्या कर्म मृत्युवद्दुःखसाधनत्वान्मृत्युः पापं। श्रुत्यर्थ एवायं मनुना व्याख्यायोक्तः ॥१०४॥

प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥१०५॥

The three (kinds of evidence), perception, inference,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

and the (sacred) Institutes which comprise the tradition (of) many (schools), must be fully understood by him who desires perfect correctness with respect to the sacred law.

धर्मस्य तत्त्वावबोधमिच्छता प्रत्यक्षमनुमानं च धर्मसाधनभूतद्रव्यगुण-जातितत्वज्ञानाय शास्त्रं च वेदमूलं स्मृत्यादिरूपं नानाप्रकारधर्मस्वरूपविज्ञानाय सुविदितं कर्तव्यम्। तदेव च प्रमाणत्रयं मनोरभिमतम्। उपमानार्थापत्त्यादेश्चानु-मानान्तर्भावः॥१०५॥

आर्षं धर्मोपदेशं च वेदशास्त्राऽविरोधिना।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः॥१०६॥

He alone, and no other man, knows the sacred law, who explores the (utterances) of the sages and the body of the laws, by (modes of) reasoning, not repugnant to the Veda-lore.

ऋषिदृष्टत्वादार्षं वेदं धर्मोपदेशं च तन्मूलस्मृत्यादिकं यस्तदविरुद्धेन मीमांसादिन्यायेन विचारयति स धर्मं जानाति नतु मीमांसानभिज्ञः। धर्मे करणं वेदः, मीमांसा चेतिकर्तव्यतास्थानीया। तदुक्तं भट्टवार्तिककृता-"धर्मे प्रमीयमाणे हि वेदेन करणात्मना। इतिकर्तव्यताभागं मीमांसा पूरयिष्यति"॥१०६॥

नैःश्रेयसमिदं कर्म यथोदितमशेषतः।
मानवस्यास्य शास्त्रस्य रहस्यमुपदिश्यते॥१०७॥

Thus the acts which secure supreme bliss have been exactly and fully described; (now) the secret portion of these Institutes, proclaimed by Manu will be taught.

एतन्निःश्रेयससाधनं कर्म निःशेषेण यथावदुदितम्। अत ऊर्ध्वमस्य मानवशाखस्य रहस्यं गोपनीयमिदं वक्ष्यमाणं शृणुत॥१०७॥

अस्य शास्त्रस्यासमस्तधर्माभिधानमाशङ्क्याह सामान्योक्त्या समग्रधर्मोप-देशकत्वं बोधयति-

अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत्।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः॥१०८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

If it be asked how it should be with respect to (points of) the law which have not been (specially) mentioned, (the answer is), 'that which Brāhmaṇas (who are) Śiṣṭas propound, shall doubtlessly have legal (force).'

धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः॥१०९॥

Those Brāhmaṇas must be considered as Śiṣṭas who, in accordance with the sacred law, have studied the Veda together with its appendages, and are able to adduce proofs perceptible by the senses from the revealed texts.

ब्रह्मचर्याद्युक्तधर्मेण यैरन्नमीमांसाधर्मशास्त्रपुराणाद्युपबृंहितो वेदोऽधिगतस्ते ब्राह्मणाः श्रुतेः प्रत्यक्षीकरणे हेतवः, ये श्रुतिं पठित्वा तदर्थमुपदिशन्ति ते शिष्टा विज्ञेयाः॥१०९॥

दशावरा वा परिषद्यं धर्मं परिकल्पयेत्।
त्रयवरा वापि वृत्तस्था तं धर्मं न विचालयेत्॥११०॥
[पुराणं मानवो धर्मः सान्नोपाङ्गचिकित्सकः।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः॥९॥]

Whatever an assembly, consisting either of at least ten, or of at least three persons who follow their prescribed occupations, declares to be law, the legal (force of) that one must not dispute.

यदि बहवः सन्तोऽवहिता न भवन्ति तदा दशावरास्त्र्यवराश्चेति वक्ष्यमाणलक्षणा यस्याः सा परिषत् तदभावे त्रयोऽवरा यस्याःसा वा सदाचारा यं धर्मं निश्चिनुयात्तं धर्मत्वेन स्वीकुर्यान्न विसंवदेत्॥११०॥

त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः।
त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा॥१११॥

Three persons who each know on of the three principal Vedas, a logician, a Mīmāṁsaka, one who knows

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

the Nirukta, one who recites (the Institutes of) the sacred law, and three men belonging to the first three orders shall constitute a (legal) assembly, consisting of at least ten members.

वेदत्रयसंबन्धशाखात्रयाध्येतारः श्रुतिस्मृत्यविरुद्धन्यायशास्त्रज्ञः,मीमांसात्मकतर्कवित्, निरुक्तज्ञः, मानववादिधर्मशास्त्रवेदी, ब्रह्मचारी, गृहस्थवानप्रस्थौ इत्येषा दशावरा परिषत्स्यात् ॥१११॥

ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ॥११२॥

One who know the Ṛg-veda, one who knows the Yajur-veda, and one who knows the Sāma-veda, shall be known (to form) an assembly consisting of at least three members (and competent) to decide doubtful points of law.

ऋग्यजुःसामवेदशाखानां येऽध्येतारस्तदर्थज्ञाश्च त्रयः सा धर्मसंदेहनिरासार्थं त्रयवरा परिषद्बोद्धव्या ॥११२॥

तदभावे-

एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः।
स विज्ञेयः परो धर्मो नाज्ञानामुदितोऽयुतैः ॥११३॥

Even that which one Brāhmaṇa versed in the Veda declares to be law, must be considered (to have) supreme legal (force, but) not that which is proclaimed by myriads of ignorant men.

एकोऽपि वेदार्थधर्मज्ञो यं धर्मं निश्चिनुयात् प्रकृष्टो धर्मः स बोद्धव्यो न वेदानभिक्षानां दशभिः सहस्रैरप्युक्तः। वेदविच्छब्दोऽयं वेदार्थधर्मज्ञपरः। एतच्च श्रेष्ठोपलक्षणम्। स्मृतिपुराणमीमांसान्यायशास्त्रज्ञोऽपि गुरुपरंपरोपदशेविच्च ज्ञेयः। तथा "केवलं शास्त्रमाश्रित्य न कर्तव्यो विनिर्णयः। युक्तिहीनविचारे तु धर्महानिः प्रजायते"। तेन बहुस्मृतिज्ञोऽपि यदि सम्यक् प्रायश्चित्तादिधर्मं जानाति तदा तेनाप्येकेन धर्म उक्तः प्रकृष्टो धर्मो ज्ञेयः। अतएव यमः-"एको द्वौ वा त्रयो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वापि यद्ब्रूयुर्धर्मपाठकाः। स धर्म इति विज्ञेयो नेतरेषां सहकृशः ॥" ॥११३॥

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्।
सहस्त्रशः समेतानां परिषत्त्वं न विद्यते॥११४॥

Even if thousands of Brāhmaṇas, who have not fulfilled their sacred duties, are unacquainted with the Veda, and subsist only by the name of their caste, meet, they cannot (form) an assembly (for settling the sacred law).

सावित्र्यादिब्रह्मचारिव्रतरहितानां, मन्त्रवेदाध्ययनरहितानां, ब्राह्मण-जातिमात्रधारिणां, बहूनामपि मिलितानां परिषत्त्वं नास्ति। धर्मनिर्णय-सामर्थ्याभावात्॥११४॥

यं वदन्ति तमोभूता मूर्खा धर्ममतद्विदः।
तत्पापं शतधा भूत्वा तद्वक्तृननगच्छति॥११५॥

The sin of him whom dunces, incarnations of Darkness, and unacquainted with the law, instruct (in his duty), falls, increased a hundrefold, on those who propound it.

तमोगुणबहुला मूर्खाः धर्माप्रमाणवेदार्थानभिज्ञा अतएव प्रश्नविषयधर्माविदः प्रायश्चित्तादिधर्मं यं पुरुषं प्रत्युपदिशन्ति तदीयं पापं शतगुणं भूत्वा वाचकान्बहून् भजेत्॥११५॥

एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परम्।
अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम्। ॥११६॥

All that which is most efficacious for securing supreme bliss has been thus declared to you; a Brāhmaṇa who does not fail off from that obtains the most excellent state.

एतन्निःश्रेयससाधकं प्रकृष्टं धर्मादिकं सर्वं युष्माकमभिहितम्। एतदनुतिष्ठन्ब्राह्मणादिः परमां गतिं स्वर्गापवर्गरूपां प्राप्नोति॥११६॥

एवं स भगवान्देवो लोकानां हितकाम्यया।
धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान्॥११७॥

Thus did that worshipful deity disclose to me, through

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

a desire of benefiting mankind, this whole most excellent secret of the sacred law.

सामान्यविधिप्राप्तेषु विशेषेणानुपदिष्टेषु कथं कर्तव्यं स्यादिति यदि संशयो भवेत्तदा यं धर्मं वक्ष्यमाणलक्षणाः शिष्टा ब्राह्मणा ब्रूयुः स तत्र निश्चितो धर्मः स्यात्॥१०८॥

स भगवानैश्वर्यादिसंयुक्तो द्योतनाद्देवा मनुरुक्तप्रकारेणेदं सर्वं धर्मस्य परमार्थं शुश्रूषुशिष्येभ्यः अगोपनीयं लोकहितेच्छया ममेदं सर्वमुक्तवानिति भृगुर्महर्षीनाह॥११७॥

एवमुपसंहृत्य महर्षीणां हितायोत्तमप्यात्मज्ञानं प्रकृष्टमोक्षोपकारकतया पृथक्कृत्याह-

सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः।
सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः॥११८॥

Let (every Brāhmaṇa), concentrating his mind, fully recognise in the Self all things, both the real and the unreal, for he who recognises the universe in the Self, does not give his heart to unrighteousness.

सद्भावमसद्भावं सर्वं ब्राह्मणो जानन् ब्रह्मस्वरूपमात्मन्युपस्थितं तदात्मकमनन्यमना ध्यानप्रकर्षेण साक्षात्कुर्यात्। यस्मात्सर्वमात्मत्वेन पश्यन्रागद्वेषाभावादधर्मे मनो न कुरुते॥११८॥

एतदेव स्पष्टयति-

आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्॥११९॥

The Self alone is the multitude of the gods, the universe rests on the Self; for the Self produces the connexion of these embodied (spirits) with actions.

इन्द्राद्याः सर्वदेवताः परमात्मैव सर्वात्मत्वात्परमात्मनः। सर्वं जगदात्मन्येवावस्थितं परमात्मपरिणामत्वात्। हिरवधारणार्थे। परमात्मैवैषां क्षेत्रज्ञादीनां कर्मसंबन्धं जनयति। तथाच श्रुतिः-"एष ह्येव साधु कर्म कारयति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यमूर्ध्वं निनीषति। एष ह्येवासाधु कर्म कारयति यमधो निनीषति" इति ॥११९॥

इदानीं वक्ष्यमाणब्रह्मध्यानविशेषोपयोगितया दैहिकाकाशादिषु बाह्याकाशादीनां लयमाह-

खं संनिवेशयेत्स्वेषु चेष्टनस्पर्शनेऽनिलम्।
पङ्क्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु॥१२०॥
मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्॥१२१॥

Let him meditate on the ether as identical with the cavities (of the body), on the wind as identical with the organs of motions and of touch, on the most excellent light as the same with his digestive organs and his sight, on water as the same with the (corporeal) fluids, on the earth as the same with the solid parts (of his body).

On the moon as one with the inernal organ, on the quarters of the horizon as one with his sense of hearing on Viṣṇu as one with his (power of) motion, on Hara as the same with his strength, on Agni (Fire) as identical with his seech, on Mitra as identical with his excretions, and on Prajāpati as one with his organ of generation.

बाह्याकाशमुदराद्यवच्छिन्नशरीराकाशेषु लीनमेकत्वेन धारयेत्। तथा चेष्टास्पर्शकारणभूतदैहिकवायौ बाह्यवायुं, औदर्यचाक्षुषतेजसोरग्निसूर्ययोः प्रकृष्टं तेजः, दैहिकास्वप्सु बाह्या अपः बाह्याः पृथिव्यादयः शरीरपार्थिवभागेषु, मनसि चन्द्रं, श्रोत्रे दिशः, पादेन्द्रिये विष्णुं, बले हरं, वागिन्द्रियेऽग्निं, पाय्विन्द्रिये मित्रं, उपस्थेन्द्रिये प्रजापतिं लीनमेकत्वेन भावयेत्॥१२०-१२१॥

एवमाध्यात्मिकभूतादिकं लीनमेकत्वेन भावयित्वा-

प्रशासितारं सर्वेषामणीयांसमणोरपि।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्॥१२२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Let him know the supreme Male (Puruṣa, to be) the sovereign ruler of them all, smaller even than small, bright like gold, and perceptible by the intellect (only when) in (a state of) sleep (-like abstraction).

प्रशासितारं नियन्तारं ब्रह्मादिस्तम्बपर्यन्तस्य चेतनाचेतनस्य जातेर्योऽयमग्न्यादीनामौष्ण्यादिनियमो यश्चादित्यादीनां भ्रमणादिनियमो यच्च कर्मणां फलं प्रतिनियतमेतत्सर्वं परमात्माधीनम्। तथाच "एतस्यैवाऽक्षरस्य प्रशासने गार्गि" (बृहदारण्यके ३।८।९) इत्याद्युपनिषदः। तथा "भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः" (कठोपनि. ६।३) इति। तथा अणोरणी यांसं सर्वात्मत्वात् (नृसिंहतापिनी १।१)। तथाच श्रुतिः-"वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवेति विज्ञेयः स चानन्त्याय कल्पते॥" रुक्माभं यद्यपि "अशब्दमस्पर्शमरूपमव्ययम्" (कठोप. ३।१५) इत्याद्युपनिषदा रूपं परमात्मनो निषिद्धं तथाप्युपासनाविशेषे शुद्धसुवर्णाभम्॥ अत एव "य एषोऽन्तरादित्ये हिरण्मयः" (१।६।६) इत्यादि छान्दोग्योपनिषत्। स्वप्नधीगम्यम्। दृष्टान्तोऽयं स्वप्नधीसदृशज्ञानग्राह्यम्। यथा स्वप्नधीश्चक्षुरादिबाह्येन्द्रियोपरमे मनोमात्रेण जन्यत एवमात्मधीरपि। अत एव व्यासः "नैवासौ चक्षुषा ग्राह्यो न च शिष्टैरपीन्द्रियैः। मनसा तु प्रसन्नेन गृह्यते सूक्ष्मदर्शिभिः॥" एवंविधं परात्मानमनुचिन्तयेत्॥१२२॥

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम्॥१२३॥

Some call him Agni (Fire), others Manu, the Lord of creatures, others Indra, others the vital air, and again others eternal Brāhman.

एतं च परमात्मानमग्नित्वेनैके याज्ञिका उपासते। तथा तमेकमग्निमित्यध्वर्यव उपासते। अन्ये पुनः कृष्टटत्वात्कृष्टाख्यप्रजापतिरूपतयोपासते। एके पुनरैश्वर्ययोगादिन्द्ररूपतयोपासते। अपरे पुनः प्राणत्वेनोपासते। सर्वाणि भूरादीनीमानि भूतानि "प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहतः" इत्यादिश्रुति-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दर्शनात्। अपरे पुनरपगतप्रपञ्चात्मकं सच्चिदानन्दस्वरूपं परमात्मानमुपासते मूर्तामूर्तस्वरूपे च ब्रह्मणि सर्वा एवोपासनाः श्रुतिप्रसिद्धा भवन्ति॥१२३॥

एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत्॥१२४॥

He pervades all created beings in the five forms, and constantly makes them, by means of birth, growth and decay, revolve like the wheels (of a chariot).

एष आत्मा सर्वान्प्राणिनः पञ्चभिः पृथिव्यादिभिर्महाभूतैः शरीरारम्भकैः परिगृह्य पूर्वजन्मार्जितकर्मापेक्षयोत्पत्तिस्थितिविनाशै रथादिचक्रवदसकृदुपावर्तमानैरामोक्षात्संसारिणः करोति॥१२४॥

इदानीं मोक्षत्वेनोक्तसर्वधर्मश्रेष्ठतया सर्वत्र परमात्मदर्शन- मनुष्ठेयत्वेनोपसंहरति-

एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम्॥१२५॥
[चतुर्वेदसमं पुण्यमस्य शास्त्रस्य धारणात्।
भूयो वाप्यतिरिच्येत पापनिर्यातनं महत्॥१०॥]

He who thus recognises the Self through the Self in all created beings, becomes equal (-minded) towards all, and enters the highest state, Brāhmaṇ.

"सर्वभूतेषु चात्मानम्" इत्याद्युक्तप्रकारेण यः सर्वेषु भूतेष्ववस्थितमात्मानमात्मना पश्यति स ब्रह्मसाक्षात्कारात्परं श्रेष्ठं पदं स्थानं ब्रह्म प्राप्नोति। तत्रात्यन्तं लीयते, मुक्तो भवतीत्यर्थः॥१२५॥

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन्द्विजः।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम्॥१२६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[मनुः स्वायंभुवो देवः सर्वशास्त्रार्थपारगः।
तस्यास्यनिर्गतं धर्मं विचार्य बहुविस्तरम्॥११॥
ये पठन्ति द्विजाः केचित्सर्वपापोपशान्तिदम्।
ते गच्छन्ति परं स्थानं ब्रह्मणः सद्म शाश्वतम्॥१२॥]

A twice-born man who recites these Institutes, revealed by Manu, will be always virtuous in conduct, and will reach whatever condition he desires.

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वादशोऽध्यायः॥१२॥

समाप्त्यर्थ इतिशब्दः। एतत्स्मृतिशास्त्रं भृगुणा प्रकर्षेणोक्तं द्विजातिः पठन् विहितानुष्ठाननिषिद्धवर्जनात्सदाचारवान् भवति। यथापेक्षितां च स्वर्गापवर्गादिरूपां गतिं प्राप्नुयादिति॥१२६॥ क्षे. श्लो. १२॥

सारासारवचःप्रपञ्चनविधौ मेधातिथेश्चातुरी
स्तोकं वस्तु निगूढमल्पवचनाद्गोविन्दराजो जगौ।
ग्रन्थेऽस्मिन्धरणीधरस्य बहुशः स्वातन्त्र्यमेतावता
स्पष्टं मानवमर्थतत्त्वमखिलं वक्तुं कृतोऽयं श्रमः॥१॥
प्रायो मुनिभिर्विवृतं कथयत्येषा मनुस्मृतेरर्थम्।
दशभिर्ग्रन्थसहस्रैः सप्तशतैर्युता कृता वृत्तिः॥२॥
सेयं मया मानवधर्मशास्त्रे व्यधायि वृत्तिर्विदुषां हिताय।
दुर्बोधजातेर्दुरितक्षयाय भूयात्ततो मे जगतामधीशः॥३॥

इति वारेन्द्रिनन्दनावासीयदिवाकरात्मजश्रीमत्कुल्लूकभट्टविरचितायां मन्वर्थ-मुक्तावल्यां मनुवृत्तौ द्वादशोऽध्यायः समाप्तः॥१२॥

समाप्तं मानवं धर्मशास्त्रम्।

Acc No. 76548

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

About Book

The Manusmṛti is the most important and earliest metrical work of Dharmaśāstra textual tradition of Hinduism. It is a standard work on Hindu law. Indian tradition unanimously regards Manu as the first progenitor of the human race and also its first legislator. This Manu was believed to the founder of the social and moral order of society. Tracing backwards from the Smṛtis to the Vedas we found the consciousness of Manu's being the first law giver present in every epoch of Sanskrit literature. So many editions of this work have been published in India since–1813. This edition contains the commentary of Kullūka. Besides, Manu Smṛti has been translated into English several times. The best translation is that of Dr.Bühler in the SBE series. Dr.Bühler also added an exhaustive and very scholarly introduction to his translation and dealt with numerous problems connected with the Manu Smṛti. The present edition contains the revised English translation of Dr.Bühler.

The specialty of this new revised edition is that it contains Sanskrit text, commentary and English translation in a systematic way, which will be more helpful for the Researchers as well as other general readers of Indian Dharma Śāstra and law.

BHARATIYA KALA PRAKASHAN
NEW DELHI

CC-0. In Public Domain. Funding by IKS-MoE